राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - २२५
पारम्परिकशास्त्रसमुत्कर्षग्रन्थमाला - ६३
स्वर्णजयन्तीग्रन्थमाला - २२

श्रीशुद्धसत्त्वं रामानुजाचार्यैः कृतं

# रहस्यत्रयमीमांसाभाष्यम्

(प्रथमभागः)

प्रधानसम्पादकः
आचार्यः हरेकृष्णशतपथी
कुलपतिः

सम्पादकः
आचार्यः तट्टा विजयराघवाचार्यः

राष्ट्रियसंस्कृतविद्यापीठम्
(विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)
तिरुपतिः - ५१७ ०६४ (आन्ध्रप्रदेशः)
२०१०

## About the book

The inclination for Spirituality and desire for Salvation is a result of divine grace, the meritorious acts of one's previous lives which is strengthened with the preaching and guidance of Acharyas, the spiritual masters. There are three important matters, or Secrets, that a Seeker of Salvation should know. the first one is the Aṣṭākṣarīmantra, the second one is the Dvaya Mantra and the third one is the Carama Śloka. These three secrets, or Rahasya traya, as they are called, along with other secrets as mentioned in the tradition are collected by Pillai Lokacharya in a work called Aṣṭādaśarahasyaṅgala (The Eighteen Secrets). Mumukṣuppaḍi is an explanatory work on Rahasyatraya, for which Suddhasatvam Ramanujacharya has written a commentary by name Rahasyatraya-mīmāṃsābhāṣyam. In this commentary the explanation of Aṣṭākṣarī Mantra only is given. The philosophical concepts of Sri Vaishnava Tradition of Ramajuja are well explained in this Bhāṣya.

Proper understanding of the Aṣṭākṣarī Mantra is fundamental for knowing the nature of the Self. The Mantra explains the nature, the end and means of Self. For the Supreme Self, i.e., the Lord, who is omniscient, Omnipresent, the individual self is the Śeṣabhūta. I cannot protect myself, I am the servant to the Supreme Lord, who is none other than Nārāyaṇa. The word Nārāyaṇa is explained as follows: Nara means that which is imperishable. Hence Nārāyaṇa is one who is imperishable. The devotee believes that I am not able to protect myself, and am solely dependant on Nārāyaṇa for my protection. I being a servant of the Lord is saved by Him. The sentences of the Itihasa, Purāṇa and those of the Divyaprbandha are shown as an authority to substantiate this point.

Rashtriya Sanskrit Vidyapeetha Publication Series : 225
Centre of Excellence Publication Series : 63
Golden Jubilee Publication Series : 22

## ŚRĪŚUDDHASATTVAṂ RĀMĀNUJĀCĀRYAIḤ KṚTAṂ

# RAHASYATRAYAMĪMĀṂSĀBHĀṢYAM

( Volume - I )

**General Editor**
**Prof. Harekrishna Satapathy**
**Vice-Chancellor**

**Editor**
**Prof. Tatta Vijaya Raghavacharyulu**

**RASHTRIYA SANSKRIT VIDYAPEETHA**
**(University established under section 3 of UGC Act, 1956)**
**TIRUPATI - 517 064 (ANDHRA PRADESH)**
**2010**

**श्रीयुक्तजानकीबल्लभपट्टनायक :**
राज्यपाल :, आसाम,
गौहाटी

Government of India

**कुलाधिपति :**
राष्ट्रियसंस्कृतविश्वविद्यालय :
तिरुपति :
Tel : 0361-2540500
0877-2287680
0877-2286799
Fax : 0361-2721832

दिनाङ्क : - २४.०४.२०१०

# कुलाधिपति-सन्देश :

महान् अयम् आनन्दस्य विषय : यत् तिरुपतिराष्ट्रियसंस्कृत-विश्वविद्यालयपक्षत : अस्मिन् वर्षे स्वर्णजयन्तीसमारोह : परिपाल्यते । एतदर्थं सर्वेषां कृते मम हार्दिकम् अभिनन्दनम् ।

विगतेषु पञ्चाशत्संवत्सरेषु अस्माकं विश्वविद्यालयस्य महती प्रगति : बहूनां विदुषां शुभेच्छुबन्धूनां नेतॄणाञ्च उद्यमेन सम्पादिता । अत : अद्य इदमनुष्ठानं न केवलं संस्कृताध्ययनगवेषणासमुत्कर्षकेन्द्ररूपेण (Centre of Excellence for Sanskrit Studies and Research) सर्वत्र परिचितम् ; अपि तु राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा (NAAC) ए+ (A+) मान्यताद्वारा सम्मानितमस्ति। सर्वेषां सामूहिकसहयोगेन एतत्सर्वं सम्पन्नम् । अत : अनेन अनुष्ठानेन सह प्रत्यक्षतया वा परोक्षतया सम्पृक्तेभ्य : सर्वेभ्य : धन्यवादान् समर्पयामि । अस्माकं सर्वेषां सहयोगेन पुनरपि अस्य विश्वविद्यालयस्य इतोऽपि अधिका उन्नति : आगामिदिनेषु भविष्यति इति आशासे ।

स्वर्णजयन्तीसमारोहावसरे बहव : कार्यक्रमा : अस्माभि : अनुष्ठीयन्ते । एतेषु कार्यक्रमेषु पञ्चाशत्संख्याकग्रन्थानां प्रकाशनम् अन्यतममुख्यकार्यक्रमरूपेण अभिप्रेतमस्ति । अत : एतेषां सर्वेषां पुस्तकानां प्रकाशनं प्रस्तुतसंवत्सरे पर्यायक्रमेण विधीयते । एतेषां सर्वेषां पुस्तकानां कथावस्तु विभिन्नसंस्कृतशास्त्रसंबन्धि अस्ति ।

ग्रन्थानां भाव : अतीव गम्भीर : ; किन्तु भाषा सुखपाठ्या । रचनाविन्यास : अतीव हृदयस्पर्शी । रचनाकाराश्च स्वस्वक्षेत्रेषु प्रसिद्धा : । अत : एते स्वर्णजयन्तीसमारोहग्रन्था : अवश्यं पाठकै : गवेषकैश्च आदृता : भविष्यन्ति इति मे दृढ : विश्वास : ।

अस्मिन्नवसरे प्रस्तुतग्रन्थस्य प्रकाशनस्य सफलतां कामये तथा ग्रन्थकर्त्तु : सर्वविधं मङ्गलं भगवत : श्रीवेङ्कटेश्वरस्य पदकमलतले सम्प्रार्थये ।

जानकी बल्लभ पट्टनायक

(जानकीबल्लभपट्टनायक :)

कुलाधिपति :

**Prof. Harekrishna Satapathy**
**Vice-Chancellor**

**Rashtriya Sanskrit Vidyapeetha**
**Tirupati - 517 064 (A.P.)**
(Accredited with A+ Grade by NAAC)

Tel/Fax : 0877 - 2287680
(O) 2287838
(R) 2287826
E-mail : hks_vc@yahoo.com

*"Centre of Excellence in the subject of Traditional Shastras"*

# पुरोवाक्

श्रीशुद्धसत्त्वं रामानुजाचार्यैः रचितं **रहस्यत्रयमीमांसाभाष्यम् (प्रथमभागः)** इति ग्रन्थः श्रीमता **आचार्य. टि.वि.राघवाचार्येण** सम्पादितः राष्ट्रियसंस्कृतविद्यापीठेनानेन प्रकाश्यत इति महतो हर्षस्य विषयः।

श्रीवैष्णवसम्प्रदाये रहस्यशब्देन श्रीमदष्टाक्षर-द्वय-चरमश्लोकमन्त्राणां प्रसिद्धिः । ते च मन्त्राः मुमुक्षुभिः प्रपन्नैः श्रीवैष्णवैः प्रतिदिनमनुसन्धेयत्वेन विहिताः । तेषामर्थवर्णनमपि तत्र तत्र संहितग्रन्थादिषु कृतमाचार्यैः संकलितं वर्तते ।

तेष्वपि त्रिषु मन्त्रेषु अष्टाक्षरमन्त्रस्य वैशिष्ट्यमधिकमस्ति । सर्वमष्टाक्षरान्तस्स्थम् इति प्राचीनोक्तिः । तस्य मन्त्रस्य विवरणं प्रथमभागे क्रियते । अष्टाक्षरमन्त्रस्य मूलमन्त्र इत्यपि नाम । अस्य मन्त्रस्य जपकाले अर्थानुसन्धानमपि कार्यम् इति विधिः ।

अस्मिन् ग्रन्थे श्रीमष्टाक्षरमन्त्रस्य प्रतिपदमर्थविशेषः विशेषरूपेण नमः शब्दार्थ वैविध्यं च निरूपिते ।

अस्य ग्रन्थस्य सम्पादनार्थं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्यास्य आगमविभागे आचार्य टि.वि.राघवाचार्यमहोदयम् अभिनन्दामि । अयं ग्रन्थः सर्वेषां सम्प्रदायपद्धत्या मन्त्रार्थं जिज्ञासमानानां महते उपकाराय भविष्यतीति विश्वसिमि ।

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य सुवर्णजयन्तीसंवत्सरमुपलक्ष्य प्रकाश्यमानेषु ग्रन्थेषु अयमन्यतमो ग्रन्थः। अस्य ग्रन्थस्य प्रकाशनप्रक्रियायाम् **आचार्य का.इ.देवनाथन् महोदयानां** तथा अन्येषां भूमिका अतीव गुरुत्वपूर्णा, तेभ्यः सर्वेभ्यः मम सहकर्मिभ्यः कृतज्ञतां विनिवेदयन् सम्पादकः **आचार्य टि.वि.राघवाचार्यमहोदयाय** भगवान् श्रीवेङ्कटेशः श्रेयः परम्परां विदधातु इति प्रार्थये।

हरेकृष्ण शतपथी

**(प्रो.हरेकृष्णशतपथी)**

कुलपतिः

# कृतज्ञतानिवेदनम्

शुद्धसत्वं रामानुजायार्यैः कृतस्य **रहस्यत्रयमीमांसाभाष्याख्यस्य** ग्रन्थस्य सम्पादने मां नियोज्य तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य प्रकाशन-मालायां प्रकाशयितुमनुमतिं दत्तवद्भ्यः कुलपतिपदमलङ्कुर्वद्भ्यः **आचार्य हरेकृष्णशतपथि**महाभागेभ्यः सकार्तज्ञ्यं धन्यवादान् समर्पयामि। तथैव ग्रन्थस्यास्य प्रकाशने सुष्ठु प्रोत्साहं दत्तवद्भ्यः **डा. समुद्राल रङ्गरामानुजाचार्येभ्य**श्च हार्दान् धन्यवादान् प्रकटयामि।

ग्रन्थस्यास्य प्रकाशने मातृकापरिशीलने च साहाय्यं दत्तवद्भ्यः **डा.पि.आर्.रङ्गराजन्**महोदयेभ्यश्च हार्दान् धन्यवादान् प्रकटयामि।

ग्रन्थोऽयं पारम्परिकशास्त्रसमुत्कर्षपरियोजानान्तर्गते प्रकाश्यते इत्यतः पारम्परिकशास्त्रसमुत्कर्षपरियोजनायाः निदेशकवर्येभ्यः बहुशास्त्रनिष्णातेभ्यः **आचार्य का.इ.देवनाथाचार्येभ्यः** कृतज्ञतावचनानि उदीरयामि।

ग्रन्थस्यास्य सुष्ठु मुद्रणं कृतवद्भ्यः राष्ट्रियसंस्कृतविद्यापीठस्य शोधविभागकार्यकर्तृभ्यः हार्दान् धन्यवादान् समर्पयामि।

भगवतो श्रीनिवासस्यानुग्रहेण **रहस्यत्रयमीमांसाभाष्य**मिदं श्रीवैष्णव-तत्त्वजिज्ञासूनां सहृदयानां च आनन्दाय कल्पतामित्याशास्महे।

इति

श्रीवैष्णवदासः

**तट्टा विजयराघवाचार्यः**

# विषयानुक्रमः

## ग्रन्थपूर्वभागः


**कुलाधिपतिसन्देशः**

**कुलपतिसन्देशः**

**कृतज्ञतानिवेदनम्**

| | |
|---|---|
| **उपोद्घातः** | **i-xvi** |
| उपक्रमः | i |
| वेदेषु विष्णुः | i |
| वैष्णवम् | iv |
| मूलग्रन्थपरिचयः | iv |
| मूलग्रन्थस्य सारः | v |
| अष्टाक्षरीमन्त्रस्य वैशिष्ट्यम् | vi |
| ओंकारस्वरूपविवरणम् | vii |
| सर्वजगद्रक्षकः परमात्मा | ix |
| शेषशेषिभावः | x |
| नमः शब्दार्थः | xi |
| नारायणशब्दार्थः | xi |
| ग्रन्थकर्तुः परिचयः | xiii |
| प्राचीनप्रतीनां विवरणम् | xiii |
| रहस्त्रयमीमांसाभाष्यस्य सारः | xiv |
| **मुमुक्षुप्पडिमूलम्** | **xviii-xxxi** |
| श्रीमन्त्रप्रकरणम् | xvii |
| द्वयमन्त्रप्रकरणम् | xxiii |
| चरमश्लोकप्रकरणम् | xxvii |


❀ ❀ ❀ ❀

# विषयानुक्रमः

## प्रथमभागः


पृष्ठसंख्या

**प्रथमाध्यायः - प्रथमपादः**

**प्रथमाधिकरणम्**
अधिकार्यादिसमर्थनम् 1-10

**द्वितीयाधिकरणम्**
उपबृंहणसमर्थनम् 11-15

**तृतीयाधिकरणम्**
मूलमन्त्रस्य सामान्यवैभवसमर्थनम् 16-25

**चतुर्थाधिकरणम्**
मूलमन्त्रशब्दयोगार्थोत्कर्षसमर्थनम् 26-39

**पञ्चमाधिकरणम्**
शिष्यावतारप्रयोजनसमर्थनम् 40-44

**षष्ठाधिकरणम्**
उपदेशप्रमाणप्राबल्यसमर्थनम् 45-52

**सप्तमाधिकरणम्**
मन्त्रान्तरापेक्षयामूलमन्त्रोत्कर्षसमर्थनम् 53-80

**अष्टमाधिकरणम्**
मूलमन्त्रस्य वाच्यापेक्षया उत्कर्षसमर्थनम् 81-87

**नवमाधिकरणम्**
अक्रमोक्तमूलमन्त्ररक्षकत्वसमर्थनम् 88-94

**दशमाधिकरणम्**
मूलमन्त्रस्य सर्वफलप्रदत्वसमर्थनम् 95-98

**एकादशाधिकरणम्**
मूलमन्त्रस्य साधनान्तरसहकारित्वसमर्थनम् 99-101

पृष्ठसंख्या

**द्वादशाधिकरणम्**

मूलमन्त्रस्य प्रपत्तिसहकारित्वसमर्थनम् 102-105

**त्रयोदशाधिकरणम्**

मूलमन्त्रस्यार्थपञ्चकपरत्वसमर्थनम् 106-112

**चतुर्दशाधिकरणम्**

मूलमन्त्रोत्कर्षसमर्थनम् 113-124

प्रथमाध्यायस्य प्रथमपादस्य श्लोकरूपसारः 124

**प्रथमाध्यायः - द्वितीयपादः**

**प्रथमाधिकरणम्**

मूलमन्त्रवाक्यार्थसमर्थनम् 125-139

**द्वितीयाधिकरणम्**

सप्रणवाष्टाक्षरसमर्थनम् 140-151

**तृतीयाधिकरणम्**

मूलमन्त्रे पदत्रयक्रमसमर्थनम् 152-163

**चतुर्थाधिकरणम्**

मूलमन्त्रे अकारार्थसमर्थनम् 164-175

**पञ्चमाधिकरणम्**

भगवतो सङ्कुचितरक्षकत्वसमर्थनम् 176-186

**षष्ठाधिकरणम्**

श्रीसम्बन्धस्य अकारव्यङ्ग्यत्वसमर्थनम् 187-204

**सप्तमाधिकरणम्**

अकारस्य लुप्तचतुर्थ्यन्तत्वसमर्थनम् 205-210

**अष्टमाधिकरणम्**

लुप्तचतुर्थ्यसमर्थनम् 211-229

| | पृष्ठसंख्या |
|---|---|
| **नवमाधिकरणम्** | |
| उकारार्थसमर्थनम् | 230-241 |
| **दशमाधिकरणम्** | |
| मकारार्थसमर्थनम् | 242-250 |
| **एकादशाधिकरणम्** | |
| अकारादिसमर्थनम् | 251-257 |
| **द्वादशाधिकरणम्** | |
| प्रणवस्य शाब्दवाक्यार्थसमर्थनम् | 258-267 |
| **अनुबन्धः** | |
| उदाहृतप्रमाणवाक्यानुक्रमणी | 268-283 |
| एतद्रचनोपयुक्तग्रन्थाः | 284-286 |

# उपोद्घातः

**नारायणपरा वेदाः देवा नारायणाङ्गजाः।**
**नारायणपरा लोकाः नारायणपरा मखाः।।**

**नारायणपरा योगाः नारायणपरं तपः।**
**नारायणपरं ज्ञानं नारायणपरा गतिः।।**

## उपक्रमः

भारतीयसंस्कृतेः मूलभूतः वेदः। **अनन्ता वै वेदाः** इति वेदानामनन्तत्वात्, दुरवगाहत्वाच्च, मन्त्रद्रष्टारः महर्षयः निखिलजगदुपकारार्थं वेदार्थं स्मृत्वा विध्यर्थवादमन्त्रमूलानि धर्मशास्त्राणि इतिहासपुराणानि च चक्रुः। सर्वेऽपि शब्दाः वेदराशेः उद्धृत्यैव तत्तदर्थविषयनामतया पारम्पर्येण प्रयुज्यन्ते। [1]**वेदैश्च सर्वैरहमेव वेद्यः** इति भगवत्सूक्त्यनुसारेण वेदवेद्यः परमात्मेति, [2]**सर्वे वेदा यत्पदमामनन्ति** इत्यत्र परमात्मानमेव प्रतिपादयन्तीति, सर्वस्य प्रशासितृत्वेन, सर्वस्मात्परमात्मतया प्रविश्य अवस्थितत्वात् सर्वेऽपि शब्दाः परमात्मनः वाचकाः एव। [3]**एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः** इति उपनिषद्वचनम्।

## वेदेषु विष्णुः

[4]**नारायणाय विद्महे, वासुदेवाय धीमहि, तन्नो विष्णुः प्रचोदयात्** इति मन्त्रराजे नारायणवासुदेवविष्णुशब्दानामेकत्वप्रतिपादनं विदितचरमेव। [5]**अथ नित्यो नारायणः, ब्रह्मा नारायणः, शिवश्च नारायणः, शक्रश्च नारायणः, कालश्च नारायणः, दिशश्च नारायणः, नारायण एवेदं सर्वं यद्भूतं यच्च भाव्यम्, निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः**

---

१. भ.गी. १५-१५ २. कठ.उ. २-१५ ३. सुब.उ.-७
४. तै.आ.-१० ५. ना.उ.-१०

**शुद्धो देव एको नारायणः, न द्वितीयोऽस्ति कश्चित्, विष्णुरेव भवति स विष्णुरेव भवति** इत्येवं प्रकारेण बहुत्र परत्वमुक्तम्।

**ये यजन्ति पितॄन् देवान् ब्राह्मणान् सहुताशनान्।**
**सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते।।**

(दक्षस्मृतिः) इति पितृ - देव - ब्राह्मण - हुताशनादिशब्दाः तन्मुखेन तदन्तरात्मभूतस्य विष्णोरेव वाचकाः। विष्णोः प्रामुख्यं वैष्णवशाखायाः बीजानि ऋग्वेदे एव दृश्यन्ते। [१]**विष्णोः पदे परमे मध्व उत्सः** [२] **विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विमये रजांसि** इति। एवं प्रकारेण ऋग्वेद-यजुर्वेद-सामवेदेषु बहुत्र बहुवारं विष्णोः परत्वमुक्तम्। इतिहासपुराणेष्वपि विष्णुपरत्वबोधकानि वाक्यानि बहूनि सन्ति। सङ्ग्रहरूपेण कानिचन स्मर्यन्ते [३]**अग्निर्वै देवानामवमः विष्णुः परमः** [४]**विष्णोः कर्माणि पश्यत !** [५]**अस्येशाना जगतो विष्णुपत्नी** [६]**इदं विष्णुर्विचक्रमे** [७]**तद्विष्णोः परमं पदम्** [८]**पुरुष एवेदं सर्वम्** [९]**दिवो वा विष्णुः** [१०]**एको ह वै नारायण आसीत्** [११]**अथ पुनरेव नारायणः** [१२]**पुरुषो ह वै नारायण अकामयत** [१३]**नित्यो नारायणः** [१४]**विश्वं नारायणं देवम्** [१५]**अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण स्थितः।**

[१६]**विष्णोस्सकाशादुद्भूतं** [१७]**विष्णवे सर्वजिष्णवे** [१८]**विष्णवे मुक्तिहेतवे** [१९] **मूलभूतो नमस्तस्मै** [२०] **नारायणपरा यज्ञाः** [२१] **यज्ञो हि वै भगवान् विष्णुः** [२२] **यज्ञरूपो हि विष्णुः** [२३]**सर्वदेवमयो विष्णुः** [२४]**नास्ति विष्णुसमो देवः**[२५]**सर्वपापहरो विष्णुः** [२६]**ईश्वरो भगवान् विष्णुः** [२७]**विष्णुरेव परं ब्रह्म**

---

१. ऋ.वे. १-१५४-५ २. ऋ.वे. १-१५४-१ ३. ऋ.वे. (ऐतरेयब्राह्मणम्)
४. यजु.वे. ३-४ ५. यजु.वे.का.४ ६. यजु.वे. ३-१५ ७. यजु.वे. ६-५
८. यजु.वे. ३१-२ ९. अ.वे. ८-१७-४ १०. महा.उ. ११. यजुर्वेदोपनिषत्सारः
१२. नारा.उ. १३. महा.उ. १४,१५. नारा.अनु. १६. वि.पु. १-१-३१
१७. वि.पु. १-२-१ १८. वि.पु. १-२-३ १९. वि.पु. १-२४ तः १-२-१८
२०. ब्र.पु. ६०-६२ २१. वि.ध.पु.१६-२-२ २२. देवी.भा.९-४३-१२ २३. पद्म.पु.६४-३४
२४. पद्म.पु.३७-७९ २५ पद्म.पु. १२६-६९ २६. पद्म.पु. २२६-६७ २७. पद्म.पु. ६८-९३

[1]**यज्ञरूपी विष्णु रहस्यम्** [2]**एतस्मिन्नन्तरे विष्णुः** इत्येवं प्रकारेण सर्वस्य जगतः सृष्टिस्थितिलयकर्ता श्रीमन्नारायण एवेति स्पष्टं भवति।

नारायणानुवाके **सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्, विश्वं नारायणं देवमक्षरं परमं पदम्** इत्यारभ्य **स ब्रह्मा स शिवः, सेन्द्रः, सोऽक्षरः परमः स्वराट्** इति सर्वशाखासु परतत्त्वप्रतिपादनपरान् अक्षर, शिव, शम्भु, परंज्योति, परतत्त्व, परायण, परमात्मादि सर्वशब्दान् तद्गुणयोगेन नारायणे एव प्रयुज्य, तद्व्यतिरिक्तस्य समस्तस्य तदायत्ततां, तद्व्याप्यतां, तदाधारतां, तन्नियाम्य तच्छेषतां च प्रतिपाद्य, ब्रह्मशिवयोरपि इन्द्रादिसमानाकारतया तद्विभूतित्वं च प्रतिपादितम्।

**सहस्रशीर्षं देवम्** इत्यादि एकादशानुवाकभाष्ये सायणाचार्याः श्रीमन्नारायण एव परमात्मेति, हृदयपुण्डरीके तस्य स्वरूपमेव उपास्यगुणविशेषपुरस्सरेण निर्दिश्यते इत्यवदन्। तत्र वाक्यनि इमानि [3]**पुराणेषु नारायणशब्देन व्यवह्रियमाणः यः परमेश्वरः स एव परमुत्कृष्टं सत्यज्ञानानन्दादिवाक्यैः प्रतिपाद्यस्य ब्रह्मणः तत्त्वम्। अतः नारायणः पर एवात्मा, नत्वपरो मूर्तिविशेषः। तथा परो ज्योतिः यदेतदुत्कृष्टं ज्योतिः छान्दोगैः परंज्योतिरूपसम्पद्य इत्याम्नातं तदपि नारायण एव। तस्मात् नारायणः** परमात्मा इति। [4]**सर्ववेदान्तेषु सर्वैः शब्दैः परमकारणतया विष्णुरेव गीयते।** यथा सर्वासु श्रुतिषु केवलपरमात्मस्वरूपविशेषप्रतिपादनायैव प्रवृत्तः नारायणानुवाकः।

एवं प्रकारेण वेदवेदान्तेतिहासपुराणधर्मशास्त्रोपबृह्मितसाङ्गवेदवेद्यः परब्रह्मभूतः नारायणः निखिलहेयप्रत्यनीकः सकलेतरविलक्षणः, अपरिच्छिन्नज्ञानानन्दैकस्वरूपः स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणाकरः, स्वसङ्क-

१. देवी.भा.९-४५-६ २. देवी.भा.१-१५-७

३. नारायणानुवाकं सायनाचार्यभाष्यम्

४. परमात्मा च सर्वेषामाधारः परमेश्वरः।
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते।। (वि.पु. ६-४-४०)

ल्पानुविधायि स्वरूपस्थितिप्रवृत्तिभेदचिदचिद्वस्तुजातः अपरिच्छेद्यस्वरूपस्वभावानन्तमहाविभूतिः नानाविधानन्तचेतनात्मकप्रपञ्चलीलोपकरणः इति प्रतिपादितः।

## वैष्णवम्

वेदविदग्रेसरसाक्षात्कारक्षमभगवद्द्वैपायन पराशरवाल्मीकिमनुयाज्ञवल्क्यप्रभृतिमुनिगणप्रणीतविध्यर्थवादमन्त्ररूपवेदमूलेतिहासपुराणधर्मशास्त्रोपबृंहितपरमार्थभूतानादिनिधनाविच्छिन्नसम्प्रदायऋग्यजुस्सामाथर्वरूपानन्तशाखं वेदमभ्युपगच्छतां मतं वैष्णवम्। सुवर्णसुधाकरादिशब्दानामिव स्वार्थे महत्त्वं, सर्वव्यापकत्वाकारं, सर्वेश्वरं प्रबोधयति विष्णुपदम्। **विशतीति विष्णुः, तस्येदम्** (४-३-१२०) इति पाणिनीयसूत्रमनुसृत्य विष्णोरिदं वैष्णवम् इति प्रसिद्धम्। सर्वेषु प्रमाणेषु अग्रगण्यं वैदिकं विष्णुशब्दं, तद्विष्णुदैवं पुरस्कृत्य व्याप्तं वैष्णवमतम्। सर्वदेशसर्वकालसर्वावस्थासु सर्वव्यापकत्वेन श्रीमहाविष्णुः एव चिदचिद्विशिष्टाद्वैततत्त्वमिति, भक्तिप्रपत्तिभ्यां प्रसन्नः श्रीमहाविष्णुः एव उपायः इति, उपेय इति च सिद्धान्तितं विशिष्टाद्वैततत्त्वप्रबोधकं श्रीवैष्णवमतम् अनादि निधनम्।

ऋषिकुलगरिष्टः वसिष्टः, परदेवतापारमार्थ्यवेदी पराशरः, अष्टादशपुराणप्रणीता, भगवद्गीताविष्णुसहस्रनामसङ्कीर्तनाचार्यः वेदव्यासः, योगिकुलचक्रवर्ति शुकमहर्षिः, भगवन्नामामृतरसपानव्यसनः वाल्मीकिः, मुनिकुलमूर्धन्यः भृगुमहर्षिश्च सर्वाणि तत्त्वानि सविमर्शेन समालोक्य वैष्णवमतमेव प्रतिपादितवन्तः। लोकत्रयसाञ्चारशीलः नारदमहर्षिः विष्णुनामगानामृतेन शिशुपाश्वादीनामपि हृदयवेदिक्रासु वैष्णवमतमुपस्थापितवान्। अतः सुरनरतिर्यक्स्थावरादीनामपि अन्तर्वहति वैष्णवम्। एवं प्रकारेण वैष्णवं विविधरूपैः विराजते। विष्णोः श्रीरनपायिनी इति ज्ञानेन श्रीवैष्णवमिति प्रसिद्धम्।

## मूलग्रन्थपरिचयः

1205 - 1326 A.D तमे काले **वडक्कुत्तिरुवीथिपिल्लै** इति श्रीकृष्णगुरूणां पुत्राः **पिल्लैलोकाचार्याः** अष्टादशरहस्यग्रन्थान् प्रणीतवन्तः। तेषु एकतमं भवति मुमुक्षुप्पडि इति रहस्यग्रन्थः। अस्मिन् ग्रन्थे रहस्यत्रयं विवृतम्। रहस्यत्रयं

नाम अष्टाक्षरीमन्त्रः, द्वयमन्त्रः, चरमश्लोकश्चेति। मृदुमधुरगम्भीरमानायां **मणिप्रवालभाषायां मुमुक्षुप्पडि** नाम रहस्यग्रन्थः लिखितः। सुधामधुरायमाना संस्कृतभाषा, सुमधुरभाषा द्रविडभाषा च मिलित्वा मणिप्रवाल इत्युच्यते।

तस्य मणिप्रवालग्रन्थस्य **रहस्यत्रयमीमांसाभाष्यम्** लिखितवन्तः **शुद्धसत्त्वं रामानुजाचार्याः**। संस्कृतभाषायां लिखितस्यास्य ग्रन्थस्य प्राचीनप्रतयः समग्रतया नोपलभ्यन्ते। उपलभ्यमानासु प्राचीनप्रतिषु असम्पूर्णतया अष्टाक्षरीमन्त्रस्य विवरणमेव उपलभ्यते। तत्रापि प्रथमाध्याये प्रथमपादे चतुर्दशाधिकरणानि, द्वितीयपादे द्वादशाधिकरणानि, तृतीयपादे पञ्चाधिकरणानि च लभ्यन्ते। षष्ठाधिकरणम् असम्पूर्णमस्ति।

## मूलग्रन्थस्य सारः

मूले **मुमुक्षुप्पडि** इति रहस्यग्रन्थे प्रथमं प्रकरणं भवति अष्टाक्षरीमन्त्रप्रकरणम्। तस्मिन् प्रकरणे एवमुक्तम् - मोक्षे यस्येच्छा भवति सः मुमुक्षुः इत्युच्यते। तेन ज्ञातव्यानि रहस्यानि त्रीणि। तत्र प्रथमं रहस्यं भवति अष्टाक्षरीमन्त्ररहस्यम्। अस्य मन्त्रस्य गौरवस्योचितरीत्या अत्यन्तप्रेरणया, अत्यन्तश्रद्धया, अत्यन्तभक्त्या, अधिकरहस्येन च अनुसन्धानं करणीयम्। मन्त्रे, मन्त्रप्रतिपाद्ये परमात्मनि, मन्त्रस्य उपदेशके आचार्ये च विशेषप्रेम्णा विद्यते चेत्, कार्यं सफलं स्यात्। बद्धचेतनाः संसारिणः आत्मनः, परमात्मनः, भगवत्कैङ्कर्यं च त्यक्त्वा, अस्माभिः त्यक्तमिति दुःखाभावेन, संसारसागरे पतिताः सन्तः दुःखे न स्थिताः सन्तः, भगवान् स्वकृपया तेषाम् आत्मज्ञानप्रसादाय स्वयमेव शिष्यरूपेण आचार्यरूपेण च स्थित्वा, अष्टाक्षरीमन्त्रम् उपदिदेश। सकलवेदसारार्थसङ्ग्रहरूपेण, सर्वशास्त्रतात्पर्यरूपेण अर्थपञ्चकप्रतिपादकम् अष्टाक्षरीमन्त्रमुपदिदेश। किमर्थं शिष्यरूपेण स्थित्वा आचार्यरूपेण उपदिष्टवानित्युक्ते, शिष्यस्यावश्यकान् अर्हान् ज्ञापयितुमेव शिष्यरूपेणापि स्थितः।

**शरीरं वसुविज्ञानं वासः कर्मगुणानसून्।**
**गुर्वर्थं धारयेद्यस्तु स शिष्यो नेतरः स्मृतः॥** इति।

किमर्थं सङ्ग्रहरूपेण बोधितवान् इत्युक्ते एवमुच्यते –

**अनन्तसारं बहुवेदितव्यं अल्पश्च कालः बहवश्च विघ्नाः।**
**यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमिश्रम्।।**

इति। समस्तशास्त्रैः सिद्ध्यमानं ज्ञानं स्वयमार्जितमित्युच्यते। अष्टाक्षरीमन्त्रेण सिद्ध्यमानं ज्ञानं पैत्रुकधनमित्युच्यते।

तस्य मणिप्रवालग्रन्थस्य **रहस्यत्रयमीमांसाभाष्यम्** लिखितवन्तः **शुद्धसत्त्वं रामानुजाचार्याः**। संस्कृतभाषायां लिखितस्यास्य ग्रन्थस्य प्राचीनप्रतयः समग्रतया नोपलभ्यन्ते। उपलभ्यमानासु प्राचीनप्रतिषु असम्पूर्णतया अष्टाक्षरीमन्त्रस्य विवरणमेव उपलभ्यते। तत्रापि प्रथमाध्याये प्रथमपादे चतुर्दशाधिकरणानि, द्वितीयपादे द्वादशाधिकरणानि, तृतीयपादे पञ्चाधिकरणानि च लभ्यन्ते। षष्ठाधिकरणम् असम्पूर्णमस्ति।

**शास्त्रज्ञानं बहुक्लेशं बुद्धेश्चलनकारणम्।**
**उपदेशाद्धरिं बुध्वा विरमेत्सर्वकर्मसु।।**

इति उक्तत्वात् समस्तेभ्यः शास्त्रेभ्यः सर्वशास्त्रार्थसङ्ग्रहरूपेण अष्टाक्षरीमन्त्रस्य वैभवमुक्तम्।

## अष्टाक्षरीमन्त्रस्य वैशिष्ट्यम्

**अनन्ता वै भगवन्मन्त्राः**। व्यापकाः,अव्यापकाश्च इति द्विविधाः। अव्यापकमन्त्रेभ्यः व्यापकमन्त्राः श्रेष्ठाः। **नारायणाय विद्महे, वासुदेवाय धीमही, तन्नोविष्णुः प्रचोदयात्** इति विष्णुगायत्र्यामुक्तरीत्या नारायण, वासुदेव, विष्णुशब्दाः मन्त्राणां प्रधानतमाः। तत्रापि वासुदेवविष्णुशब्दाभ्यामपि **नारायणाय विद्महे** इति मन्त्रः श्रेष्ठतमः भवति। **न मन्त्रो अष्टाक्षरात्परः**। अस्याष्टक्षरीमन्त्रस्य शिष्टपरिग्रहः विद्यते। वेदैः, ऋषिभिः, दिव्यसूरिभिः,आचार्यैश्च स्वीकृतः आचारितश्च।

**यथा सर्वेषु देवेषु नास्ति नारायणात्परः।**
**तथा सर्वेषु मन्त्रेषु नास्ति चाष्टाक्षरात्परः।।** इति।

**भूत्वोर्ध्वबाहुरद्यात्र सत्यपूर्वं ब्रवीमि वः।**
**हे पुत्रशिष्या! शृणुत न मन्त्रोऽष्टाक्षरात्परः।।** इति।

**सर्ववेदान्तसारार्थः संसारार्णवतारकः।**
**गतिरष्टाक्षरो नृणां अपुनर्भवकांक्षिणाम्।।** इति।

**नारायणेति शब्दोऽस्ति वागस्ति वशवर्तिनी।**
**तथापि नरके घोरे पतन्तीति किमद्भुतम्।।** इति।

**किं तत्र बहुभिर्मन्त्रैः किं तत्र बहुभिर्व्रतैः।**
**नमो नारायणायेति मन्त्रस्सर्वार्थसाधकः।।** इति।

वाच्यप्रभावादपि श्रेष्ठतमः वाचकप्रभावः। भगवान् दूरे विद्यमानेऽपि अवश्यं रक्षति। महद्यापदि सम्प्राप्ते स्मर्तव्यो भगवान् हरिः।

**शङ्कचक्रगदापाणे द्वारकानिलयाच्युत।**
**गोविन्द! पुण्डरीकाक्ष! रक्ष मां शरणागताम्।।** इति।

प्रार्थनां कृतवतीं द्रौपदीं रक्षितवान् भगवान् श्रीकृष्णः। अतः मन्त्रस्यास्य अधिकप्रभावः विद्यते।

**साङ्केत्यं पारिहास्यं च स्तोभं हेलनमेव च।**
**वैकुण्ठनामग्रहणमशेषाघहरं विदुः।।** इति।

येन केन प्रकारेण वा भगवन्नामस्मरणं रक्षकं भवति। अष्टाक्षरीमन्त्रस्मरण-प्रभावेन सर्वापेक्षितानि च सिद्ध्यन्ति।

**ऐहलौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकम्।**
**कैवल्यं भगवन्तं च मन्त्रोऽयं साधयिष्यति।।**

कर्म, ज्ञान, भक्ति, योगादीन् उपायान् ये वाञ्छन्ति तेषां सहायको भवति अष्टाक्षरीमन्त्रः। यज्ञदानतपोध्यानसन्ध्यावन्दन पञ्चमहायज्ञाग्निहोत्रपुण्य-क्षेत्रवासकृच्छ्रचान्द्रायण , पुण्यनदीस्नानचातुर्मास्यफलमूलाशनशास्त्राभ्याससमा-राधनजपतपतर्पणादिकायशोषणैः पापान् नाशयित्वा, विषयापेक्षया यमनियमासन-

प्राणायामप्रत्याहारधारणध्यानसमाधिरूपेण अष्टाङ्गयोगमार्गेण योगाभ्यासः एव कर्मयोग इत्युच्यते। ज्ञानयोगो नाम योगजन्यज्ञानस्य हृदयकमले आदित्यमण्डलान्तर्वर्तिनं परमात्मानं शङ्खचक्रगदापीताम्बरकिरीटादिनूपुरान्तं दिव्यभूषणालङ्कृतं लक्ष्मीसमेतं श्रीमन्नारायणं निक्षिप्य योगाभ्यासपूर्वकानवरतभावनानुभव एव। भक्तिः नाम तैलधारा इव अविच्छिन्नं भगवन्तं प्रीतिपूर्वकस्मृतिपरम्परारूपानुभव एव। कालन्तरे असाध्यसाध्याः कर्मज्ञानभक्त्यादयः। **तेनुं पालुं अमुदुमाय तिरुमाल् तिरुनामम्** इति। मन्त्रप्रतिपाद्यं परमात्मानमिव स्वयं भोग्यहेतुभूतः अष्टाक्षरी मन्त्रः।

आत्मोज्जीवनार्थायोपयुक्ताः अर्थविशेषाः अष्टाक्षरीमन्त्रे विद्यन्ते। ते अर्थविशेषाः एव अर्थपञ्चकमित्युच्यते परस्वरूपं, स्वस्वरूपं, पुरुषार्थस्वरूपं, उपायस्वरूपं, विरोधिस्वरूपं च अर्थपञ्चकमित्युच्यते।

**प्राप्यस्य ब्रह्मणोरूपं प्राप्तुश्च प्रत्यगात्मनः ।**
**प्राप्त्युपायं फलं चैव तथा प्राप्तिविरोधि च।।** इति।

अर्थपञ्चकमेव प्रतिपादयन्ति सर्वाणि वेदशास्त्राणि । तादृशसकलवेदशास्त्रार्थसार एव अष्टाक्षरीमन्त्रः। कथमित्युक्ते स्वस्वरूपं नाम जीवात्मनः स्वरूपं प्रणवेन, नमः पदेन विरोध्युपायस्वरूपाणि, नारायणपदेन परस्वरूपं, आय इति चतुर्थ्या फलस्वरूपं चोक्तानि।

पूर्वाचार्याः सर्वेऽपि सर्वदा अष्टाश्ररीमन्त्रकालक्षेपमेव कृतवन्तः। वाचकात् वाच्यस्वीकरणमेव हेतुः। उपायः उपेयश्च परमात्मैवेति ज्ञात्वा, तस्य मन्त्रस्य वैभवं सर्वेभ्यः उपदिष्टवन्तः।

## ओङ्कारस्वरूपविवरणम्

**ओमित्येकाक्षरं, नम इति द्वे अक्षरे, नारायणायेति पञ्चाक्षराणि** इत्यष्टाक्षरं छन्दसागायत्रीचेति **ओमित्यग्रे व्याहरेत्**, इति श्रुतिः। **प्रणवाद्यं नमो मध्यं नारायणपदान्तिमम्** इति स्मृतिः। अ इति उ इति म् इति

रत्रयात्मकः प्रणवः। **भूरिति ऋग्वेदादजायत, भुव इति यजुर्वेदात्, सुवरिति सामवेदात्। तानि शुक्राण्यभ्यतपत्। तेभ्यः अभितप्तेभ्यः त्रयो वर्णाः अजायन्त अकारउकारमकार** इति । सः अक्षरत्रयात्मकः एव ओङ्कारः। ः नाम जगत्कारणं ब्रह्म। भुवः नाम आश्रितानां संसारनिवर्तकः। सुवः नाम न्तर्यामी। भूः भुवः सुवः इति व्याहृतित्रयसम्मेलनेन अकारउकारमकारसम्मेलनेन न्नः ओङ्कारः वेदसारः इत्युच्यते।

## सर्वजगद्रक्षकः परमात्मा

**अक्षराणामकारोऽस्मि** इति भगवता स्वयमुक्तं गीतायाम्। सर्वजगतः रणभूतः सर्वेश्वर एव अकारेणोच्यते। परमात्मा सर्वजगद्रक्षकः। रक्षकत्वं विधम्। अरिष्टनिवर्तकत्वम्, इष्टप्रापकत्वं चेति। आश्रितानां दुःखानि दूरीकृत्वा, उकराणि अपेक्षितानि प्रदास्यति परमात्मा। तदेव रक्षणमित्युच्यते। अनिष्ट-र्तकत्वम् इष्टप्रापकत्वं नाम चेतनानां रक्षणम् अध्यवसायोचितरीत्या भवति। रिणां विरोधाः शत्रुपीडादयः। अपेक्षिताः अन्नपानादयः। मुमुक्षूणां विरोधः रबन्धः। अपेक्षितः परमपदप्राप्तिः। मुक्तानां नित्यानां विरोधः कैङ्कर्यहानिः। क्षिता कैङ्कर्यवृद्धिः। एवं प्रकारेण अधिकारस्योचितरीत्या, विरोधं दूरीकृत्य, क्षितं प्रदास्यति परमात्मा। अतः स एव सर्वविधैः रक्षकः इत्युच्यते। त्मानं विना अन्ये रक्षकाः न भवन्ति इति विषयः **प्रपन्नपरित्राणे** उक्तः।

**लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपया।**
**रक्षकस्सर्वसिद्धान्ते वेदान्तेऽपि च गीयते।।** इति।

उक्तरीत्या दयारूपिण्या लक्ष्म्या सहितः श्रीमन्नारायण एव सर्वदा रक्षकः इति वेदान्तेषु सिद्धान्तेषु च गीयते।

लक्ष्म्या सहितः परमात्मा तस्याः पुरुषकारेण चेतनानां दोषान् दृष्ट्वापि, नोपेक्ष्याभावेन रक्षकः भवति। अतः श्रियासहितं परमात्मानमेव स्तोतव्यम् दर्शनीयम्, आश्रयणीयमित्युच्यते। **श्रीयत इति श्रीः, श्रयत इति श्रीः** इति

चोच्यते खलु। अतः लक्ष्मीसहितं नारायणमेवाश्रयणीयम्। **नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी** इति पुराणोक्तिः। जीवाः सर्वेऽपि परमात्मनः यथा शेषभूताः भवन्ति, तथैव लक्ष्म्याः अपि शेषभूताः एव। सूर्यप्रभयोः सम्बन्धः यथा अपृथक्सिद्धः, पुष्पपरिमलयोः सम्बन्धः यथा अपृथक्सिद्धः तथैव लक्ष्मीनारायणोः सम्बन्धः। श्रीरामायणे एवमुक्तम् – **"अनन्या हि मया सीता भास्करेण प्रभा यथा"** इति।

## शेषशेषिभावः

**तादर्थ्ये चतुर्थी** इति वार्तिकेन चतुर्थ्या नारायणाय शेषः इति ज्ञायते। **सर्वं परवशं दुःखं, सेवा श्ववृत्तिः** इत्युक्तरीत्या इतरेषां शेषत्वं दुःखदायकं स्या:त्। भगवतः शेषत्वमानन्ददायकं भवति। शेषत्वमेव आत्मनः स्वरूपम्।

**सत्वमात्मनिसञ्जातं स्वामित्वं ब्रह्मणि स्थितम्।**
**आत्मदास्यं हरेस्साम्यं स्वभावं च सदा स्मर।।**

**दासभूताः स्वतस्सर्वे ह्यात्मानः परमात्मनः।**
**नान्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च।।** इति।

परमात्मनः शेषित्वं नाम स्वामित्वं, जीवात्मनः शेषत्वं नाम दासत्वं च सर्वदा सुस्थिरमेव, स्वतस्सिद्धमेव। शेषत्वमेव जीवात्मनः स्वरूपम्। शेषत्वाभावे जीवात्मनः स्वरूपमेव न भवति।

शेषत्वज्ञानाभावेन जीवात्मनः स्वरूपज्ञानं न भवति। लक्ष्मीनारायणस्यैव शेषभूतोऽहमितरेषां नेति ज्ञानमेव मुख्यम्। भगवच्छेषत्वेन अन्यशेषत्वनिर्वतनमपि प्रधानमेव। समस्तात्मनामपि शेषत्वं प्रधानं भवति। आत्मा जात्येकवचनम्। ज्ञानं ज्ञाता च आत्मैव। परिमलस्याश्रयं पुष्पम् इति, प्रकाशस्याश्रयः मणिः इति यथा उच्येते तथैव शेषत्वस्याश्रयः जीवः इति ज्ञातव्यम्।

आत्मनः शेषत्वाभावे सर्वविधैः स्थितिभ्रष्टः स्यात्। जीवात्मपरमात्मनोः अपृथक्सिद्धसम्बन्ध एव विशिष्टैक्यसम्बन्धः, शेषशेषिसम्बन्धश्च।

## नमः शब्दार्थः

**नमः** इत्यत्र **न** इति **मः** इति च पदद्वयं विद्यते। **मुच्लु मोक्षणे** इत्यस्मात् धातोः उत्पन्नः **मः** इति। स्वतन्त्रोऽहमित्यर्थः। **न** इति निषेधवाचकः। नमश्शब्देन अहङ्कारममकारयोः स्वातन्त्र्यं निवर्तते। **मः** इति स्वरूपनाशः। **नमः** इति स्वरूपोज्जीवनम्। **मम** इति द्वे अक्षरे संसारबन्धरूपमृत्युः। **न मम** इति त्रीण्यक्षराणि शाश्वतप्रदायकानि। **नमः** इत्यत्र स्वरूपम् उपायः, फलं च विद्यन्ते। **नमः** इत्यनेन अनन्यार्हशेषत्वं प्रकाशते।

**त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्य ।**
**भृत्यस्य भृत्य इति मां स्मर लोकनाथ।।** (कुलशेखरः)

इतिवत् भागवतशेषत्वमपि अनुसन्धेयं भवति। अहंकारममकारयोः निवृत्त्या, भगवच्छेषत्वं प्रकाशते, भगवतशेषत्वमपि प्रकाशते। एवं परतन्त्र्यप्रतिपत्त्या भगवतः अनुग्रहातिशयेन निग्रहस्वरूपाः सकलपापदोषाः नश्यन्ति। संसार-विमोचनादारभ्य कैङ्कर्यप्राप्तिपर्यन्तं सकलफलानि सिदध्यन्ति। अतः नमः इत्यस्य तादृशवैशिष्ट्यमस्तीति ज्ञातव्यम्।

## नारायणशब्दार्थः

**नाराणां, अयनं यः सः नारायणः** अथवा **नाराः अयनं यस्य सः** नारायणः इति च तत्पुरुषबहुव्रीहिसमासद्वयं वक्तुं शक्यते। **नर** इति, **नार** इति, **नाराः** इति च पदविवक्षितः। रिङ्क्षये इत्यस्मात् धातोः **र** इति पदेन नाशवस्तु उच्यते। नकारेण तन्निषिध्यते। **नर** इति नाशरहितं नित्यवस्तूच्यते। समूहार्थे अण् प्रत्ययेन आदिवृद्धेः नार इति नित्यवस्तुसमूहमुक्त्वा, **नाराः** इति बहुवचनेन समासबाहुल्येन नित्यवस्तूनां समूहः उच्यते। नित्यवस्तुसमूहः कः इत्युक्ते - **ज्ञान, शक्ति, बल, ऐश्वर्य, वीर्य,** तेजांसीति षड्गुणाः। स्वरूपनिरूपकधर्माः, वात्सल्य, सौशील्य, परमात्मनःदिव्यविग्रहः, विग्रहगुणाःसौन्दर्य सौकुमार्य सौगन्ध्य-लावण्ययौवनादयः, किरीटनूपुरपर्यन्तभूषणानि, शङ्खचक्रगदाशाङ्र्गखड्गेत्यादयः असख्येयायुधविशेषाः, श्रीभूनीलादिदेव्यः, अनन्तगरुडविष्वक्सेनाद्यसङ्ख्येय-

नित्यसूरयः, कैङ्कर्योपकरणछत्रचामरतालवृन्तभृङ्गाराः इत्यादयः, चण्डप्रचण्ड-भद्रसुभद्रजयविजयादयः, कुमुदकुमुदाक्षपुण्डरीकवामनशङ्खुकर्णसर्पनेत्रसुप्रति-ष्ठादयः गणाधिपाः, नित्यसूरिभिः समानाकाराः संसारसागरात् विमुक्ताः, अखिलकैङ्कर्यनिरताः, असङ्ख्येयाः चेतनाः, पञ्चशक्त्युपनिषण्मयं परमपद-मित्यादि नित्यविभूतिः। सात्विकराजसतामसगुणैः सहिता प्रकृतिः नाम लीला-विभूतिः। **अण्डानां तु सहस्राणाम्। सहस्राण्ययुतानि च** इत्युक्ताः असङ्खेय ब्रह्माण्डविशेषाः। अण्डान्तर्वर्तिनः देव, मनुष्य, तिर्यक्, स्थावराश्च नारशब्दस्यार्थाः इत्युक्ताः।

अयनं नाम आश्रयवाचकः। नारायणं वासस्थानं, नाराः वासस्थानं यस्य सः इति उभयविधसमासाभ्यां फलितः अर्थः। स्वव्यतिरिक्तसमस्तवस्तूना-माधारभूतत्वं परत्वमित्युच्यते। एवं सर्वाधारोभूत्वा, सकलचेतनाचेतनेषु प्रविश्य स्थितत्वं सौलभ्यमित्युच्यते। एवं बहुव्रीहितपुरुषसमासाभ्यां सिद्धं यत् तत् सर्वम् अन्तर्यामिब्राह्मणे उक्तम्।

अचिद्विलक्षणजीवात्मनां समूहः नार - इति, नाराणाम् उपायरूपेण, उपेयरूपेण च स्थितः नारायणः इत्युच्यते। तस्य परमात्मनः सर्वविधबन्धुत्वं च अयनपदेनोच्यते। मम उपकारकः, पिता, बन्धुः, राजा, प्राणश्च परमात्मैवः इत्युक्तत्वात् अस्यात्मनः सर्वविधबन्धुः परमात्मैवेति अयनशब्देनोच्यते। नारायणपदेन कैङ्कर्यप्रतिसम्बन्धिनः परमात्मनः अन्तर्यामित्वं स्पष्टमुच्यते। **आय** इति चतुर्थ्या सर्वविधकैङ्कर्याणि करणीयानीति ज्ञायते। शेषत्वस्वरूपात्सिद्धम् कैङ्कर्यम्। **सदा पश्यन्ति सूरयः** तदेव नित्यकैङ्कर्यम्। जीवात्मनः स्वरूपानुरूपपुरुषार्थः कैङ्कर्यम्। यावज्जीवपर्यन्तं सर्वकालसर्वदेशसर्वावस्थासु कैङ्कर्यं कर्तव्यमेव। भार्यायाः मङ्गलसूत्रधारणं यथा भर्तुः अनन्यार्हा इति ज्ञापयति, तथैव अष्टाक्षरीमन्त्रधारणमपि भगवदनन्यार्हत्वं प्रकाशयति। अष्टाक्षरैः त्रिभिः पदैः दिव्येन विराजते अष्टाक्षरीमन्त्रः। मङ्गलसूत्रधारिणीं भर्ता यथा रक्षति, तथैव अष्टाक्षरीमन्त्रधारिणं परमात्मा रक्षति। सर्वविधैः भगवतो नारायणस्यैव दासोऽहम्

इति भावेन विशेषज्ञैः, अल्पज्ञैः, स्त्रीभिः, बालैश्च सर्वैः अनुसन्धानं करणीयमिति, अष्टाक्षरीमन्त्रस्यानुसन्धानाय सर्वकालसर्वदेशसर्वावस्थाश्चानुकूला एवेति सकलवेदसारार्थसङ्ग्रहरूपेणोक्तः।

## ग्रन्थकर्तुः परिचयः

1734 - 1766 A.D काले महीशूरपुरस्य राज्ञः द्वितीयकृष्णराजस्य सेनापतेः अनुजः, वीरराजस्य पुत्रः नञ्जराजः। तस्य नाम शुद्धसत्त्वं रामानुजाचार्यः अथवा लक्ष्मणाचार्यः इति ।

एतैः **अथर्वशिखाविलासः** (Adyar D.X. 82-3 Extr.P.P. 203-4) इति अथर्वशिखोपनिषदः व्याख्याग्रन्थः लिखितः। अस्मिन् ग्रन्थे विष्णोः परत्वं प्रतिपादितम्। गायत्रीमन्त्रेऽपि श्रीमहाविष्णुः एव प्रतिपाद्यते इति, न शिवः इति निरूपयन्तः **गायत्र्यर्थशतदूषणी** (Adyar 196-8, Extr, PP. 251-2) इति ग्रन्थं लिखितवन्तः। अस्मिन् ग्रन्थे षष्ठि विषयाः एव उपलभ्यन्ते।

**वेदाहमेतं पुरुषं महान्तम्** इत्यस्य मन्त्रस्यार्थं विवृण्वन्तः **वेदाहमिति मन्त्रार्थः** (Adyar PP 504, Extr 408-9) इति ग्रन्थं लिखितवन्तः । श्रीभाष्य-व्याख्यायाः श्रुतप्रकाशिकायाः मुख्यविषयान् विवृण्वन्तः गुरुभावप्रकाशिका (Adyar 63, Extr 6195) इति व्याख्यां लिखितवन्तः ।

कृष्णपादाः इति प्रसिद्धैः पिल्लै लोकाचार्यैः कृतेषु **अष्टादशरहस्येषु** एक तमस्य **मुमुक्षुप्पडि** इत्यस्य ग्रन्थस्य व्याख्यां कुर्वन्तः **रहस्यत्रयमीमांसाभाष्यम्** इति ग्रन्थं लिखितवन्तः। त्रिषु रहस्येषु प्रथमरहस्ये अष्टाक्षरीमन्त्र एव उपलभ्यते। शेषभागः न लभ्यते।

## प्राचीनप्रतीनां विवरणम्

1. G.O.M.L/Serial No. 16934 - **रहस्यत्रयमीमांसाभाष्यम्** - रामानुजदासः - श्रीवैष्णवम् - Paper - Telugu - Incomplete - R - 1454.

2. G.O.M.L/Serial No. 16935 - **रहस्यत्रयमीमांसाभाष्यम्** - रामानुजदासः - **श्रीवैष्णवम्** - Palm leaf - Grantha - Incomplete - D. 5340.

3. G.O.M.L/Serial No. 16936 - **रहस्यत्रयमीमांसाभाष्यम्** - रामानुजदासः - श्रीवैष्णवम् - Palm leaf - Grantha - Incomplete - D. 5341.

4. G.O.M.L/Serial No. 16937. रहस्यत्रयमीमांसाभाष्यम् - रामानुजदासः - श्रीवैष्णवम् - Palm leaf - Grantha - Incomplete - D. 4746.

5. O.R.I / Serial No. 5160 - **रहस्यत्रयमीमांसाभाष्यम्** - Lakshmana or Kausika Krishna Pada Lokaguru - Sampradarya - Grantha - Incomplete - Stock Number. 2991.

6. O.R.I / Serial No. 5161 - **रहस्यत्रयमीमांसाभाष्यम्** - Lakshmana or Kausika Krishna Pada Loka Guru - Sampradaya - Grantha - Incomplete - Stock Number 5059.

7. O.R.I / Serial No. 5162 - **रहस्यत्रयमीमांसाभाष्यसिद्धाञ्जनम्** - Stock No. 2430.

## रहस्यत्रयमीमांसाभाष्यस्य सारः

उपलभ्यमानेऽस्मिन् ग्रन्थे **प्रथमाध्याये प्रथमपादे** -

* **प्रथमाधिकरणे** न्यायनिबन्धनात्मकमिदं रहस्यत्रयमीमांसाशास्त्रमारम्भणीयमिति अधिकार्यादिसमर्थनं कृतम्।

* **द्वितीयाधिकरणे** औपदेशिकक्रमसिद्ध्या मन्त्ररत्नचरमश्लोकयोः उपबृंहणत्वसम्भवात् रहस्यत्रयमीमांसा कर्तव्येति कथ्यते।

* **तृतीयाधिकरणे** मूलमन्त्रस्य सामान्यवैभवसमर्थनं कृतम्।

* **चतुर्थाधिकरणे** मन्त्रशब्दयोगार्थोत्कर्षसमर्थनं कृतम्।

* **पञ्चमाधिकरणे** शिष्यावतारप्रयोजनसमर्थनं कृतम्।

* **षष्ठाधिकरणे** उपदेशप्रमाणसारभूतो मूलमन्त्र एव सर्वेषां परिग्राह्यः इति उपदेशप्रमाणप्राबल्यसमर्थनं कृतम्।

* **सप्तमाधिकरणे** मन्त्रान्तरापेक्षया मूलमन्त्रोत्कर्षसमर्थनं कृतम्।
* **अष्टमाधिकरणे मूलमन्त्रस्य** वाच्यापेक्षया उत्कर्षसमर्थनं कृतम्।
* **नवमाधिकरणे** अक्रमोक्तमूलमन्त्ररक्षकत्वसमर्थनं कृतम्।
* **दशमाधिकरणे मूलमन्त्रस्य** सर्वफलप्रदत्वसमर्थनं कृतम्।
* **एकादशाधिकरणे** मूलमन्त्रस्य साधनान्तरसहकारित्वसमर्थनं कृतम्।
* **द्वादशाधिकरणे** मूलमन्त्रप्रपत्तिसहकारित्वं स्वरूपज्ञानशब्देन सूचितः। मूलमन्त्रस्य ज्ञातव्यः सकलार्थप्रतिपादकत्वोत्कर्षः साध्यते।
* **त्रयोदशाधिकरणे** मूलमन्त्रस्यार्थपञ्चकपरत्वसमर्थनं कृतम्।
* **चतर्दशाधिकरणे** मूलमन्त्रोत्कर्षसमर्थनं कृतम्।

एवं मूलमन्त्रस्यप्रभावः प्रपञ्चितः।

**प्रथमाध्याये द्वितीयपादे** प्रणवः व्याख्यायते। तदुपोद्घततया च -

* **प्रथमाधिकरणे** मूलमन्त्रवाक्यार्थसमर्थनं कृतम्।
* **द्वितीयाधिकरणे** सप्रणवाष्टाक्षरसमर्थनं कृतम्।
* **तृतीयाधिकरणे** मूलमन्त्रे पदत्रयक्रमसमर्थनं कृतम्।
* **चतुर्थाधिकरणे** अकारस्य कारणत्वरक्षकत्वविष्णुत्वनिमित्तकत्वं च समर्थितम्।
* **पञ्चमाधिकरणे** भगवतः असङ्कुचितरक्षकत्वसमर्थनं कृतम्।
* **षष्ठाधिकरणे** श्रीसम्बन्धस्य अकारव्यङ्ग्यत्वसमर्थनं कृतम्।
* **सप्तमाधिकरणे** अकारस्य लुप्तचतुर्थ्यन्तत्वसमर्थनं कृतम्।
* **अष्टमाधिकरणे** लुप्तचतुर्थ्यर्थसमर्थनं कृतम्।
* **नवमाधिकरणे** उकारार्थसमर्थनं कृतम्।
* **दशमाधिकरणे** मकारार्थसमर्थनं कृतम्।
* **एकादशधिकरणे** अकाराद्यक्षरत्रयक्रमसमर्थनं कृतम्।
* **द्वादशाधिकरणे** प्रणवस्य शाब्दवाक्यार्थसमर्थनं कृतम्।

**प्रथमाध्याये तृतीयपादे -**

❋ **प्रथमाधिकरणे** मन्त्रशेषविवरणं कृतम्।

❋ **द्वितीयाधिकरणे** नमश्शब्दार्थसमर्थनं कृतम्।

❋ **तृतीयाधिकरणे** नमश्शब्दप्रयोजनसमर्थनं कृतम्।

❋ **चतुर्थाधिकरणे न** नमश्शब्दव्यङ्ग्यर्थविशेषसमर्थनं कृतम्।

❋ **पञ्चमाधिकरणे** अचिद्वत्पारतन्त्र्यसमर्थनं कृतम्।

❋ **षष्ठाधिकरणे** सर्वफलोत्पादकत्वलक्षणवैलक्षण्यं समर्थितं, परं तु पूर्वपक्षे एव किञ्चिदुपलभ्यते। उत्तरग्रन्थालाभात् विरतम्।

**श्रीवैष्णवसम्प्रदायजिज्ञासूनामतीवोपकारकोऽयं ग्रन्थः।**

श्रीवैष्णवदासः

**तट्टा विजयराघवाचार्यः**

श्रीमते रामानुजाय नमः

## श्रीश्रीनिवासरामानुजदासकृतः

## संस्कृतानुवादरूपः

# मुमुक्षुप्पडि

## श्रीमन्त्रप्रकरणमारभ्यते

१. मुमुक्षोर्ज्ञातव्यानि रहस्यानि त्रीणि।

२. तत्र प्रथमरहस्यं श्रीमन्त्रः।

३. श्रीमन्त्रस्य यावद्वैभवपर्याप्ति प्रेम्णादृत्यानुसन्धानं कार्यम्।

४. मन्त्रे मन्त्रान्तर्गतवस्तुनि मन्त्रप्रदाचार्ये च प्रेमाधिक्ये सति कार्यकरो भवति।

५. संसारिणस्स्वानीश्वरं च विस्मृत्य ईश्वरकैङ्कर्यप्रच्युताः प्रच्युता इति क्लेशेनापि विना संसाररूपमहासमुद्रे पतित्वा दुःखितास्तिष्ठन्तीति, सर्वेश्वरः स्वकृपयैते स्वज्ञानेन तीरवृक्षं यथा प्राप्नुयुस्तथा स्वयमेव शिष्य आचार्यश्चभूत्वा श्रीमन्त्रं प्रकाशयामास।

६. शिष्यतया स्थितिः शिष्यस्थितेर्लौकिकैरज्ञातत्वात्तां ज्ञापयितुम्।

७. सकलशास्त्रैरुत्पद्यमानं ज्ञानं स्वयमार्जितधनमिव, श्रीमन्त्रेणोत्पद्यमानं ज्ञानं पैतृकधनमिव।

८. भगवन्मन्त्राश्चानेके।

९. ते तु व्यापकाऽव्यापकाश्चेति द्विधाः।

१०. अव्यापकापेक्षया व्यापकास्त्रयः श्रेष्टाः।

११. एतेषां त्रयाणां मध्ये बृहच्छ्रीमन्त्रः प्रधानभूतः।

१२. अन्ययोरशिष्टपरिग्रहोऽपूर्तिश्चास्ति।

१३. इमं वेदऋषयः सूरयोऽचार्याश्च प्रत्यपादयन्।

१४. वाच्यप्रभाववन्न भवति वाचकप्रभावः तस्मिन्दूरस्थे सत्यप्ययं समीपे स्थित्वोपकरोति।

१५. द्रौपद्या आपदि नाम हि वस्त्रवर्धकम्।

१६. यथानुसंधानविधानमननुसंधानेऽपि स्वस्वरूपान्न च्यवति।

१७. अयं च **कुलं ददाती**त्युक्तप्रकारेण सर्वापेक्षितप्रदो भवति।

१८. ऐश्वर्यकैवल्यभगवल्लाभकामेभ्यस्तान् ददाति।

१९. कर्मज्ञानभक्तिषु निष्टानां विरोधिनं निवर्त्य ताः समापयति।

२०. प्रपत्तौ प्रविष्टानां स्वरूपज्ञानमुत्पाद्य कालक्षेपस्य भोगस्य च हेतुर्भवति **अन्यत्सर्वं वदती**त्युक्तप्रकारेण ज्ञातव्याः सर्वेप्यर्था अस्मिन् सन्ति।

२१. ते च पञ्चविधाः पूर्वाचार्या एतदर्थज्ञानात्पूर्वं स्वानुत्पन्नान्नानुसंदधत एतदर्थ ज्ञानोत्पत्यनंतर**मुत्पत्तेः पश्चान्न विस्मरामी**त्युक्तप्रकारेणानेन विनाऽन्येन कालं न क्षिपन्ति।

२२. वाचकाद्वाच्ये श्रद्धाहेतुरीश्वर एवोपायोपेयाविति स्थितिः।

२३. एतत्प्रतिपाद्योऽर्थः स्वरूपं स्वरूपानुरूपप्राप्यं च, स्वरूपमुपायः फलं चेति वा।

२४. फलप्रकारः **प्रमेयशेखरे, अर्चिरादि**गत्यां चोक्तः।

२५. अयं चाष्टाक्षरस्त्रिपदः।

२६. पदत्रयं चार्थत्रयमाह।

२७. तच्च शेषत्वं पारतन्त्र्यं कैंकर्यं च।

२८. तत्र प्रथमपदं प्रणवः।

२९. अत्र, अ इति उ इति म् इति च त्रीणयक्षराणि।

३०. पात्रत्रये दधि पूरयित्त्वा मथित्त्वा नवनीतोद्धारवत् त्रिभ्यो वेदेभ्यस्त्रीण्यक्ष-राण्युद्धृतानि।

३१. अतोऽयं सकलवेदसारः।

३२. तत्राकारः, सकलशब्दमूलत्वान्नारायणपदसङ्ग्रहत्वाच्च सकलजगत्कारणं सर्वरक्षकं नारायणमाह।

३३. रक्षकत्वं नाम, विरोधिनिवर्तकत्वमपेक्षितप्रदत्वं च।

३४. एतदुभयं तत्तच्चेतनानुरूपम्।

३५. संसारिणां विरोधी शत्रुपीडादिरपेक्षितमन्नपानादि।

३६. मुमुक्षूणां विरोधी संसारसम्बन्धोऽपेक्षिता परमपदप्राप्तिः।

३७. मुक्तानां नित्यानां विरोधी कैंकर्यहानिरपेक्षिता कैङ्कर्यवृद्धिः।

३८. ईश्वरव्यतिरिक्तानामरक्षकत्वं **प्रपन्नपरित्राण** उक्तम्।

३९. रक्षणकाले श्रीसम्बन्धोऽनुसन्धेयः।

४०. क्षणमपि वियुक्तो न भवति।

४१. अत्र भगवत्सेनापतिमिश्रवाक्यं **तद्वक्षस्थलं त्यजति चेदेतदक्षरं त्यजेत**।

४२. भर्तुश्शय्यां प्रजाया डोलां चापरित्यजन्ती मातेव प्रथमचरमपदे न परित्यजति।

४३. श्रीनन्दगोपं कृष्णं चापरित्यजती यशोदेव।

४४. केनचिच्छेषवस्तुस्वीकारकाले न हि गृहिणी नाम्ना विक्रयपत्रं विलिख्यते। तथापि गृहिण्याः खलु कैंकर्यं क्रियते तद्वद्द्वयं श्रियो दासभूताः।

४५. तथा चैषाऽविश्लिष्यस्थितिरव्याहता यथा प्रभाप्रभावतोः पुष्पपरिमलयोः।

४६. तस्मादेतन्मिथुनमुद्देश्यमभूत्।

४७. अत्र चतुर्थी प्राप्ता लुप्यते चतुर्थीप्राप्तिः कथमितिचेत् नारायणपदसङ्ग्रहत्वात्।

४८. अनयैश्वरशेष इत्युच्यते।

४९. शेषत्वं दुःखात्मकं हि लोके दृश्यत इति चेत्स नियमो नभवत्यभिमतशेषत्वस्य सुखरूपतया दृश्यमानत्वात्। अकारेण कल्याणगुणकथनादिदं शेषत्वं गुणकृतम्।

५०. शेषत्वमेवात्मनस्स्वरूपम्।

५१. शेषत्वाभावकाले स्वरूपमेव नास्ति।

५२. आत्मापहारो नाम, स्वतन्त्र इत्यनुसन्धानम्।

५३. स्वातन्त्र्यदशायां तन्नास्ति।

५४. स्थानप्रमाणेनोकारोऽवधारणार्थः।

५५. अनेनेतरशेषो न भवतीत्युच्यते।

५६. महालक्ष्म्याश्शेष इत्युच्यत इत्यपि वदन्ति।

५७. ततोप्यन्यशेषत्वनिवृत्तिरेव प्रधाना।

५८. देवशेषभूतपुरोडाशस्य शुने दानवदीश्वरशेषस्यात्मवस्तुनस्संसारिशेषकथनम्।

५९. भगवच्छेषत्वादन्यशेषत्वनिवृत्तिरेव प्रधाना **विस्मृत्याप्यन्यतमसेवा मना** इत्युक्तत्वात्।

६०. **अनेन** स्वस्मादितरेभ्यश्च नोपयुक्तोभवतीत्युच्यते।

६१. मकारः पञ्चविंशाक्षरो ज्ञानवाचकश्च तस्मादात्मानमाह।

६२. अयं च समष्टिवाचको जात्येकवचनञ्च।

६३. अनेनात्मा ज्ञातेंति देहाद्व्यावृत्तिरुक्ता भवति।

६४. देहाद्व्यावृत्तिं **तत्वशेखरे**ऽवोचाम।

६५. परिमलेतेजोभ्यां पुष्परत्न इव शेषत्वेनात्माऽद्रियते।

६६. अन्यथा **आत्मना नमे प्रयोजन**मित्युक्तप्रकारेण त्याज्यः।

६७. एतद्ज्ञापनाय शेषत्वमुक्त्वाऽत्मानमाह।

६८. एवं प्रणवेन **कृष्णपुरैकशरणस्य दासोहं नान्येषा**मित्युक्तप्रकारेण जीवपरसम्बन्ध उक्तः।

६९. अनेन **कमलालया नायकमेकमेव प्राप्नोति ज्ञान**मित्युक्तं भवति।

७०. अकारमकाराभ्यां रक्षकरक्ष्यावुक्तौ चतुर्थ्युकाराभ्यां रक्षणहेतुभूता प्राप्तिः फलं चोक्तम्।

७१. मन्त्रशेषः प्रणवं विवृणोति।

७२. उकारविवरणं नमसा।

७३. अकारं विवृणोति नारायणपदम्।

७४. मकारं विवृणोति चतुर्थी, नारपदमित्यपि वदन्ति।

७५. अक्रमेण विवरणं, विरोधिनिवृत्तिपूर्वकानुभवस्य कर्तव्यत्वात्।

७६. नमः न इति म इति पदद्वयम्।

७७. म इत्यनेन स्वस्मादुपयुक्त इत्युच्यते नेति तन्निषिध्यते । तथा च नम इत्यनेन स्वस्मादुपयुक्तो न भवतीत्युच्यते।

७८. इतरशेषत्वदशायां स्ववैलक्षण्यं प्रदर्श्यनिवर्त्तयितुंशक्यः स्वशेषत्वे तु तादृशयोग्यतापि नश्यति।

७९. अनेन विरोधी निवर्त्यते। स च त्रिविधः स्वरूपविरोध्युपायविरोधी प्राप्यविरोधी चेति। स्वरूपविरोधिनिवृत्तिर्नाम **अहं त्वम्मदीयं च** त्वमेवेतिस्थितिः।

८०. उपायविरोधिनिवृत्तिर्नाम **निवर्तय दुःखं मा वा रक्षकान्तरशून्योह**मिति स्थितिः।

८१. प्राप्यविरोधिनिवृत्तिर्नाम, **व्यतिरिक्तास्मत्क्रमान्निवर्त** येति स्थितिः।

८२. **म** इति स्वरूपनाशः।

८३. नम इति स्वरूपोज्जीवनम्।

८४. इदं स्वरूपमुपायं फलं च दर्शयति।

८५. **देवेशस्थलाय नमस्करोती**त्युक्तत्वात्स्वरूपं दर्शयति।

८६. **वेङ्कटाचलवासिने नमः** इत्युक्तत्वादुपाय उक्तः।

८७. **अन्त्यदशायां नम उक्ति**रित्युक्तत्वात्फलमुक्तम्।

८८. **प्राप्तं त्वद्दासदास्य**मित्युक्तप्रकारेणात्र भागवतशेषत्वमनुसन्धेयम्।

८९. इदं केचिदकार इत्याहुः।

९०. अपर उकार इत्याहुः। ईश्वरः - स्वस्मादेव भवति।

९१. अचित्परस्मादेव भवति।

९२. आत्मा स्वस्मै परस्मै च समानो भवतीति पूर्वप्रतिपत्तिः।

९३. नमसात्त्वचिद्व **त्स्वस्मादेव मम विनियोगो**स्त्विति प्रतिपत्तिः।

९४. स च भोगदशाया मीश्वरो यदा नाशयति तदा रक्षणीयमित्यविनाश्यनिवृत्तिः।

९५. नाशयितुं हेतुः प्रागुक्त उपरिष्टादपि वक्ष्यते।

९६. एतत्ज्ञानोत्पत्तिकाले कृतकृत्यः।

९७. एतज्ज्ञानाभावे सर्वाणि दुष्कृतानि कृतानि।

९८. एतज्ज्ञाने सकलानि सुकृतानि जातानि।

९९. एतेन विना क्रियमाणं यज्ञादिकं प्रायश्चित्तादिकं च निष्प्रयोजनम्।

१००. एतेन सर्वाणि पापानि नश्यन्ति।

१०१. पुण्यानि सर्वाणि जायन्ते।

१०२. नारायण इति, नाराणामयनमित्यर्थः।

१०३. नाराणि - नित्यवस्तुसमूहाः।

१०४. ते च ज्ञानानन्दामलत्वादयो ज्ञानशक्त्यादयो वात्सल्यसौशील्यादयो विग्रहः कान्तिसौकुमार्यादयो दिव्यभूषणानि दिव्यायुधानि श्रीलक्ष्मीप्रभृतिदिव्यमहिष्यो नित्यसूरयश्छत्रचामरादयो द्वारपालका गणाधिपा मुक्ताः परमाकाशः प्रकृतिर्बद्धात्मानः कालो महदादिविकारा अण्डान्यण्डान्तर्गतदेवादिपदार्थाश्च।

१०५. अयनमिति, एतेषामाश्रय इत्यर्थः।

१०६. किञ्च, एते आश्रया यस्येति च भवति।

१०७. एताभ्यां द्वाभ्यां फलिते परत्वसौलभ्ये। अन्तर्यामित्वमुपायत्वमुपेयत्वं वा।

१०८. **मदुपकारको मत्पिते**त्युक्तत्त्वादीश्वर एव सकलविधबन्धुरात्मनामित्युक्तं भवति।

१०९. अस्मदितरार्थस्थितिसमयेप्यसावस्मदर्थमेव तिष्ठति।

११०. रात्रौ मठभोजयितार इवान्तरलक्ष्यत्वेन स्थितस्सत्तामारभ्य रक्षति।

१११. आयेत्यनेन **गमने छत्रं भवती** त्युक्तप्रकारेण सकलविधकैङ्कर्यं कर्तव्यमित्यपेक्ष्यते।

११२. नमसा स्वेन सह सम्बन्धो नास्तीत्युक्त्वा कथं कैङ्कर्यप्रार्थना सम्भवतीति चेत् **सोपानीभूयत्त्वत्प्रवालाधरंपश्यानी**त्युक्तप्रकारेण कैंकर्यप्रार्थनाऽगन्तुकी न भवत्यपि तु स्वरूपप्रयुक्ता।

११३. तस्मात् **विच्छेदरहितकैङ्कर्यं प्रार्थयमानावयम्** इत्युक्त प्रार्थनां दर्शयति। **नेत्राभ्यां सम्यग्दृष्ट्वा गतं शोचतां नेत्रयो र्निद्रास्ति किम्** इति वद्दर्शनात्पूर्वं निद्रा नास्ति।

११४. दर्शने **सदा पश्यन्ति** इत्यस्मान्निद्राया नावकाशोऽस्ति।

११५. **व्यर्था बहुदिवसा गता** इति गतदिवसाननुघोषितवतां न निद्रावकाशोऽस्ति **तदानीमहं नजातो जन्मानन्तरं न विस्मृतवान्** इत्युक्तवन्तःखलु।

११६. इदं कैङ्कर्यं **च्युतिरहितकालेषु सर्वेषु सहैव स्थित्वा** इत्युक्तप्रकारेण सर्वदेशसर्वकालसर्वावस्थास्वनुवर्तते।

११७. अष्टसूत्रं त्रिविभागं मङ्गलसूत्रमिव श्रीमन्त्रः।

११८. अनेनेश्वरः आत्मनां पतिस्सन् रक्षतीत्युच्यते।

११९. एवं श्रीमन्त्रेणास्मत्स्वामिन एव दासभूतोऽहं यथा मम दासो न भूयासं तथा भवितव्यं सर्वशेषिणो नारायणस्यैव सकलविधकैङ्कर्याणि कर्तुं भाग्यवान् भूयासमित्युक्तमासीत्।

**।। इति श्रीमन्त्रप्रकरणं समाप्तम्।।**

श्रीलोकगुरुचरणौ शरणम्　　　　　　　　　　　　श्रीलोकगुरवे नमः

**श्रीमते रामानुजाय नमः**

# द्वयप्रकरणमारभ्यते

१. बाह्येषु विद्यमानानां सङ्गानां सवासनया त्यागः।

२. अस्मत्स्वाम्येवोपाय इति स्वीकारः।

३. फलसिद्धिरवश्यं भवतीति दार्ढ्येन स्थितिः।

४. प्राप्ति त्वरा च।

५. स्थितिकालेऽभिमतदिव्यदेशेषु प्रावण्येन गुणानुभवकैङ्कर्यैः कालक्षेपः।

६. एवं स्थितानां श्रीवैष्णवानां माहात्म्यज्ञानम्।

७. श्रीमन्त्रे द्वये च नियतत्वम्।

८. आचार्यप्रेमाधिक्यम्।

९. आचार्य विषय ईश्वरविषये च कृतज्ञत्वम्।

१०. ज्ञानविरक्तिशान्तिमता परमसात्विकेन सहवासकरणं च।

११. एतानि वैष्णवाधिकारिणोऽवश्यपेक्षितानि।

१२. अस्य चाधिकारिणो रहस्यत्रयमनुसन्धेयम्।

१३. सर्वप्रमाणैर्देहेन पुरुषार्थ इत्यच्यते।

१४. श्रीमन्त्रेणात्मना पुरुषार्थ इत्युच्यते।

१५. चरमश्लोकेन ईश्वरेण पुरुषार्थ इत्युच्यते।

१६. द्वयेन श्रीमहालक्ष्म्या पुरुषार्थ इत्युच्यते।

१७. महालक्ष्म्या पुरुषार्थोनाम, अस्याः पुरुषकारभावं विना ईश्वरः कार्यं न करोतीति।

१८. द्वयस्याधिकारी आकिञ्चन्यायानन्यगतित्ववान्।

१९. इदं द्वयं **प्रपन्नपरित्राणे**ऽवोचाम।

२०. अत्र पूर्वखण्डेन महालक्ष्मीं पुरस्कृत्येश्वरचरणावुपाय इति स्वीकार उच्यते।

२१. उत्तरखण्डेन तस्मिन्मिथुने कैङ्कर्यं प्रार्थ्यते।

२२. श्रीरिति महालक्ष्म्याः नाम।

२३. श्रीयते श्रयते।

२४. अस्यार्थ इमामाश्रित्य सर्वेषां स्वरूपलाभोऽस्यास्तमाश्रित्यस्वरूपलाभः।

२५. इदानीमिमां वदति पुरुषकारत्वेन।

२६. नीरेऽग्निवृद्धिरिव शीतले मनस्यपराधेन कालुष्योदये सहनमेतदर्थम्।

२७. इयं जननी तेषां क्लेशमसहमाना तस्य पत्नी अभिमतविषया अतो अबाधितपुरुषकारः।

२८. हनुमन्तं क्षमापयन्ती स्ववचनमार्ग आगच्छं तं क्षमापयेदिति कैमुत्यसिद्धम्।

२९. मतुपा उभयोस्संश्लेषो नित्य इत्युच्यते।

३०. अनयामिलित्वेवास्यवस्तुनस्सद्भावः।

३१. ईश्वरस्वातन्त्र्यं चेतनापराधं च दृष्ट्वा न जहाति।

३२. चेतनस्यैतद्द्वयं दृष्ट्वा न भेतव्यम्।

३३. अनेनाश्रयणो रुचिरेवापेक्षिता कालो न प्रतीक्ष्य इत्युच्यते।

३४. अस्याः सन्निधिना काकस्य शिरोभेदनं न प्राप्तम् तदभावेन रावणो मृतः पुरुषकारबलेन स्वातन्त्र्ये निमग्ने उद्बुध्यमानान्गुणानाह नारायणपदम्।

३५. ते च वात्सल्यस्वामित्वसौशील्यसौलभ्यज्ञानशक्त्यादयः।

३६. अपराधं दृष्ट्वा अभयाय वात्सल्यम्।

३७. कार्यं कुर्यादिति दार्ढ्याय स्वामित्वम्।

३८. स्वामित्वन्दृष्ट्वादूरमगमनाय सौशील्यम् दृष्ट्वा आश्रयणं सौलभ्यम्।

३९. विरोधिनं निवर्तयित्वा स्वात्मानं दातुमुपयुक्ते ज्ञानशक्ती।

४०. अत्रोक्तसौलभ्यस्य सीमाभूमिरर्चावतारः।

४१. अयं च परव्यूह विभावादिवन्नभवति नेत्राभ्यां द्रष्टुं योग्यः।

४२. एतत्सर्वमस्माकं श्रीरङ्गनाथस्य समीपे द्रष्टव्यम्।

४३. श्रीहस्तयोर्धृत दिव्यायुधत्वम्।

४४. अभयमुद्रितहस्तत्वम्।

४५. धृतकिरीटत्वम्।

४६. मुखं हासं चासनपद्मे दृढया स्थापितश्रीचरणत्वम्।

४७. एवमस्यावस्थितिरेवास्माकं शरणम्।

४८. रक्षकत्वं भोग्यत्वमुभयमपि श्रीविग्रहे प्रकाशितम्।

४९. अनेन साहित्यं सौन्दर्यमुपायपूर्तिश्चोच्यते।

५०. लक्ष्मीस्स च त्यजतश्चेदपि चरणौ नत्यजतः।

५१. **दृढचरणौ** इति वर्तेते।

५२. शेषिविषये शेषभूतस्य प्रवेशस्थानम्।

५३. प्रजाया मातुः स्तनमिव।

५४. अनेन लक्ष्म्यावासस्थानभूतो गुणप्रकाशकः शिशुपालं च प्राप्तये शिक्षको मेलयिता च श्रीविग्रह उच्यते।

५५. शरणम् - इष्टप्राप्तेरनिष्टनिवृत्तेश्चाव्यभिचार्युपायः।

५६. अनेन प्राप्यमेव प्रापकमित्युच्यते।

५७. पूर्वोक्तं त्रितयमपि प्राप्यं हि अस्याशक्तयोपायं करोतीति।

५८. चरणौ शरणमित्युक्तत्वादुपायान्तरव्यावृत्तोपाय इत्युच्यते।

५९. प्रपद्ये - आश्रयामि।

६०. वाचिके कायिक आश्रयणेपि फलस्यालाभो नास्ति।

६१. ज्ञानान्मोक्ष इत्युक्तत्वान्मानसेन भवितव्यम्।

६२. तस्यैवोपायत्वादिमे साक्षादुपायाः न भवन्ति।

६३. अत एतत् त्रितयमप्यपेक्षितमिति निर्बन्धो नास्ति।

६४. वर्तमाननिर्देशेन सत्वोन्मीलने सति भये तदानुसन्धानाय, उपायान्तरेषु मनसोऽगमनाय, कालक्षेपस्य दुःशकतया त्यक्तुमशक्यत्वाच्चानुवर्तते।

६५. फलाय बहुकालोऽपेक्ष्यत इति स्मरणे उपायश्च्युतो भवति।

६६. उत्तरवाक्येन प्राप्यमुच्यते।

६७. प्राप्त्यान्तराय न भवतीति।

६८. उपायान्तराणित्युक्त्वा चरमोपायस्याश्रयणावदुपेयान्तरैश्वर्यकैवल्ये त्यक्त्वा सीमाभूतप्राप्यमर्थ्यते। अनेनार्थनीयं किम् ? सर्वज्ञ एतदभिप्रायं न जानाति किमितिचेदेतद्वाक्ये श्रुते मनः प्रसन्नं भवति।

६९. श्रीमते - महालक्ष्म्यासह स्थिताय।

७०. **अस्योपायत्वावस्थायां स्वयं प्राप्यभूता कैङ्कर्यवृद्धिकरी च भवति।**

७१. अस्मिन् श्रीमन्त्रोक्तं प्राप्यं विशदतयाऽनुसन्धीयते।

७२. बालस्वामिवदुभयात्मकमिथुने कैङ्कर्यकरणमुचितम्।

७३. कैङ्कर्यं सिध्यति रस्यति चैतमिथुने।

७४. नारायणाय - सर्वशेषिणे।

७५. अत्र श्रीविग्रहो गुणाश्चोच्यन्ते।

७६. शेषित्वे तात्पर्यम् प्राप्तविषये कैङ्कर्यं हि रस्यति।

७७. कैङ्कर्यं च नित्यं प्रार्थयित्वा प्राप्तुं योग्यम्।

७८. शेषिणोऽतिशयस्य वर्द्धनं शेषभूतस्य स्वरूपलाभः प्राप्यं च।

७९. नमः - कैङ्कर्यविरोधिनं निवर्तयति।

८०. विरोधी नाम, स्वस्येति क्रियमाणत्वम्।

८१. अत्राविद्यादयोऽपि निवर्त्यन्ते।

८२. **तवैव वयं दास्यं कुर्म** इत्युक्तप्रकारेण भवितव्यम्।

८३. सौन्दर्यमन्तरायः पूर्वोक्तं कैङ्कर्यं च तथैव।

८४. कैङ्कर्यप्रार्थनावदस्मिन् पदे प्रार्थना च सदास्ति **औषधमस्मद्भोगगर्वस्य** इत्युक्तं खलु।

**इति द्वयप्रकरणं समाप्तम्।**

**श्रीलोकगुरुचरणौ शरणम्।**

❀ ❀ ❀ ❀

श्रीमते रामानुजाय नमः

श्रीलोकगुरवे नमः

# चरमश्लोकप्रकरणमारभ्यते

१. पूर्वं केषुचिदुपायेषूक्तेषु ते दुश्शकास्स्वरूप विरोधिन इति ज्ञात्वा शोकाविष्टमर्जुनं प्रति तस्य शोकनिवृत्यर्थमित उत्कृष्टो नास्तीति चरमोपायस्य कथनं चरमश्लोकः।

२. अत्र पूर्वार्धेनाधिकारिकृत्यमाह।

३. उत्तरार्धेनोपायकृत्यमाह।

४. अधिकारिकृत्यं नाम, उपायपरिग्रहः।

५. तं साङ्गं विदधाति।

६. रागप्राप्तोपायो वैधश्चेच्छीघ्र परिग्रहस्योपयुक्तो भवति खलु।

७. अत्र पूर्वार्धं षट्पदम्।

८. सर्वधर्मान् - सर्वान् धर्मांश्च धर्मोनाम फलसाधनभूतः।

९. अत्रोक्तधर्मशब्दो दृष्ठफलसाधनानि न वदति किन्तु मोक्षफलसाधनानि वदति।

१०. ते श्रुतिस्मृतिविहिता बहुविधा इति बहुवचनम्।

११. ते च कर्मज्ञानभक्तियोगा अवताररहस्यज्ञानं पुरुषोत्तमविद्या देशवासः श्रीनामकीर्तनं श्रीदीपारोपणं श्रीमालाकैङ्कर्यमित्येतत्प्रभृतय उपायबुध्या क्रियमाणास्सर्वेऽपि।

१२. सर्वशब्देन तत्तत्साधनविशेषानुष्ठानसमये तेषां योग्यतापादकानि नित्यकर्माण्युच्यन्ते।

१३. एवं श्रुतिस्मृतिविहितनित्यनैमित्तिकादिरूपकर्मयोगाद्युपायानित्यर्थः।

१४. इमान्धर्मानिति कथनं भ्रान्तार्जुनतात्पर्येण।

१५. परित्यज्य - त्यागोनाम, उक्तोपायाननुसन्धाय शुक्तौ रजतबुद्धिकर्तार इव विपरीत दिशागमनकर्तार इव चैतेष्वनुपायेषूपायबुद्धिं कृतवानस्मीति बुद्धिविशेषेण त्यागः।

१६. परीत्युपसर्गेण पातकादित्यागवद्रुचिवासनाभ्यां लज्जया सह पुनरन्वयं यथा नस्या त्तथा त्यागः कर्तव्य इत्युच्यते।

१७. ल्यपा स्नात्वा भूञ्जीतेतिवदुपायान्तराणि त्यक्त्वैवाश्रयणं कर्तव्यमित्युच्यते।

१८. **चचाल चापं च मुमोच वीरः** इत्युक्तप्रकारेणानुपायमात्राणि न भवन्ति।

१९. किन्तु पादबन्धनानीत्युच्यन्ते।

२०. चक्रवर्तिवच्च्युतिकारणानि भवन्ति।

२१. सर्वधर्मान् त्यक्त्वेत्युक्तत्वात्केचिदधर्माणामवकाश इत्याहुः।

२२. स न भवत्यधर्मान् कुर्वित्यनुक्तत्वात्।

२३.स्वत एवोक्तो न भवति किमिति चेन्न धर्मशब्दस्याधर्मनिवृत्तिप्रकराशकत्वाभावात्।

२४. प्रदर्शयत्यपि तत्तद्व्यतिरिक्तं वदति।

२५. स्वमीश्वरं फलं च पश्यति चेत्तेषाम्प्रवेशितुम्मार्गो नास्ति।

२६. माम् - सर्वरक्षकं तव हस्तवशं त्वदिच्छां दृष्ट्वा त्वद्दोषान् भोग्यतया स्वीकृत्य स्थितं तवोपायं जले उष्णतावत् घटयत्स्वेव विघटयत्स्वपि त्यक्तुमशक्तं रक्षन्तं माम्।

२७. एतत्पदं परव्यूहान् देवतान्तर्यामिणं च व्यावर्तयति।

२८. धर्मसंस्थापनं कर्तुमवतीर्णेनैव सर्वधर्मान्त्यक्त्वा मामाश्रयेत्युक्तत्वात्साक्षाद्धर्मः स्वयमेवेत्युच्यते।

२९. अनेन त्यक्तसाधनेभ्य आधिक्यमुच्यते।

३०. तच्च सिद्धत्वपरमचेतनत्वसर्वशक्तित्वनिरपायत्वप्राप्तत्वसहायान्तरनिरपेक्षत्वरूपम्।

३१. इतरोपायास्साध्यत्वात्स्वरूपसिद्धौ चेतनमपेक्षन्ते।

३२. अचेतनत्वादशक्तत्वाच्च कार्यसिद्धावीश्वरमपेक्षन्ते।

३३. अयमुपायस्तत्प्रत्यनीकतया इतरनिरपेक्षः।

३४. अत्र वात्सल्यस्वामित्वसौशील्यरूपगुणविशेषास्साक्षात्प्रकाशन्ते।

३५. हस्तगतकशा दण्डतया धृतप्रग्रहरज्जुतया सेनाधूलिधूसरितकेशपाशतया रथस्याधः प्रदेशे स्थापितश्रीपादतया च वर्तमानसारथ्यवेषम्मामिति प्रदर्शयति।

३६. एकम् - अयमेकशब्दस्स्थानप्रमाणेनावधारणार्थकः।

३७. **मामेव ये प्रपद्यन्ते, तमेव चाद्यं पुरुषं प्रपद्ये, त्वमेवोपायभूतो मे भव त्वच्चरणावेवोपायतयादत्तवानसी**त्युक्तप्रकारेण ज्ञातव्यम्।

३८. अनेन व्रजेतिस्वीकारे उपायभावो निवर्त्यते।

३९. स्वीकारश्च तेनैवा गतः।

४०. सृष्ट्यवतारमुखेन कृतकृषिफलम्।

४१. **स च तदीयभोग्यभूतकृपयैव** एतं स्वीकारं विनापि स्वयमेव कार्यं कुर्यादिति मन्तव्यम्। अन्यथोपायनैरपेक्ष्यं न जीवेत।

४२. अयं सर्वमुक्तिप्रसङ्गपरिहारार्थः बुद्धिसमाधानार्थः चैतन्यकार्यम् रागप्राप्तः स्वरूपनिष्ठोऽप्रतिषेधद्योतकश्च।

४३.पूर्वं स्वयमितरेचेति स्थितिं निवारितवान् अत्र स्वयमयं चेति स्थितिं निवारयति।

४४. तमयं चेतन आश्रयतीत्ययं स्वीकारोंऽहङ्कारगर्भोऽवद्यकरः।

४५. तस्य स्वीकार एव रक्षकः।

४६. इतरोपायानां निवृत्तिर्दोषः।

४७. अस्य प्रवृत्तिर्दोषः **नव्याप्रियताम्** निवृत्तिः प्रागुक्तः।

४८. उपकारस्मृतिश्च चैतन्येनागतः उपाये नान्तर्भवति।

४९. शरणम् - उपायत्वेन यद्यप्ययं शरणशब्दो रक्षितारं गृहमुपायं च प्रदर्शयति तथाप्यत्रोपायमेव प्रदर्शयति पूर्वेणान्वयावश्यकत्वात्।

५०. व्रज - बुद्धिं कुरु गत्यर्था बुद्ध्यर्था इत्यध्यवसायं कुर्वित्यर्थः।

५१. वाचिककायिकयोरस्यापेक्षितत्वेपि **ज्ञानान्मोक्ष** इत्युक्तत्वान्मानसिकानुष्ठानमुच्यते।

५२. एवं त्याज्यमुक्त्वा त्यागप्रकारमुक्त्वाऽश्रयणीयमुपायमुक्त्वोपायनैरपेक्ष्यमुक्त्वोपायस्वीकार उच्यते।

५३. अहम् - स्वकृत्यमाह।

५४. सर्वज्ञस्सर्वशक्तिकः प्राप्तश्चाहम्।

५५. पूर्वं वर्तमानस्थितिमुपरिमार्गं च ज्ञातुम् ज्ञातप्रकारेण कृत्वा समापयितुं चैकान्तगुणविशेषान् स्वफलत्वेन कर्तुमुपयुक्तं सम्बन्धविशेषं च दर्शयति।

५६. स्वार्थं स्वीकृतसारथ्यवेषं तदर्थममत्वा स्वार्थम्मत्वा भीतस्य भयनिवृत्यर्थं स्वस्य भावमहमिति दर्शयति।

५७. पूर्वमुक्तं पारतन्त्र्यमस्य स्वातन्त्र्यस्य सीमाभूमिः खलु।

५८. त्वा - अज्ञमशक्तमप्राप्तं मामेवोपायतयास्वीकृत्य स्थितं त्वाम्।

५९. सर्वपापेभ्यः - मत्प्राप्तिप्रतिबन्धकानीति यानि यानि पापानि प्रति बिभेषि तेभ्यः पापेभ्य इत्यर्थः।

६०. **असत्ये स्थितं ज्ञानं दुष्कर्म मलिनदेहश्च** ।

६१. इत्युक्तप्रकारेणाविद्याकर्मवासनारुचिप्रकृतिसम्बन्धा उच्यन्ते।

६२. तृणच्छेदकण्डूयनादिवत्प्रकृतिवासनयाऽनुवर्तमानानि लोकापवादभीत्या करुणया कालुष्येण च क्रियमाणानि सर्वाणि स्मर्यन्ते उन्मत्तप्रवृत्तेर्ग्रामप्राप्तिवत् एते त्यक्तोपायेष्वन्विता भवन्तीति न विचारणीयम्।

६३. कलुषितेनोपायबुद्ध्या क्रियमाणा प्रपत्तिरपि पातकसदृशा।

६४. मोक्षयिष्यामि - मुक्तो यथाभवेस्तथा कुर्याम्।

६५. णिचा - अहन्नापेक्षितस्स्वं च नापेक्षितस्तानिस्वयमेव विहाय गच्छेयुरित्याह। मम निग्रहफलतयाऽगतानि, मदनुग्रहे सति तिष्ठेयुः किम् ? इत्यर्थः।

६६. अनादिकालं पापानि दृष्ट्वा तवोत्पन्नं भयं तान्येव यथा प्राप्नुयुस्तथा कुर्याम् इतःपरं त्वद्धस्ते त्वात्र दास्यामि।

६७. मच्छरीरमलमहमेव ननिवर्तयिष्यामि किम् ? मा शुचः - तव त्वत्कार्येऽनधिकृतत्वात् मम त्वत्कार्येऽधिकृतत्वाच्च तव शोकनिमित्तं नास्तीति तस्य शोकनिवृत्तिं करोति।

६८. निवर्तकस्वरूपमुक्त्वा निवर्त्यानि त्वामागत्य नाक्रमन्त इत्युक्त्वा तव शोकनिमित्तं नास्तीत्याह।

६९. **केन दुःखसागरे निमग्नं दीनमन** इत्याह।

७०. तव पापानि मयि सोढ्वा पुण्यानीति स्मरति त्वं शोचितुं योग्यः किम् ?।

७१. उय्यक्कोण्डार्विषये भाष्यकृदुक्तवार्ता स्मर्तव्या।

७२. अस्येश्वरस्वातन्त्र्ये तात्पर्यम्।

७३. अयमनुवादकोटाविति वङ्गिपुरनम्बिवार्ता।

७४. कृष्णस्यातिमानुषचेष्टितै ऋषिवाक्यैश्च स्वकार्येऽधिकृत्यस्थितत्वाच्च कृतविश्वासानन्तरमर्जुनाय स्वाश्रयणोपदेशादनुवलादकोटौ प्रविष्ट इति।

७५. पूर्वं विस्तारस्सर्व एतन्मनश्शोधनार्थमुक्तः।

७६. वेदपुरुषस्योपायान्तरविधानं दुष्टपशोर्यष्टिं बद्ध्वा गमयितार वाहङ्कारममकाराभ्यामागतं गर्वं त्यक्त्वा ज्ञानोत्पत्त्यर्थम्।

७७. सन्यासी पूर्वस्थितान्यथा त्यजति तथैवैतज्ज्ञानोत्पत्तिमान् त्यजति चेद्दाषो नायाति। अयं चैतान् साक्षान्नत्यजति।

७८. कर्मकैङ्कर्ये अन्तर्भवति।

७९. ज्ञानं स्वरूपप्रकाशे अन्तर्भवति।

८०. भक्तिः प्राप्यरुचावन्तर्भवति।

८१. प्रपत्तिस्स्वरूपयाथात्म्यज्ञाने अन्तर्भवति।

८२. किञ्चित्फलं प्रति दुर्लभमार्गस्य सुलभमार्गस्य चोपदिष्टत्वादुभयं विना भगवत्प्रसाद एवोपायो भवेत्।

८३. फलसिद्धेरपेक्षितो अप्रतिषेधो याच्ञा चक्रवर्तिश्रीकुमारः पापेनागमनेऽपीत्युक्तवान्।

८४. अयं पुण्यं विहायागन्तव्यमित्यवदत्।

८५. **आस्तिकोऽस्मिन्नर्थे रुचिविश्वासवांश्चेदुज्जीवनम्, नास्तिकश्चेन्नाश एवान्यथा मध्यमा स्थितिर्नास्तीति** भट्टारकं प्रति गोविन्दाचार्यैरुक्ता वार्ता।

८६. व्यवसायरहितस्यास्मिन्नन्वयोऽजीर्ण भोजनमिव।

८७. **विष्णुचित्तश्श्रुत्वा स्थित** इत्युक्तप्रकारेणाधिकारिणो नियताः **वार्ताविदः, पिता भूत्वा** इति गाथे अस्यार्थत्वे नानुसन्धेये।

**इति चरमश्लोकप्रकरणं समाप्तम्।**

**इति मुमुक्षुप्पडिनामरहस्यं समाप्तम्।**

**श्रीलोकगुरुचरणौ शरणम्।**

श्रीमते रामानुजाय नमः

श्रीमच्छुद्धसत्त्वं रामानुजाचार्यैरनुगृहीतं

# रहस्यत्रयमीमांसाभाष्यम्

## प्रथमाध्याये प्रथमपादे
## अधिकार्यादिसमर्थनं नाम
## प्रथमाधिकरणम्

लोकाचार्याय गुरवे कृष्णपादस्य सूनवे।
संसारभोगिसन्दष्टजीवजीवातवे नमः।।

### मुमुक्षुप्पडिमूलम्

मू।। (१) मुमुक्षुवुक्करियवेण्डुम् रहस्यम् मून्रु ।

अस्मद्गुरुमनोजुष्टो विस्मयावहवाङ्मयः।
सौम्यजामातृसूरिर्मे सन्निधत्तां सदा हृदि।।

लोकाचार्यकृतां रहस्यविवृतिं मीमांसयाशोभितां श्रीमान् सौम्यवरोमुनिः सुविशदं वृत्त्यात्मना व्याकरोत्। श्रीमत्कौशिकशुद्धसत्त्वगुरुतो लब्धात्मजन्मत्रयो दासो लक्ष्मणनामको विवृणुते भाष्यात्मना तन्मुदे।।

श्रीमल्लोकगुरुद्भूतं रहस्यत्रयगोचरम्।
मीमांसाशास्त्रमत्रेदमाद्याधिकरणं मतम्।।

तत्र - रहस्यत्रयमीमांसाविषयः। सा - कर्तव्या न वेति संशयः। तदर्थमिदं विचार्यते। तदसाधारणाधिकारिविषयभूतप्रमितितद्विषयवेदान्तवाक्यतदुपबृह्मणानि सम्भवन्ति न वेति।

## तत्र पूर्वपक्षः

न तावत्तदसाधारणाधिकारिसम्भवः [१]**मुमुक्षुर्वै शरणमहं प्रपद्ये** इत्यादि प्रसिद्धमुमुक्षोरेव शरणागतिशास्त्ररूपरहस्यत्रयमीमांसाधिकारित्वात्।

मुमुक्षायाश्च [२]**स्वात्मानुभूतिरिति या किल मुक्तिसक्ता** इति श्रीवत्साङ्क-मिश्रसूक्त्यनुसारेण [३]**मुक्तानां परमा गतिः** इति सहस्रनामभाष्यसूक्त्यनुसारेण [४]**जीवनम् - उज्जीवनम्। संसारोन्मोचनम्। सम इति - कैवल्यव्यावृत्तिः** इति श्रुतप्रकाशिकासूक्त्यनुसारेण च कैवल्यार्थिसाधारण्यात्। न च कैवल्यार्थिनो रहस्यत्रयज्ञानापेक्षाशङ्कामप्यर्हति । तस्य [५]**सोऽश्नुते सर्वान् कामान्** इत्यादि प्रतिपन्न ब्रह्मप्राप्तिरेव नास्तीत्यन्यत्र प्रपञ्चिततत्वेन ब्रह्मप्राप्तिपूर्वककैङ्कर्य-पर्यन्तफलप्रतिपादकरहस्यत्रयज्ञानापेक्षायाः दूरापास्ततत्वात्।

किञ्च-मुमुक्षायाः [६]**अथातो ब्रह्मजिज्ञासा** इत्युक्तब्रह्ममीमांसाधिकारत्वेन नात्रासाधारणाधिकारित्वसम्भवः। अनुगृहीतञ्च भगवता भाष्यकृता -

[७]**सञ्जातमोक्षा भिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा हि अनन्तर-भाविनी** इति। न च - ब्रह्मजिज्ञासोरपि रहस्यत्रयज्ञानापेक्षास्तीति वाच्यम्। कर्मज्ञानभक्तिनिष्ठानामपि ब्रह्मजिज्ञासुत्वेन, तेषाञ्च कर्मज्ञानभक्तीनां प्रपत्तिवत् मुक्तिव्याजत्वस्यैव अन्यत्र सिद्धान्तिततत्वेन, सिद्धोपायनिष्ठत्वेऽपिब्रह्मप्राप्तिमत्वेऽपि कैङ्कर्यपर्यन्तब्रह्मप्राप्तिः। नास्तीत्यन्यत्र सिद्धान्तिततत्वेन केवलवदेव कर्मज्ञानभक्ति-निष्ठानामपि रहस्यत्रयज्ञानापेक्षायाः असम्भवात्। तस्मात् न असाधारणाधिकारि-सम्भवः।

नापि मीमांसाफलीभूतप्रमितिसम्भवः। त्रिवर्गापवर्गतत्साधनादिप्रमितेः पूर्वोत्तरमीमांसाशास्त्रनिर्णीतार्थसोपबृह्मणभागद्वयात्मकवेदेनैव सिद्धेः। देवता प्रीणनव्यापारस्यैव कैङ्कर्यशब्दार्थतया कैङ्कर्य तत्साधनप्रमितेः नित्यनैमित्तिक-काम्यकर्मशास्त्रेण भक्तिप्रपत्त्यात्मकब्रह्मविद्याशास्त्रेण च सिद्धेः। सपरिकरप्रपदन-

---

१. श्वेता. उ. ६-१८ २. व.रा.-८१ ३. स.ना.भा.-२ ४. श्रु.प्र.
५. तै.उ.आ. २-२. ६. ब्र.सू. १-१-१ ७. श्रीभाष्ये जिज्ञासाधिकरणम्

**स्वरूपप्रमितेश्च** पाञ्चरात्र तदनुसारिशाण्डिल्य**स्मृति पाद्**मोत्तरखण्डादिसिद्धत्वात्। निरवशेषनिष्कलङ्क सपरिकरपुरुषार्थ तत्साधननिर्णयार्थं भागद्वयात्मक वेद तदुपबृह्मणस्मृतीतिहासपुराण पाञ्चरात्रकर्मब्रह्मसूत्राणामावश्यकत्वाच्च।

किञ्च-अभ्युदयशिरस्कानुष्ठानौपयिकार्थज्ञानफलकत्वात् मीमांसायाः, प्रकृते च अनुभवकैङ्कर्यपर्यन्तमोक्षस्य निरपेक्षसिद्धोपायसाध्यत्वाभ्युपगमेन रहस्यत्रयार्थज्ञानस्य साधनानुष्ठानफलकत्वाभावात् न तदुद्देशेन मीमांसायां पुरुषप्रवृत्तिः सम्भवतीति न तत्फलीभूतप्रमितिसम्भवःनाप्यसाधारणो विषयः सम्भवतिरहस्यत्रयप्रतिपाद्यार्थपञ्चकस्य मूलमन्त्रविवरणभूतसर्ववेदान्तविचारमुखेन शारीरकशास्त्र एव निरूपितत्वात्। मूलमन्त्रादियोजनाभेदानां भगवच्छास्त्रादिषु प्रपञ्चितत्वाच्च।

नापि [१] **इतिहासपुराणाभ्यां वेदं समुपबृह्मयेत्** इत्युक्तोपबृह्मणस्य सम्भवः। प्रकृते मूलमन्त्रप्रतिपाद्यार्थपञ्चकोपबृह्मणस्य नानाविधस्य स्मृत्याद्युपबृह्मणपञ्चके प्रपञ्चितत्वेन, तत्र एकरूपार्थनिर्णयस्य मन्दमतिभिः कर्तुमशक्यत्वात्। चरमश्लोक-रूपैकमुख्योपबृह्मणमुखेन मूलमन्त्रार्थ निर्णये च, विशिष्टोपायोपेयत्वासिद्धिप्रसङ्गात्। शारीरकशास्त्रे वेदान्तार्थतया विशिष्टाद्वैतवत्, रहस्यशास्त्रे मूलमन्त्रार्थतया विशिष्टोपायोपेयत्वं हि प्रधानव्युत्पाद्यम्। न च मूलमन्त्रे चरमश्लोके च लक्ष्मी-विशिष्टविषयप्रतिपत्तिगन्धोऽस्ति। उपबृह्मणान्तरसापेक्षत्वे तेषां - **भेदस्वामिकृपा फलान्यगतिषु** इत्याद्यनुगृहीतरीत्या नानाविधत्वेन विस्तृतत्वेन च दुर्ज्ञेयत्वमुक्तम्।

किञ्च-चरमश्लोकमात्रस्यापि मीमांसयैवार्थनिर्णयः कार्यः। अन्यथा रहस्यत्रयमीमांसाऽनारम्भप्रसङ्गात्। सा च स्वयोगमहिमसाक्षात्कृतनिखिलतत्त्वार्थैः व्यासादिपरमर्षिभिरेव कर्तुं योग्या। नत्वर्वाचीनैः श्रीमल्लोकगुरुप्रभृतिभिरिति नोपबृह्मणसम्भवः।

तस्मात् - असाधारणाधिकारिफलीभूतप्रमितिविचारविषयवाक्यतदुपबृह्मणा-लाभात् तृतीयमिदं रहस्यमीमांसाशास्त्रमनारम्भणीयमिति।

---

१. म.भा.आ.प.१-२७३

## अत्रायं सिद्धान्तः

न तावदधिकार्यसम्भवः [१]**मुमुक्षुर्वै शरणमहं प्रपद्ये** इत्यादि प्रसिद्ध-मुमुक्षोरेवाधिकारित्वात्। न च कैवल्यार्थिनामपि मुमुक्षास्तीति वाच्यम्।

अपरपदार्थान्वययोग्यतानुसारेण विवक्षितविशेषलाभोपपत्तेः । तथा हि-न तावदयं मुमुक्षुशब्दः स्वार्थकसन्ततया अधिकारिविशेषे रूढः। [२]**गुप्तिङ्किद्भ्यस्सन्** इत्यादिना जुगुप्सा तितिक्षा चिकित्सा मीमांसादिशब्देष्वेव तद्व्युत्पादनात्। किन्तु [३]**मुच्लु मोक्षणे** इति धातुः, [४]**धातोः कर्मणः समानकर्तृकादिच्छायां वा** इत्यनुशासनेन इच्छार्थक सन्नन्तः। तथा च -यत्किञ्चिद्विमोचनार्थिनः शरणागत्यनधिकारितया [५]**श्रीमते नारायणाय नमः** इत्युत्तरवाक्ये कैङ्कर्यप्रार्थनानुसारेण कैङ्कर्योपायप्रार्थनारूपायाः।

[६]**मुमुक्षुर्वै शरणमहं प्रपद्ये** इति पूर्ववाक्योक्तशरणागतेः कैङ्कर्य-हेतुभूतभगवत्प्राप्तिप्रतिबन्धकसंसारविमोचनेच्छावत एव सम्भाविततया च, संसारविमोचनेच्छावान् मुमुक्षुपदार्थ इति समभिव्याहारबलात् अवश्यमभ्युपगन्तव्यम्। तथा च-तद्बलादेव भगवत्प्राप्तिकामतया संसारविमोचनेच्छावान् तदर्थ इत्यवगम्यत इति न दोषः। एतेन - **किञ्च मुमुक्षायाः** इत्याद्यपि निरस्तम्। उक्तन्यायेन अनुभव-जनितप्रीतिकारितकैङ्कर्यपर्यन्तभगवत्प्राप्तिकामतया इत्यधिकारिविशेषणस्य सुगमत्वात्। इत्थमसाधारणाधिकारिलाभमभिप्रेत्य (मुमुक्षुवुक्कु) इत्यनुगृहीतम्।

नापि फलीभूतप्रमित्यसम्भवः। परमपुरुषार्थकैङ्कर्यतत्साधनादिप्रमितेः सोपबृह्मणवेदादिभिः दुस्साधत्वात्।

यद्यपि अपौरुषेय नित्यनिर्दोषतया वेद एव स्वतः प्रमाणम्। तन्मूलस्मृत्या-दिभिरेव तदुपबृह्मणमपि कार्यम्। तथापि तत्सारभूतरहस्यत्रयेणैव कैङ्कर्य-तत्साधनतदनुगुणस्वरूपप्रमितिः सम्भवति। नान्यथा। **अनन्तपारं बहुवेदितव्यम्** इत्याद्युक्तरीत्या दुर्ज्ञेयानवधिकवेदादिशास्त्राभ्यासस्य बहुवेदनसामर्थ्यदीर्घायष्ट्व बहुविघ्नानुपहतत्वरूपानेकयोग्यतासापेक्षतया वेदादेःत्रैगुण्यविषयतयासारासार

१. श्वेता उ. ६-१८. २. पा.सू. ३-१-५ ३. तुदादि
४. पा.सू. ३-१-७ ५. द्वयोत्तरमन्त्रः ६. श्वेता.उ.६-१८

विवेकचातुर्यमन्तरेण तात्पर्यांशस्य दुरवबोधतया च स्वरूपोपायपुरुषार्थेषु सा-रतमाकारमात्रप्रतिपादनैदम्पर्येण प्रवृत्तस्य रहस्यत्रयस्यैव सर्वचेतनानां सुखप्रतिप-त्तिमुखेन उज्जीवनार्थं परिग्राह्यत्वात्।

तथा हि-राजभृत्यादि साधारणं शेषशेषिभावमात्रं न जीवस्वरूपयाथात्म्य-म्। नापि सेवा शिश्रूषणादिप्रसन्नराजगुर्वादेःधनविद्यादिप्रदानवत्, भक्तिप्रपत्तिजनित प्रसादद्वारकमोक्षप्रदत्वमात्रम् ईश्वरस्य स्वरूपयाथात्म्यम्। नापि परिपूर्णब्रह्मानुभवमात्रं पुरुषार्थयाथात्म्यम्। अपि तु-भगवन्मुखोल्लासमात्रोद्देश्यकप्रवृत्त्यर्हत्वम्, भगव-त्प्रसादद्वारकफलसाधनगोचरप्रवृत्त्यनर्हत्वम्, स्वप्रवृत्त्युद्देश्य भोगवत्त्वानर्हत्वञ्च-जीवस्वरूपयाथात्म्यम् निरपेक्षपुरुषकारभावविशिष्टलक्ष्मीविशिष्टस्य, गुणविग्रह विशेषविशिष्टस्य, चेतनप्रवृत्तिसामान्यनिरपेक्षस्वप्रसादद्वारक कैङ्कर्यपर्यन्तमोक्षक-रणत्वम्। ईश्वरस्य स्वरूपयाथात्म्यम्। स्वयम्प्रयोजनभगवत्प्रसाधमात्रोद्देश्यक शेषवृत्तित्वम्। कैङ्कर्यलक्षणपुरुषार्थस्वरूपयाथात्म्यम्। एतच्च रहस्यत्रयेण निष्कलङ्कतया सुगमम्। इतरासङ्कीर्णत्वात्, शब्दविस्तराभावात् प्रमाणत-मत्वाच्च।

यद्यपि - एवं सति रहस्यत्रयाधिकारी मुमुक्षुरिति न स्यात्। बद्धदशायामपि रहस्यत्रयार्थज्ञानशालिना मुक्तपुरुषार्थलाभसम्भवात्। तथापि - उत्तरवाक्ये नमश्श-ब्देनाविद्यानिवृत्तेरपि प्रार्थना प्रतीत्या, श्रियः पतेः श्रीवैकुण्ठनिकेतनस्य नित्य-मुक्तानुभाव्यस्य निरतिशयानन्दयुक्तस्य सर्वेश्वरस्य नित्यसूरिवत् सदा पश्यन्ति इत्युक्तमनुभवं लब्ध्वा, यावदात्मभाविस्वयम्प्रयोजननिरतिशयभगवन्मुखोल्लास-मा त्रोद्देश्यककैङ्कर्यमेव भगवत्प्रियतमतया मुक्तस्य 'रसो वै सः इत्युक्तभगवत्स्व-रूपवत् भगवतो रस इति तल्लाभ एव समुज्जीवनम्। तच्च मोक्षेण विना न लभ्यत इति, ताहशपुरुषार्थयाथात्म्य तदनुगुणस्वरूपोपाययाथात्म्यपरस्य रहस्यत्रयस्य, यथोक्त मुमुक्षुरेवाधिकारीति सिद्धम्।

न च, वेदादीनां रहस्यत्रयप्रपञ्चनरूपत्वादावश्यकता। अन्यथा तद्वैय-र्थ्यादिति वाच्यम्। चतुर्विधाधिकार्यनुजिघृक्षयैव वेदादिप्रवृत्त्या तत्र रहस्यत्रय प्रपञ्चनेऽपि स्वरूपयाथात्म्यनिर्णयार्थं तस्य रहस्यत्रयाधिकार्यनपेक्षितत्वात्।

---

१. तै.उ.आ.व.७-१

इत्थं रहस्यत्रयमन्यानपेक्षतया सुखप्रतिपत्तिमुखेन सर्वचेतनोज्जीवनमिति अयमर्थः भगवतः वेदादेः रहस्यत्रयस्य च प्रवृत्तिक्रमादेव सुगमः।

तथा हि - स भगवान् पुरुषोत्तमः यथोक्त योग्यतायां करणकलेबरवैधुर्येण अनुभवकैङ्कर्य लक्षणपक्षद्वयविहीनतया भगवन्मुखोल्लासविषयत्वलक्षणपरम-प्राप्तिम्, अर्वाचीन भोगप्राप्तिञ्च विना प्राकृताप्राकृतभोगद्वयेऽपि भग्नपक्षद्वय-शकुन्तवत् प्रलयेऽवस्थितानां [1]**स एकाकी न रमेत** इत्याद्युक्तनिर्हेतुककृपया [2]**विचित्रा देहसम्पत्तिः** इत्याद्युक्तरीत्या करणादिप्रदानपूर्वकमनाद्यविद्यामूलकविषय-प्रावण्यविनिवृत्तये पशुपुत्रवृष्ट्यन्नस्वर्गाद्यैहिकामुष्मिक तत्तदभिलषितप्रतिलम्बन-मुखेन परमपुरुषार्थरुच्युत्पादनेन तत्प्रतिलम्बनार्थम् [3]**यो वै वेदांश्च प्रहिणोति तस्मै** इत्याद्युक्तरीत्या चतुर्मुखमन्वादिमुखेन प्रथमं वेदादिकं प्रवर्तयित्वा, प्रायेण तदयोग्यानां चेतनानामुज्जीवनार्थं रुचिविश्वासातिशयजननार्थञ्च पश्चात् स्वयमेव अत्यादरेण श्रीबदरिकाश्रमश्रीविष्णुलोककुरुक्षेत्रेषु अवतीर्य,स्वांशावतार स्वमाहिषी-स्वाश्रितार्जुनव्याजेन महर्षिदेवमनुष्येषु रहस्यत्रयं प्रावर्तयत्। पुनरपि स एव भगवान् स्वमहिषी, विष्वक्सेन, श्रीपराङ्कुशमुनि, श्रीमन्नाथमुनिप्रभृतिपूर्वाचार्यमुखेन श्रीरामानुजसिद्धान्तनिष्णातेषु शुद्धं रहस्यत्रयसम्प्रदायमवतारयामास। अत एव श्रीवत्साङ्कमिश्रैः श्रीमद्दाशरथिमिश्रैश्च –

**लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम्।**
**अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पाराम्।।**

इति श्लोके अस्मदादिपर्यन्तानां सामान्येन स्वस्वगुरुपरम्परानुसन्धानरूपे प्रथम-गुरुत्वेन भगवाननुसंहितः। तस्मात् स्वरूपयाथात्म्यप्रमितेः रहस्यत्रयेण विना अन्यथासिद्ध्यभावात् न फलीभूतप्रमित्यसम्भवः।

किञ्च अभ्युदयशिरस्क इत्याद्यप्ययुक्तम्। [4]**भगवत्प्रवृत्तिविरोधिस्व-प्रवृत्तिनिवृत्तिः प्रपत्तिः** इति मुक्तक श्रीभाष्यकारश्रीसूक्त्यनुसारेण [5]**देहासक्ता-त्मबुद्धिः यदि भवति** इत्यादितद्विवरणश्रीपराशरभट्टार्यसूक्त्यनुसारेण च मूल-

१. मह.उ.१ २. विष्णुतत्त्वम् ३. श्वेता.उ. ६-१७
४. मुक्तकम् ५. अष्टश्लोकि -४

मन्त्रमन्त्ररत्नस्थचतुर्थ्यन्तनारायणपदव्यङ्ग्यानुभवजनितप्रीतिकारितकैङ्कर्यस्य **[1]सर्वपापेभ्यो मोक्षयिष्यामि** इत्युपबृंहिततदुभयवर्तिनमश्शब्दद्वयोक्तविरोधिनि वृत्तिसाध्यतया तदर्थं रहस्यत्रयार्थ ज्ञानस्यावश्यं सम्पादनीयतया **स्वज्ञानम्** इत्यादिवचने अन्यज्ञाननिषेधमुखेनोक्तत्वेन अभ्युदयशिरस्कानुष्ठानोपयोग्यर्थज्ञान-फलकमीमांसायाः पुरुषप्रवृत्ति योग्यत्वात्।

अथस्यात् - रहस्यत्रयस्य सुग्रहत्वे निवृत्तिफलकत्वे च मीमांसा नऽपेक्षा स्यात्। विस्तृतत्वे हि पूर्वापरपर्यालोचन सापेक्षत्वेन उपक्रमादिन्यायविचारापेक्षा स्यात्। सङ्ग्रहत्वेन सुग्रहत्वेऽपि च प्रवृत्तिफलकत्वे अदृष्टार्थ प्रवृत्तेः निष्कलङ्क-ज्ञानसाध्यतया प्रमाणान्तराऽविरोधाय न्यायविचारापेक्षा स्यादिति।

उच्यते-सुग्रहत्वेऽपि निवृत्तिफलकत्वेऽपि अनादिदुर्वासनया चेतनगतयोरेव कर्तृत्वफलित्वयोः आनुभाविकत्वेन तथैव सर्वशास्त्रेषु बोधोदयेन च, सर्वशास्त्र-विरुद्धेन प्रत्यक्षविरुद्धेन च रहस्यत्रयेण जीवात्मनः कर्तृत्वकलित्वनिषेध-स्यैवावबोधनेन आचार्यवाक्यात् न्याययुक्तार्थग्रहणरूपश्रवणमुखेनैव रहस्यत्रयार्थज्ञानस्य सम्पादनीयत्वेन, मीमांसा अपेक्षितैव। यदि च परमपुरुषार्थ लक्षणः मोक्षः स्वप्रवृत्तिसाध्यः स्यात्, तदा सर्वशास्त्रप्रत्यक्षविरोधशङ्कया रहस्यत्रयमीमास्यं स्यात्। न च तदस्ति। भगवतः जीवरक्षणार्थप्रवृत्तेः अयत्नसिद्धत्वेन, सर्वज्ञसर्व-शक्तिकृतत्वेन, निरपायत्वेन, प्राप्तत्वेन, सहायान्तरनिरपेक्षत्वेन च जीवस्य स्वरक्षणप्रवृत्तेः तद्विरुद्धस्वभावतया **जीवस्य कष्टं कर्म** इति न्यायेन दुःखवहतया च, भगवदनिष्टत्वेन च,स्वप्रवृत्तेः भगवत्प्रवृत्तिविरोधितया, मार्गान्तरानवकाशात्। प्रत्युतसर्वशास्त्रसारतमभूतरहस्यत्रये स्वप्रवृत्तेः भगवत्प्रवृत्तिविरोधित्वप्रतिपादनेन तद्विरुद्धे सर्वस्मिन् शास्त्रे अप्रामाण्यशङ्कया रहस्यत्रयमीमांसाया एव अवश्य-कर्तव्यत्वाच्च। इत्थं रहस्यत्रयस्य अवश्यं ज्ञातव्यत्वमभिप्रेत्य (अरियवेण्डुम्) इत्यनुगृहीतम्।

नाप्यसाधारणविषयाऽसम्भवः। अर्थपञ्चकस्य शारीरकशास्त्रे कुदृष्टि-मतविरोध्याकारेण निरूपितत्वेऽपि अस्मिन् शास्त्रे निरूपयिष्यमाणस्य अर्थपञ्च

१. भ.गी.१८-६६

कयाथात्म्यस्य निरूपणात्। भगवच्छास्त्रादिषु योजना भेदप्रपञ्चनेऽपि वक्ष्यमाण-सुग्रहन्यायमुखेन सङ्ग्रहेणार्थनिरूपणाभावाच्च।

न च - **वक्ष्यमाणन्यायमुखेनार्थपञ्चकयाथात्म्यनिरूपणं सर्वज्ञेन महर्षिणा शारीरक एव कुतो न कृतम्** इति वाच्यम्। [१] **इदन्तु ते गुह्यतमम्** इति गीतोक्तरीत्या वेदान्तार्थस्य गुह्यतमत्वेन [२]**आचार्यस्तु ते गतिं वक्ता** इति न्यायेन सर्वज्ञेन महर्षिणा षोडशलक्षणे अनिरूपणवत्। [३]**सर्वगुह्यतमं भूयः** इति गीतोक्तरीत्या रहस्यत्रयस्य सर्ववेदान्तसारार्थप्रतिपादकतया परमगुह्यतमतया शारीरके कुदृष्टिनिरसनाऽवसरे ग्रन्थमुखेनाऽनिरूपणो पपत्तेः।

इत्थं विषयलाभमभिप्रेत्य (रहस्यम्) इत्यनुगृहीतम्।

अत्र **रहस्यम्** इति सामान्यतःनिर्देशेऽपि, मूलमन्त्र, मन्त्ररत्नचरमश्लोका-नामेव उत्तरत्र व्याख्यानानुसारेण तत् त्रितयमेव विवक्षितम्। न चैवं **स्वायते** इति न्यायेन तिरुमन्त्रमुम् द्वयमुम् चरमश्लोकमुम् इति कुतो नोक्तमिति वाच्यम्। एतेषामेव रहस्यत्वं मुख्यम्, नान्येषाम्। अत एव मूलमन्त्रे [४]**गुह्यानां गुह्यमुत्तमम्** इति वचनमुपपद्यते इत्यभिप्रायेण विषयलाभदार्ढ्यसूचनाय सामान्यनिर्देशोपपत्तेः।

नाप्युपबृह्मणाऽसम्भवः। चरमश्लोकरूपैकमुख्योपबृह्मणमुखेन मूल-मन्त्रार्थनिर्णयसम्भवेन नानाविधविस्तृतस्मृत्याद्युपबृह्मणपञ्चकाऽनपेक्षणात्। न चैवं विशिष्टोपायोपेयत्वाऽसिद्धिः। स्वतः प्रमाणस्य मन्त्ररत्नस्यापि उपबृह्मणकोटि-निवेशाऽभ्युपगमेनैव तत्सिध्या अधिकाऽनपेक्षणात्।

किञ्च इत्यपि न। भगवन्निर्हेतुककटाक्षलब्धदिव्यज्ञानानां श्रीमत्पराङ्कु-शमुनि श्रीमन्नाथमुनिप्रभृतीनां पूर्वाचार्याणां न्यायमुक्तार्थोपदेशराजन्यश्रवणपरम्परा-मूलकत्वेन रहस्यत्रयमननफलकस्य [५] **मन्त्रं यत्नेन गोपयेत्** इत्यस्य [६]**आनुशंस्यं परो धर्मः** इत्यभिप्रायेण श्रीकृष्णपादलोकगुरुप्रणीतस्य मीमांसाशास्त्रस्य स्वोत्प्रेक्षित तर्कमूलकत्वा भावात्।

---

१. भ.गी.९-१ २. छा.उ.४-१४-१ ३. भ.गी.१८-६४
४. भ.गी.१८-२५ ५. शे.सं.१४-५० ६. रामा.सु.का.३८-४१

न चैवम्। श्रीमत्पराङ्कुशमुनिप्रभृतीनां दिव्यसूरीणां दिव्यप्रबन्धैरेव गतार्थतेति वाच्यम्। तेषां भाषारूपत्वेऽपि तात्पर्यगर्भत्वेन दुर्ग्रहत्वात्।

गाथारूपत्वेन श्लोकवत् व्युत्पन्नयोग्यतया व्यवहारशब्दवत् अव्यक्तत्वाच्च। अत एव श्रीमल्लोकगुरूणां रहस्यव्याख्यानरूपप्रतिबन्धत्रितयेनापि न गतार्थताः। तेषां मन्दमत्यनुग्रहार्थम् अतिबुद्धिमदनुग्रहार्थं संस्कृतरसिकाऽनुग्रहार्थञ्च अति संक्षिप्तातिविस्तृत संस्कृतवाक्यबहुलतयाऽनुगृहीतत्वेन मध्यस्थमतीनां अव्युत्पन्नानाञ्चानुग्रहार्थं एतत्प्रबन्धारम्भात्। अयञ्चार्थो रहस्यत्रयविषययार्चिछकादि संज्ञिक-प्रबन्धत्रयवत् अस्य प्रबन्धस्यानन्तरं प्रवर्तनादवगम्यते। किञ्च प्रबन्धान्तरानुक्तार्थोपदेशरूपत्वात् न गतार्थता। अत एव श्रीमल्लोकगुर्वभिमततरत्वाऽनुक्तार्थ-विशेषनिबन्धनत्वाभ्याम्, अयमेव प्रबन्धः कूरकुलोत्तमदासप्रभृतिभिः आचार्यैः अध्ययनाऽध्यापनाभ्यां प्रवर्तित इति। इत्थं न्यूनाधिकसंख्याव्यवच्छेदेन उपबृंहण-सम्भवमभिप्रेत्य (मून्) इत्यनुगृहीतम्।

अत एव —

**[1]स्वज्ञानं प्रापकज्ञानं प्राप्यज्ञानं मुमुक्षुभिः।**
**ज्ञानत्रयमुपादेयमेतदन्यन्न किञ्चन॥**

इति वचने मुमुक्षुभिः **स्वज्ञानं** प्रापकज्ञानं प्राप्यज्ञानञ्चोपादेयम् इत्येतावदनुक्त्वा **स्वज्ञानरूपं प्रापकज्ञानरूपं प्राप्यज्ञानरूपञ्च ज्ञानत्रयम्** इति पुनः ज्ञानोक्त्या [2]**तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्** इत्युक्तरीत्या तत्सिद्धिपेटिकागतप्रशंसाधिकरणोक्त-पशुन्यायेन स्वरूपोपायपुरुषार्थयाथात्म्यरूपरहस्यत्रयार्थज्ञानमेव प्रशस्तज्ञानम्, नान्यदिति सूचनात्। त्रित्वोक्त्यैव न्यूनाधिकसङ्ख्याव्यवच्छेदे सिद्धेऽपि अन्यन्नोपादेयमिति पुनर्निषेधोक्त्या अन्यत्किञ्चन नोपादेयमिति निषेधदृढीकृत्या च श्रुतिस्मृत्यादिषु रहस्यत्रयार्थातिरेकेण **शेषोऽन्यो ग्रन्थविस्तरः** इत्यस्यार्थस्य निरवशेषेण श्रुतिस्मृत्यादि सकलशास्त्रपरिश्रमशालिभिः श्रीशुकव्यासपराशरवाल्मीकिप्रभृतिभिः महर्षिभिः वेदपुरुषवल्लोकाऽनुजिघृक्षयाऽऽवरण भ्रमणेन गोपुरप्रवेशन्यायेन प्रदर्शित इत्यस्यार्थस्य च सूचनाच्च (अरियवेण्डुम्) इत्युक्तम्। रहस्यत्रयार्थस्यावश्यज्ञातव्यत्वम्।

---

१. पाञ्चरात्रम
२. वि.पु. ६-५-७८

**(रहस्यं मूनु)** इत्युक्तम्। न्यूनाधिकसङ्ख्यव्यवच्छेदेन ज्ञानोपायसौकर्यञ्च स्पष्टमित्यनुसन्धेयम्।

तस्मात् असाधारणाधिकारिफलीभूतप्रमिति विचारविषयवेदान्तविशेषतदुपबृह्मणसम्भवात् रहस्यत्रयमीमांसा कर्तव्येति, तदुपयोगिन्यनिबन्धनात्मकमिदं रहस्यत्रयमीमांसाशास्त्रमारम्भणीयमिति सिद्धम्।

**।। इति श्रीमच्छुद्धसत्वरामानुजाचार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे**
**अधिकार्यादिसमर्थनं नाम**
**प्रथमाधिकरणं समाप्तम्।।**

❀ ❀ ❀ ❀

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे
# उपबृंहणसमर्थनं नाम
# द्वितीयाधिकरणम्

**मू।। (२) अतिल् प्रथमरहस्यं तिरुमन्त्रम्**

पूर्वाक्षेपेणेदमारभ्यते। अत्र प्रथमविचारः पूर्ववत्।

द्वितीयस्तुरहस्यत्रयमीमांसासहकारिभूतमुपबृंहणं सम्भवति - न वेति। तदर्थं रहस्यत्रयस्य क्रमः सम्भवति नवेति।

## तत्र पूर्वपक्षः

व्याख्यानेषु वक्तृणां तावत् अज्ञानसंशयविपर्ययव्युदासेन व्याख्येयार्थं बुद्ध्वा तद्बोधविषया प्रवृत्तिरिति लोकसिद्धम्। श्रोतॄणामप्यापाततो व्याख्येयार्थ प्रतीतौसत्याम्, अप्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्तिप्रहाणेन निश्शेष तदर्थनिर्णयाय तेषु प्रवृत्तिरिति च। एवञ्च मूलमन्त्रमन्त्ररत्नयोः तावदपौरुषेयत्वाऽविशेषात् न मूलमूलिभाव प्रयुक्तक्रमः सम्भवति। नित्यनिर्दोषप्रमाणे **अर्थं बुद्ध्वा शब्दरचना** इति न्यायाऽनवतारात्।

पूर्वोत्तरभागवत् अध्ययनक्रमाभावेन प्रथममापाततो मूलमन्त्रार्थप्रतीत्यभावाच्च। मूलमन्त्रस्य [१]**ओमित्यग्रे व्याहरेत्** [२]**प्रत्यगान्दम्** इत्याद्यथर्वणोपनिषत् खण्डद्वयगतत्वात्, मन्त्ररत्नस्य कठवल्लीद्वयोपनिषद्गतत्वाच्च। अतः मूलमन्त्रमन्त्ररत्नयोः प्रथमद्वितीयरहस्यत्वमनुपपन्नम्।

इत्थं चरमश्लोकस्य तृतीयत्वमपि अनुपपन्नम्। तस्य पौरुषेयत्वेऽपि [३]**सकृदेव प्रपन्नाय** [४]**मित्रभावेन सम्प्राप्तम्** इति श्रीरामचरमश्लोकद्वयस्य [५]**स्थिते मनसि सुस्वस्थे** इत्यादि श्रीवराहचरमश्लोकद्वयस्य [६]**त्वमेवोपायभूतो**

---

१. ना.उ. २. ना.उ. ३. रामा.यु.का.१८-३३
४. रामा.यु.का.१८-३ ५. व.पु. ६. अहि.सं. ३६-३४

[१]**अनन्यसाध्ये स्वाभीष्टे** [२]**अथ पातकभीतस्त्वम्** इत्यादिश्लोकानाम् [३]**कुरुष्व-मामनुचरम्** [४]**ये च वेदविदो विप्राः** इत्यादि श्लोकानाम्, पतङ्गयोगविषय-पञ्चरात्रवचनानाञ्च उपबृह्मणत्वसम्भवात्।

शब्दतः अर्थतश्च विशिष्य प्रत्यभिज्ञाविरहात् मूलमन्त्रमन्त्ररत्नयोः सर्वजीवानां स्वस्वरूपाऽनुसन्धानरूपत्वेन, चरमश्लोकस्य चेतनविशेषं प्रति विधिरूपत्वेन च प्रत्यभिज्ञायाः असम्भवाच्च श्रीकृष्णचरमश्लोकस्योपबृह्मणरूपत्वेन रहस्यत्रयान्तर्भावकल्पनस्यामूलकत्वात्।

अतः न्यूनाधिकसङ्ख्याव्यवच्छेदासम्भवात्, बहूपबृह्मणसापेक्षत्वेन तेषु मन्दमतिभिः एकरूपार्थनिर्णयस्य कर्तुमशक्यत्वेन उपबृह्मणसहकारिविरहेण रहस्यत्रयमीमांसायाः कर्तुमशक्यत्वात्, सर्वचेतनानां सुखप्रतिपत्तिमुखेन समुज्जीवनार्थं रहस्यत्रयप्रवर्तनमनुपपन्नमिति।

## सिद्धान्तस्तु

मूलमन्त्रमन्त्ररत्नयोः अपौरुषेयत्वेन बुबोधयिषा पूर्वकवक्तृप्रवृत्तिविषयत्वा-भावेऽपि, प्रेक्षावतांश्रोतॄणां मन्त्ररत्नचरमश्लोकप्रतिपन्ननिर्हेतुकपुरुषकारत्वविशिष्ट-लक्ष्मीविशिष्टस्य भगवतः निरपेक्षोपायत्वप्रार्थनारूपार्थे, केवलपरार्थानुभवकैङ्कर्य-प्रार्थनारूपार्थे, साधनानुष्ठाननिवृत्त्यङ्गत्वरूपार्थे प्रपत्त्यनुपायत्वरूपार्थे **अहमेव मोक्षयिष्यामि** इति भगवतः स्वयमेव स्वाऽनिष्टनिवर्तनरूपार्थे च जीवगतमोक्षरूप-पुरुषार्थतत्साधनविधिरूपसर्वशास्त्रविरोधेन प्रत्यक्षविरोधेन च अयोग्यतानिश्चयेन मन्त्ररत्नचरमश्लोकार्थजिज्ञासायाः एवानुदयेन, पूर्वोक्तस्वरूपयाथात्म्यत्रयस्य मूल-मन्त्रेण सम्यक् मीमांसापूर्वकनिर्णयरूपसुशिक्षणे सति तादृशस्वरूपानुगुणोपायोपेय-प्रार्थनादियोग्यताज्ञानेन तदुभयजिज्ञासोदयेन मूलमन्त्रस्य तदुभयमीमांसा पूर्वकार्थ-निर्णयहेतुभूतनिर्णयजनकत्वेन, निरुक्तबोधक्रमविवक्षया पूर्वाचार्यैः प्रथममुपदेशात्। मन्त्ररत्नचरमश्लोकयोः श्रुतिस्मृतिरूपत्वेन क्रमेणोपदेशाच्च। रहस्यत्रयस्य अनाद्यध्यनयनक्रमाभावेऽपि उपदेशक्रमाधीनाऽध्ययनक्रमः सम्भवत्येव। अतः

१. विष्व.सं. २. वि.ध.पु.६६-७१

३. रामा.अयो.का..३१-२२ ४. म.हा.सभा.३८-२३

वेदान्तसमाख्यासिद्धभागद्वयक्रमवत्, मूलमन्त्रसमाख्यासिद्धो रहस्यत्रयक्रमोऽपि अर्थक्रमादुपपद्यते।

किञ्च देहासक्तात्मबुद्धिः इत्याद्युक्तरीत्या मूलमन्त्रेण त्याज्यषट्कस्य तत्प्रतिकोट्युपादेयषट्कस्य चाऽतिसङ्ग्रहप्रमाणतमेन मूलमन्त्रेण, पूर्वापरविरोध-प्रमाणान्तरविरोधनिबन्धनाऽप्रामाण्यशङ्का शून्यतया श्रुत्यर्थापत्तिभ्यां सुस्पष्ट-मवगमेन ज्ञातव्यान्तरराहित्येन परिपूर्णतयाऽवगमेन च द्वयप्रतिपन्न भगवदेकोपायत्व-प्रार्थनायाः परार्थकैङ्कर्यप्रार्थनायाः चरमश्लोकप्रतिपन्नत्यागस्वीकारयोश्च मूलमन्त्र-जनितत्याज्योपादेयज्ञानसाध्यतया, त्याज्योपादेयविभागज्ञानवत एव उक्तप्रार्थनाद्वयादि सम्भवज्ञानेन, तादृशयोग्यताज्ञानजनकतादृशविभागज्ञानजनकतया, मूलमन्त्रस्य प्राथम्यमुपपद्यते।

अपि च मन्त्र ब्राह्मणभागेषु परस्परप्रतिपन्नार्थ वैशद्यस्य प्रायेण प्रतिपत्तृणा-मानुभाविकतया वक्ष्यमाणन्यायेन प्रणवमन्त्रशेषयोरिव रहस्यत्रयस्य विवरण-विवरणिभावेन मन्त्ररत्नचरमश्लोकप्रतीताऽर्थाकाङ्क्षाहेतुभूतज्ञानजनकत्वेन, मूलमन्त्रमन्त्ररत्नयोः मन्त्ररत्नचरमश्लोकयोश्च क्रमः उपपद्यते।

न च - सकृदेव इत्यादिनामपि विनिगमनाविरहात् उपबृंहणत्वे, तेषां बहुत्वेन, नानाविधत्वेन च तद्विरुद्धेन चरमश्लोकमात्रेण, रहस्यमीमांसासहायभूतोपबृंह-णासिद्धिरिति वाच्यम्। पञ्चमवेदसारभूतोपनिषत्साराऽर्थसङ्ग्रहतया, चरमश्लोक-स्यैवोपबृंहणत्वरूपोपपत्तेः। कर्मयोगज्ञानयोगभक्तियोगादिविधानपूर्वकं तेषां साधना-ऽन्तरत्वभ्रमवारणाय सर्वधर्मत्यागाङ्गकशरणागतिविधिरूपत्वेन चरमश्लोकस्यैव शरणागत्यनुष्ठानकरणमन्त्ररूपद्वयविवरणत्वोपपत्तेश्च। मन्त्ररत्नोक्तानुष्ठीयमा-नावस्थशरणागतेः भगवता स्वयमेव विहितत्वेन शरण्याभिमतत्वरूपार्थविशेष-लभकतया, शरणागतेः साधनत्वव्यवच्छेदस्य शरणशब्दत्यागविध्येकशब्दोऽहं शब्दबलेन सिद्ध्या **अहमेव मोक्षयिष्यामि** इत्येवं भगवतः स्वयमेव स्वानिष्टनिवर्तनरूपोत्तरवाक्यप्रतिपन्नकैङ्कर्यप्रतिबन्धकनिवर्तनप्रकाशोक्त्या च तस्यैव तद्विवरणत्वावश्यम्भावात्। पाञ्चरात्रस्य वेदवत् अतिविततगहनगम्भीरतया तत्रत्यवचनानाम् [1] **इतिहासपुराणाभ्याम्** इति नियमित वेदोपबृंहणत्वाऽसिद्धेश्च।

१. म.भा.आ.प.१-२७३

श्रीशब्दादिव्युत्पत्तिपरप्रमाणानुगृहीते पूर्वाचार्योपदेशपरम्पराप्राप्तमीमांसान्यायानुगृहीत चरमश्लोकोपबृंहितेन स्वयमपि तादृशन्यायानुगृहीतेन मन्त्ररत्नेनैवाकारादिव्युत्पत्तिप्रमाणाऽनुगृहीतस्य स्वयमपि तादृश न्यायानुगृहीतस्याष्टाक्षरस्य निरवशेषनिष्कलङ्कार्थनिर्णयस्याव्याहतत्वाच्च।

श्रीरामचरमश्लोक निर्णीतार्थैकदेशससंवादतया, तदनुसारेण, पूर्वाचार्यव्याख्यातार्थान्तरलम्बकतया च, कालक्षेपार्थं भोगार्थञ्चानुसन्धानसम्भवाच्च।

मन्त्ररत्नचरमश्लोकयोः शब्दतः अर्थतश्च विशिष्य प्रत्यभिज्ञाविरहेऽपि, मूलमन्त्रमन्त्ररत्नप्रतिपन्नोपायोपेययोः विवक्षिताकारविशेषसमर्पकतया प्रत्यभिज्ञासम्भवेन, पूर्वोक्तप्राबल्येन च, श्रीकृष्णचरमश्लोकस्यैव उपबृह्मणरूपत्वेन रहस्यत्रयान्तर्भावस्य समूलकत्वाच्च।

अतः न्यूनाधिकसङ्ख्याव्यवच्छेदसम्भवात् बहूपबृह्मणनैरपेक्ष्येण, मन्दमतिभिरपि एकोपबृंहणार्थनिर्णयस्य कर्तुं शक्यत्वेन, उपबृंहणरूपसहकारिसम्भवात् रहस्यत्रयमीमांसायाः कर्तुं शक्यत्वेन सर्वचेतनानां सुखप्रतिपत्तिमुखेन समुज्जीवनार्थं रहस्यत्रयप्रवर्तनमुपपद्यत इति।

(अतिल् प्रथमरहस्यं तिरुमन्त्रम्) इति द्वितीय सूत्रे च (अतिल्) इत्यस्य-रहस्यत्रये इत्यर्थः। निर्धारणे सप्तमी। प्रथमशब्दस्य प्रथमयज्ञन्यायेन क्रियासापेक्षत्वात्, (अरियवेण्डुम्) इति पूर्वसूत्रे ज्ञानक्रियायाः उपात्तत्वाच्च, प्रथमशब्दः - प्रथमज्ञात व्यपरः। तेन उपबृह्मणोपबृंह्यभावहेतुभूतबोधक्रमनिबन्धनोपदेशक्रमसिद्धाऽध्ययनप्राथम्यंफलितम्। रहस्यत्वंपूर्ववत्, सर्ववेदान्तसारार्थप्रतिपादकतया परमगुह्यत्वम्। तच्च हेतुपरम्। पूर्वत्र रहस्यपदम् असाधारणविषयसम्भवरूपहेतुलम्भकम्। अत्र तु औपदेशिकाध्ययनप्राथम्यहेतुभूतबोधक्रमहेतुभूतविवरणविवरिणीभावसम्भवरूपप्रवृत्त्युपन्यस्त तृतीयहेतुलम्भकमिति विशेषः। मूलं हि - सर्वत्र सारार्थप्रतिपादकम्। मूलार्थस्य सारत्वञ्च व्याख्यानार्थनिर्णयस्य मूलार्थनिर्णयार्थत्वात्। मूलमन्त्रस्य सारार्थत्वञ्च। [1]**सर्ववेदान्तसारार्थः** [2]**सर्वमष्टाक्षरान्तस्थम्** [3]**मूलमन्त्रस्सनातनः** इत्यादि सिद्धम्। अत्र मूलमन्त्रस्य प्रथमरहस्यत्वोक्त्या, मन्त्ररत्नचरमश्लोकयोः

---

१. नार.पु. १-१३ २. वृद्ध.हा.सं.३-४५ ३. नार.सिं.पु.१८-२५

श्रुतिस्मृतिरूपयोः द्वितीयतृतीयरहस्यत्वलाभेन मन्त्ररत्नस्य **चरमश्लोकापेक्षया** सारार्थत्वेन द्वितीयत्वं, **चरमश्लोकस्य** उपबृंहणसारत्वेन तृतीयत्वञ्च **सूचितम्**।

(तिरुमन्त्रम्) इत्यत्र (तिरु) इति-**पूजोक्तिः**। **पूज्यता च** मूलमन्त्रस्य, मन्तारं त्रायत इत्युक्तस्य शब्दतः अर्थतश्च मननेन सर्वप्रकाररक्षणरूपयोगार्थस्य पूर्त्या [1]**मन्त्राणां परमो मन्त्रः** इत्युक्तं पारम्यम्। तथा हि - उच्चारणमात्रेण अदृष्टफलसाधनभूताः सर्वे मन्त्राः। स च साधनभावो मूलमन्त्रस्यापि उपासकानां जपहोमार्चनमुखेन उपासननिर्वृत्ति लक्षणकार्यकारित्वात् अव्याहतः। तत्पूर्तिस्तु तस्यैव। तस्य सर्वापेक्षितप्रदत्वस्य वक्ष्यमाणत्वात् ब्रह्मविद्यालक्षणमहाफल-निर्वर्तकत्वेन तस्य कैमुत्यसिद्धत्वाच्च। अर्थमनेन त्रिवर्गसाधनभूताः देवतापराः सर्वे मन्त्राः। तत्रापि मूलमन्त्रस्य प्राग्वत् योगार्थपूर्तिः अनुसन्धेया। अयं तु अनन्यसम्भावितो योगार्थः। [2]**देहासक्तात्मबुद्धिः** इत्युक्तरीत्या त्याज्योपादेयषट्क-ज्ञापनमुखेन पूर्वोक्तस्वरूपयाथात्म्यत्रयज्ञापनमुखेन च स्वरूपानुरूपत्यागोपादान-सम्पादनेन यावदात्मभाविनित्यकैङ्कर्यैकरसतया समुज्जीवनहेतुरयं मूलमन्त्रः इति। अयञ्च 'तिरुमन्त्रम्' इति धर्मिनिर्देशो मूलमन्त्रविषयतया **पूर्वाचार्याणां** निरूढव्यवहारसिद्धः। अनेन द्वयार्थश्रवणहेतुभूतस्वरूपयाथात्म्यज्ञानत्याज्योपादेय-विभागज्ञानहेतुतया प्रथमज्ञातव्यत्वलक्षणपूर्वोक्तक्रमनियामकन्यायद्वयं **सूचितम्**।

तस्मात् न्यायत्रयेण औपदेशिकक्रमसिद्ध्या मन्त्ररत्नचरमश्लोकयोः उपबृह्मणत्वसम्भवात् रहस्यत्रयमीमांसा कर्तव्येति सिद्धम्।

**।। इति श्रीमच्छुद्धसत्वरामानुजाचार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे**
**उपबृंहणसमर्थनं नाम**
**द्वितीयाधिकरणं समाप्तम्।।**

---

१. नार.सिं.पु.१७-२५ २. अष्टश्लोकि - ४

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे मूलमन्त्रस्य सामान्यवैभवसमर्थनं नाम तृतीयाधिकरणम्

**मू।। (३) तिरुमन्त्रत्तिनुडैय शीर्मैक्कुप्योरुम्बडि प्रेमत्तोडे पेणियनुसन्धिक्कवेणुम्**

**आद्ये अत्राधिकरणे शास्त्रारम्भफले अथ।**
**शास्त्रमारभ्यते तच्च शारीरकसमं मतम्।।**

इदं हि रहस्यमीमांसाशास्त्रं शारीरकमीमांसाशास्त्रवत् अध्यायं च तुष्ट्यात्मकम्।

तत्र मूलमन्त्रप्रकरणात्मके प्रथमेऽध्याये, सिद्धोपायाधिकारिभूत निष्कृष्टजीवस्वरूपं मूलमन्त्रप्रतिपाद्यं विशोध्यते। अत एवासौ अधिकार्यध्याय इत्युच्यते। द्वयप्रकरणात्मके द्वितीयेऽध्याये, दृष्टविधया ज्योतिष्टोमाद्यङ्गभूतफलज्ञानतत्कामना साधनज्ञान तच्छिकीर्षाप्रयत्नवत्, अदृष्टविधया सिद्धोपायाङ्गभूतं मन्त्ररत्नपूर्वोत्तरखण्डप्रतिपाद्यम् उपायोपेयप्रार्थनाद्वयं विशोध्यते। अत एव अयमङ्गाध्याय इत्युच्यते। चरमश्लोकपूर्वार्थप्रकरणात्मके तृतीयेऽध्याये,सिध्योपायात्मकमदृष्टद्वारकमोक्षसाधनं, साध्योपायात्मकशरणागतिरूपम् अदृष्टाद्वारकमोक्षसाधनञ्च सपरिकरं विचार्यते। अत एवासौसाधनाध्याय इत्युच्यते। चरमश्लोकोत्तरार्थप्रकरणात्मके चतुर्थेऽध्याये, सपरिकरसिद्धोपायफलं दृष्टाऽदृष्टरूपं विचार्यते। अत एवैष फलाध्याय इत्युच्यते।

तत्र प्रथमेऽध्याये प्रथमे पादे आरम्भपेटिकानन्तरं मूलमन्त्रव्याख्येयत्वोपयोगितया मूलमन्त्रोत्कर्षो विचार्यते। अत एवायमुपोद्घातपाद इत्युच्यते। अनन्तरं प्रणवार्थपादो द्वितीयः। नमश्शब्दार्थपादः तृतीयः। नारायणशब्दार्थपादश्चतुर्थः। अङ्गाध्याये वेद्यपादः प्रथमः। शरणागतिरूपविद्यापादो द्वितीयः।

फलप्रतिसम्बन्धिपादः तृतीयः। फलप्रार्थनापादः तुरीयः। साधनाध्याये त्याज्यपादः प्रथमः। त्यागपादो द्वितीयः। स्वीकार्यपादः तृतीयः। स्वीकारपादः चतुर्थः। फलाध्याये फलिपादः प्रथमः, निवर्त्यपादो द्वितीयः, निवृत्तिपादः तृतीयः, निष्ठापादश्चरमः। अन्ते चरमश्लोकार्थ निष्ठाक्रमनिरूपणादिति विवेकः। सङ्ग्रहश्च –

**अधिकारी साधनाङ्गं साधनं फलमित्यमी।**
**अत्राध्यायचतुष्कार्थाः पादार्थानभिदध्महे।।**

**मन्त्रप्रभावमनुराजपदत्रयार्था** वेद्यञ्च **वेदनमुपेयतदर्थने च। त्याज्यं त्यजिश्च करणे अपि सिद्धसाध्ये प्रोक्ताः क्रमात् फलिनिवर्त्य निवृत्तिनिष्ठाः** इत्येवमनुसन्धेयम्।

तत्र प्रथमपादद्वितीयाधिकरणे उपोद्घातत्वेन रहस्यपदसिद्धम् 'तिरुमन्त्रम्' इति विशेष्यनिर्देशसिद्धञ्च मूलमन्त्रवैभवं समर्थयितुं श्रुतिस्मृत्याद्यपेक्षया भगवन्मन्त्रान्तरापेक्षया सिद्धोपायापेक्षया कर्मज्ञानभक्तिप्रपत्तिरूपव्याजापेक्षया च मूलमन्त्रस्य वैलक्षण्यसिद्धये दशधाविशिष्यं समर्थयिष्यमाणं वैभवं,सामान्येन प्रथमं साध्यते। अत्रैवं संशयः - रहस्यपदविवक्षितसर्ववेदसङ्ग्रहत्वरूपम्, मन्त्रशब्दयोगार्थपूर्तिरूपञ्च वैभवं सम्भवति न वेति।

## तत्र पूर्वः पक्षः

न तावन्मूलमन्त्रस्य सर्ववेदसङ्ग्रहत्वमुपपद्यते। वेदान्तैकदेशार्थसङ्ग्रहत्व-मात्रेण, सर्ववेदार्थसङ्ग्रहत्वाऽसम्भवात् अन्यथा [1]**वेदैश्च सर्वैरहमेव वेद्यः** इति भगवतः एव वेदार्थतया भगवन्मन्त्रमात्रस्य सकलवेदसङ्ग्रहत्वापत्तेः।

[2]**ऋचो यजूंषि सामानि** इत्यादिकञ्च अर्थवादमात्रम् सर्ववेदार्थभूत भगवत्परत्वात् - अष्टाक्षरः प्रशस्त इति। एतेन [3]**मन्त्राणां परमो मन्त्रः** इत्यादिकमपि व्याख्यातम्। अन्यथा **न गायत्र्याः परो मन्त्रः** इत्यादि विरोधात् मूलमन्त्रमन्त्ररत्न-मन्त्रराजसमाख्यादीनाम् अन्योन्यविरोधाच्च।

न च [4]**मन्त्रं यत्नेन गोपयेत्** इत्यनेन रहस्यत्वसिद्धिः।

१. भ.गी.१५-१५ २. वृद्ध.हा.सं.३-४५ ३. नार.सिं.पु.१७-२५ ४. शेष.सं.१४-५०

तस्य मन्त्रसामान्यविषयत्वेन मूलमन्त्रे विशेषाभावात्। तस्य सम्पदायुर्वृद्ध्यर्थं गुरुप्रकाशनमन्त्रगोपनरूपकाम्यविधिपरत्वाच्च। अन्यथा **आवृणोति विवृणोति वीक्षितः** इति न्यायेन गुणग्रहणनिबन्धनगोपनस्य स्वतः प्राप्तत्वेन विधिवैयर्थ्य-प्रसङ्गाच्च।

एतेन **मन्त्रे तद्देवतायाञ्च** इत्यादिना भक्तिविधिबलात् मन्त्रपदयो-गार्थपूर्तिरिति प्रत्युक्तम्। तस्यापि मन्त्रसामान्यविषयत्वात्। गुणज्ञाननिबन्धनभक्तेः विधानायोग्यत्वाच्च। तस्य **भज - सेवायाम्** इत्यनुशासनानुरोधेन **मन्त्रे तीर्थेद्विजे दैवे विश्वासः फलदायकः** इत्यादि सिद्धमानससेवारूपविश्वासविधिपरत्वाच्च। अन्यथा महनीयविषयप्रीतिरूपभक्तिविधिपरत्वे,अन्येषामपि साधनत्वाविशेषेण प्रथमसाधनत्वेन प्रशंसानुपपत्तेश्च।

किञ्च-साधनानुष्ठानफलकज्ञानजननमुखेन केवलपरार्थानुभवकैङ्कर्यान्व-यलक्षणरूपयोगार्थोत्कर्षो बाधित एव। श्रीरामानुजसिद्धान्तनिष्ठानिष्ठेष्वेव **मोक्षो-**पायानुष्ठानरूपशरणागत्यनुष्ठानस्य दरीदृश्यमानत्वात्। ते च [१]**अष्टाक्षराख्यमनु-राजप्रदत्रयार्थ निष्ठाम्** इति जोघुष्यन्ते। अनुगृहीतञ्च श्रीमद्वरवरमुनिदिनचर्यायां वा श्रीदेवराजाचार्यैः [२]**दीर्घं प्रणमतो मम। साक्षात्फलैकलक्ष्यत्वप्रतिपत्ति-पवित्रितम्। मन्त्ररत्नं प्रयच्छन्तम्** इति। अत्र **तत्प्रार्थनानुसारेण संस्कारान् सन्निधाय मे** इति मन्त्रसंस्कारस्य पृथगुक्ततया पुनः **मन्त्ररत्नं प्रयच्छन्तम्** इति मन्त्ररत्नप्रदानं शरणागत्यनुष्ठानकरणमन्त्रभूतद्वयोच्चारणं पूर्वकम् **गुरुणा योऽभि-मन्येत** इत्यादि परगतस्वीकाररूपं शिष्योद्देशेन आचार्यकर्तृकं शरणागत्यनुष्ठानमेव। तच्च [३]**साक्षात्फलैकलक्ष्यत्वप्रतिपत्तिपवित्रितम्** इत्युक्तम्। तथा मोक्षोपायत्वा**नु-सन्धानपूर्वकं** तदुपायभूतशरणागत्यनुष्ठानमेवेति सिद्धम्। तस्मात् रहस्यपदविवक्षितम् (तिरुमन्त्रम्) इति विशेष्यपदनिर्देशसिद्धञ्च वैभवं न सम्भवतीति।

## सिद्धान्तस्तु

मूलमन्त्रस्य सकलवेदसङ्ग्रहत्वमुपपद्यत एव। [४]**सर्वमष्टाक्षरान्तस्थम्** इति वचनात् [५]**गुह्यानां गुह्यमुत्तमम्** इति वचनात्। मूलमन्त्रसमाख्याबलाच्च।

१. य.रा.विं.-५ २. पू.दि. -२० ३. पू.दि.-२७
४. वृद्ध.हा.सं. ३-४५ ५. भ.गी. १८-२५

न च एकदेशसङ्ग्रहस्य सर्वसङ्ग्रहत्वाऽसम्भवः। एतद्वचनबलादेवमूलमन्त्रार्थव्यतिरिक्तार्थाना श्रुतिस्मृत्यादि प्रपञ्चितानां तत्रत्यमूलमन्त्रार्थविवरणशेषकल्पनेन, मूलमन्त्रार्थस्यैव सकलवेदपरमतात्पर्यविषयत्वोपपत्तेः। न च - सकलवेदवेद्यभगवत्स्वरूपपराणां सर्वेषां भगवन्मन्त्राणां सर्ववेदसङ्ग्रहत्वापत्तिः। एतद्वचनबलादेव सर्ववेदपरमतात्पर्यविषयीभूतज्ञातव्यसकलार्थप्रतिपादकतया सर्ववेदसङ्ग्रहत्वं मूलमन्त्रस्यैवेति कल्पनीयत्वात्,तस्य च विशिष्यनिरूपयिष्यमाणत्वात्। न च अर्थवत्त्वे सम्भवति असदर्थवादकत्वं न्याय्यम्।

इत्थम् [1]**मन्त्राणां परमो मन्त्रः** [2]**न मन्त्रोऽष्टाक्षरात्परः** इत्यादिवचनलाभाच्च, मन्त्रशब्दयोगार्थपूर्तिरपि मूलमन्त्रस्यैव उपपद्यते। तत्र हि **मन्त्राणां परमो मन्त्रः** इत्यत्र निर्धारण षष्ठ्या, सकलेतरमन्त्रापेक्षया मूलमन्त्रस्यैव मन्त्रशब्दयोगार्थे पारम्यमुक्तम्। समभिव्याहृतविशेषणस्य विधेयापेक्षया विशेषणत्वे सम्भवति, उपलक्षणत्वस्याऽन्याय्यत्वात्। तस्य च पारम्यस्यानुपदमेव व्युत्पादयिष्यमाणत्वात्। एतदेव दृढयति **गुह्यानाम्** इति। गोपनाधिक्यरूपकार्यबलात योगार्थः पूर्तिलक्षणातिशयो दृढ इति तात्पर्यम्। प्रकाशन्तरेणापि गुह्यतमत्वमाह- **पवित्राणाम्** इति। अत्र **पवित्राणां मध्ये पवित्रम्** इति नार्थः। पवित्राणामिति निर्धारणषष्ठ्या पवित्रपदनिर्दिष्टपवित्रत्वरूपविधेयान्वयोक्तौ व्याघातात्। मन्तारं त्रायत इत्यनेन इष्टप्राप्त्यनिष्ठनिवृतिहेतुत्वलक्षणरक्षणोक्त्या, अत्र पापनिवर्तकत्वातिशयोक्तौ पौनरुक्त्याच्च। अत एव उत्तममिति पदानुषङ्गोऽपि न कल्पनीयः।

तथा च [3]**कृष्णानुस्मरणं परम्** इत्युक्तरीत्या स्वेतरपावनवस्त्वन्त्यय प्रतिबन्धक पापनिवर्तकत्वलक्षणातिशयोऽपि गोपनातिशये मूलमित्यभिप्रेतम्। विशिष्यचेदं व्युत्पादयिष्यते। मूलमन्त्र इति विशेष्यनिर्देशेन गुह्यतमत्वे तृतीयहेतुर्विवक्षितः। अष्टाक्षरस्य मूलत्वं सनातनमित्यभिप्रायेण सनातनः इत्युक्तम्।

किञ्च **मन्तारं त्रायते** इत्युक्त रक्षणस्यापि [4]**नित्यकिङ्करः प्रहर्षयिष्यामि** इत्युक्त नित्यकैङ्कर्यरसपर्यवसायितया मूलमन्त्रस्य मन्त्रत्वमपि सनातन-

---

१. नार.सिं.पु.१७-२५  २. नार.सिं.पु.१८-३२

३. विष्णु.पु.२-६-३९  ४. स्तोत्ररत्नम् ४६.

मित्यभिप्रायेण **मूलमन्त्रः सनातनः** इत्युक्तम्। तथा च [1]**ऋचो यजूंषि समानि** इत्युक्तरीत्या ऋगादिवेदचतुष्टयस्य **यच्चान्यदपि वाङ्मयम्** इत्युक्त स्मृतीतिहास-पुराणपञ्चरात्र कर्मब्रह्ममीमांसासूत्राणाञ्च मूलमन्त्रविवरणतया श्रोतॄणां सर्वाध्यात्म-शास्त्रार्थबोधावसरे मूलमन्त्रार्थगोचरविशदप्रतीत्युत्पत्त्या अष्टाक्षरस्य विशदप्रतीति-विषयार्थकत्वलक्षणमूलत्वम्, अतीतानागतसर्वाध्यात्मशास्त्रप्रवृत्तिकालीनतया सनातनम्। मन्त्रान्तराणां तु न तथेति एवं रूपमूलत्वमपि गुह्यतमत्वे मूलमितिभावः।

इत्थमस्य वचनस्य गुह्यतमत्वोपपत्तितात्पर्यातिशयात् अर्थवादत्वं दूरोत्सारितम्। एवं [2]**भूतोर्ध्वबाहुः** इत्यादावपि ऊर्ध्वबाहुत्वोक्त्या, सत्यशब्दोक्त्या, पुत्रशिष्योक्त्या, **श्रुणुत** इत्युक्त्या च, असदर्थवादत्वं दूरोत्सारितम्। न च **न गायत्र्याः परो मन्त्रः** इत्यादिविरोधः। तत्तदसाधारणोत्कर्षविशेषविवक्षयाऽन्य-निषेधासम्भवात्। न च प्रकृतेऽपि तत्प्रसङ्गः। केवलपरार्थानुभवकैङ्कर्य-परमपुरुषार्थ तत्साधनसिद्धोपाय तद्व्याजभूताऽऽत्मज्ञानऽप्रतिषेधाद्यर्थप्रतिपादकतया, अपेक्षतयावदर्थप्रतिपादकतया च प्रकृते असाधारणोत्कर्षस्य सर्वोत्कर्षपर्यवसानात्। एतेन मूलमन्त्रमन्त्ररत्नमन्त्रराजसमाख्यादीनां मिथो विरोधोऽपि निरस्तः। श्रीमल्लक्ष्मी-नृसिंहदिव्यमङ्गलविग्रहतद्दिव्यात्मगुणतद्दिव्यचेष्टितादिप्रतिपादकत्वलक्षणाऽ-साधारणोत्कर्षविशेषविवक्षया मन्त्रराजत्वोपपत्तेः। विशिष्टोपायोपेयत्वादि-प्रतिपादकतया परमपुरुषार्थस्वरूपानुरूपतत्साधनाद्यपेक्षितयावदर्थप्रतिपादकतया च मन्त्ररत्नत्वोपपत्तेः। पूर्वोक्तरीत्या मूलमन्त्रगतमूलत्वरूपोत्कर्षस्य सामान्यतः प्रमाणप्रतिपन्नस्य मन्त्ररत्नापेक्षयापि उत्कर्षरूपतया योगार्थपूर्तेः सर्वोत्कर्षपर्यव-सानोपपत्तेश्च।

इत्थं - सर्ववेदपरमतात्पर्यविषयीभूतयावदर्थप्रतिपादकत्वस्य सामान्यतः प्रमाणसिद्धत्वादेव [3]**मन्त्रं यत्नेन गोपयेत्** इति विधिरुपपद्यते। तत्र कृतज्ञत्वनिबन्ध-नगुरुप्रकाशनस्य मन्तारं त्रायते इत्युक्तोत्कर्षज्ञाननिबन्धनगोपनस्य च स्वतः प्राप्तस्याकरणे अनिष्टापत्तेरेव प्रतीयमानत्वात्। अन्यथा वाक्यभेदप्रसङ्गात्। सम्पदायुष्कामः इत्यध्याहारापत्तेश्च।

१. वृद्ध.हा.सं.३-४५ २. नार.सि.पु.१८-२५ ३. शेष.सं.१४-५०

**न च**-मूलमन्त्रे विशेषालाऽभः। अन्धकारनिरोधित्वलक्षणगुरुत्वहेतुक-प्रकाशनोक्तेः, त्राणहेतुकगोपनोक्तेश्च विपक्षे बाधकोक्तिबलेनाऽनुवादत्वे अर्थाबाधे च सिद्धे, मूलमन्त्रस्य [1]**गुह्यानां गुह्यमुत्तमम्** इत्युक्तस्य गोपनोत्कर्षेण **गुणोत्कर्षसिद्धेः** दुर्वारत्वात्।

इत्थञ्च **मन्त्रे तद्देवतायाञ्च** इत्यादिना भक्तिविधिबलात् मन्त्रपदयोगार्थ-पूर्तिसिद्धिरपि दुर्वारा। **न च** - तस्यापि सामान्यविषयत्वात् मूलमन्त्रे विशेषालाभः। मन्त्रे तद्देवतायाम् इत्यादौ शब्दार्थोभयानुसन्धानेन त्राणरूपमन्त्रपदप्रतिपन्नगुणस्य गुणविग्रहव्यापारविशेषरूपमन्त्रप्रतिपाद्याकारलक्षणोत्कर्षस्य, तादृशमन्त्रप्रदानेन गुरुत्वरूपोत्कर्षस्य चानुसन्धानेन स्वतः प्राप्तायाः महनीयविषयप्रीतेः मन्त्रस्वरूप-श्रवणदशामारभ्य श्रवणमननपर्यन्तमनुवृत्तायाः मन्त्रार्थनिर्णयसाधनत्वम्।

तत्रापि सहकार्यन्तरसम्पादकतया साधनेषु मुख्यत्वलक्षणं प्राधान्यम्। इदञ्च-[2]**यस्य देवे पराभक्तिः, मन्त्रतीर्थे** इत्यादि प्रमाणसिद्धम्।

इत्येवमज्ञातज्ञापनरूपविधिमुखेन अर्थवत्त्वे सम्भवति **सा हि प्रथम-साधनम्** इत्यस्यासदर्थवादत्वस्य विश्वासरूपा प्रसिद्धार्थविषयाऽप्रवृत्त प्रवर्तनरूपस्य चाऽन्यायतया, मन्त्रसामान्ये योगार्थभूतोत्कर्षनिबन्धनभक्तिरूपार्थसत्तानिश्चये सति [3]**गतिरष्टाक्षरो नृणामपुनर्भवकाङ्क्षिणाम्** इत्यत्र **गम्यते इति गतिः** इति व्युत्पत्त्या परमपुरुषार्थाऽभ्यर्थिजनसार्थ सेव्यत्वलाभेन, मूलमन्त्रे भक्त्युत्कर्षसिद्ध्या गुणोत्कर्षसिद्धेः दुर्वारत्वात् **सर्ववेदान्तसारार्थः संसारार्णवतारकः** इति पूर्वार्थे प्रापकत्वस्योक्तत्वात्, गतिशब्दः - प्राप्यपर एव। **नृणाम्** इत्यनेन संसारार्णवतारणे कस्याप्यनधिकारः, गत्यन्तरञ्च नास्तीति गम्यते।

**अपुनर्भवकाङ्क्षिणां** गतिः इत्युक्तरीत्या **क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम्** इत्युक्त्या साधनमेव भोग्यमिति गम्यते। भोग्यता हेतुभूतं गुणद्वयं पूर्वार्थे विवक्षितम्। तत्र **सर्ववेदान्तसारार्थः** इत्यनेन **मूलमन्त्रः सनातनः** इत्युक्तं विवृतम्। **संसारार्णवतारकः** इति **मन्त्राणां परमो मन्त्रः** इत्येतद्विवृतम्।

१. भ.गी.१७-२४ २. श्वेता.६.२३

३. नार.पु.१-१३

**पवित्रञ्च पवित्राणाम्** इत्येतदपि गर्भितम्। कर्माद्युपायसहकारित्वरूपपरम्परा-तारकत्वस्यापि लाभात्। अतः अष्टाक्षरस्य परमपुरुषार्थवत् परमभोग्यत्वे हेतुपरस्य पूर्वार्थस्य असदर्थवादत्वशङ्कापि न सम्भवतीति सिद्धम्।

किञ्चेत्यदिना सिद्धोपायप्रार्थनारूपस्य वा,तत्स्वीकाररूपस्य वा आत्मज्ञानत्वेनाऽप्रतिषेधत्वेन, उपायेच्छात्वेन, रक्ष्यत्वानुमतित्वेन च मुक्तिव्याज-भूतप्रार्थनारूप प्रपत्तिलाभस्य वा उपायानुष्ठानत्वे जोघुष्यमाणत्वात्। स्वयं प्रयोजनभगवत्प्रीत्यर्थत्वे सति मुक्तौ दृष्टविधया प्रसङ्गादुपकारकत्वलक्षण-व्याज्यत्वरूपोपायताश्रयभूतशरणागति लाभस्य तथात्वसम्भवाच्च। निरुक्तव्याजत्वं विना शरणागतेः अदृष्टद्वारकफलसाधनत्वलक्षणकरणतया, मुख्यानुष्ठानस्य पूर्वोक्तस्वरूपयाथात्म्यप्रतिपादनरूपगुणभक्त्यभावकृतजीवगतकर्तृत्वभोक्तृत्व-गोचरानादि दुर्वासनामूलकमन्त्रार्थभ्रमनिबन्धनत्वात्, यथावदर्थज्ञाननिबन्धनभक्तेरेव निष्कलङ्कवाक्यार्थज्ञानोदयहेतुत्वात् यथावदर्थापातज्ञानसद्भावेऽपि गुणविशेषाऽ-नुगुणभक्तिविशेषभावे निष्कलङ्कवाक्यार्थज्ञानाऽनुदयाच्च अत्र [१] **औपनिषदपरम-पुरुषवरणीयताहेतुगुणविशेषविरहिणाम्** इत्यादि श्रीभाष्यसूक्तिः, तद्याख्यानश्रुत-प्रकाशिकासूक्तिश्चानुसन्धेया। [२]**साक्षात्फलैकलक्ष्यत्व** इत्यादि सूक्तावपि शिष्योद्दे-शेनाऽऽचार्यकृतमन्त्ररत्नकरणक शरणागतेः पूर्वोक्तचतुर्विध व्याजत्वमेव विवक्षित-मिति न कश्चिद्दोषः।

तस्मात् भक्तिगोपनविधिबलेन सामान्यतः स्वरसतः प्रमाणप्रतिपन्नगुणो-त्कर्षस्य सत्तानिश्चयदाढर्येन मोक्षोपायानुष्ठानस्य चतुर्थान्यथासिद्धत्वेन च रहस्यपदविवक्षितं च वैभवमुपपद्यत इति सिद्धम्। (तिरुमन्त्रत्तिनुडैय) इत्यादि तृतीयसूत्रे मूलमन्त्रत्तिनुडैय इति पुनः कण्ठतो मूलमन्त्रस्य उत्कर्षसामान्याऽनुयोगितया निर्देशः, उत्कर्षेषु निवर्तकज्ञानजनन मुखेन, परार्थानुभवकैङ्कर्यहेतुत्वरूप-योगार्थोत्कर्ष एव सारभूतोत्कर्ष इति द्योतनार्थः।

अत एव (प्रथम रहस्यम् तिरुमन्त्रम्) इत्युक्त्वा (अदिनुडैयशीमैक्कु) इति वाक्यशैली न परिगृहीता ।

---

१. श्रीभाष्ये - जिज्ञासाधिकरणे २. पू.दि. २७

(शीमैक्कु) इति वाक्यनिर्देशेन **मन्त्राणां** परमो **मन्त्रः** इत्याद्युक्तं पञ्चविधमुत्कर्षसामान्यमत्र **समर्थ्यते**। दशविधोत्कर्षविशेषसमर्थनमुत्तरत्रेति न पौनरुक्त्यमिति सूचितम्। अत एव (तिरुमन्त्रत्तुक्कुप्पोरुम्बदि) इति नाऽनुगृहीतम्। (प्रेमत्तोडेपेणि) इत्यनेन पदद्वयेन भक्तिविधित्वात्, गोपनविधिबलाच्च, उत्कर्ष समान्योक्तेः अर्थवादत्वशङ्का नास्तीति सूचितम्। (अनुसन्धिक्ककवेणुम्) इति-निर्बन्धोक्त्या **मन्त्रं यत्नेन गोपयेत् त्रिषु भक्तिस्सदा कार्या** इति विधिद्वयं सूचितम्। तेन च प्रकारान्तरेणऽनुसन्धानस्य निषिद्धत्वलाभात्। (प्रेमत्तोडे) इति पदविवक्षितस्य - **मन्त्रार्थः सदानुभाव्यः** इत्यभिनिवेशस्याऽभावे, निष्कलङ्क-मन्त्रार्थज्ञानरूपस्यापूर्वेष्टस्य लाभो न स्यात्। (पेणि) इति पदविवक्षितस्य **मन्त्रोऽनधिकारिणा न श्रोतव्यः** इत्यभिनिवेशस्याऽभावे सम्प्रदायशब्द-विवक्षितस्य लब्धेष्टस्य परिपालनं स्यात्। अतः योगक्षेमार्थं **भक्तिगोपने आवश्यके** इति सूचितम्। (अनुसन्धिक्ककवेणुम्) इति - (**तिरुमन्त्रत्तैसार्थमागनिर्णयिक्कवेणुम्**) इत्यर्थः। (शीमैक्कुप्पोरुम्बडि) इत्यनेन मोक्षोपायानुष्ठानस्य पूर्वोक्तचतुर्विधा-न्यथासिद्धिः सूचिता। [1]**मन्त्राणां परमो मन्त्रः** इत्युक्त प्रभावानुगुण्येन मन्त्रार्थानु-सन्धानोक्तौ स्वरक्षणे स्वान्वयनिषेधरूपनमश्शब्दार्थानुसन्धाने सति, मोक्षहेतु-निवर्तकज्ञानजनकत्वरूपोत्कर्षो लभ्यत इति सूचनात्।

**मू।। (४) मन्त्रत्तिलुम्, मन्त्रत्तुक्कुल्लीडान वस्तुविलुम्, मन्त्रप्रदनान आचार्यन्पक्कलिलुम्, प्रेमम् कनक्कवुण्डानाल् कार्यकरमावदु।**

ननु [2]**प्रियतम एव हि वरणीयो भवति** इति श्रीभाष्योक्तरीत्या भक्तिप्रीतभगवत्कटाक्षविशेषेणैव [3]**किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने** इत्यादिरीत्या सर्वफलसिद्धेः मन्त्रभक्तिर्विफला। **कथञ्च मन्त्रभक्तेः निष्कलङ्क-मन्त्रार्थ ज्ञानलक्षणकार्यकरत्वम्। अन्यथा सिद्धान्वयव्यतिरेकसहकृत प्रत्यक्षा-भावात्** इति शङ्कायाम् न हि **वचनविरोधे न्यायः** प्रभवति न हि **वाचनिकेऽर्थे युक्तयः क्रमन्ते, किं हि वचनं न कुर्यात्** इत्यभिप्रेत्य मन्त्रे **तद्देवतायाञ्च** इत्यादि वचनार्थमनुसन्धाय तृतीयाधिकरणे द्वितीयसूत्रमाह - (**मन्त्रत्तिलुमित्यादि**)।

---

१.नार.सिं.पु.१७-२५ २,३. श्रीभाष्ये - जिज्ञासाधिकरणे

अत्र मन्त्रित्तिलुम्) इत्यनेन ज्ञातव्यसकलार्थप्रतिपादकत्वरूपप्रेमाधिक्यहेतुः विवक्षितः। (उल्लीडानवस्तुविलुम्) वाच्यभूतवस्तुनीत्यर्थः। (उल्लीडान) इत्यन्तरङ्गत्वोक्त्या लक्ष्यार्थव्यावर्तनेन शब्दस्वरसिद्धत्वम् विवक्षितम्।

वस्तुपदम्-प्रमेयपरम्। [१]**किञ्चिदस्ति किल वस्तुनिर्मलम्** [२]**परं यद्वस्तूक्तम् वस्तुलक्ष्मीधरं विदुः,** [३]**वस्तुपैतामहं धनम्** इत्यादिवत्। तथा च-प्रकृते वस्तुविलुम् इत्यनेन शेषित्वशरण्यत्वप्राप्यत्वरूपप्रेमाधिक्यहेतुभूताऽऽकारप्रयुक्त ईश्वरो विवक्षितः। **मन्त्रप्रदनान आचार्यन्** इत्यनेन, आचार्यस्य मन्त्रप्रदत्वाभावे, मन्त्रप्रदस्य आचार्यत्वाभावे च, मन्त्रस्याऽकार्यकरत्वं विवक्षितम्। अत्र -

**तन्मन्त्रं ब्रह्मणाधीनम् यदृच्छयाश्रुतोमन्त्रः,**
[४]**आचार्याद्धैवविद्या विदिता साधिष्ठं प्रापत्।**
**अनाचार्योपदिष्टा हि विद्येयं नश्यति ध्रुवम्।**
**न प्रसीदति वै विद्या विना सदुपदेशतः।।**

इत्यादिकंमनुसन्धेयम्। मन्त्रप्रदशब्देन प्रकृते पूर्वोक्तस्वरूपयाथात्म्यत्याज्योपादेय-विभागपरिज्ञानपूर्वकमन्यप्रयोजनतया सार्थमन्त्रोपदेष्टत्वं विवक्षितम्। आचार्यशब्देन **आचिनोति हि शास्त्रार्थान्** इति वचनार्थो विवक्षितः। प्रेमशब्देन भक्तिशब्दो विवृतः। **न सेवामात्रं भक्तिशब्दार्थः इत्यर्थः** (कनक्क उण्डानाल्) इत्येननसदा कार्येति शब्दार्थः उक्तः। (कनक्क) - भारेण इत्यर्थः। (उण्डानाल्) इति । **यदि** शब्देन प्रेमाधिक्याभावे कार्यसिद्धिः नास्तीति व्यतिरेकः सूचितः।

अनेन **सा हि प्रथमसाधनम्** इत्युक्तकरणतासिद्धाऽन्वयव्यतिरेकाऽ-नुविधानं सूचितम्। (कार्यकरमावतु) कार्यकरं भवतु। [५]**न जातु हीयते** इत्युक्तरीत्या निष्कलङ्कमन्त्रार्थज्ञानरूपकार्यप्रच्युतिः कदापि न भवतीति भावः। [६]**नम इत्येव वादिनः** [७]**नमो नारायणाय वेनृ** - (पल्लाण्डुम्-एत्तुवर्) **स यो ह वै तत्परम्** [८]**ब्रह्मवेद ब्रह्मैव भवति** इत्यादिकमत्रानुसन्धेयम्।

---

१. व.रा.स्त.९ २. व.रा.स्त.१४ ३. छा.उ.४-९-३
४. स्तो.र.२८ ५. म.भा.शा.प.३३७-४० ६. तिरुप्पल्लाण्ड-१२

(प्रेमम् कनक्कवुण्डानाल् कार्यकरमावतु) इति सिद्धवन्निर्देशेन **सा हि प्रथमसाधनम्** इति, हि शब्दद्योतिता [1]**यस्य देवे** पराभक्तिः इत्यादिप्रमाणप्रसिद्धिः सूच्यते। देवभक्तिवत् गुरुभक्तिवच्च **मन्त्रभक्तिरपि देवताप्रसादातिशयकरी** इति **मन्त्रे तद्देवतायाञ्च** इति वचनतात्पर्यमिति भावः। (कार्यकरम्) इति सामान्यनिर्देशेन मन्त्रार्थनिर्णयसाधनमननतत्कारणश्रवणतत्प्रयोजकव्यापार लक्षण-कार्यजातं विवक्षितम्। तेन **सा हि प्रथमसाधनम्** इत्युक्तं प्राथम्यं विवृतमित्यनु-सन्धेयम्।

**।। इति श्रीशुद्धसत्वरामानुजाचार्यविरचिते रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे मूलमन्त्रस्य सामान्यवैभवसमर्थनं नाम तृतीयाधिकरणं समाप्तम्।।**

१. श्वेता.उ.६-२३

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे मूलमन्त्रशब्दयोगार्थोत्कर्षसमर्थनं नाम चतुर्थाधिकरणम्

**मू।। (५) संसारिकल् तङ्गलैयुम् ईश्वरनैयुम् मरन्दु ईश्वरकैङ्कर्यत्तैयुम् इलन्दो उलन्दो मेन्गिर इलवुमिन्रिक्के संसार माकिर पेरुङ्गडलिले- विलुन्दुनोवुपड सर्वेश्वरन् तन् कृपैयाले इवर्कल् तन्नै यरिन्दु करैमरम् शेरुम्बडि, तानेशिष्यनुमाय् आचार्यनुमाय् निन्नुतिरुमन्त्रत्तैवेलियिट्टरुलिनान्**

**सामान्यवैभवं सिद्धं विशिष्यैतत्प्रसाध्यते।**
**तत्राप्यत्रिमं तत्तु चतुर्थे सम्प्रदृश्यते।।**

अत्र मूलमन्त्रस्य सामान्येन सर्वोत्कर्षः सम्भवति-नेति प्रथमविचारः। तदर्थं परमपुरुषार्थलक्षणाऽभ्युदयशिरस्काननुष्ठानफलकाऽर्थज्ञानजनकत्वलक्षण-मप्रतिमवैभवं सम्भवति - न वेति।

## तत्र पूर्वपक्षः

शास्त्रमात्रस्य निवर्तकज्ञानजननमुखेन प्रयोजनपर्यवसानं बाधितम्। [१]**शास्त्रफलं प्रयोक्तरि,** [२]**कर्ता शास्त्रार्थवत्त्वात्** इति सूत्रद्वयविरोधात्। तस्मिन् सूत्रद्वये जीवस्यैव साधनानुष्ठातृत्वं, फलभोक्तृत्वञ्च साधितम्।

**एवञ्च कर्ताऽहम् भोक्ताऽहम्** इत्याद्यनुभवोऽपि सर्वसाक्षिकोऽनुगृहीतो भवति। न च - अज्ञानादेव संसारिणां साधनानुष्ठानं फलभोगश्चेति वाच्यम्। जीवात्मनः स्वाभाविक सांसारिकप्रवृत्तिकर्तृताज्ञानस्य भ्रान्तिरूपत्वेऽपि प्रकृतिसंसर्ग-कृतपरमात्माधीन सामान्यकर्तृता ज्ञानस्याऽतथात्वात्।

न च - तद्ज्ञानं साधनानुष्ठानादिविरोधीति शङ्कितुमपि अशक्यम्। न च - जीवस्वरूपाज्ञानप्रयुक्तं साधनानुष्ठानादिकम्। देहादिविलक्षणत्व अजडत्व

---

१. पू.मी.सू.३-७-१८ २. ब्र.सू.२-३-३३

आनन्दरूपत्वनित्यत्व अणुत्वनिर्विकारत्वज्ञानाश्रयत्व ईश्वरनियाम्यत्वधार्यत्वशेषत्वादि जीवगतस्वाभाविकाकारज्ञानस्य साधनानुष्ठानाद्यविरोधित्वात्। अत एव ईश्वर-स्वरूपाज्ञानप्रयुक्तं तदिति निरस्तम्। चिदचिद्विलक्षणत्व अजडत्वविभुत्वनियन्तृत्व-धारकत्वशेषित्वादि ज्ञानेऽपि तत्सम्भवात्। शेषत्वादि ज्ञाने शेषित्वादिज्ञानस्य पृथगवक्तव्यात्वाच्च।

अत एव प्राप्याकारविशिष्टब्रह्मस्वरूपाज्ञानप्रयुक्तं तदित्यपि अपास्तम्। **[१]वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः। श्रीसहायो जनार्दनः** इत्यादि प्रतिपन्नप्राप्याकारविशिष्टज्ञानस्य तद्विरोधित्वाभावात्। एतेन प्रापकाकारविशिष्टोपाय-स्वरूपज्ञानं तथेत्यपि निरस्तम्। भक्तिप्रपत्तिप्रसन्नत्वलक्षणप्रापकाकारविशिष्टानु-सन्धानस्य साधनानुष्ठानानुकूलत्वात्।

किञ्च-जीवस्वरूपादिज्ञानस्यादृष्टारिमोक्षसाधनत्वे निर्हेतुकत्वभङ्गः। दृष्टविधया अविद्या निवृत्तिरूपमोक्षसाधनत्वे कुदृष्टिमतप्रवेशापत्तिः। **तत्त्वज्ञाना-न्मोक्षः** इति च सर्वसम्प्रतिपन्नम्।

इत्थं पुरुषार्थस्वरूपज्ञानं तद्विरोधीत्यपि अयुक्तम्। शारीरकचतुर्थाध्याय-प्रतिपाद्य ब्रह्मविद्या तत्पूर्वोत्तराघाश्लेषविनाशप्राणोत्क्रमण सूक्ष्मशरीरानुवृत्त्यर्चिरादि-मानवब्रह्मप्राप्तिस्वरूपाविर्भावभोगमात्रसाम्यऽपुनरावृत्तिरूपाणां फलानां वैलक्षण्य-ज्ञानस्य तद्भोगेच्छया तत्साधनानुष्ठानानुगुणत्वात्।

तथा कैङ्कर्यरूपपुरुषार्थस्वरूपज्ञानं तथेत्यपि विरोधाभावादेव निरस्तम्। कैङ्कर्यस्य मुख्यपुरुषार्थत्वाभावाच्च। प्रतिसम्बन्धिप्रीत्यर्थतयैव किङ्करवृत्तेः दर्शनात्। विषयप्रवणस्य विषयप्रीत्यर्थमेव शेषवृत्तेः दर्शनाच्च। न हि किङ्करस्य वृत्त्यभावे पुरुषार्थहानिरनुभूयते। **यावता कष्टं कर्म** इति न्यायेन वृत्त्यभाव एव पुरुषार्थतया अनुभूयते। अनुगृहीतञ्च जिज्ञासाधिकरणसिद्धान्तभाष्ये - **यतः सुखमेव पुरुषानुकूलम्** इति।

एवं विरोधिस्वरूपज्ञानं साधनानुष्ठानादिविरोधीत्यपि न युक्तम्। प्रकृति-सम्बन्धस्य भगवत्प्राप्तिविरोधित्वेऽपि **शरीरमाद्यं खलु धर्मसाधनम्, मन एव मनुष्याणां कारणं बन्धमोक्षयोः** इत्यादिरीत्या साधनानुष्ठानानुगुणत्वात्।

---

१. शीवे - वायव्ये

अनुगृहीतञ्च [1]**सूक्ष्मन्तु तदर्हत्वात्** इति सूत्रभाष्ये **तस्याव्यक्तपरिणाम विशेषस्य शरीरस्य रथवत् पुरुषार्थसाधनप्रवृत्त्यर्हत्वात्** इति।

न च संसारसागरं घोरम् इति वचनविरोधः। तत्र सागर इव संसारः इत्युपमितसमासाश्रयणेन नान्यत्वसिद्ध्या चेतनत्वेन निस्तार्यत्वावगमात्। न च [2]**ईशेतव्यसम्बन्धात्** इति वचनविरोधः। तत्र रक्षिष्यत्यनुकूलान्नः इति जीवगतानुकूलस्य हेतुत्वप्रतीतेः। नापि-[3]**कृपा काप्युपजायते** इति वचनविरोधः। तत्रापि कापि इत्यस्य परमपुरुषार्थलक्षणमोक्षहेतुत्वपरत्वेननिर्हेतुकत्वपरत्वाभावात्।

किञ्च-प्राप्तृफलविरोधिरूपत्रितयज्ञानाय हेतुत्वे न च -[4]**तमेवं विद्वान्** [5]**तमेवं विदित्वा** इत्यादि विरोधः। अपि च **तमेवं विदित्वा** [6]**ध्यात्वा देवम्** [7]**देवं मत्वा** [8]**प्रेरितारञ्च मत्वा** [9]**शरणं प्राप्य, भक्त्या परमया वापि** [10]**विद्ययाऽमृतमश्नुते** [11]**इदं शरणमज्ञानं, उपायोऽयं चतुर्थस्ते** इत्यादिषु श्रुत्यादिभिः तत्त्वज्ञानस्य साधनत्वश्रुतिविरोधः।

**भिन्ननावाश्रितस्त्सब्धो यथा पारं न गच्छति।**
**ज्ञानहीनं गुरुं प्राप्य कुतो मोक्षमवाप्नुयात्।।**

**नृदेहमाद्यं प्रतिलभ्य दुर्लभं प्लवं सुकुल्यं गुरुकर्णधारम्।**
**मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा।।**

इत्यादौ आचार्यस्य शरीरस्य च नौ स्थानीयत्वाऽवगमात् [12]**विष्णुपोतं विना नाऽन्यत्** इत्यादि वचनविरोधस्यापि नाऽवकाशः।

अन्यथा-तत्रैव परायणम् इति परशब्देनाऽवरसाधनाऽभ्युपगमविरोधः। भक्तिप्रपत्त्योः साधनत्वेऽपि विष्णुपोतवत् अनन्याधीनत्वाभावेनाऽवरसाधनत्वोपपत्तेः।

---

१. ब्र.सू.१-४-२ २. लक्ष्मी.तं. १७-७०
३. अहि.सं.१४-२८ ४. पु.सू.
५. श्वतो.उ.३-८ ६,७. कठ.उ.२-१२
८. श्वेता.उ.१-६ ९. जिता.४
१०. ईशा.उ.११ ११. लक्ष्मी.त.१७-१००
१२. वि.ध.पु.१-५६

अत एव [1]**यो वै वेदांश्च प्रहिणोति** इत्यादिरीत्या परमुखेन प्रवर्तनं विना स्वयमेव आचार्यावतारमुखेन प्रवर्तनात् मूलमन्त्रस्य सर्वोत्कर्षसिद्धिरिति प्रत्युक्तम्। भगवत्स्वातन्त्र्यात् आचार्यावतारमुखेन प्रवर्तनोपपत्तेः। अन्यथा शिष्यावतारस्य अमूलकत्वापत्तेः। अज्ञातार्थबोधनादरातिशयेनाचार्यावतारेऽपि स्वतः सर्वज्ञस्य भगवतः अज्ञातार्थबोधे तदसम्भवेन शिष्यावताराऽसम्भवात्। अत एव **गुह्यानां गुह्यमुत्तमम्** इत्युक्तस्य प्रकाशनात्, पञ्चरात्रादिवत् नूतननिर्माणं विनाऽनादिसिद्धस्य प्रकाशनाच्च मूलमन्त्रे भगवतः आदरातिशयसिद्धिः इत्यपि पराकृतम्। भगवतः **मन्त्रं यत्नेन गोपयेत्** इति विधिवश्यत्वाभावात्। वेदवैदिक-मन्त्राणां कृत्स्नशः अनादिसिद्धत्वाच्च। तस्मात्परमपुरुषार्थलक्षणाभ्युदयशिरस्कान-नुष्ठानफलकार्थज्ञानजनकत्व रूपमप्रतिमवैभवं न सम्भवतीति।

## सिद्धान्तस्तु

शास्त्रस्य निवर्तकज्ञानजननमुखेन प्रयोजनपर्यवसानं बाधितम्। **देहासक्तात्मबुद्धिः** इत्याद्यनुगृहीतरीत्या प्रमाणतममूलमन्त्रजनितज्ञानस्य निवृत्तिमुखेन प्रयोजनपर्यवसानस्य दुरपन्हवत्वात्। [2]**तद्ज्ञानमज्ञानमतोऽन्यदुक्तम्** इति न्यायेन सामान्येन मकारोक्तमन्त्रार्थज्ञानस्य निवृत्तिफलकस्य, उकारनमश्शब्दोक्ततत्फ-लीभूताऽप्रतिषेधस्य च, भूतभव्यसमुच्चारणन्यायेन व्यक्तचतुर्थीव्यङ्ग्यफलं प्रति-हेतुत्वस्य दुरपदन्हवत्वाच्च। न च - **शास्त्रफलं प्रयोक्तरि, कर्ता शास्त्रार्थत्वात्** इति सूत्रद्वयविरोधः। तत्र भगवदीयसाधनानुष्ठानफलीभूतकृतिमत्त्वस्य भगवद्भोगो-द्देशेन प्रवृत्तेःअवघातस्वेदवदानुषङ्गिकभोक्तृत्वस्य च विवक्षितत्वोपपत्तेः।

एतेन **कर्ताऽहम्, भोक्ताऽहम्** इत्यनुभवविरोधो अपास्तः। प्रकृति-संसर्गकृतपरमात्माधीनकर्तृताज्ञानस्य प्रमितिरूपत्वेऽपि अदृष्टद्वारकयत्किञ्चि-त्फलोद्देश्यकसाधनानुष्ठानाऽर्हत्वलक्षणकर्तृत्वज्ञानस्य भ्रमरूपत्वस्य नमःशब्दादि सिद्धत्वात्। स्वप्रवृत्त्युद्देश्य भोगाश्रयत्वार्हत्वलक्षणभोक्तृत्वज्ञानस्यापि तथात्वाच्च। अस्य च भ्रमद्वयस्य अनाद्यचित्सम्बन्धनिबन्धनाऽहङ्कारममकारमूलत्त्वेन दुरपह्न-वत्वाच्च।

---

१. श्वेता.उ.६-१७ २. विष्णु.पु.६-५-७८

अत एव फलोद्देश्यकाऽदृष्टद्वारकसाधनानुष्ठानादिकं जीवस्वरूपाज्ञान-प्रयुक्तम्। यत्किञ्चित्फलोद्देश्यकादृष्टद्वारकसाधनानुष्ठानानर्हत्वस्वप्रवृत्त्युद्देश्य-भोगाश्रयत्वानर्हत्वलक्षणजीवगतस्वाभाविकसारष्ठतमाकाररूपयाथात्म्यज्ञानस्य तद्विरोधित्वात्।

अत एव—

[१]**दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः।**
**नान्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च।।**

इत्युकारनमश्शब्दौ उपबृंहितौ। अत्रेदमवधेयम् दासाश्चते भूताश्च-दासभूताः। दास्येन लब्धसत्ताका इत्यर्थः। स्वशब्दः - **आत्मानः** इत्युक्तात्मपरः। न त्वागन्तुकोपाधित इत्यर्थः। अनादि भगवन्मायातिरोहितत्वेन दास्यरसाऽनाविर्भावात्, सत्यामपि दास्ययोग्यतायां तत्फलोपधानं नास्तीति भावः। सर्वशब्दः - त्रिविधा-ऽऽत्मवर्गपरः हि शब्दः - [२]**पतिं विश्वस्य** इत्यादि प्रमाणप्रसिद्धपरः आत्मनोदासभूता इति व्याहृतम्। व्यापनभरणस्वाम्यानामात्मपदार्थत्वात्। स्वामिनश्च स्वत्वानुपपत्तेः। इत्याशङ्कापरमात्मसमाख्यया परिहृता।

ननु [३]**असन्नेव स भवति** इत्यत्र ज्ञानस्य सत्तालम्भकत्वं श्रुतमित्यत्राऽऽह-**नान्यथा** इति। **लक्षणम्** - भूतशब्दोपात्त भगवत्प्रियतमत्वरूपसत्ताज्ञापकमित्यर्थः। कैङ्कर्यस्यानुभवजनितप्रीतिकारितत्वेन प्रेमौत्कण्ट्यगर्भतया अनुभवापेक्षया कैङ्कर्यमेव भगवत्प्रियतमम्। **असन्नेव** इत्यत्र कैङ्कर्यपर्यन्तज्ञानं भगवत्प्रियतमत्व-लक्षणसत्तातिशयलाभहेतुरित्यपि विवक्षितमिति भावः। अनुभवजनितप्रीतिकारित-कैङ्कर्यम् [४]**गुणैर्दास्यमुपागतः** इत्यादिरीत्या निर्हेतुक भगवत्कटाक्षविशेषेण बद्धदशायामपि सम्भवतीत्यभिप्रायेणऽऽह **बन्धे** इति।

ननु [५]**सोऽश्नुते सर्वान् कामान्** इत्यादौ अनुभवस्यैव सामान्येन ब्रह्म-विद्याफलत्वश्रवणात्, मन्त्ररत्नादौ विशिष्य प्रपत्तिविद्यायाः एव कैङ्कर्यपर्यन्त

---

१. राम.यु.का.    २. महा.ना.उ.१०
३. तै.उ.आ.व.६-१    ४. रामा.कि.का.४-१२
५. तै.उ.आ.व.१

फलश्रवणाच्च मोक्षदशायामनुभवमात्रनिष्ठानामपि सद्भावात् [1]**प्रियो हि ज्ञानिनोऽत्यर्थम्** इत्यादि रीत्या तेषां भगवत्प्रियतमत्वाच्च दास्यमेव सत्तालाभः **हेतु**: इत्ययुक्तमित्यात्राह**मोक्षे** इति। मोक्षे च तथैवेत्यर्थः। लक्ष्मीप्रभृति दिव्यमहिषीवर्ग इवाऽनन्तगरुडविष्वक्सेनादिसूरिवर्ग इव भक्तेषु प्रपन्नेषु च भगवत्प्रियतमत्वतारतम्यस्य प्रामाणिकत्वादानन्दतारतम्यावहत्वाभावाच्च न दोष इति भावः।

इत्थं दास्यापेक्षयाज्ञातृत्वस्य प्रियतमत्वज्ञापकत्वाभावेन लक्षणत्वनिषेधे सति ज्ञातृत्वप्रयुक्तमनाद्यचित्सम्बन्धनिबन्धनं यत्किञ्चित्फलोद्देश्यकाऽदृष्टद्वारकसाधनानुष्ठात्रृत्वरूपंकर्तृत्वं प्रवृत्त्युद्देश्य भोगाश्रयत्वरूपं भोक्तृत्वं च लक्षणं न भवतीत्यभिप्रायेण **नान्यथा** इति सामान्यतो निर्दिष्टमिति।

अत एव ईश्वरस्वरूपाज्ञानप्रयुक्तं साधनानुष्ठानादिकमिति युक्तम्। असङ्कोचेन सर्वप्रवृत्तिनिवृत्त्यनुकूलसङ्कल्पवत्वलक्षणनियन्तृत्वाऽपरपर्यायेश्वरत्वज्ञाने सति, तस्य सत्यसङ्कल्पस्य निर्हेतुकप्रसादलब्धतया फलार्थप्रसादोद्देशेन साधनानुष्ठानाऽसम्भवात्। साधनानुष्ठानवदेव फलस्यापि निर्हेतुकप्रसादसाध्यत्वसम्भवात्। अत एव तज्ज्ञानवतः प्रवृत्त्युद्देश्यफलभोक्तृत्वासम्भवाच्च। एवं यथेष्टविनियोगहेतुभूतसम्बन्धविशेषात्मकशक्तिविशेषरूपनिरुपाधिकाऽसङ्कुचितसर्वस्वामित्वज्ञानवतः, स्वामित्वप्रतिनियतनिरूपाधिकाऽसङ्कुचितचेतनाऽचेतन विनियोक्तृत्वलक्षणशेषित्वज्ञानवतश्च, स्वामिन एव स्वत्वाश्रयवस्तु भोगसाधनाऽनुष्ठातृत्वंसत्वाश्रयवस्तुभोक्तृत्वञ्चेति ज्ञानेन, चेतनस्यौपाधिकं स्वशेषत्वमिति ज्ञानेन च तदुभयासम्भवाच्च। अत एव [2]**पतिं विश्वस्यात्मेश्वरम्** इति **सर्वस्वामित्वम्** आत्मेश्वरत्वञ्च भगवदसाधारणमुक्तम्। अत एव **स्वत्वमात्मनि सञ्जातं स्वामित्वं ब्रह्मणि स्थितम्** इति जीवेश्वरयोः स्वत्वस्वामित्वे व्यवस्थयोक्ते। पूर्वोक्तयत्नफलित्वानर्हत्वलक्षणजीवस्वरूपयाथात्म्यस्य पूर्वोक्तेश्वरत्वस्वामित्वशेषित्वानाञ्च भिन्नभिन्नत्वेन जीवस्वरूपाज्ञानहेतूपन्यासेन ईश्वरस्वरूपाज्ञानहेतूपन्यासस्य गतार्थत्वमित्यप्ययुक्तम्।

अत एव प्राप्याकारविशिष्टब्रह्मस्वरूपाज्ञानप्रयुक्तं तदिति युक्तम्। उत्तर-

---

१. भ.गी.७-१७

२. महा.ना.उ.१०

वाक्यस्थ नमश्शब्दव्यङ्ग्यचेतनप्रवृत्त्यनुद्देश्यानुषङ्गिकचेतनभोगजनितप्रीतिविशेष-शालित्वलक्षणप्राप्याकारयाथात्म्यज्ञानस्य तद्विरोधित्वाच्च।

अत एव प्रापककाकारविशिष्टब्रह्मस्वरूपज्ञानं तद्विरोधीत्यपि युक्तम्। चेतन-प्रवृत्त्यप्रतिरुद्धरक्षणप्रवृत्तिमत्व लक्षणोपायपरिवृढत्वज्ञानस्य तद्विरोधित्वात्। भोजनार्थो-त्कटक्षुधादिवदात्यन्तिकरुचिरूपतया तत्त्वज्ञानादिरूपतया चदृष्टकारणीभूतस्वयं-प्रयोजन भगवन्मुखोल्लासहेतु तदनुद्देश्यकसामग्रीवशसम्पन्नमुक्तिव्याजभूतसिद्धोपाय-करणतापूर्तिरूपभक्तिप्रपत्तिविषयत्वलक्षणप्रापककाकारविशिष्टानुसन्धानस्य मोक्ष-फलार्थमदृष्टोद्देशेन मोक्षसाधनानुष्ठानविरोधित्वाच्च।

किञ्च-जीवस्वरूपादि ज्ञानस्येत्याद्यपि अयुक्तम्। तद्ज्ञानस्यस्वयंप्रयोज-नाऽदृष्टार्थत्वाङ्गीकारेणमोक्षस्य मोक्षार्थादृष्टोद्देशेन साधनानुष्ठानासाध्यतया निर्हेतुकत्वभङ्गाभावात्। तत्वज्ञानस्य दुःखजन्मप्रवृत्तीत्याद्यनुसारेण दृष्टविधया मोक्षसाधनत्वेऽपि मोक्षस्य निर्हेतुकभगवत्प्रसाधलक्षणाऽदृष्टसाध्यत्वाभ्युपगमेन तत्वज्ञानस्य स्वयंप्रयोजनभगवत्प्रसादार्थत्वाभ्युपगमेन च कुदृष्टिमत प्रवेशशङ्कायाः अपि अनवकाशपराहतत्वाच्च।

इत्थं पुरुषार्थस्वरूपज्ञानं तद्विरोधीत्यपि युक्तम्। मूलमन्त्रमन्त्ररत्नस्थनमश्शब्द तद्विवरणश्रुतिस्मृत्यादि प्रमितसाम्प्रदायिकार्थपरिशीलनशालिनां स्वभोगस्या-नुद्देश्यतया। परप्रयोजनप्रवृत्तिरूपकैङ्कर्यस्यैव भगवत्प्रियतमत्वेन परमोद्देश्यत्वेन मुख्यपुरुषार्थत्वात्, तादृशपुरुषार्थज्ञानस्य स्वभोगोद्देशेन साधनानुष्ठानविरोधित्वाच्च। लोकदर्शनस्य च **न ह्येष स्थाणोरपराधः** इति न्यायपराहतत्वात्। एतादृशपुरुषार्थ-परिज्ञानशालिनां तदत्यन्ताभिनिवेशस्य तदलाभक्लेशातिशयानुसन्धानस्य च [१]**अहं सर्वं करिष्यामि** [२]**यावन्न चरणौ भ्रातुः** इत्यादि प्रमाणप्रतिपन्नत्वाच्च। कष्टं कर्म इति न्यायस्य [३]**सुसुखं कर्तुम्, क्व जपो वासुदेवेति** इत्यादि प्रमाणा-नुसारेण **पादप्रहारः परमं हि भाग्यम्** [४]**कान्तापादतलाहतिस्तवमुदे** इत्यादि प्रसिद्धविषयप्रवणानुभवानुसारेण च औत्सर्गिकत्वाच्च।

---

१. रामा.अयो.का..३१-२५ २. रामा.अयो.का.१८-८
३. भ.गी.९-२ ४. मालविकाग्निमित्रम्

एवं प्रकृतिसम्बन्धरूपविरोधिस्वरूपज्ञानं साधनानुष्ठानादिविरोधीत्यपि युक्तम्। नमश्शब्दादिना स्वभोगोद्देशेन साधनार्थस्वगतानुष्ठानस्य निषिद्धत्वेऽपि, अनाद्यचित्सम्बन्धनिबन्धनाऽहङ्कारममकारजनितदुर्वासनाबलेन स्वगतभोगोद्देशेन साधनानुष्ठानानुवृत्तेः आनुभाविकतया, भगवत्कर्तृकचेतनसंरक्षणविरोधिसाधनानुष्ठानसम्पादकतया प्रकृतिसम्बन्धः भगवत्प्राप्तिविरोधीति ज्ञानवतस्तादृशसाधनानुष्ठा नाऽसम्भवात्।

किञ्च-मोक्षोद्देशेन साधनानुष्ठानं [1]**संसारसागरं घोरम्** इति वचनविरुद्धम्। तत्र **संसार एव सागरः** इति प्रसिद्धसागरादन्योऽयं **सागरः** इत्येवं व्यावर्तकेन संसारशब्देन रूपकसमासाऽऽश्रयणात्। उपमित समासाश्रयणे उत्तरपदस्य गौणत्वापत्तेः। **अनन्तक्लेशभाजनम्** इति प्रसिद्धसागरव्यावर्तकविशेषणोपादानानुपपत्तेश्च। प्रसिद्धसागरस्वरूपस्य सान्ततया तत्र अनन्तक्लेशभाजनत्वस्य शङ्कितुमशक्यत्वात् **घोरम्** इति पदस्य **त्वामेव** इति वक्ष्यमाणाऽवधारणोपपादकतया साफल्यस्य वक्तव्यत्वेन मोक्षोद्देशेन साधनाऽनुष्ठानरूपस्वयत्नेन निस्तर्तुमशक्यत्वस्यैव विवक्षणीयतया तद्विशेषणविरोधच्च। अन्यथा **त्वामेव** इत्यवधारणवैयर्थ्यस्य दुरुद्धरत्वात्। तदनन्वयस्य दुष्परिहारत्वाच्च।

अपि च - मोक्षस्य साधनानुष्ठानसाध्यत्वे **ईशेशितव्यसम्बन्धात्** इति वचनविरोधः।

**[2]शक्तेस्सूपसदत्वाच्च कृपायोगाच्च शाश्वतात्।**
**ईशेशितव्यसम्बन्धादनिदं प्रथमादपि।।**

**रक्षिष्यत्यनुकूलान्न इति या सुदृढा मतिः।**
**स विश्वासो भवेच्छक्र सर्वदुष्कृतनाशनः।।**

इत्यत्र कृपा तत्फलीभूतनियमनव्यापारयोः निर्हेतुकत्वस्यादारातिशयेन पृथक् पृथक् उक्ततया अघटितघटनासामर्थ्ये स्वरूपव्याप्त्याऽन्तर्यामितया च सूपसदत्वे च तदन्वयस्य विवक्षिततया च, निर्हेतुकशक्त्यादि चतुष्टयस्यैव रक्षणहेतुत्वावगमात्। आनुकूल्येऽपि तस्यैव हेतुत्वेन विवक्षितत्वात्।

---

१. जित.स्तो. १-४ २. लक्ष्मी.तं.१७-७०

अन्यथा अनवस्थानात्। **कर्माऽविद्यादि चक्रे प्रतिपुरुषमिहानादि-चित्रप्रवाहेतत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्त सिद्धा** इत्याद्यनु-गृहीतरीत्याभगवदेकवेद्य निर्हेतुककृपाकार्यकर्मविपाककालविशेषे निर्हेतुककृपयैव आनुकूल्यस्यापि फलितत्वोपपत्तेः। अनादौ संसार इव अनन्तसंसारेऽपि **इदानीं रक्षणम्** इति निश्चयः न स्यादिति शङ्कां परिहर्तुं **न हि दृष्टेऽनुपपन्नं नाम** इति न्यायेन निर्हेतुक सौहार्दाधीनयादृच्छिकसुकृतविष्णुकटाक्षविशेषाऽद्वेषानन्तर भाव्यानु-कूल्यशब्दिताभिमुख्यस्यास्मास्वानुभाविकत्वात्।

सात्विकसम्भाषणाचार्यप्राप्त्यादिमुखेन भगवान् अवश्यमविलम्बेन रक्षिष्य-तीति विश्वासः सम्भवत्येव इत्यभिप्रायेण **अनुकूलान्नः** इत्युक्तमिति साफल्य-सम्भवाच्च। अन्यच्च कृपायाः सहेतुकत्वं **कृपा काप्युपजायते** इति वचनविरुद्धम्। संसृतिचक्रभ्रमणाधीनदुःखाकुलविषयककृपायाः संसारनिवर्तकत्वाऽवश्यम्भावेन कापीत्यस्य मोक्षहेतुकत्वार्थकत्वे वैयर्थ्यात्। **कृपायोगाच्च शाश्वतात्** इत्यनुसारेण **दुःखाकुले कृपा जायते** इत्युक्त्वादुःखदर्शनमात्रेण कृपा जायत इति वक्तुं कापीत्युक्तिः निर्हेतुकत्वपरेत्येव युक्तत्वाच्च।

किञ्च-प्राप्तृफलविरोधिरूप त्रितयज्ञानस्येत्याद्यप्ययुक्तम्। तद्ज्ञानस्या-दृष्टद्वारकत्वाभावेन **पन्थाः** इत्यस्य मोक्षार्थादृष्टोद्देश्यकमोक्षसाधनपरत्वेन च विरोधाभावात्। प्राप्तृस्वरूपादीनामेवं शब्दोक्तविशेषणान्तर्भावेन **तमेव** इत्यवधारणा-विरोधाच्च। अस्मत्पक्षे विरोधमापादयितुः वितथमतित्वापाताच्च। एतेन **त्वा** श्रुत्यादिविरोधोऽपि दूरोत्सारितः। व्याजत्वमादाय तदुपपत्तेः। **त्वामेव शरणं प्राप्य** इत्याद्यवधारणविरोधाच्च। शरणशब्देन भगवतो दृष्टद्वारकमोक्षसाधनत्वरूप-करणत्वे प्रतिपादिते तत्रैव शरणागतेः करणत्वप्रतिपादनस्य करणस्य करणान्त-रानपेक्षत्वेन व्याहतत्वाच्च, साधनानुष्ठानम् - अज्ञानकृतमित्यभिप्रायेण **मनीषिणः** इति पदोपादानविरोधाच्च। इतरच्च, मोक्षस्य सहेतुकत्वे **विष्णुपोतं विनाऽन्यत्** इति वचनविरोधो दुर्वारः। विष्णुशब्देन व्यापकत्वपरेण प्रादेशिकपोतान्तरस्य प्रेरकसापेक्षत्ववचनमुखेन तद्वैलक्षण्यसूचनात्। **संसारार्णवमग्नानाम्** इत्यनेन स्वयत्नवासनाहेतुत्वेन संसारस्य विरोधित्वसूचनात्।

**विषयाक्रान्तचेतसाम्** इत्यनेन स्वभोक्तृत्वबुद्धिहेतुत्वेन तत्सूचनाच्च। **परायणम्** इति परशब्देन उत्कृष्टपरेण, चेतनव्यापारसामान्यस्य व्याजत्वे सत्यपि फलार्थं प्रसादहेतुत्वलक्षणोत्कर्षाऽभावसूचनेन तत्साफल्योपपत्तेश्च। परशब्दस्य-अनन्याधीनत्वपरत्वे विष्णुशब्देनैव तत्सिद्ध्या परशब्दवैफल्यापत्तेः। भगवदधीन-त्वोक्तेः पूर्वोक्तरीत्या अयन पदार्थकरणत्वविरोधित्वाच्च। विष्णुपोतं विना परायणं नास्तीत्येव पर्याप्तौ गुर्वादिचेतनस्य शरीराद्यचेतनस्य च नौ स्थानीयत्वोक्त्या साधनत्वे प्रसक्ते परशब्देन सिद्धां तदुभयव्यावृत्तिं दृढयितुं तदुभयस्यापि दृष्टविधया साधनत्वमेव, नत्वदृष्टद्वारेत्यभिप्रायेण अन्यच्छब्दकिञ्चिच्छब्दयोरुपादानेन **भिन्ना-वाश्रितः स्तब्धः** इत्यादि वचनविरोधाभावाच्च।

आचार्यावतारबलेन सर्वोत्कर्षसिद्धिरपि युक्त्यैव। **स्वतन्त्रेच्छस्य** इति न्यायस्य अगतिकगतित्वेनादरातिशयस्यैवाऽऽचार्यावतारमूलत्वात्। ज्ञातार्थस्य शिष्यावताराभिनयेन पुनरनुसन्धानस्यापि आदरातिशयकृतत्वेनैव वक्तव्यत्वाच्च। परमरहस्यप्रकाशनम् अपूर्वनिर्माणं विना स्थितस्यैव सुखेन प्रकाशनञ्च सर्वोत्कर्षहेतुः इत्यपि युक्तमेव। मन्त्रगोपनस्य **आवृणोति विवृणोति वीक्षितः** इति न्यायप्राप्तत्वेन [१]**मन्त्रं यत्नेन गोपयेत्** इत्यस्य अकरणे प्रत्यवायमात्रपरत्वाद्विषयवैलक्षण्येन मन्त्रगोपनस्य भगवत्यपि प्राप्तत्वेऽपि शिष्यावतारमुखेन **यादवगिरिमाहात्म्योक्त-रीत्या** पराशरपाराशर्यादीनां बहूनां महर्षीणाम् अष्टाक्षराख्यमन्त्रराजपदत्रयार्थ-निष्ठापर्यन्तमन्त्रार्थनिर्णयोपयोगितदर्थजिज्ञासोत्पादनस्य मूलमन्त्रसर्वोत्कर्षं विना दुरुपपादत्वाच्च। वेदवैदिकमन्त्राणां सर्वेषामनादिसिद्धत्वेऽपि न्यायनिरपेक्षतया स्फुटतया च ज्ञातव्यसकलार्थप्रतिपादकत्वस्य श्रुत्यादिविवरणसिद्धतयाऽनादिसिद्धस्य प्रकाशनमेवात्राचार्यावतारमुखेन विवक्षितमिति नूतननिर्माणं विना तादृशाऽनितर-साधरणधर्मविशिष्टवेषेण अनादिसिद्धस्य मूलमन्त्रस्य प्रकाशनं सर्वेषामनायासेन निष्कलङ्कतया च मोक्षोपयोगिदृढतरनिर्णयार्थमेवेति स्थितप्रकाशनेनापि सर्वोत्कर्षसिद्धेः दुर्वारत्वात्।

तस्मात् परमपुरुषार्थलक्षणाभ्युदयशिरस्काऽननुष्ठानफलकार्थज्ञानजन-कत्वरूपं प्रति तन्त्रसिद्धान्ततया अप्रतिमवैभवं सम्भवत्येवेति।

---

१. शेष.सं.१४-५०

अत्रेदम्, वक्तव्यम्। (संसारिकल्) इत्यादि सूत्रस्थपदानां तात्पर्यमनुसन्धेयम्। (संसारिकल् तङ्गलैयुम ईश्वरनैयुम् मरन्दु) इत्यत्र संसारिकल् इति पदेन साधनानुष्ठानादिहेतुभूतदुर्वासनामूलभूतः, वक्ष्यमाणस्वरूपाऽज्ञानहेतुभूतश्चाऽनाद्यचित्सम्बन्धो विवक्षितः। (तङ्गलैयुम्) इत्यनेन पूर्वोक्तयत्नफलित्वाऽनर्हत्वविशिष्टजीवस्वरूपजातं विवक्षितम्। (ईश्वरनैयुम) इत्यनेन ईश्वरत्वतद्धेतुभूतशेषित्वपूर्वोक्तप्राप्यप्रापकाकारचतुष्टयविशिष्टं ब्रह्मस्वरूपं विवक्षितम्। **मरन्दु** इत्यनेन विस्मरणवाचिना, अनादिकालमारभ्य अवश्यज्ञातव्यत्वं विवक्षितम्। संसारिणां स्वस्वरूपाऽज्ञानस्याऽनादिसिद्धत्वेन विस्मरणरूपमुख्यार्थसम्भवात्। [१]**तद्ज्ञानमज्ञानमतोऽन्यदुक्तम्** इति न्यायेन स्वस्वरूपादिज्ञानार्थमेव भगवता ज्ञातृत्वशक्तिप्रदानात्। ईशेशितव्यसम्बन्धादेः निरतिशयकल्याणगुणत्वेन सदाऽनुभवितुं योग्यत्वाच्च स्वस्वरूपादिज्ञानस्य दृष्टविधया परमपुरुषार्थलक्षणमोक्षोपयोगित्वाच्च। अत एव [२]**मरन्देनुत्रैमुन्नम्** इति श्रीमत्परकालसूरिभिर्विस्मरणस्याऽनादि सिद्धत्वमनुगृहीतम्। अनेन स्वस्वरूपादिज्ञानस्यैव परमपुरुषार्थत्वमनाद्यलाभ क्लेशाऽऽवहत्वञ्च वक्ष्यमाणोपयोगितया सूचितम्। अनेन निर्हेतुकत्वभङ्गकुदृष्टिमतप्रवेशप्रसङ्गयोः परिहारोऽपि सिद्धः। दृष्टविधया अवश्यज्ञातव्यत्वस्यापि सूचितत्वात्।

(ईश्वरकैङ्कर्यत्तैयुमिलन्दु) इत्यत्र पुनः ईश्वरशब्देन प्रथमोपकारकविषये स्वयंप्रयोजनशेषवृत्तेः औचित्यं सूच्यते। कैङ्कर्यशब्देन पूर्वाचार्यप्रयोगप्रसिद्ध्या परप्रयोजनप्रवृत्तिः विवक्षिता। (कैङ्कर्यत्तैयुम्) इत्यपि शब्देन (मरन्दुम्) इत्युक्तज्ञानरूपपुरुषार्था लाभसमुच्चयो व्यज्यते। (इलन्दु) इत्यनेन स्वरूपज्ञानप्रति कैङ्कर्यस्य स्वयंप्रयोजनत्वम्, [३]**ईश्वराय निवेदितुम्** इत्युक्तरीत्या कैङ्कर्यार्थमेव करणादिप्रदानेन तद्वैफल्यञ्च सूच्यते। अत्र कैङ्कर्यरूपफलज्ञानाऽलाभोऽपि गर्भितः। (इलन्दो मेग्निर इलवुमिन्त्रिक्के) इत्यत्र प्राथमिकाऽलाभशब्देन पूर्वोक्ताऽलाभचतुष्टयं विवक्षितम्। (इलन्दोम्) इति बहुवचनेन अभयं नोऽस्तु इत्युक्तानां बहूनामलाभक्लेशोऽभिप्रेतः। द्वितीयाऽलाभशब्देन तत्कार्यक्लेशो लक्ष्यते।

---

१. विष्णु.पु.६-५-७८ २. पेरियतिरुमोलि.६-२-२

३. विष्णुतत्त्वम्

(इलवुम्) इत्यपि शब्देन पूर्वोक्तमलभ्यचतुष्टयं सूच्यते। किञ्च **भूयोऽपि दृश्यते सा कोपि पिकान्तं मुखम्, यत्त्वन्नेत्र समान कान्ति** इत्यादिरीत्या अत्यल्पविषयेषु अविवेकिनामनपायिनी अलाभक्लेशानुसन्धानपरिपाटी दृष्टा।

एवं स्थिते **परमपुरुषार्थ**भूतस्वस्वरूपज्ञानाद्यलाभक्लेशाऽननुसन्धानं चेतनानामत्यन्तमयोग्यमित्ययोग्यतां द्योतयत्यपि शब्दः। अत्र फलाऽलाभतत्क्लेशाऽलाभोक्त्या **पुरुषार्थ**स्वरूपाज्ञानं सूचितम्। तदुभयमुखेन तत्सूचनञ्च तस्य परमपुरुषार्थाऽलाभहेतुत्वद्योतनाय।

(संसारमाकिर पेरुङ्गडलिले विलन्दुनोवुपड) इत्यत्र (**संसारमाकिर**) इत्यनेन [1]**संसारसागरम्** इत्यत्र - रूपकसमासः सूचितः। (**पेरुङ्गडल्**) इत्यनेन घोरत्वमनन्तक्लेशभाजनत्वञ्च प्रसिद्धसागरवैषम्यमभिप्रेतम्। (**विलन्दु**) इत्यनेन पातालनिम्नत्वात् भगवद्यत्नेन विना दुस्तरत्वं सूचितम्। (**नोवुपड**) इत्यनेन (कण्डलि), (केट्टरि), (पोयरि) इति न्यायोऽपि नेति सूचितम्। अनेन **विरोधि**स्वरूपज्ञानं कार्यमुखेन सूचितम्। **स्वयत्नवासनाजनकत्वेन संसारो भगवत्प्राप्तिविरोधी** इति ज्ञानाभावेन स्वयं साधनाऽनुष्ठानेन स्वभोगपरतया अनर्थभाजो भवन्ति इति लाभात्। अत्र संसारस्य विरोधित्वाऽज्ञानात् भगवतः प्राप्यापेक्षया प्रापकत्ववत्, निवर्तकत्वलक्षणोपायाकाराऽज्ञानमपि सूचितम्।

इत्थं भगवत्प्रसक्तिं विनैव चेतनस्यानादिकालमवस्थानमुक्तम्। अथ चेतनप्रसक्तिं विना भगवतोऽनादिकालमनवस्थानमुच्यते।

(सर्वेश्वरन्) इत्यादिना सूत्रार्थेन। पूर्वम् ईश्वरत्वज्ञानं स्वयत्नविरोधि प्रथमोपकारकत्वानुसन्धानरूपञ्चेत्येवं योगार्थमात्रविवक्षया ईश्वरशब्दः द्विरुक्तः। अत्र तु विशेष्यसमर्पणाय रुढ्यर्थस्यापि विवक्षितत्वसूचनाय वैरूप्येण निर्देशः कृतः। सर्वेश्वरशब्दस्य भगवन्नामत्वात्। उक्तञ्च श्री सहस्रनामाध्याये [2]**अजस्सर्वेश्वरस्सिद्धः** इति। श्रीविष्णुपुराणे च **सर्वेश्वरस्सर्वदृक्सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः** इति। अनुगृहीतञ्च भगवता भाष्यकारेण जिज्ञासासूत्रे ब्रह्मशब्दार्थ-

---

१. जित.स्तो.१-४

२. विष्णु.स.स्तो.

प्रस्तावे **स च सर्वेश्वर एव** इति। **अतस्सर्वेश्वर एव जिज्ञासाकर्मभूतं ब्रह्म** इति च। श्रीमद्द्रमिडोपनिषद्भाष्ये च महाप्रवेशोपक्रमे कलिजिज्जगदाचार्यैरनुगृहीतम्। [१]**श्रियः पतियाय् अवाप्तसमस्तकामनाय् समस्तकल्याणगुणात्मकनान सर्वेश्वरन्** इति। नारायणशब्दं विहाय सर्वेश्वरशब्दप्रयोगश्च **ईशेशितव्यसम्बन्धादनिदं प्रथमादपि** इति पूर्वोक्तवचनार्थविशेषस्मारणार्थः। (नोवुपडतन् कृपै याले) इत्यनेन [२]**जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते** इति वचनं स्मारितम्। (तन्) इत्यनेन स्वासाधारण्योक्त्या निर्हेतुकत्वं विवक्षितम्।

(इवर्कल्) संसारिण इत्यर्थः। प्रकृतिसम्बन्धवशेन स्वयत्न स्वभोगपरा इति यावत्। **मरन्दु** इत्यादि क्रियापञ्चकमपि इदं शब्देन परामृश्यते। (तन्नै) स्वयत्नस्वभोगाऽनर्हजीवस्वरूपस्य, निरुपाधिकतया ईश्वरं स्वामिनं शेषिणं कैङ्कर्यप्रतिसम्बन्धिनं निरपेक्षप्राप्यप्रापकं निरपेक्षविरोधिनिवर्तकञ्चेत्यर्थः। अनेन [३]**तमेवं विद्वान्** इत्यादि विरोधपरिहारः सूचितः। (अरिन्दु) इति ज्ञानस्य व्याजनत्वमभिप्रेतम्। अनेन त्वाश्रुत्यादिविरोधपरिहारः सूचितः। (मरम् - करै शेरुम्बडि) इत्यन्वयः। (मरम् - मार्गतरुः), कूलं यथा प्राप्नोति, तथेत्यर्थः। अनेन आचार्यस्य शरीरस्य च नौ स्थानीयत्वेनोक्तावपि -

**निर्हेतुक कटाक्षेण मदीयेन महामते।**
**आचार्यविषयीकारात्प्राप्नुवन्ति परां गतिम्।।**

**मयानुकूलेन नभस्वतेरितम्** इत्युक्तरीत्या भगवत्प्रेरणाभावे आचार्यसम्बन्धादेरपि दुर्लभतया आचार्यसम्बन्धादिकं मोक्षं प्रतिदृष्टकारणतया व्याजभूतं निर्हेतुकभगवत्प्रसादफलमेवेति सूचितम्।

(ताने शिष्यनुमाय्) इत्यत्रावधारणेन (तान्) इति पदोपान्तसर्वेश्वरत्वस्य शिष्याचार्यभावस्य च विरोधः सूच्यते। अज्ञस्यैव शिष्यत्वात् **आचिनोति हि शास्त्रार्थान्** इत्यादेः भगवत्प्रसादलब्धज्ञानवत्येवौत्सर्गिकत्वाच्च। अनेन शिष्याचार्य भावः भेदघटित इति सूच्यते।

---

१. भगवद्विषयः २. अहि.सं.१४-२८
३. पु.सू.

आचार्यत्वम्-अवतारेण साक्षात्सम्पादयितुं शक्यम्। शिष्यत्वन्तु अवतारेणापि स्वस्मिन् शिष्यत्वभावनयाऽन्यत्र सम्पादनीयमिति शिष्यत्वस्य आचार्यत्वापेक्षया दुर्लभतया तत्र भगवतः आदरातिशयः अस्तीति द्योतनाय (शिष्यनुमाय्) इति प्रथमोपात्तम्। अत एव श्रीमत्परकालसूरिभिरपि [1]**नरनारायण-नायुलकत्तुरनूल् शिङ्गामै विरित्तवन्** इत्यत्र शिष्यावतारः प्रथमोपात्तः। तत्र (उलकत्तु) इत्यनेन शिष्यावतारस्यापि भावनामुखेनाऽन्यत्रैव ज्ञानं फलमिति सूचितम्। (अरनूल्) धर्मशास्त्रम्। (शिङ्गामै) असङ्कोचेन। (विरित्तवन्) प्रकाशितवानित्यर्थः। मूलमन्त्रे साक्षाद्भगवत एव साक्षाद्धर्मत्वस्थापनात् धर्मशास्त्र-प्रकाशनम् अवतारफलतया अनुगृहीतम्। (निनृ) इत्यनेन शिष्याचार्यावतारयोः नैरन्तर्येण संश्लेषलक्षण सौशील्योऽस्तीति व्यज्यते।

(तिरुमन्त्रत्ते) इत्यत्र परमपुरुषार्थलक्षणाऽभ्युदयशिरस्काऽननुष्ठानफलक-ज्ञानजनकत्वलक्षणयोगार्थोत्कर्षस्य विशेषणत्वविवक्षया अनादिसिद्धं तादृशज्ञा-नजनकत्वमपि प्रकाशितवानिति सूच्यते। नोवुपडकृपैयाले प्रकाशितवान् इति समभिव्याहारेण [2]**आनृशंस्यं परो** धर्मः इत्युक्तोऽऽनृशंस्येन परमरहस्यमपि प्रकाशितवानित्यपि सूच्यते। (अरुलिनान्) इति तु पूज्योक्तिः। उत्थमर्थद्वयविवक्षया (अरुळिच्चेय् तान्) इति नानुगृहीतमिति।

**।। इति श्रीशुद्धसत्त्वरामानुजाचार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे**
**मूलमन्त्रशब्दयोगार्थोत्कर्षसमर्थनं नाम**
**चतुर्थाधिकरणं समाप्तम्।।**

❀ ❀ ❀ ❀

---

१. परकालसूक्तिः

२. रामा.सु.का.३८-४१

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे शिष्यावतारप्रयोजनसमर्थनं नाम पञ्चमाधिकरणम्

**मू।। (६) शिष्यनाय् निन्रदु शिष्यनिरुक्कुमिरुप्पुनाट्टाररिया मैयाले अत्तै अरिविक्कैक्काग।**

अत्र शिष्यावतारबलेन पूर्वं साधितो मूलमन्त्रस्य सर्वोत्कर्षः सम्भवति-न वेति विचारः। तदर्थं शिष्यावतारस्य शिष्यलक्षणपरिज्ञानफलकत्वं सम्भवति-न वेति। तदर्थं शिष्यलक्षणपरिज्ञानमावश्यकम् - न वेति। तत्परिज्ञानम् उपदेशेन सम्भवति न वेति।

## तत्र पूर्वपक्षः

शिष्यावतारबलेन पूर्वोक्त सर्वोत्कर्षः न सम्भवत्येव। साक्षादेव अज्ञातज्ञापनायाऽऽदरातिशयेनाऽऽचार्यावतारसम्भवेऽपि सर्वज्ञस्य अज्ञातार्थज्ञानाऽसम्भवेन शिष्यावतारस्यादरातिशयकृतत्वासम्भवात्। स्वातन्त्र्यकृतत्वेनैव वक्तव्यत्वाच्च। न च स्वाभिनयेन अन्येषामज्ञातज्ञानार्थं शिष्यावतारः सम्भवति। स्वधर्मभूताचार्यत्व-वत्सुकरत्वाभावेन अभिनयेन परेषाम् अज्ञातार्थज्ञापने आदरातिशयश्च सम्भवतीति वाच्यम्। अज्ञातार्थज्ञापनस्य परेषां तत्त्वजिज्ञासादिसत्त्वे आचार्यावतारेणैव सम्भवात्। तदसत्त्वे शिष्यावतारेणाप्यसम्भवात्। कृपामात्रप्रसन्नाचार्यावतारस्य शिष्यानुवृत्ति-निरपेक्षत्वेन शिष्यलक्षणपरिज्ञानार्थं शिष्यावतार इत्यस्याऽसम्भवाच्च। शिष्याणां तत्त्वज्ञानार्थं शिष्यलक्षणपरिज्ञानाऽनवश्यम्भावाच्च। आचार्योपदेशेनैव तत्त्वज्ञानवत् शिष्यलक्षणपरिज्ञानऽनवश्यम्भावाच्च। उपदेशाऽप्रामाण्यशङ्कायां शिष्यावताराभिनयेनाप्यन्येषां तत्त्वज्ञानोत्पादनाऽसम्भवप्रसङ्गाच्चेति।

## अत्रायं सिद्धान्तः

शिष्यावतारबलेन मूलमन्त्रस्य सर्वोत्कर्षसाधनं सम्भवत्येव अभिनयेन

परेषामज्ञातज्ञापनार्थमाचार्यावतारापेक्षया शिष्यावतारस्याऽधिकादरविषयत्वोपपत्तेः। न च जिज्ञासादिसत्वे शिष्यावतारवैफल्यमिति वाच्यम्। जानश्रुतेः पराऽनुग्रहार्थप्रवृत्त हंसद्वयोक्तरैक्वस्तुतिजानश्रुतिनिन्दावाक्यश्रवणेन ब्रह्मजिज्ञासायाः ब्रह्मविद्रैक्वजिज्ञासयाश्च तत्समीपजिगमिषायाश्च उत्पत्तिवत्, शिष्यावताराभिनयेनैव तत्वजिज्ञासाद्युत्पत्त्युपपत्तेः। शिष्यलक्षणपरिज्ञानार्थंशिष्यावतारसम्भवाच्च। कृपामात्रप्रसन्नाचार्यविषये तत्त्वोपदेशहेतुभूतप्रसादार्थं शिष्यानुवृत्त्यनपेक्षायामपि गुरुमन्त्रदेवताद्वेषोपेक्षादीनां तत्त्वज्ञानोत्पत्तिप्रतिबन्धकतया [1]**यस्य देवे परा भक्तिः सदा कार्या, यादृशी भावना यत्र, विश्वासः फलदायकः, यस्य यावांश्च विश्वासः, शुद्धभावं गतो भक्त्या,** [2]**न चाऽशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति, न नास्तिकाय वक्तव्यं, नाऽभक्त्या कदाचन,** [3]**तद्विद्धि प्रणिपातेन** इत्यादि प्रमाणबलेन गुरुमन्त्रदेवताभक्त्यादीनामन्वयव्यतिरेकाभ्यामद्वेषादिरूपत्वेन तत्त्वज्ञानकारणतया च **आस्तिकोधर्मशीलश्च, शरीरं** वस्तुविज्ञानम् [4]**सद्बुद्धिस्साधुसेवी** इत्युक्त शिष्यलक्षणपरिज्ञानस्य शिष्यनिष्ठासम्पादनमुखेन तत्त्वज्ञानार्थमेवाऽऽवश्यकत्वाच्च। श्रुत्याद्युक्त तत्त्वोपदेशप्रामाण्यस्वीकारे विरहे वा सार्वजनीनतया गुरूत्कर्षापादकस्य शुश्रुषादेः कर्तव्यतोपदेशे हेतुदर्शनाधिकरणन्यायेन लोभादिमूलत्वशङ्कायादृढत्वेनाऽत्यन्तानभिज्ञानामपि **सजातीयेन गृह्णन्ति सजातीयमृगपक्षिणः** इति न्यायेनाऽनुष्ठानेनेव उपदेशेन शिष्यनिष्ठासम्पादनस्य दुस्साधनत्वाच्चेति।

सूत्रार्थस्तु - (शिष्यनाय् निन्रु) शिष्यतया नैरन्ध्र्येण संश्लेषु इत्यर्थः। अनेनऽऽचार्यावतारापेक्षया शिष्यावतारे सौशील्यातिशयसूचनात्, परकीयशिष्यत्वस्य लोकरीत्या प्रयाससाध्यत्वेन मनस्थैर्यसूचनाच्च तत्रादरातिशयः सूचितः। (शिष्यनिरुक्कुमिरुप्पु) शिष्यनियतस्वभाव इत्यर्थः। अनेन कादाचित्काऽनुवर्तनादेः लोकसिद्धत्वेऽपि **आस्तिको धर्मशीलश्च** इत्याद्युक्तस्वभावविशेषा न लोकसिद्धा इति सूचितम्। तथाहि -

**आस्तिको धर्मशीलश्च शीलवान् वैष्णवश्शुचिः।**
**गम्भीरश्चतुरोधीरशिष्य इत्यभिधीयते।।**

---

१. श्वेता.उ.६-२३ २. भ.गी.१८-६७ ३. भ.गी.४-३४ ४. न्या.विं.२

शास्त्रोक्तमस्तीति दृढाध्यवसायशालीत्यर्थः। इत्थमुपदेशमूलभूतशास्त्रविश्वासः उक्तः। शास्त्रविश्वासाऽभावे गुरुपदेशवैफल्यप्रसङ्गात्।

अथ सम्यक् ज्ञानहेतुभूतसत्वविवृद्धिहेतुभूतं धर्मानुष्ठानमाह (धर्मशीलश्च) इति। **शीलवान्** [1]**दोषैकदृक्पुरोभागी** इत्युक्तपुरोभागित्वं विना गुणग्रहणैकशील इत्यर्थः। सौशील्यगुणस्य शिष्यत्वानुपयोगात्। **वैष्णवः** यस्य देवे परा भक्तिः इत्याद्युक्तविष्णुभक्तिमानित्यर्थः। धर्मशीलश्च इति कृत्यकरणमुक्तम्। **शुचिः** इति अकृत्याऽकरणमुच्यते। **गम्भीरः** प्रणिपातसेवादौ प्रयासे सत्यपि तदनाविष्कारशील इत्यर्थः। **चतुरः** गुर्वभिमतसर्वशूश्रूषासु समर्थ इत्यर्थः। **धीरः** धियं रातीति धीरः। [2]**रा-दाने, आदाने च तस्मै देयं ततो ग्राह्यम्** इत्युक्तरीत्या ज्ञातार्थबोधने अज्ञातार्थावगाहने च समर्थ इत्यर्थः। एवम्भूतः, (शिष्य इत्यभिधीयते) उक्तगुणाष्टकशाली शिष्यशब्दमुख्यव्यवहारविषय इत्यर्थः। [3]**शासु - अनुशिष्टौ अनुपूर्वः शासिः विविच्य ज्ञापनार्थः**। अस्मात् धातोः कर्मणि एतिस्तुशास्वृहजुषः क्यप् इत्यनेन क्यप् प्रत्यये [4]**शास इदङ्हलोः** इति उपधायाः इत्वे षत्वे च, शिष्य इति भवति। उक्तगुणाष्टकवान् विविच्य ज्ञापनयोग्यत्वरूपनिमित्तसम्भवात् शिष्यशब्दवाच्य इत्यर्थः ।

**शरीरं वसुविज्ञानं वासः कर्मगुणानसून्।**
**गुर्वर्थं धारयेद्यस्तु स शिष्यो नेतरः स्मृतः।।**

सर्वप्रकारगुरुशुश्रूषार्थतया शरीरधारणं **शरीरं धारयेत्** इत्यनेन विवक्षितम्। सर्वस्वदानेनापि विद्यार्थं गुरुप्रीतिः सम्पादनीयेति **वसु-धारयेत्** इत्यनेन विवक्षितम्। लब्धापि विद्यागुरुप्रीत्यर्थेत्यध्यवसायः **विज्ञानं धारयेत्** इत्यनेन विवक्षितः।

[5]**शिष्यप्रकर्षो यशसे गुरूणाम्** इत्युक्तेः। **वासः** वस्त्राद्यलङ्कारः, गृहाद्युपकरणं वेत्यर्थः। विद्याफलतया गृहादिलाभे च गुर्वर्थत्वबुद्धिः कार्येत्यर्थः। विद्याफलीभूतेऽनुष्ठाने, अमानित्वाद्यात्मगुणजाते, सकलविद्यापारङ्गतायां शतायुः सम्पूर्णतायाञ्च [6]**प्रशस्तिस्सारज्ञः** इत्याद्यनुगृहीतरीत्या गुर्वर्थत्वबुद्धिः कार्येति, **कर्मगुणानसून्** इति पदत्रये विवक्षितम्। **यस्तु** इति-एवम्भूताध्यवसायशालीन

---

१. अ.को.३-४७ २. तुदादि ३. अदादि ४. पा.सू.६-४-३४
५. श्री.गु.र.को.३० ६. न्या.विं.२

एव। विविच्य ज्ञापनं सद्यः फलमित्यभिप्रायेण **स शिष्यो नेतरः** स्मृतः इत्युक्तमित्यर्थः।

[1]**सद्बुद्धिस्साधुसेवी समुचितचरितस्तत्त्वबोधाभिलाषी शुश्रूषुः त्यक्तमानः प्रणिपतन**परः प्रश्नकालप्रतीक्षः । **शान्तोदान्तो**ऽनसूयुश्शरण**मुपगतश्शास्त्रविश्वासशाली शिष्यः** प्राप्तः **परीक्षां** कृतविद**भिमतं** तत्त्वतः **शिक्षणीयः** इति। **सद्बुद्धिः** गहनन्याया‍ऽवगाहनयोग्यबुद्धिशालीत्यर्थः। **साधुसेवी गुरुसन्निधिमात्रेण** इत्युक्तरीत्या सन्निधानमात्रेण स्वस्य ज्ञानोदयहेतुभूतसाधुजनसेवापर इत्यर्थः। **समुचितचरितः** सम्यक् ज्ञानोदयार्थं अकृत्यकरणकृत्याकरणलेशरहित इत्यर्थः। तत्त्वबोधाभिलाषी -

**सुव्याहृतानिमहतां सुकृतानि ततस्ततः।**
**सञ्चिन्वन् धीर आसीत सिलहारीसिलं यथा।।**

**मधुलुब्धो यथा भृङ्गः पुष्पात्पुष्पान्तरं व्रजेत्।**
**ज्ञानलुब्धस्तथा शिष्यो** गुरोर्गुर्व**न्तरं व्रजेत्।।**

इत्युक्तरीत्या अज्ञातार्थज्ञानसम्पादनैकशील इत्यर्थः। **शुश्रूषुः गुरुविषये** सर्वप्रकारपरिचर्यापर इत्यर्थः। **त्यक्तमानः** [2]**गुरुं प्रकाशयेत्** इत्युक्तरीत्या सार्वजनीन शुश्रूषाशालीत्यर्थः। **प्रणिपतनपरः प्रणिपातप्रतीकारस्संरम्भो हि महात्मनाम्** इत्युक्तरीत्या गुरुणा निग्रहेकृते तत्र हि तत्त्वबुद्ध्या तदनुग्रहार्थं प्रणिपात**शीलः** इत्यर्थः। प्रश्नकालप्रतीक्षः **प्रश्नोचितेषु परया कृपया प्रसीदन्** इत्युक्तरीत्या प्रश्नोत्तरक्षणे प्रसादपूर्वकमुत्तरलाभाय गुरोर्व्यासङ्गराहित्यदशाप्रतीक्षणपर इत्यर्थः। **शान्तो दान्तः** श्रवणोपयोगितया बाह्याभ्यन्तरकरणव्यासङ्गरहित इत्यर्थः। **अनसूयुः** गुरुणा समीचीनन्यायोपन्यसने कृते तत्र पुरोभागित्वं विना गुणग्रहणैकशील इत्यर्थः। **शरणमुपगतः** आत्मसम्बन्धाभावे अर्थज्ञानानधिकारात् पञ्चसंस्कारपूर्वकं स्वगतस्वीकारेण वा परगतस्वीकारेण वा प्रसन्न इत्यर्थः।

---

१. न्या.विं.- २

२. गुरुं प्रकाशयेत् धीमान् मन्त्रं यत्नेन गोपयेत्।
अप्रकाशप्रकाशाभ्यां क्षीयेते सम्पदायुषी।। शे.सं.१४-३३

**शास्त्रविश्वासशाली** प्रमाणान्तरेण केनाप्यत्यन्ताप्रसिद्धेऽपि प्रबलप्रमाणाबाधिते न्यायानुगृहीतवाक्यस्वरससिद्धे परमपुरुषार्थ तत्साधनादिरूपे शास्त्रार्थे **देवगुह्येषु चाऽन्येषु हेतुर्देविनिरर्थकः** इत्यादिरीत्या अप्राणशङ्कालेशशून्यफलपर्यन्त सत्तानिश्चयशालीत्यर्थः। **कृतवित्** कृतज्ञः। **शिष्यः** इति - पूर्ववत्।

एवं भूतः शिष्यः **परीक्षां प्राप्तः** परीक्ष्य विविधोपायैः इत्याद्युक्ताऽचार्यकर्तृक परीक्षाविषयी कृतस्सन्। **अभिमतम् - [1]कोधर्मः सर्वधर्माणां भवतः परमो मतः** इत्युक्तरीत्या आचार्याऽत्यन्तभिमतं परमरहस्यार्थम्। **तत्त्वतः** यथावदाकारेण, **शिक्षणीयः** आचार्येण बोधनीयः इत्यर्थः। सारतमाकारबोधनेन सामान्याकारेण बोधनं न कार्यमिति भावः। एवमन्यदपि शिष्यलक्षणप्रमाणमनुसन्धेयम्।

(नाट्टाररियामैयाले) इत्यनेन-पण्डितानामपि **उपदेशो निरर्थकः** इत्युक्तरीत्याऽनुष्ठानेनैव शिष्यलक्षणपरिज्ञानं सम्भावितम्। कथाञ्चित् शिष्य लक्षणशास्त्रमुखेन आचार्योपदेशबलेन तेषां तत्परिज्ञानं सम्भवेत्। पामराणां तु हेतुदर्शनाधिकरणन्यायेन उपदेशेन तद्ज्ञानकथैवदवीयसीति सूचितम्। (अत्तै अरिविकैक्काग) इत्यत्र (अत्तै) इति जातावेकवचनम्। (अरिविक्कैक्काग) इत्यनेन रामलक्ष्मण रामकृष्णाद्यवतारेष्वेवेति विवक्षितम्। (नाट्टाररिया मैयालेशिष्यनाय् निन्रु) इत्येव पर्याप्तौ **उपदेशो निरर्थकः** इत्युक्तरीत्या शिष्यलक्षणपरिज्ञानं अनुष्ठानेनैव भवतीति दृढयितुम् (अत्तैयरिविक्कैक्काग) इत्युक्तम्। यद्यपि **तत्त्वजिज्ञासाद्युत्पादनार्थमेव शिष्यावतारः** इत्यपि वक्तुं शक्यम्। तथापि **तत्त्वजिज्ञासादेरपि शिष्यलक्षणान्तर्भाव** इति न पृथगुपन्यासः इत्यनुसन्धेयम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे**
**शिष्यावतारप्रयोजनसमर्थनं नाम**
**पञ्चमाधिकरणं समाप्तम्।।**

---

१. विष्णुसहस्रनामस्तोत्रम्

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे उपदेशप्रमाणप्राबल्यसमर्थनं नाम षष्ठाधिकरणम्

**मू।। (७) सकलशास्त्रङ्ङलालुम् पिरक्कुम् ज्ञानं स्वयमार्जितम्पोले**

अत्र पूर्वोक्तो मूलमन्त्रस्य सामान्योत्कर्षो विशेषोत्कर्षश्च सम्भवति- न वेति विचारः। तदर्थं तत्त्वज्ञानजनने वेदादेशधिक्यम् उत मूलमन्त्रस्येति। तदर्थं न्यायसापेक्षप्रमाणाऽपेक्षया न्यायनिरपेक्ष प्रमाणस्य प्राबल्यमस्ति - न वेति।

## तत्र पूर्वः पक्षः

न-मूलमन्त्रस्य सामान्यतोविशेषतश्च सर्वोत्कर्षः सम्भवतिसर्वप्रमाणतात्पर्यविषयार्थकत्वलक्षणस्य सङ्ग्रहतया मन्दमतीनां सुखेनाऽर्थबोधकत्वलक्षणस्य चोत्कर्षस्य सद्भावेऽपि वेदादेरेव तत्त्वज्ञानजनने सर्वोत्कृष्टत्वात्।

तथा हि-[१]**सर्वमष्टाक्षरान्तस्थम्** इत्याद्यनुसारेण वेदादेः मूलमन्त्रविवरणत्वं तावत्सिद्धम्। विवरणञ्च द्वेधा-**उक्तार्थ विशदीकारो युक्तऽर्थान्तरबोधनम्**। असङ्कोचेन तदुभयाभावे निरवशेषनिष्कलङ्कार्थज्ञानं न स्यात्। तादृशार्थज्ञानजननमेव हि तत्वज्ञानजनने सर्वोत्कर्षः। तात्पर्यविषयार्थकत्वस्य सुखप्रतिपत्तिजनकत्वस्य च मूलमन्त्रापेक्षया प्रणवे, प्रणवापेक्षया अकारे च **यद्वेदादौ स्वरः प्रोक्तः, ब्रह्मणः प्रणवं कुर्यात्** इत्यादि श्रुतिस्मृतिसिद्धत्वेन, प्रेक्षावतां तत्वबुभुत्सूनामनादरणीयत्वात्। मूलमन्त्रस्यैव निरवशेष निष्कलङ्कतत्वज्ञानजनकत्वे गुरुलघुविकल्पायोगेन विस्तृतवेदादिप्रवर्तनवैफल्यापत्तिः दुर्वारा। सत्यपि गुरूपाये, लघूपायप्रवर्तनन्तु मन्दमतीनां सुखप्रतिपत्त्यर्थतया साफल्यमश्नुते। न च स्मृतीतिहासादिवत् वेदादेः शब्दजन्यवाक्यार्थज्ञानजन्यतया मूलमन्त्रविवरणत्वम्।

---

१. वृद्ध.हा.सं.३-४५

येन प्रामाण्ये परमुखनिरीक्षणेन प्राबल्यं न स्यात्। अपि तु-मन्त्रब्राह्मणभागानां अर्थस्वभावेन मिथो विवरणविवरणि भावस्य प्रायशो दर्शनेन नित्यनिर्दोषप्रमाणतया वेदादेः मूलमन्त्रमनपेक्ष्य प्रवृत्तस्याऽप्यर्थस्वभावादेव विवरणत्वम्।

न च-वेदादेः मीमांसापरिकरसापेक्षस्यैव बोधकतया दौर्बल्यम् **शास्त्रज्ञानं बहुक्लेशम्** इति वचनसिद्धमिति वाच्यम्। तस्मिन् वचने मन्दमतीनां वेदादिकं मीमांसामुखेन न तत्त्वनिर्णये फलति। अपि तु न्यायविचारक्लेशमात्रम्। प्रत्युत **स्वपक्षस्थान् दोषान् वितथमतिरारोपयति जडः** इति न्यायेन तत्त्वविपर्यय एव फलति।

अतो मन्दमतिभिः व्यासादिपरमर्षिषु महामीमांसकत्वं पर्यवस्य **आलोढ्य सर्वशास्त्राणि, तत्त्वं जिज्ञासमानानाम् हरिः परायणं परम्** इत्याद्युपदेश एवं शरणीकरणीय इत्यस्यैवाऽर्थस्य प्रतिपादनेन तत्र मीमांसाऽनादरप्रतिपत्ति गन्धाभावात्। अन्यथा [1]**यस्तर्केणाऽनुसन्धत्ते सधर्मं वेद नेतरः** इति मनुवचनविरोधापत्तेः दुर्वारत्वात्। **आवापोद्वापतस्स्युः** इत्यादिरीत्या निर्धूतसर्वप्रतिमतविमतितया सर्वार्थ-साधकानां शास्त्रज्ञानस्य बहुक्लेशमात्रपर्यवसानाभावेन बुद्धेः चलनकारणत्वाभावेन च **शास्त्रज्ञानम्** इत्यादि वचनस्य समुद्रघोषत्वापत्तेश्च।

मन्दमतीनां न्यायविश्वासाभावे तत्तद्गुरुपदेशेषु तत्तद्विश्वासविषयत्व-स्यवैदिकाऽवैदिकसाधारण्येन दर्शनेन सर्वशास्त्रसाम्यशङ्कया [2]**संशयात्मा विनश्यति** इत्युक्तविनाशस्यैव फलत्वापत्तेश्च । तस्मात् उक्तार्थविशदीकारार्थम-पेक्षितार्थान्तरबोधनार्थञ्च मीमांसामुखेन निरवशेषनिष्कलङ्कतत्वज्ञानजनकं वेदपाञ्चरात्रादिकमेव प्रेक्षावतां तत्वबुभुत्सूनां परिग्राह्यम्। मूलमन्त्रादिकन्तु दिव्यदेशवासभगवन्नामसङ्कीर्तनादिरीत्या न्यूनार्थज्ञानस्यापि तत्त्वज्ञानरूपतया कार्यकरत्वेन मन्दमतीनां सुखेन सङ्ग्रहेण तत्वहितपुरुषार्थप्रतिपत्त्यर्थं परिग्राह्यमिति।

किञ्च मूलमन्त्रस्यापि मीमांसासापेक्षस्यैव बोधकतया वेदादितौल्यमेव। अन्यथा रहस्यत्रयमीमांसाऽनारम्भप्रसङ्गेन व्याघातापत्तेः। अतः निरवशेषनिष्कल-ङ्कज्ञानजनकं वेदादिकमेव सर्वोत्कृष्टं प्रमाणमिति।

---

१. म.स्मृ.१२-१०६ २. भ.गी.४-४०

## अत्राय राद्धान्तः

मूलमन्त्रस्य यतोक्त उत्कर्षः सम्भवत्येव। सर्वप्रमाणतात्पर्यविषयार्थकत्वस्य [1]सर्वमष्टाक्षरान्तस्थम् इत्याद्यनुरोधेन वक्तव्यतया तस्यैव तत्त्वज्ञानजनने वेदाद्यपेक्षया उत्कृष्टत्वात्। न हि यत्किञ्चित्स्वार्थस्य सर्वप्रमाणतात्पर्य विषयत्वं तद्धर्मः। [2]वेदैश्चसर्वैरहमेव वेद्यः इत्युक्तरीत्या भगवन्मन्त्रमात्रे तत्सत्त्वेन अष्टाक्षरे विशेषोक्त्यनुपपत्तेः। किन्तु यावत्स्वार्थस्य सर्वप्रमाणपरमतात्पर्यविषयार्थकत्वे सति स्वानुक्तार्थस्य सर्वप्रमाणपरमतात्पर्याऽविषयत्वम्। तच्च अष्टाक्षरे वक्ष्यमाण-रीत्या उपपद्यते। एवञ्च प्रमाणान्तरेण ज्ञातव्यार्थाभावात् अष्टाक्षरस्यैव तत्त्वज्ञान-जनने मुख्यप्रामाण्यम्।

एवं सङ्ग्रहतया सुखेन ज्ञातव्य यावदर्थबोधकतयापि मुख्यप्रामाण्य-मुपपद्यते। महामतीनामपि अष्टाक्षरार्थातिरेकेण परमपुरुषार्थसिद्ध्यर्थं ज्ञातव्यार्थान्तरा-भावेन लघूपायभूताऽष्टाक्षरस्यैवादरणीयत्वात्।

यदुक्तं द्वेधा मूलमन्त्रविवरणतया वेदादेरेव मुख्यप्रामाण्यमिति। तद्युक्तम्। **व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणम्** इति परिभाषानुरोधेन विशेषप्रतिपत्त्यर्थं व्याख्यानस्याऽपेक्षितत्वमात्रेण मुख्यप्रामाण्याऽलाभात्। मूलस्य मुख्यप्रामाण्याक्षतेश्च। तथाहि - अस्य शब्दस्यायमर्थः, इति बोध्यबोधकभावपरव्या-ख्यानस्य नियतनिशेषाकारबोधनरूपोक्तार्थ विशदीकाररूपस्य अनियतापेक्षितोपपदा-कार्थान्तरबोधनरूपस्य च व्याख्यानस्य मूलवाक्यसापेक्षतस्यैव मूलार्थबोधकतया न निरपेक्षप्रामाण्यं सम्भवति। उपन्यासमुखेन बिम्बप्रतिबिंम्बभावापन्नो भयविध-व्याख्यानस्य मूलानपेक्षमेव मूलार्थबोधकत्वेऽपि न मूलमन्त्रस्य मुख्यप्रामाण्यहानिः। पदवाक्यतात्पर्यग्राहकप्रमाणसहकृतमूलमन्त्रजन्यवाक्यार्थज्ञानस्यापौरुषेय नित्यनिर्दोषप्रमाणजन्यतया ज्ञातव्य यावत्प्रधानार्थविषयकतया च निरवशेष निष्कल-ङ्कज्ञानजनकत्वात्, एतादृशस्याधिकारिणः **अयमेव पुरुषार्थः, इदमेव साधनम्** इत्येवमभिधानपर्यवसानाच्च। न च, एतादृशतात्पर्यविषयार्थकत्वं सुखप्रतिपत्तिजन-कत्वञ्च प्रणवाकारयोरस्ति। प्रणवस्य स्वरूपमात्रप्रतीतिजनकत्वेनाऽभिधानाऽ-पर्यवसानात्। अकारस्य पदार्थोपस्थापकमात्रत्वाच्च। न चैवं वेदादि प्रवर्तन-

---

१. वृद्ध.हा.सं.३-४५ २. भ.गी.१५-१५

वैफल्यम्। उक्तार्थ विशदीकारार्थान्तरबोधनाभ्यां सर्वचेतनाऽनुजिघृक्षया त्रिवर्गापवर्गतत्साधन्नबोधने च साफल्यात्।

न च मन्दमत्यनुजिघृक्षया मूलमन्त्रप्रवर्तनमित्युक्तं युक्तम्। महामतीनामपि निरवशेषनिष्कलङ्कज्ञानजनकतया लाघवार्थमादरणीयत्वात्। न च वेदादेः निरपेक्षप्रमाणतया विवरणत्वेनाऽऽवश्यकतया च प्राबल्यम्। विशेषाकारस्य उपपादकार्थान्तरस्य चाज्ञानेऽपि [1]**ज्ञानात् मोक्षः** इत्युक्तमुक्ति **व्याजभूतार्थपञ्चकतत्त्वज्ञानजनने मूलमन्त्रस्य अन्यानपेक्षत्वात्।** विशेषाकारतदुपपादकार्थान्तरजिज्ञासून् प्रति तदुभयशास्त्रसाफल्यसम्भवाच्च। **व्याजभूतत्वम्** अन्यार्थत्वे सति प्रसङ्गादुपकारकत्वं प्रकृते। स्वयं प्रयोजनभगवत्प्रीत्यर्थत्वेसति स्वरूपयाथात्म्यज्ञानरूपतया दृष्टविधया मोक्षोपकारकत्वम्।

अथवा - अस्तु मूलमन्त्रमात्रस्याभिधानाऽपर्यवसानम्। अत एव पूर्वाचार्यैः मन्त्ररत्नस्य चरमश्लोकोपबृंहितस्य श्रीशब्दतादिव्युत्पादकवचनानुगृहीतस्य मूलमन्त्रसुशिक्षितस्वरूपयाथात्म्यपुरुषार्थाऽऽकाङ्क्षितसपरिकरनिर्हेतुकविशिष्टोपायोपेयत्वनिर्धारकतया तत्साहायस्यैव मूलमन्त्रस्य स्वरूपोपायपुरुषार्थाभिधानपर्यवसायित्वमनुगृहीतम्। तस्मात्, अर्थस्वभावात् वेदादेः विवरणत्वेऽपि मूलमन्त्रस्य तदनपेक्षतया मुख्यप्रामाण्यं सिद्धम्।

किञ्च **शास्त्रज्ञानं बहुक्लेशम्** इत्यादिवचनबलेन वेदादेः मीमांसा - परिकरसापेक्षस्यैव बोधकतया दौर्बल्यं सिद्धम् । तस्य वचनस्याऽसङ्कोचेन सर्वाधिकारिविषयत्वसम्भवे मन्दमतिविषयत्वापत्त्ययोगात्। **बहुक्लेशम्** इत्यस्य मन्दमतिमहामति साधारण्येन मूलमन्त्रस्य सर्ववेदसारतया सर्वशाखाप्रत्ययसर्ववेदान्तप्रत्ययादिन्यायविचारनिरपेक्षतया बोधकत्वेऽपि वेदादेः तादृशन्यायविचारादिदुःखक्लेशहेतुत्वमस्तीति वैषम्यमात्रपरत्वेन **बहुक्लेशम्** इत्यध्याहारेण तात्पर्यवर्णनाऽयोगाच्च। **बुद्धेश्चलनकारणम्** इत्यस्य शोकाविष्टाऽर्जुनन्यायेनाऽप्रामाण्यशङ्काकलङ्कितबुद्धिसम्पादकत्वपरतया शङ्करादीनामिव विपर्याऽऽवहत्वपरत्वाऽयोगाच्च। चलनशब्देन विरुद्धकोट्यन्तरविषयकत्वस्यैव स्वरससतः प्रतीतेः। अन्यथा

१. म.भा.अनु.प.२१-१८

**विरमेत्सर्वकर्मसु** इति उपदेशजन्यज्ञानस्य सर्वकर्मत्यागफलकत्वोक्त्या उपदेशपदेन बहुक्लेशजनकत्वाभावाऽप्रतीतिवत्, उपदेशस्य साधनानुष्ठानं स्वरूपविरुद्धमिति दृढबुद्धिजनकत्वप्रतीतिविरोधाच्च। [1]**सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु** इत्याद्यनुसारेण सर्वकर्मशब्दस्य साधनाऽनुष्ठानपरतया शास्त्रार्थनिर्णयहेतुभूतश्रवण-मननादिरूपव्यापारनिषेधपरत्वास्वारस्याच्च।

औपदेशिकज्ञानसौकर्यमात्रपरत्वे [2]**सर्वधर्मान् परित्यज्य** इतिवत् त्याग-विध्यनुपपत्तेश्च।

व्यासादिपरमर्षिषु महामीमांसकत्वविश्वासशालिनोऽपि [3]**आलोड्यसर्व-शास्त्राणि** इत्याद्युपदेशस्य पौरुषेयतया प्रामाण्यनिश्चयार्थं मूलाऽनुसन्धानाऽवश्य-म्भावेन निरपेक्षोपदेशशास्त्रभूतस्पष्टार्थकमूलमन्त्रार्थसंवादमात्रार्थम् अपेक्षणीय-त्वेऽपि निर्णयार्थमनादरणीयत्वाच्च। उपदेशपदस्वारस्येन मीमांसाऽनादरप्रतीतेश्च। [4]**आर्षं धर्मोपदेशञ्च** इत्यादौ **ऋषिशब्दितवेदवाक्यानि, सिद्धसाध्यधर्मोपदेश-रूपस्मृतीतिहासपुराणानि च श्रुतिस्वारस्याऽनुग्राहकन्यायजातमुखेन मीमांसितान्येव धर्मनिर्णायकानि** इत्युक्त्वा मूलमन्त्रादेः मीमांसानिरपेक्षनिर्णय-कत्वेऽपि तद्वचनविरोधाऽभावाच्च। **मीमांसाशास्त्रयुगमश्रमविमलमनाः** इत्यनु-गृहीतरीत्या महामतीनामपि कालक्षेपार्थं सर्वप्रतिमतविमतिनिर्धूननार्थञ्च श्रमलब्धित बहुक्लेशाऽवश्यम्भावेन -

**पठन्तु कतिचिच्छठाः खफछठेतिवर्णच्छठाः।**
**घटः पट इतीतरे पटुरटन्तुवाक्पाटवात्॥**

**वयं वकुलमञ्जरी गलदरीण माध्वीझरी ।**
**धुरीणगुणरीतिभिः फणितिभिः प्रमोदामहे॥**

इति वेदान्ताचार्याऽनुगृहीतरीत्या तेषां शठरिपुसूक्त्याद्युपदेशस्यैव तत्वनिर्णयकत्वेन च शास्त्रज्ञानम् इत्यादेः समुद्रघोषत्वाऽनापत्तेश्च।

---

१. दक्षस्मृतिः २. भ.गी.१८-६६
३. म.भा. ४. म.स्मृ.१२-१०६

मन्दमतीनां न्यायविश्वासाभावेऽपि स्फुटार्थकमूलमन्त्रेण निरवशेषनिष्कलङ्कज्ञातव्यार्थनिर्णयसम्भवेन [1]**संशयात्मा विनश्यति** इत्युक्तार्थानापत्तेश्च। तस्मात् **शास्त्रज्ञानम्** इत्यादि वचनबलेन वेदपाञ्चरात्रादिकं सर्वेषां तत्वनिर्णयार्थमपरिग्राह्यम्। अपि तु मूलमन्त्रादिकमेव परिपूर्णोपदेशरूपतया परिग्राह्यमिति सिद्धम्।

किञ्च-मूलमन्त्रस्यापीत्यादिकमप्ययुक्तम्। शठरिपुशुकव्यासेत्याद्यनुगृहीतरीत्या सर्वप्रमाणमुख्यभूतश्रीमन्नाथमुनिप्रभृतिपूर्वाचार्यपरम्पराप्राप्तश्रीमत्पराङ्कुशमुनि प्रभृतिदिव्यसूरिसूक्त्यात्मकोपदेशजातबलादेव मूलमन्त्राद्यर्थनिर्णयसम्भवात्। तथापि वक्ष्यमाणरीत्या कालक्षेपार्थं भोगार्थञ्च **श्रमपरिणतश्रद्धाशुद्धाशयाः** इत्यनुगृहीतरीत्या श्रीमत्कुरुकेशाचार्यप्रभृतिश्रीमद्वरवरमुनिपर्यन्तपूर्वाचार्यप्रणीतश्रीमद्द्रमिडोपनिषद् भाष्यजातपरिशीलनशालिनां मीमांसा मुखेनापि रहस्यत्रयार्थनिर्णयसम्भवेन व्याघाताऽनापत्तेश्च। अतः निरवशेषनिष्कलङ्कज्ञानजनकं रहस्यत्रयमेव सर्वोत्कृष्टप्रमाणमिति।

अस्मिंश्च षष्ठाधिकरणे **सकलशास्त्रङ्गलाल्** इति प्रथमं सूत्रम्, शास्त्रज्ञानम् इति श्लोके पूर्वार्थतात्पर्यार्थपरम्। (तिरुमन्त्रत्ताल्) इति द्वितीयसूत्रं उत्तरार्धतात्पर्यार्थपरम्। तत्र शास्त्रपदम् - **शासनात् - शास्त्रम्, शासनञ्च-प्रवर्तनम्** इति श्रीभाष्यसूक्त्यनुसारेण **वेदाच्छास्त्रं परं नास्ति** इति वचनानुसारेण च प्रवर्तक वेदजातपरमित्यभिप्रायेण (शास्त्रङ्गलाल्) इत्युक्तम्। **अङ्गानि वेदाश्चत्वारः पुराणन्यायमीमांसाः** इत्याद्युक्तरीत्या साङ्गोपाङ्गवेदानामेव धर्मनिर्णायकत्वाभिप्रायेण **सकल** इत्युक्तम्। यथा **वेदवित् शास्त्रवित्** इत्यादौ वेदादि शब्दानाम् इति **श्रुतप्रकाशिकासूक्त्यनुसारेण** शास्त्रज्ञानपदम्-शास्त्रार्थज्ञानपरमित्यभिप्रायेण 'शास्त्रङ्गलाल् परिक्कुम् ज्ञानम्' इत्युक्तम्। (चेतनरक्कुप्पिरक्कुम्) इति पूरणीयम्। अन्यथा स्वयमिति पदस्य समभिव्याहृत - परस्याऽनन्वयात्। (चेतनर्क्कु) इति पदम् (आर्जितम्बोले) इत्यत्राप्यन्वेति। अनुषक्ते च पदे षष्ठ्यर्थो ज्ञातृत्वम् [2]**अहमस्य** इतिवत्। तथा च आर्जितसाम्यम् आत्मसाक्षिकमिति यावत्। स्वात्मनो बुद्ध्युत्पत्ति दृष्ट्वा इतिवत्। आर्जितशब्दे

---

१. भ.गी.४-४०  २. रामा.किष्कि.४-१२

धनमार्जयेदिति धनस्यार्जन कर्मत्वप्रसिद्ध्या (आर्जितधनम्पोले) इति विशेष्यं स्फुटम अस्तिभवत्यादीनां सार्वत्रिकतया (धनम्पोले पिरक्कुम्) इति भवति क्रियाध्याहारः स्फुटः।

आर्जितसाम्यञ्च-अत्यायासलभ्यत्वं विवक्षितम्। अतिशब्देन **आर्जितानाञ्च रक्षणे** इत्युक्तरीत्या रक्षणक्लेशोऽभिप्रेतः। तेनाऽप्रामाण्यशङ्काकलङ्कितत्वरूपबुद्धिचाञ्चल्याभावोऽपि दार्ष्टान्तिके सम्पादनीय इति फलितम्। दृष्टान्तमुखेन साधारणधर्मोक्तिः पुरुषार्थत्वतत्साधनत्वोभयाकारसूचनार्था। तेन च साङ्गोपाङ्गवेदप्रवचनवैफल्यशङ्का परिहृता। तत्वनिर्णयार्थं सपरिकरवेदाऽनपेक्षायामपि **वेदशास्त्रविनोदेन कालो गच्छति धीमताम्** इत्युक्तरीत्या कालक्षेपार्थं **प्रत्यक्षेण दृष्टमपि** इत्याद्युक्तरीत्या **न बोधादपरं सुखम्** इत्युक्त भोगार्थञ्च तत्प्रवचनोपपत्तेः। आर्जितस्याऽत्यायासलभ्यत्वेन अनार्जितापेक्षया भोग्यत्वमल्पमित्यभिप्रायेण **स्वयमार्जितधनम्पोले** इति विशेष्याऽनुपादानमित्यनुसन्धेयम्।

**मू।। (८) तिरुमन्त्रत्ताल् पिरक्कुम् ज्ञानम् पैतृकधनम्पोले।**
**षष्ठाधिकरणे द्वितीयसूत्रम्। (तिरुमन्त्रत्तालित्यादि)**

अत्र (तिरुमन्त्रत्ताल्) इत्यनेन परमपुरुषार्थहेतुभूतानिवर्तकज्ञानजनकत्वरूपयोगार्थपूर्तिसूचनमुखेन दार्ष्टान्तिके पैतृकधनसाम्योपपादनमभिप्रेतम्। अनेन च श्लोकस्थोपदेशपदेन अज्ञातज्ञापनप्रवृत्तिनिमित्तकेन मूलमन्त्र एव विवक्षित इति सूचितम्। मूलमन्त्रस्यैव **विरमेत्सर्वकर्मसु** इत्युक्तसाधनाऽनुष्ठानफलकसिद्धोपायज्ञानजनकाऽज्ञातज्ञापनरूपत्वादिति भावः। (पिरक्कुम् ज्ञानम्) इत्यनेन **हरिं बुद्ध्वा** इत्युक्त सिद्धोपायज्ञानं विवक्षितम्। हरति - **संहरति हरति - गृणाति** इति व्युत्पत्त्या हरिशब्देन इष्टप्रापणाऽनिष्टनिवारणलक्षणसिद्धोपायत्वलाभात्। (तिरुमन्त्र-ताल्) इत्यत्र (तिरु) इति पूजोक्तिः । तेन च प्रकृते श्रीमन्नाथयामुनयतिवरादिपूर्वाचार्यपरम्पराप्राप्तत्वं विवक्षितम्। ततश्च पूर्वोक्त व्याघातपरिहारः सूचितः। आचार्योपदेशपरम्पराप्राप्तमन्त्रार्थज्ञानस्य न्यायनिरपेक्षसोपबृह्मणवेदार्थनिर्णायकद्रमिडोपनिषज्जालरूपस्वतन्त्रप्रमाणश्रेष्ठमूलकत्वेन मीमांसानैरपेक्ष्यलाभात्। पैतृक शब्देन पितृ स्ववाचिना, पितुरपि दायप्राप्तत्वेन धनस्याऽनायाससिद्धत्वं लभ्यते। तेन च दार्ष्टान्तिके मन्त्रजन्यज्ञाने वेदजन्यज्ञान इव भगवतोऽङ्गोपाङ्गप्रवर्तन-

प्रयासं विना शठकोपमुनिप्रभृतिसूक्तिरूपोपदेशमुखेनैवोत्पत्तिसम्भवेन मीमांसा नैरपेक्ष्यं सूच्यते। अत एव स्वयमार्जितमितिवत् पित्रार्जितमित्यनुक्तिः। धनशब्देन दार्ष्टान्तिकज्ञानेऽपि भोग्यत्वं भोगोपकरणत्वञ्चाऽभिप्रेतम्। अत एव (अनाया सलभ्यमायिरुक्कुम्) इति साधारणधर्मस्य कण्ठतोऽनुक्तिः। (धनम्पोले) इत्यनन्तरं भवतीत्यध्याहारः पूर्ववत्।

अत्र प्रथमसूत्रे वेदस्य अपौरुषेयस्य अर्थस्वभावेन विवरणत्वेऽपि मूल-मन्त्रस्य पदार्थव्युत्पादकप्रमाणानुगृहीतस्य तादृशरहस्यद्वयसहकृतस्य विस्तृत-सोपबृह्मणवेदनिरपेक्षत्वेन लाघवार्थं मूलमन्त्र एव सर्वेषां मुख्यप्रमाणत्वेन परिग्राह्य इति पूर्वोक्त-शास्त्रज्ञानमित्यादिश्लोके पूर्वार्धविवक्षित प्राथमिकन्यायोऽभिप्रेतः द्वितीयसूत्रे मीमांसानिरपेक्षमेव निरवशेषनिष्कलङ्कज्ञानजनकतया उपदेशप्रमाण-सारभूतो मूलमन्त्र एव सर्वेषां परिग्राह्य इत्यनन्तरोक्तः श्लोकोत्तरार्धविवक्षितो द्वितीयन्यायोऽभिप्रेत इत्यनुसन्धेयम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे**
**उपदेशप्रमाणप्राबल्यसमर्थनं नाम**
**षष्ठाधिकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे

# मन्त्रान्तरापेक्षयामूलमन्त्रोत्कर्षसमर्थनं नाम

# सप्तमाधिकरणम्

## मू।। (१) भगवन्मन्त्रङ्ङल् तान् अनेकङ्ङल्।

अत्र यदि शास्त्रात् उपदेशस्याऽऽधिक्यम्, तर्हि [1]**इषेत्वा इत्यादि** मन्त्राणामर्थबोधनेन मुमुक्षुरक्षकत्वाभावेन तदनादरणीयत्वेऽपि नारायणरूपदेवता-विशेषपराणामानुष्टुभादिमन्त्राणमर्थबोधनेन मुमुक्षुरक्षकतया, न्यायनिरपेक्षाऽज्ञात-सिद्धार्थज्ञापनात्मकोपदेशरूपतया च, **मूलमन्त्रस्य न तदपेक्षया उत्कर्षसिद्धिः** इत्याक्षिप्य समाधीयते। तत्र संशयः - **मूलमन्त्रः** - स्वेतरसर्ववेदापेक्षया उत्कृष्टो न वेति। तदर्थं मूलमन्त्रः स्वेतरसकलभगवन्मन्त्रापेक्षया उत्कृष्टो न वेति।

### तत्र पूर्वः पक्षः

**मन्तारं त्रायते** इति व्युत्पत्त्या **तच्चोदकेषु मन्त्राख्या** इति सूत्रेण च मन्त्राणां योगरूढसमाख्याबलात् सकलशास्त्रापेक्षया उत्कर्षः तावत् सिद्धः। न च-पङ्कजादिशब्देष्वेव योगार्थातिप्रसङ्गेऽपि रूढिनिमित्ताऽनतिप्रसङ्गात्, न मन्त्रसमाख्यया सकलशास्त्रापेक्षया उत्कृष्टत्वसिद्धिरिति वाच्यम्। पुरुषेश्वरादि-शब्देष्विव, योगार्थोत्कर्षेणाऽपि अनतिप्रसङ्गस्य सम्भवतः त्यागाऽयोगात्। सम्भवति च तच्चोदकेषु योगार्थोत्कर्षः। मन्त्राधिकरणन्यायेन विधिवाक्येन ज्ञातस्याप्यर्थस्य नियमादृष्टानुविद्धानुष्ठानसिद्धये मन्त्रेणैव पुनः ज्ञातव्यतया मन्तुर्विशिष्यरक्षकत्वात्। सिद्धस्वरूपोपदेशपरेषु च देवता मन्त्रेषु स्वातन्त्र्येण स्वार्थानुसन्धानमात्रेण रक्षकत्वरूपयोगार्थोत्कर्षः उपपद्यते।

न च-भगवन्मन्त्रव्यतिरिक्तमन्त्राणां स्वरूपेणार्थबोधनेन वा मुमुक्षुरक्षकत्वा-भावेन न योगार्थोत्कर्ष इति वाच्यम्। तथा सति नित्यनैमित्तिकाङ्गमन्त्राणां

---

१.यजु.१-१

मुमुक्षुभिः अननुसन्धेयत्वापत्तौ अनुष्ठानविरोधात्। [1]**प्रियोऽपि न प्रियोऽसौ मे, मनसापि न लङ्घयेत्**, [2]**वर्णाश्रमाचारवता**, [3]**न चलति निजवर्णधर्मतो यः** इत्यादिवचनविरोधाच्च।

न चैवमपि मुक्तिहेतु ज्ञानजनकत्वाभावेन न योगार्थोत्कर्ष इति वाच्यम्। मुमुक्षुणामपि **अविदित्वाऋषिश्छन्दो दैवतं योगमेव च** इत्याद्यनुसारेण स्वरूपानुसन्धानेन अर्थानुसन्धानेन च रक्षकत्वे सिद्धे निरुक्ततारतम्यमात्रेण भगवन्मन्त्रव्यतिरिक्तमन्त्राणां मुमुक्षुभिः अनादरणीयत्वासिद्धेः। अन्यथा रहस्यत्रयेऽपि स्वरूपोपायपुरुषार्थेषु परस्पराऽनुक्ताकारविशेषप्रतिपादनलक्षणतारतम्यमादाय एकापेक्षयाऽन्यस्य अनादरणीयतापत्तेः।

माऽस्तु वाऽन्यमन्त्राणां योगार्थोत्कर्षः। तथापि भगवन्मन्त्राणां मिथस्तारतम्याभावेन न मूलमन्त्रस्यैवोत्कर्षः। [4]**तमेवं विद्वानमृत इह भवति** इत्याद्युक्तमुक्त्यर्थभगवत्स्वरूपज्ञानजनकतया भगवन्मन्त्राणां योगार्थपूर्त्यविशेषात्। न च रक्षणरूपयोगार्थतारतम्याभावे अनेकमन्त्र मननमनर्थकमिति वाच्यम्। **विकल्पो विशिष्टफलत्वात्** इति न्यायेनोपपत्तेः।

नापि व्यापकमन्त्राऽव्यापकमन्त्रसमाख्याभेदेन तारतम्यसिद्धिः। **व्यापकत्वोपलक्षित भगवत्स्वरूपप्रतिपादकमन्त्रत्वं व्यापकमन्त्रत्वम्** इत्युक्तौ - प्रवृत्ति निमित्तस्य सर्वसाधारण्यापत्तेः। **व्यापकत्वविशिष्टभगवत्स्वरूपप्रति पादकत्वं तत्** इत्युक्तौ, व्याप्त्यतिरिक्तगुणविशिष्टभगवत्स्वरूपप्रतिपादकेषुरामकृष्णादिमन्त्रेषुभगवद्गुणप्रतिपादकत्वाऽविशेषेण व्याप्तिप्रतिपादनतदभावाभ्यां तारतम्यस्य परिभाषामात्रत्वात्। नृसिंहानुष्टुभादिषु विष्ण्वादिशब्दासद्भावेन अतिव्याप्तेश्च। व्याप्त्यपेक्षित यावदाकारप्रतिपादनाभावेनऽनुष्टुभादौ अनतिप्रसङ्गे मूलमन्त्रस्यैव व्यापकमन्त्रत्वापत्तेः। अस्तु वा व्यापकमन्त्रस्याधिक्यं तथापि तत्र न मूलमन्त्रस्योत्कर्षसिद्धिः। व्यापकत्वविशिष्टभगवत्स्वरूपप्रतिपादकत्वात्।

न च-व्याप्यपदार्थव्याप्तिप्रकारव्याप्तिफलादिप्रतिपादकमूलमन्त्रस्य व्यापकस्वरूपमात्रप्रतिपादकमन्त्रापेक्षया मिथ्यावादिमतविरुद्धार्थ प्रतिपादनाधिक्यात्

---

१. लक्ष्मी.तं.१७-९५ २. विष्णु.पु.३-८-९ ३. विष्णु.पु.३-७-२० ४. पु.सू.

उत्कर्षसिद्धिरिति वाच्यम्। **निर्विशेषचिन्मात्रवादिनो** व्याप्तिमात्रप्रतिपादनस्यापि विरोधित्वात्, **कल्पितव्याप्तिपरत्वोक्तौ** कल्पितव्याप्यादिपरत्वस्यापि **सुवचत्वात्**, कुदृष्टिविरुद्धार्थप्रतिपादनाधिक्यस्योत्कर्षत्वोक्तेः परिभाषामात्रत्वाच्च। अन्यथा निमित्तमात्रेश्वरवादविरोध्युपादानत्वाऽप्रतिपादनेन मूलमन्त्रस्यापि अनुत्कर्षत्वापत्तेः। प्रमाणान्तरसाचिव्येन विवक्षितार्थलाभस्य सर्वत्रतुल्यत्वात्।

एतेन - अर्थपूर्तितदभावलक्षणं तारतम्यं व्यापकमन्त्रत्रयस्येति **प्रत्युक्तम्**। शब्दस्वारस्यपर्यालोचनयैव तात्पर्यस्य कल्पनीयतया व्याप्तिमात्रप्रतिपादनशक्तस्य मन्त्रद्वयस्य व्याप्तिविशिष्टस्वरूपप्रतिपादनमात्रे व्याप्त्यादि प्रतिपादनशक्तस्य तद्विशिष्टस्वरूपप्रतिपादने च तात्पर्यावश्यम्भावेन विवक्षितार्थपूर्तेः सर्वत्राऽविशेषात्, व्याप्तिसम्बन्धि यावदर्थाप्रतिपादनेन अपूर्त्युक्तौ नारपदार्थादौ विशिष्यानुक्त्या अपूर्णत्वापत्तेः स्यादेतत्।

पुराणापेक्षया इतिहासस्यैव परिग्रहातिशयात् व्यापकमन्त्रत्रयस्य अव्यापकमन्त्राऽपेक्षया श्रैष्ठ्यमुपपद्यते। परिग्रहातिशयश्च वेदसारभूतविष्णुगायत्र्यां व्यापकमन्त्रत्रयाम्नानात्। एवं मूलमन्त्रस्य विष्णुगायत्र्यां प्रथमोपादानात् इतरमन्त्रद्वयाऽपेक्षया प्राधान्यमुपपद्यते।

एवं कठवल्यां विष्णुशब्देन उपास्यदेवतानिर्देशात् श्रीविष्णुपुराणस्य विष्णुपुराणसमाख्याबलात् तत्रैव - [1]**विष्णोस्सकाशादुद्भूतम्**, [2]**विष्णवे सर्वजिष्णवे**, [3]**विष्णुर्वरिष्ठः**, **सकलफलप्रदो हि विष्णुः** इत्यादि प्रयोगात्। [4]**ते वैष्णवाः**, [5]तमवैहि **विष्णुभक्तम्**, **वैष्णवैः कृतलक्षणैः**, **न वैष्णवानाम्**, **वैष्णवोवैष्णवंदृष्ट्वा**, [6]**वैष्णवांघ्रिजलात्पुण्यात्**।

**वैष्णवैस्तु विशेषतः**, **ये च वैष्णवसंश्रयाः** इत्यादिप्रयोगबलात्, **वासुदेवोऽसि पूर्णः**, [7]**वासुदेवस्सर्वमिति**, [8]स वासुदेवो **नयतोऽन्यदस्ति**, [9]**ततस्स वासुदेवेति**, **वासुदेवपरा वेदाः**, **वासुदेवो न चिन्त्यते** इत्यादि प्रयोगबलाच्च वैदिकपरिग्रहोऽप्यनु सन्धेयः। अत एव व्यापकमन्त्रसमाख्याऽप्युपपद्यते। **पवित्रं**

१. विष्णु.पु.१-१-३१ २. विष्णु.पु.५-२-१ ३. विष्णु.पु.१-२-७० ४,५.विष्णु.पु.३-७-२०
६. विष्णु.पु.१-२-१ ७. भ.गी.७-१९ ८. विष्णु.पु.२-१२-४४ ९. विष्णु.पु.१-२-१२

**ते विततम्, चरणं पवित्रम्** इत्यत्र प्रमाणप्रसिद्ध्या विततत्वोक्तिवत् व्यापकत्वोक्ति सम्भवात्।

इत्थं नारायणानुवाकमहोपनिषत्सुबालोपनिषदन्तर्यामिब्राह्मणेषु वासुदेव-विष्णुशब्दाऽनाऽदरेण **नारायणशब्देन** भगवत्स्वरूपनिर्देशात्, व्यापकमन्त्रत्रये **मूलमन्त्रस्य** वेदपरिग्रहातिशयः स्फुटः।

इत्थं [१]**यथा सर्वेषु वेदेषु** इत्यादौ **नारायणमध्यान्यैस्तु** इति महापाप-हेतुत्वेनोक्ताऽनुसन्धानविषयनारायणसाम्यदृष्टान्तेन **सत्यं सत्यम्** इति शपथपूर्वक मुक्तिनिषेधदृष्टान्तेन च अष्टाक्षरात्परस्य न निषेधात् **भूत्वोर्ध्वबाहुः** इति शपथपूर्वकं तन्निषेधात्।

[२]**सर्ववेदान्तसारार्थः**, [३]**आर्ता विषण्णाः**, [४]**नारायणेति शब्दोऽस्ति, किं तत्र बहुभिर्मन्त्रैः** इत्यादिवचनेषु मूलमन्त्रस्य इतरव्यापकमन्त्रद्वयापेक्षया प्राशस्त्यकथनाच्च, मूलमन्त्रेऽपि वेदवैदिकपरिग्रहातिशयो द्रष्टव्यः।

एवं श्रीमत्पराङ्कुशमुनिप्रभृतिदिव्यसूरीणां नाथयामुन यतिवरादिपूर्वाचार्या-णाञ्च परिग्रहातिशयो मूलमन्त्रे अनुसन्धेय इति।

उच्यते-यत्तावदुक्तं विष्णुगायत्र्यामाम्नानात्, व्यापकमन्त्रत्रयस्यपरिग्रहातिशय इति। तदयुक्तम्। आरुणेषष्ठप्रश्ने अम्भस्यानुवाके विष्णुगायत्र्याः पूर्वं द्विः पठितायामन्ते **नमस्तेऽस्तु रुद्ररूपेभ्यः** इत्यनन्तरं पुनः पठितायां रुद्रगायत्र्याम्नानेन पुरुषमहादेवरुद्रशब्दानां परिग्रहातिशयप्रसङ्गात्। अत एव विष्णुगायत्र्यां प्रथमो-पादानान्मूलमन्त्रस्य प्राधान्यमिति निरस्तम्। ततः पूर्वं द्विरभ्यस्त रुद्रशब्दप्राधान्य-प्रसङ्गात्। तथा भूतमन्त्रदेवशब्दे तत्प्रसङ्गाच्च। रुद्रगायत्र्यां प्रथमं पुरुषपदोपादानेन तस्यैव सर्वापेक्षया प्राधान्यप्रसङ्गाच्च। तथैव गरुडगायत्र्यां दन्तिगायत्र्यापुरुष-शब्दस्य प्रथमोपादानेन तत्प्रसङ्गाच्च।

विष्णु गायत्रीसमाख्यवत् नारायणपदोपक्रमस्य स्वतन्त्रवेदपुरुषेच्छाऽ-धीनत्वेन प्राधान्यनियामकत्वे मानाभावाच्च। किञ्च विष्णुगायत्र्यां षडक्षराऽष्टाक्षरद्वा-

---

१. नार.अष्टा.१-४१ २. नार.पु.१-१३
३. विष्णुसहस्रनामस्तोत्रम् ४. विह.सं.२४-१२

दशाक्षराणा मन्त्राणां कार्त्स्नेनोपादानाभावेन नोत्कर्षसिद्धिः । अन्यथा मन्त्ररत्न-पूर्वोत्तरवाक्ययोः वैष्णवमन्त्रेषु च सर्वेष्वतिप्रसङ्गात्।

एतेन केवलं विष्णुशब्देनोपास्य निर्देशोप्यप्रयोजक इति सिद्धम्। अपि च नारायणादिशब्दानां, शब्दपरत्वे लक्षणाप्रसङ्गेन अर्थपरतया विष्णुगायत्रीप्रतिपाद्यत्वेन भगवतो देवताप्तिरपेक्षया प्राधान्यसिद्धावपि न विष्ण्वादिशब्दघटितमन्त्रत्रयप्राधान्यसिद्धिः। अन्यच्च सर्ववेदसारत्त्वेन सर्वसम्मते पुरुषसूक्ते पुरुषपदाम्नानात् तद्घटितमन्त्रस्यैव परिग्रहातिशयः स्यात्। एतेन विष्णुपुराणसमाख्यापि प्रत्युक्ता। पुरुषसूक्तसमाख्याप्रतिबन्ध्यापराहतत्त्वात्। श्रीरामायणभागवतहरिभक्तिसुधोदयादिसमाख्या प्रतिबन्धी पराहतत्वाच्च। तेषामर्थपरतयाऽर्थे अर्थान्तर व्यावर्तकत्वमेव। न शब्दविशेषे शब्दान्तरवैलक्षण्यपरत्वमित्युक्तौ सर्वत्र दीयतां दृष्टिः। एतेन [1]**विष्णोस्सकाशादुद्भूतम्** इत्याद्युदाहरणमपि प्रत्युक्तम्।

तत्र [2]**एवमेष महाशब्दो मैत्रेय भगवानिति,** [3]**भगवानिति शब्दोऽयं तथा पुरुष,** इत्यपि [4]**हरिरखिलाभिरुदीर्यते स एकः,** [5]**हरिरपजन्मजरादिकां समृद्धिम्** इत्यादेरपि नत्वाच्च।

अत एव वैष्णवशब्देन भक्तिनिरूपणमपि न विष्णुशब्दाधिक्ये प्रयोजकम्। देवतान्तरभक्तिव्यावृत्तिमात्रपरत्वात्। अत एव च वासुदेवशब्दघटित वाक्योदाहरणमपि दूरोत्सारितम्। इत्थञ्च व्यापकमन्त्रसमाख्योपपादनमयुक्तमिति सिद्धम्। व्यापकशब्देन त्रयाणां चक्रधारणवत् प्रमाणप्रसिद्धावपि मन्त्रान्तरव्यावृत्त्यसिद्धेः।

यद्यप्यष्टाक्षरे वेदपरिग्रहातिशयः स्पष्ट इति। तदपि मन्दम्। श्वेताश्वतरोपनिषदि - पुरुष ईश, हर, शिव, रुद्र, शब्दानामेव विष्ण्वादिशब्दाऽनादरेण जगत्कारणपरतया अभ्यासात्। अथर्वशिखायां ईशान, शम्भु, शिव, शब्दानामेव कारणरूपध्येयपरतयाऽऽम्नानात्। अथर्वशिरसिरुद्रशब्दस्यैव सर्वाऽन्तर्यामिपरतया प्रचुरतराऽभ्यासाच्च। एवं कालाग्निरुद्रोपनिषदादिकमपि उदाहर्तव्यम्। किञ्च नारायणशब्दाभ्यासस्य भगवन्माहात्म्यप्रतिपादनार्थं देवतान्तरव्यावर्तकत्वेऽपि नारायणशब्दे रुद्रादि शब्दव्यावर्तकत्वं नास्तीत्युक्तम्। एवञ्च विष्ण्वादि शब्द-

---

१. वि.पु.१-१-३१ २. विष्णु.पु. ६-५-७६ ३.विष्णु.पु. ४,५.विष्णु.पु.६-८-६४

व्यावर्तकत्वं दूरोत्सारितम्। इदानीमव्यापकभगवन्मन्त्रापेक्षयापि नारायणशब्दाभ्यासस्य व्यावर्तकत्वं नास्तीत्युच्यते। श्रीनृसिंहतापनीयोपनिषदि, श्रीरामचन्द्रतापनीयोपनिषदि च - नृसिंहानुष्टुभमन्त्रादेः सर्वाभीष्टप्रदत्वेन स्वयम्प्रयोजनत्वेन च शब्दस्वरूपेण कार्त्स्न्येन उपादानपूर्वकं सर्वोत्कृष्टत्वं हि प्रतिपाद्यते। नारायणशब्दाभ्यासस्तु अष्टाक्षरैकदेशस्याऽर्थप्रतिपादनार्थमुपादानरूप इति न तावन्मात्रेणाऽष्टाक्षरस्य सर्वोत्कृष्टत्वमुपपद्यते।

यदपि अष्टाक्षरमुपादायैव त्रेधा अन्यस्य परत्वनिषेधात् वैदिकपरिग्रहातिशयसिद्धिरिति। तदप्ययुक्तम्। भगवत्स्वरूपदृष्टान्तेन समाभ्यधिकराहित्यप्रतिपादनस्य भगवत्प्रतिपादकत्वेनोत्कर्षपरत्वग्राहकतया विष्ण्वादिमन्त्रवैषम्यपरत्वाऽसिद्धिप्रसङ्गात्। एतेन अष्टाक्षरमुपादाय वैभवप्रतिपादनमपि व्याख्यातम्। न हि निन्दा न्यायात् भगवत्प्रतिपादकत्वप्रयुक्तोत्कर्षपरतयाऽन्यथासिद्धत्वाच्च। यद्यपि **प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम्,** [1]**ओमित्यग्रे व्याहरेत्** इत्यादौ अष्टाक्षरोद्धारपूर्वकं तस्य संसानिवर्तकत्वं श्रुतम्। तथापि अनुष्टुभाद्यपेक्षया श्रुतिपरिग्रहातिशयो न लभ्यत एव।

एतेनैव दिव्यसूरीणां पूर्वाचार्याणाञ्च परिग्रहातिशयोऽपि प्रत्युक्तः। दिव्यसूरीणां वेदतदुपबृंहणाऽनुसारित्वात्। अन्यथा अशिष्टतापत्तेः। अत एव तदुपादानवैफल्याच्च। उभयथापि व्यर्थेति न्यायात्।

किञ्च [2]**आयिरनामम् शोल्लि** [3]**नामं पल परवि** [4]**नामम् पलवुम् न विन्नु** [5]**नाममायिरमेत्त,** [6]**ओतियायिरनामङ्गल्** [7]**ओदियायिरनामम् पणिन्दु** [8]**नामम् पलशोल्लि** [9]**मालरिकेशवन् इत्यादि - ओलमिडवेन्नैप्पणियिट्टु,** [10]**पेरुमोरायिरत्तुलोन्नुनीर् पेशुमिने** इत्यादौ अनन्तनाम्नामपि अविशेषेण अनुसन्धेयत्वं दिव्यसूरिभिरेव अनुगृहीतम्। तथा तेषामनुसन्धानमपि सार्वत्रिकमिति सार्वजनीनम् आचार्याणाञ्च अनुष्ठानपर्यन्तं सर्वभगवन्नामानुसन्धानम्।

---

१. नारा.उ. २.तिरुप्पल्लाण्डु-५ ३. तिरुप्पल्लाण्डु-५ ४. तिरुप्पावै-९
५. ना.ति.२-१ ६. पेरियतिरुमोलि ९-२-१ ७. तिरुवाय्मोलि ३-५-९
८. तिरुप्पल्लाण्डु -२ ९. तिरुवाय्मोलि ८-२-७ १०. तिरुवाय्मोलि १०-२-३

तथा हि-आचार्याः तावत् न शुद्धयाजिनः। [1]**सन्ध्यावन्दनत्तुक्कुगप्पट्टारै शिष्टगर्हैपण्णुमापोले,** [2]**इष्टाऽनिष्टङ्गल् वर्णाश्रमङ्गलैयुम् आत्मस्वरूपत्तैयुमवलम्बित्तिरुक्कुम्,** [3]**इवन् तान् इवै तन्नैनेराकविट्टिलन्** इत्यादि सुक्तिविरोधात्। नित्याराधनक्रमेषु पूर्वाचार्यानुगृहीतेषु सर्वेष्वपि नित्यनैमित्तिकानुष्ठानोक्तिविरोधात्। श्रीमद्वरवरमुनिदिनचर्यायाम् अभिगमनोपादानाद्यनुष्ठानोक्तिविरोधात्, [4]**ज्ञानाधिक्यत्ताले प्रपन्नर् पूर्वाचार्यर् कल्** इत्यनुगृहीतत्वेन ज्ञानाधिकानां तेषां [5]**मनसापि न लङ्घयेत्,** [6]**मद्भक्तोऽपि न वैष्णवः, प्रियोऽपि न प्रियोऽसौ मे** इत्यादि विशेषशास्त्रबलेन नित्यनैमित्तिकानुष्ठानावश्यम्भावाच्च। तदनुष्ठाने च ब्राह्ममुहूर्ते प्रथमं हरिर्हरिरित्युच्चारणीयम् । [7]**परव्यूहादिकान् पत्युः प्रकारान् प्रणिधाय च** इत्यनुगृहीतरीत्या वासुदेवादिनाम्नां केशवादिद्वादशनाम्नामनुसन्धानं कार्यम्। आचमनादौ नामत्रया नुसन्धानं कार्यम्। ऊर्ध्वपुण्ड्रधारणादौ **चतुश्चक्रं नमस्यामि** इत्यनुसन्धानं कार्यम्। अत एव [8]**मेल्लवेलुन्दरि येन्न पेररवम्** इत्यनुगृहीतम्। एवम् अन्यदपि उदाहर्तव्यम्।

अत एव श्रीमद्गीताभाष्ये [9]**सततं कीर्तयन्तो मां** इत्येतत् व्याख्यानावसरे नारायणकृष्णवासुदेवेत्यादीनाम् अनुसन्धानमनु गृहीतम्।

तस्मात् भगवन्मन्त्राणां मिथो न्यूनाधिकभावो निष्प्रमाणक इति।

## अत्रायं सिद्धान्तः

यत्तावदुक्तं मन्त्राणां सिद्धसाध्यपराणां स्वेतरसकलशास्त्रापेक्षया द्विविधोत्कर्षः कात्स्न्येनाऽविशेषेणोपपद्यत इति, तदयुक्तम्। भगवन्मन्त्रव्यतिरिक्तमन्त्राणां स्वरूपेणार्थबोधनेन वा मुमुक्षुरक्षकत्वमस्तीति वाच्यम्। तथापि मुक्तिहेतुज्ञानजनकत्वाभावात्।

न च - देवताज्ञाने सत्येव मन्त्राणां कार्यकरत्वेन मुमुक्ष्णामन्यमन्त्रार्थानुसन्धानमावश्यकमिति वाच्यम्। तथापि तस्य मुक्तिहेतुत्वाभावात् न च - शब्दतदर्थानुसन्धानावश्यम्भावे, मुक्तिहेतुज्ञानजनकत्वतदभाववैषम्यमात्रेण भगवन्मन्त्रव्यतिरिक्त-

---

१,२ श्री.व.भू.-३ ३. मुमुक्षुप्पडि-३ ४. श्री.व.भू.-१२ ५,६. लक्ष्मी.तं.१७-९५
७. पू.दि.-१५ ८. तिरुप्पावै -६ ९. भ.गी.९-१४

मन्त्राणां मुमुक्षुभिः अनादरणीयत्वाऽसिद्धिरिति वाच्यम्। मोक्षजनकसाधनाऽनुष्ठान-फलकज्ञानार्थमेव रहस्यत्रयमीमांसायाः आदरणीयतया तदारम्भणीयत्वौपयिकमन्त्र-पदमन्त्रपदयोगार्थोत्कर्षस्यैवा प्रकृते विचारणीयत्वेन तादृशोत्कर्षरहितानाम् अन्यमन्त्राणां अनादरणीयत्वोपपत्तेः। रहस्यत्रयोक्तस्वरूपोपायपुरुषार्थयाथात्म्येषु परस्परानुक्ताका-रपरिज्ञानाभावे, मोक्षोपयोगिसाधनाऽनुष्ठाफलकज्ञानपूर्त्यभावेन, रहस्यत्रयेकस्याप्य-नाद-रणीयताऽनापत्तेश्च।

किं बहुना? भगवन्मन्त्रेष्वपि मूलमन्त्रस्यैवोत्कर्षः। सर्वात्मनां स्वाभाविक-शेषित्वशरण्यत्वप्राप्यत्वरूपाकारत्रययुक्ततया, सुस्पष्टभगवत्स्वरूपप्रतिपादकत्वस्य मूलमन्त्र इव भगवन्मन्त्रान्तरेष्वभावात्। उक्ताकारत्रय युक्तभगवत्स्वरूपज्ञानस्यैवऽ-न्यशेषत्वस्वरक्षणस्वप्रयोजनान्वयनिवर्तनमुखेन मोक्षहेतुत्वाच्च। अन्यथा सर्वेषां मुक्त्यर्थज्ञानजनकत्वे [1]**अनन्ता वै भगवन्मन्त्राः** इत्युक्ताऽनन्तमन्त्रवैफल्यापत्तेः। **न चात्र विकल्पो** विशिष्टफलत्वात् इति न्यायेन भगवन्मन्त्राणाम् अदृष्टद्वारकार्थज्ञा-नजननमुखेन मोक्षसाधनता विकल्पः सम्भवति। स्वयंप्रयोजनविजातीयभगवदेक-भोगसाधनविजातीयविद्यानां मुक्तिव्याजतया, विकल्पस्यैव ब्रह्मसूत्रविवक्षितत्वात्। भगवन्मन्त्राणाञ्च [2]**आस्तां ते गुणराशिवद्गुणपरीवाहात्मनां जन्मनां सङ्ख्या** इत्यनुगृहीतरीत्या आश्रितानुग्रहार्थमनन्तावतारसमाश्रयणवत्, तत्तदतारगुणविग्रह-चेष्टितविशेषवैलक्षण्यानुभवरूपभोगसाधनतामादाय मन्त्रपदयोगार्थरक्षकत्वोपपत्तौ मुक्तिव्याजत्वेनाऽपि विकल्पाश्रयणे मानाभावाच्च।

किञ्च-व्यापकमन्त्राऽव्यापकमन्त्रसमाख्याभेदेन भगवन्मन्त्राणां तारतम्य-सिद्धिः दुर्वारा। न च - व्यापकत्वस्योपलक्षणत्वे अव्यावर्तकत्वं, विशेषणत्वे तारतम्याप्रयोजकत्वमितिव्याप्तिश्चेति वाच्यम्। मन्त्रनानात्वान्यथानुपपत्तिसिद्धसर्ववि-ग्रहसाधारणभगवत्स्वरूपबोधकत्व तत्तद्विग्रहावच्छिन्न भगवत्स्वरूपबोधकत्व-बोधयोरेव, व्यापकाऽव्यापकशब्दविवक्षितत्वात्।

भगवद्विग्रहविशेषमनपेक्ष्यैव शङ्खचक्रादिचिह्नितदेवतान्तरविग्रहव्या-वृत्तमूर्तिसामान्यावच्छिन्नतया, रूढ्या नारायणशब्द बोधितस्य भगवत्स्वरूपस्य

---

१. तै.ब्रा. २. श्रीरङ्गराजस्तवः-२-७४

त्रिविधात्मवर्गनिरूपितशेषित्वशरण्यत्व प्राप्यत्वरूपाऽऽकारत्रयविशिष्टतया भगवत्स्वरूपप्रतिपादकस्य मूलमन्त्रस्यैव, तत्तदवतारगुणविग्रहचेष्टितविशेषप्रतिपादकानामुक्ताकारत्रयाऽप्रतिपादकानां चाऽन्यमन्त्राणां परिपूर्णजीवेश्वरस्वरूपयाथात्म्यप्रतिपादकत्वभावेन, मुक्त्युपयोगिजीवेश्वरादिज्ञानजनकत्वासिद्ध्या तेषां निरुक्तव्यापकत्वाऽव्यापकत्वयोः तारतम्यप्रयोजकत्वात्। अनुष्टुभादावतारविशेषगुणविग्रहादिप्रतिपादके निरुक्तव्यापकत्वस्याऽनतिप्रसङ्गाच्च। सर्वावतारसाधारणभगवत्स्वरूपप्रतिपादकत्वस्य व्यापकमन्त्रत्रयेऽप्यविशेषेण मूलमन्त्रस्यैव व्यापकमन्त्रत्वानापत्तेश्च। अस्तु वेत्यादिकमप्ययुक्तम्। मूलमन्त्रस्य मिथ्यावादिमतविरुद्धार्थप्रतिपादकनाधिक्येन उत्कर्षसिद्धेः।

**न च** - व्याप्तिमात्रप्रतिपादनमपि विरुद्धमेव। कल्पितत्वं तु व्याप्यादेरपि सम्भवतीति वाच्यम्। नित्यसमूहवाचिना नारशब्देन नारायणशब्दे आधेयतया प्रतिपन्नानां नित्यत्वसिद्ध्या कल्पितत्वाश्रयणाऽयोगात्। नित्यत्वे कल्पितत्वव्याघातात्। गुणानामकल्पितत्वस्य **त इमे सत्याः कामाः** [1]**एतांश्च सत्यान् कामान्** इत्यादिस्पष्टार्थकश्रुत्यन्तरसिद्धत्वाच्च। सूत्रितञ्च शारीरकमीमांसायाम् [2]**आदरादलोपः** इति। **ततो ब्रवीति च भूयः** इति च। एवं दिव्यमङ्गलविग्रहाणां त्रिविधचेतनाऽचेतनात्मकविभूतीनाञ्च नारशब्दार्थत्वेन अकल्पितत्वसिद्ध्या विरुद्धार्थप्रतिपादनाधिक्यमनुसन्धेयम्। न च - कुदृष्टिविरुद्धार्थप्रतिपादनाधिक्यमुत्कर्ष इति परिभाषामात्रमिति शक्यं वक्तुम्।

परमपुरुषार्थ लक्षणमोक्षहेतुपरिपूर्णतत्त्वज्ञानजनकत्वस्यैव **मन्तारं त्रायते** इति व्युत्पत्तिसिद्धरक्षकत्वोत्कर्षरूपत्वेन तस्य कुदृष्टिविरुद्धार्थप्रतिपादनाधिक्ये सत्येव सम्भवात्। अतः स्वरूपरूपगुणविभूतीनां तन्नित्यत्वस्य च प्रतिपादनात् मूलमन्त्रस्यैव उत्कर्ष इति सिद्धम्। यत्तु - उपादानत्वाप्रतिपादनादनुत्कर्षापत्तिरिति। तन्न। [3]**पिता च रक्षकश्शेषी** इत्याद्यनुगृहीतरीत्या नवविधसम्बन्धप्रतिपादनेन ज्ञातव्यसकलार्थप्रतिपादनस्य वादिकेसरिरम्यजामातृमुनिभिः **तत्त्वदीपादौ** प्रपञ्चितत्वात्।

---

१. छा.उ.८-१-६ २. ब्र.सू.३-३-४०

३. तत्त्वदीपे

किञ्च - **अर्थपूर्ति** तदभावलक्षणं व्यापकमन्त्राणां तारतम्यमुपपद्यते। तथा हि - षडक्षरी तावत्, विष्णुपदेन [1]**विष्लृ-व्याप्तौ** इति धातोः कर्तरि कृदन्ततया व्युत्पन्नेन त्रिविधचेतनाऽचेतनरूपव्याप्यपदार्थाऽपेक्षया जलतेजोवायूनामिव अन्तस्संयोगमात्रेण व्यापकत्वं विना शरीरेषु जीवस्वरूपाणामिव धारकतया अन्तः प्रवेशरूपव्याप्तौ धारकत्वरूपप्रकारस्याऽन्तःप्रवेशरूपव्याप्तिफलभूतधारण-नियमनपूर्वकयादृच्छिकसुकृतादिमुखेन [2]**नित्यकिङ्करः प्रहर्षयिष्यामि** इत्युक्तचतुर्थी-व्यङ्ग्यकैङ्कर्यहेतुभूताऽयनपदवाच्यप्राप्तिपर्यन्तफलस्य तादृशफलपर्यन्तव्यापारहेतु-भूतानां ज्ञानशक्त्यादिवात्सल्यादिरूपव्यापकस्वरूपगतगुणानाञ्चाऽप्रतिपादनेन तत्स्वरूपमात्रस्य व्यापकत्वेनैव रूपेण प्रतिपादनेन च अपूर्णा।

तथा श्रीमद्द्वादशाक्षरीमन्त्रोऽपि अपूर्णः। [3]**वस निवासे** इत्यस्मात् धातोः कर्त्रर्थके औणादिके उदेवञ् प्रत्यये सति, प्रत्ययस्य ञित्वात् उपधा वृद्धौच सत्यां **वसतीति - वासुदेवः** इति व्युत्पत्त्या निष्पन्नस्य वासुदेवशब्दस्याऽऽवृत्त्याद्या-श्रयणेन **वसत्यत्रेति -वासुदेवः** इत्यधिकरणव्युत्पत्त्याधारकत्वलाभेन व्याप्तिप्रकार-वाचित्वेऽपि नारायणे शब्दे बहुव्रीहिवृत्ताविव व्याप्यवाचकपदाभावात्। अन्यथा सर्वत्र वसतीति अध्याहारप्रसङ्गात्।

न च - **विष्णुशब्दस्य** विष्लृ व्याप्तौ इति व्यापनक्रियामात्रवाचिनो धातोः औणादिकसुप्रत्ययान्तत्वेनव्युत्पन्नतया धारकत्वाऽलाभेन व्याप्तिप्रकार-वाचित्वाऽभावेऽपि वासुदेवशब्देधातोः व्यापनक्रियावाचित्वं विना आवर्तनक्रियावाचि-त्वाश्रयणेनाऽधिकरणव्युत्पत्तौ विष्णुशब्दे ईश्वरस्य व्याप्यत्वबाधवत् बाधकाभावात् [4]**सर्वत्राऽसौ समस्तं च** इत्यादिवचनबलाच्च व्याप्तिप्रकारवाचित्वमुपपद्यते। अत एव वचनबलात् आवृत्तिः, कर्तरिव्युत्पत्तौ अध्याहारोऽपि आवश्यक इति वाच्यम्। तथाऽपि वचनबलेन अध्याहाराऽऽवृत्त्याश्रयणेन बोधस्य नारायणपदजन्य-बोधापेक्षया त्रेधा विलम्बस्य दुरुद्धरत्वात्।

न च-नारायणपदे तत्पुरुषबहुव्रीहिवृत्तिद्वयाश्रयणे [5]**नारस्त्विति सर्वपुंसाम्** [6]**आपो नारा इति प्रोक्ताः** इत्यादिवचनमेव आश्रयणीयमिति वाच्यम्। नारायणशब्दे

---

१. जुहोत्यादि प्रकरणे   २. स्तो.र.४३   ३. भ्वादिप्रकरणे
४. विष्णु.पु.१-२-१२   ५. पाद्मो.पु.२२६-५२   ६. वि.पु.१-४-६

तत्पुरुषबहुव्रीह्योः लोकसिद्धतया वचनस्योपष्टम्भक मात्रत्वात्। वासुदेवशब्दे औणादिकप्रत्ययकल्पनस्य बाहुलकाऽधिकरणव्युत्पत्तिकल्पनस्य अध्याहारकल्पनस्य च वचनैकमूलत्वात्। किञ्च - अध्याहारेऽपि सर्वशब्दस्य वासुदेवशब्दान्वयो दुर्घटः। सकृत् श्रुतस्य सर्वशब्दस्य कर्तरिव्युत्पत्तौ अधिकरणव्युत्पत्तौ च व्यापनक्रियाधिकरणसमर्पकत्वेन वर्तनक्रियाकर्तृकसमर्पकत्वेन च अन्वयाङ्गीकारे वक्ष्यमाणरीत्या गुणानामव्यापकत्वेन गुणांशेऽपि अनन्वयापातात्। वाचनिकसर्वार्थाश्रयत्वरूपाऽर्थबलेन कर्तरिव्युत्पत्तौ अध्याहृताधिकरणसमर्पकगुणेतरसर्वविषयसर्वशब्दातिरेकेण अधिकरणव्युत्पत्तौ वाचनिकासङ्कुचितसर्वार्थाश्रयत्वरूपाऽर्थबलेन भगवत्स्वरूपेतरयावद्विषयस्य सर्वशब्दस्य **सर्वमत्र वसति सर्वत्र वसति** इति पृथगध्याहारे विवक्षितार्थबोधस्य तुरीयविलम्बापत्तिः।

अथ तत्परिहारार्थं पृथगध्याहारमपहाय वाचनिक सर्वार्थाश्रयत्वरूपाऽर्थबलेनाधिकरणव्युत्पत्तौ अध्याहृतस्य भगवत्स्वरूपेतरयावद्विषयस्य सर्वशब्दस्यैव लाघवतर्कसहकृतवचनबलेन कर्तरिव्युत्पत्तौ अन्वयोग्यतारनुसारेण स्वरूपतद्गुणेतरयावत्परतया अर्थवैरूप्याश्रयणेन कर्तरिव्युत्पत्तावपि अन्वयाङ्गीकारे वचनैकमूलकव्युत्पत्तिविशेषान्वयोग्यता परामर्शाधीनविरूपार्थकसर्वशब्दावृत्त्या विवक्षितार्थबोधस्य तुरीयविलम्बापत्तिः। सर्वत्राऽसौ समस्तञ्च इति सप्तमीप्रथमरूपविभक्तिभेदनिबन्धनसर्वशब्दवैरूप्येण पञ्चमविलम्बापत्तिश्च।

अथ - अर्थवैरूप्यनिबन्धनावृत्तिवैरूप्यपरिहारार्थं **सर्वमत्रवसति** इत्यत्र सर्वशब्दस्य गुणपरत्वं विना वासुदेवमन्त्रस्थभगवच्छब्देन गुणसिद्ध्यभ्युपगमेन तुरीयदोषपरिहारेऽपि गुणसिद्ध्यर्थं पदान्तरसापेक्षतया विवक्षितार्थबोधविलम्बरूपः पञ्चमदोषः दुर्वारः। एवं व्याप्तिफलाऽप्रतिपादनादपि उभयोरपि अपूर्तिः द्रष्टव्या।

यच्चोक्तं - व्यापकमन्त्रद्वयस्यव्याप्यादिवाचकपदरूपफलाभावेन तद्विशिष्टबोधपरत्वे मानाभावः। मूलमन्त्रस्य तु तत्सद्भावेन तत्परत्वमुपपद्यते। पदान्तरमनपेक्ष्य तात्पर्यविषयान्वयानुभावकत्वमेव वाक्यस्य पूर्तिः। अन्यथा बोध्यार्थसम्बन्ध्यबोधेन अपूर्णत्वे नारपदार्थादेः विशिष्यानुक्त्या मूलमन्त्रस्य अपूर्णत्वापत्तिरिति। तदयुक्तम् व्यापकमन्त्रद्वयस्य सर्ववेदसारभूतमूलमन्त्रार्थाऽनधिकार्थप्रतिपादकस्य तदन्यूनार्थप्रतिपादकत्वे वैयर्थ्यप्रसङ्गेनन्यूनार्थपरत्वाऽवस्यम्भावात्। अन्यथा मूलमन्त्रे

अधिकार्थप्रतिपादनवैफल्यापत्तेः। मोक्षहेतुभूतनिवृत्त्युपयोग्यर्थपञ्चकज्ञानपूर्त्यर्थतया मूलमन्त्रे एकस्यापि अक्षरस्य वैयर्थ्यानवकाशाच्च।

अत एव व्यापकमन्त्राणाम् अपूर्तिः न दोषाय। तेषां तत्तदवतारगुणविग्रह-चेष्टितविशेषादिरूपमूलमन्त्राऽनुक्तार्थप्रतिपादनेन सफलतया तदन्यूनार्थपरत्वे मानाभावात्। एवञ्च व्यापकमन्त्रद्वयस्य मूलमन्त्रसापेक्षतयैव विवक्षितार्थबोधकत्वा-दपूर्णत्वं सिद्धम्। अपूर्णस्यापि [1]**मालरिकेशवन्** इत्यादिरीत्या भगवत्प्रतिपादकत्व-मात्रेण भक्तिपारवश्यप्रपन्नानां शब्दविशेषानु सन्धानजनितभोगविशेषार्थतया, ज्ञानाधिक्यप्रपन्नानाम् **इष्टं हि विदुषां लोके समासन्यासधारणम्** इति न्यायेन भोगविशेषार्थतया, अज्ञानप्रपन्नानां सर्वभगवन्मन्त्रसाधारणस्वयंप्रयोजनभगव-न्मुखोल्लासाऽर्थकतया, त्रिवर्गार्थिनां जपहोमादिमुखेन तत्फलसिद्ध्यर्थतया च भगवत्कटाक्षविशेषादीनरुचिविशेष मूलकाऽनुसन्धानविषयत्वेन साफल्यमुपपद्यते। न च-नारायण पदस्यापि [2]**नारस्त्वितिसर्वपुंसां** [3]**आपो नारा** इति प्रोक्ताः इत्यादि विवरणसापेक्षत्वेनाऽपूर्णत्वप्रसङ्गः। न हि स्वाङ्गमितिन्यायेनऽभिधानपर्यव - सानहेतुभूततात्पर्यग्राहकसापेक्षत्वमात्रेण स्वैकवाक्यताऽनापन्नपदान्तरनिरपेक्ष-तात्पर्यविषयानुभावकत्वरूपपूर्तौ बाधकाभावात्। **सर्वमष्टाक्षरान्तस्थम्** इत्यादि वचनबलेन मूलमन्त्रस्यैव सर्वोपजीव्यत्वाच्च।

अपि च - वेदवैदिकपरिग्रहातिशयरूपः सर्वोत्कर्षः मूलमन्त्रस्योपपद्यते। तथाहि - विष्णुगायत्र्यामुपादानात् व्यापकमन्त्रत्रयस्य तावत्परिग्रहातिशयः सिद्धः तत्र प्रथमोपादानात् मूलमन्त्रस्य तत्सिद्धिः।

यदत्रोक्तं पुरुषमहादेवरुद्रशब्दानांरुद्रगायत्र्यां आम्नानेन परिग्रहातिशयप्रसङ्ग इति। तन्न। विकल्पाऽसहत्वात्। किं देवतान्तरपरतयापुरुषादिशब्दानां परिग्रहातिशयः आपाद्यते। उत-भगवत्परतया। नाद्यः। [4]**अम्भस्यपारे** [5]**यमन्तस्समुद्रे** इति नारायणानुवाकादिप्रसिद्धसमुद्रशायित्वलिङ्गात् **अद्भ्यस्सम्भूतो हिरण्यगर्भ** इत्यष्टौ

---

१. तिरुवायिमोलि ८-२-७ २. पाद्मो.पु. २२६-५२

३. विष्णु.पु.१-४-६

४,५. तै.उ.ना.व.१

इत्युक्त नारायणाष्टार्चनं वादबलात्, रुद्रगायत्रीषु उपक्रमे पुरुषश्रुत्यभ्यासबलात्, शचीपतिरूढसहस्राक्षश्रुति प्रतिबन्धिबलात्, **न तु नारायणादीनां नाम्ना मन्यत्रसम्भवः** इत्यादिवचनबलात् **रुजं द्रावयते यस्मात्** इत्यादिवचनबलात्, विष्णुगायत्र्याम् अनन्यथासिद्धभगवदसाधारणनामत्रयोपादानबलात् श्रीसहस्रनामाध्यायपाठबलाच्च अम्भसि अनुवाकस्य भगवत्परतया अन्यत्रस्थापितत्वेन, पुरुषमहादेवरुद्रशब्दानां देवतान्तरपरत्वाऽसम्भवात्। न द्वितीयः। पुरुषमहादेवरुद्रशब्दानां भगवत्परत्वस्य वासुदेव विष्णुनारायणशब्दाधीनतया तन्निर्णायकत्वाभिप्रायेणैव विष्णुगायत्र्यां व्यापकमन्त्रत्रयोपादानेन तस्यैव परिग्रहातिशयोपपत्तेः। अत एव –

**[१]भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।**
**निरुपाधी च वर्तेते वासुदेवे सनातने।।**

इति श्रीमतिवैष्णवे पुराणे धर्मिविशेषसमर्पकतया वासुदेवशब्दप्रयोगः उपपद्यते।

अत एव च –

**[२]रुजं द्रावयते यस्मात् तस्मात् रुद्रो जनार्दनः।**
**ईशानादेव चेशानः महादेवो महत्त्वतः।।** इति वचने

**[३]सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम्।**
**स संज्ञां याति भगवाम् एक एव जनार्दनः।।**

इति वचनेन च भगवत्प्रसिद्धजनार्दनशब्देन धर्मिनिर्देशः उपपद्यते।

अत एव च -

**[४]न तु नारायणादीनां नाम्नामन्यत्रसम्भवः।**
**अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः।।**

इति **वचने** विष्णुशब्देन धर्मिनिर्देशः उपपद्यते। नारायणानुवाके च चतुर्मुखवाचिपुल्लिङ्गब्रह्मशब्दशम्भुशिवेन्द्रशब्दानां देवाऽक्षरपतीश्वरब्रह्मतत्त्वज्योतिरात्मशब्दरूपसामान्यशब्दाष्टकस्य चाऽर्थनिर्धारणं नारायणशब्देन कृतमिति सुप्रसिद्धम्।

---

१,२. विष्णु.पु. ३. विष्णु.पु.१-२-६७ ४. विष्णु.पु.

अत एव विष्णुगायत्र्यां प्रथमोपादानात् **मूलमन्त्रस्य** प्राधान्यमुपपद्यते। ततः पूर्वमेवाऽभ्यस्तस्यापि रुद्रशब्दस्य न्यायदशकेनाऽप्राधान्यस्योपपादितत्वात्।

पूर्वमेव चतुर्वारमभ्यस्तस्यापि पुरुषशब्दस्याऽन्यपरत्वशङ्कार्हस्य **एतान् प्रयुञ्जन् विष्णुं प्रीणाति, निरुपाधी च वर्तेते वासुदेवे सनातने, नारायणाभ्यामुपस्थानम्** इत्यादि वाक्येषु श्रुतैः विष्ण्वादिशब्दैः एव अर्थनिर्णयस्य कर्तव्यत्वात् सुप्रसिद्धगणत्वाऽनुपपत्त्यादिभिः अन्यपरत्वशङ्कागन्धाऽनर्हस्य नारायणशब्दस्य प्रथमोपादनमिति सम्भवतः प्रयोजनस्य त्यागाऽयोगाच्च।

**न गायत्र्याः परो मन्त्रः** इति, **ध्येयस्सदा** इत्याद्युक्तध्यानविशेषकरणमन्त्रत्वलक्षणाऽनितरसाधारणोत्कर्षशालिन्यां प्रसिद्धगायत्र्यां सर्वप्रचोदयित्रु सवितृदेवशब्दत्वेन निर्दिष्टस्य भगवतः भर्गश्शब्दित तेजोविशेषणतया निर्देशप्रयुक्ताऽप्राधान्यपरिहाराय तृतीयपादे सर्वधीप्रचोदयितृत्वेन रूपेण प्राधान्येन निर्देशात्। एतदभिप्रायसूचनार्थं सवितृशब्दस्य सहस्रनामपाठसिद्धभगवत्परत्वसूचनार्थं च तवल्कारोपनिषदि **यज्ञो वै प्रचोदयति** इति तृतीयपादोपादानपूर्वकं कृत्स्नगायत्र्युपादानपूर्वकञ्च [1]**यज्ञेन यज्ञमयजन्त देवाः**, [2]**यज्ञो वै विष्णुः** इत्यादि प्रसिद्ध यज्ञपुरुषत्वेन विवरणात्, विष्णुगायत्र्यां विष्णुशब्देन नारायणवासुदेवसमाख्याद्वयोपोद्बलितेन गायत्रीप्रतिपाद्य देवताविशेषनिर्धारणात् [3]**एष सर्वभूतान्तरात्मा** इति प्रसिद्धप्रचोदकत्वस्य गायत्रीनिर्दिष्टस्य विष्णुलिङ्गत्वस्फुटीकरणात्, सर्वोत्कृष्टप्रसिद्धगायत्र्यर्थनिर्णयोक्त्या विष्णुगायत्र्यां नारायणानुवाके देवशब्दाभ्याससूचितगायत्रीवेद्यदेवतानिर्धारणस्य स्फुटीकारकत्वाच्च। पूर्वाचार्यैः **असारमल्पसारञ्च** इति वचनस्य वेदसारोपनिषत्सारतराऽनुवाकसारतमगायत्रीति विष्णुगायत्र्याः सारतमत्वपरत्वेन व्याख्याततया तत्र नारायणशब्दप्रथमोपादानस्य प्राधान्यनियामकत्वोपपत्तेश्च। अत एव विष्णुगायत्रीसमाख्यायामपि ऐच्छिकत्वाऽनुपपत्त्या तदृष्टान्ताऽसिद्धेश्च।

अत एव-किञ्च विष्णुगायत्र्यामित्याद्यप्ययुक्तम्। विष्णुगायत्र्यां नामत्रयोपादानस्य वैकल्याऽनुपपत्त्या मोक्षहेतु निवृत्तिकरणीभूतार्थपञ्चकज्ञानजनकमन्त्रत्रयोपलक्षणत्वाऽभ्युपगमात्। अन्यथा नामत्रयमात्रोपादानस्य अमूलकत्वापत्तेः। विष्णुवा-

---

१. पु.सू. २. यजुर्वेद ३. सुबा.उ.-१

सुदेवशब्दयोः प्राप्यप्रापकाकारपूर्त्यंशे नारायणशब्दसापेक्षत्वेऽपि रूढ्याऽवतारविशेषाऽनवच्छिन्न भगवत्स्वरूपप्रतिपादकतया प्रणवनमश्शब्दचतुर्थीघटिततया च अव्यापकसकलभगवन्मन्त्रापेक्षया अर्थपञ्चकप्रतिपादकांशे उत्कर्षोपपत्तेश्च। मन्त्ररत्नस्य मूलमन्त्रतुल्ययोगक्षेमतया व्यापकमन्त्रान्तर्भावेन तत्राऽतिप्रसङ्गस्याऽदोषत्वाच्च। मन्त्रप्रधानभूतनारायणशब्दैक्येन मूलमन्त्रमन्त्ररत्नयोः ऐक्यविवक्षया व्यापकमन्त्रत्रयोक्त्युपपत्तेश्च। मन्त्ररत्नस्य व्यापकमन्त्रत्वाविशेषेऽपि विष्णुवासुदेवमन्त्रत्रयोरशिष्टपरिग्रहाऽपूर्तिनिबन्धननिकर्षस्य मन्त्ररत्नप्रतिपन्नोपायोपेयाकांक्षाहेतुभूतस्वरूपशिक्षामूलत्वलक्षणमूलमन्त्रोत्कर्षस्य च सम्भवाच्च। एतेन अव्यापकवैष्णवमन्त्रेष्वतिप्रसङ्गो दूरोत्सारितः।

अत एव-कठवल्यां विष्णुशब्देन उपास्यनिर्देशोऽपि उत्कर्षप्रयोजक इति सिद्धम्। [1]**प्राज्ञो हि प्रकरणात्** इति ब्रह्मसूत्रोक्तन्यायेन जीवपरत्वेन प्रसक्तस्य [2]**पुरुषान्नपरं किञ्चित्** इत्युक्तपुरुषशब्दस्य देवताविशेषपरत्वनिर्धारकत्वात्।

एतेन - अपिचेत्यादिकमपि अपास्तम्। सारतमविष्णुगायत्र्यां नामत्रयमात्रोपादानस्य मोक्षहेतुनिवर्तकज्ञानजनकमन्त्रत्रयस्मारणमुखेन तदुत्कर्षसूचकतया साफल्यस्य सम्भवतः दुर्वारत्वात्।

एतेनैव - अन्यच्चेत्यादिकमप्ययुक्तम्। श्रीपुरुषसूक्तस्य शारीरकमीमांसायांविचारितत्वेन चिदचिद्विलक्षणदेवताविशेषत्वेन निर्णीतार्थकत्वलक्षणसर्ववेदसारत्वसद्भावेऽपि **पुरुषावात्ममानवौ** इत्यादि सामान्यरूढ्या ईशानशब्देन च सम्भावितायाः देवतान्तरपरत्वशङ्कायाः मन्दविषन्यायेन देवताविशेषयात्रारूढैः विष्ण्वादिशब्दैः **एतां प्रयुञ्जन् विष्णुं प्रीणाति, नारायणाभ्यामुपस्थानम्** इत्यादिवाक्यस्थैः परिहर्तव्यतया, व्यापकमन्त्राणां तदपेक्षया उत्कर्षोपपत्तेः। अत एव नारायणानुवाके [3]**सहस्रशीर्षम्** इति पुरुषसूक्तप्रत्यभिज्ञापनपूर्वकं नारायणशब्देन पुरुषशब्दार्थनिर्धारणमुपपद्यते। अत एव हर्यच्युतानन्तपरमात्मपदानां विष्णौ रूढानामपि, चतुर्मुखवाचिब्रह्मशब्दशम्भुशिवेन्द्रादिशब्दानामिव अर्थनिर्धारणमपि युज्यते। नारायणपदस्य मूलमन्त्र मन्त्ररत्नस्मारणमुखेन विशिष्टोपायोपेयत्वलक्षणवेद्याकारपूर्तिज्ञापनमुखेन दिव्यनामान्तरापेक्षयाऽतिशयि तत्वात्।

---

१. ब्र.सू.१-४-५ २. कठ.उ.३-१-११ ३. तै.उ.ना.व.

अत एव विष्णुपुराणसमाख्यापि प्रत्युद्धृता। चतुर्विंशत्सहस्रिकायाः संहितायाः चतुर्विंशत्यक्षरगायत्रीरूपत्ववत्, अंशषट्कात्मकस्य श्रीविष्णुपुराणस्य-मोक्षहेतुनिवर्तकज्ञानजनकषडक्षरवत् अवतारविशेषाऽनवच्छिन्नभगवत्स्वरूपप्रति-पादकतयाऽर्थपञ्चकज्ञानजनकतया च तद्विवरणत्व सूचनाय षडक्षरस्मारकविष्णु-पदघटितसमाख्योपपत्तेः। तथा-हि प्रथमाध्यायः प्रणवार्थपरः। [1]**विष्णोस्सकाशादुद्भूतम्** इत्यादिना - **जगच्च सः** इत्यनेन, [2]**अकारो विष्णुवाचकः** [3]**अकारार्थो विष्णुः** इत्याद्युक्ताऽकारविवरणपूर्वकं [4]**यथा जगत्**, [5]**यन्मयञ्च जगद्ब्रह्म** [6]**जगत्तत्रैव च स्थितम्** [7]**जगतोऽस्य जगच्च सः** इति अभ्यस्तजगच्छब्देन [8]**मकारार्थो जीवः** इत्याद्युक्तमकारार्थविवरणपूर्वकं [9]**तत्रैव च स्थितम्** इत्येवकारेण **जगच्च सः** इति शब्देन च, उकारार्थविवरणपूर्वकं, [10]**स्थितिसंयमकर्ता** इत्यनेन **जगच्च सः** इति तादात्म्येन च [11]**तदुपकरणं वैष्णवमिदम्** इत्याद्युक्तलुप्तचतुर्थ्यर्थविवरणपूर्वकं चांऽशषट्के वक्ष्यमाणार्थस्य सङ्ग्रहीतत्वात्। अनन्तरम् [12]**अविकाराय** इत्यारभ्य अंशषट्कं मन्त्रशेषविवरणम्। [13]**विष्णवे सर्वजिष्णवे** [14]**नमो हिरण्यगर्भाय** इति मन्त्रशेषोपादानपूर्वकं स्वरूपरूपगुणविभूति-भिरपरिच्छिन्नस्य भगवतो वासुदेवस्य प्रतिपादनेन **नारायणो जगन्मूर्तिः** इत्यादिषु नारायणशब्दोपादानेन च नारायणशब्दसमानार्थकतया विष्णुशब्दार्थप्रपञ्चनात् (अत्र **अनात्मन्यात्मबुद्धिर्वा** इत्यादिना नमश्शब्दार्थप्रपञ्चनाच्च इति वाक्यं पूरणीयम्।)

**इति विविधमजस्य** इति अन्तिमश्लोके **स दिशतु** भगवानशेषपुंसाम् इति व्यक्तचतुर्थ्यर्थपरप्रार्थनायाः कण्ठोक्तत्वात्।

न च, पुरुषसूक्तसमाख्यास्थपुरुषशब्दवत् विष्णुशब्दस्य देवताऽन्त-रव्यावर्तकत्वमेव, न तु मन्त्रविशेषस्मारकत्वमिति वाच्यम्। शब्दविशेषोपादान-प्रयोजनस्य सम्भवतः त्यागायोगात्। अत **एव** [15]विष्णोः कृपा, [16]**विष्णोः कटाक्षम्** विष्णुपोतं विना, **विष्णुस्सनातनः**, **विष्णुरात्मा यस्यां जातो विष्णुः** इत्यादिषु शब्दविशेषोपादानस्य प्रयोजनविशेषः पूर्वाचार्यैः अनुगृहीतः।

---

१. विष्णु.पु.१-१-३१ २. विष्णु.पु. ३. अष्टश्लोकी ४. विष्णु.पु.१-१-४
५. विष्णु.पु.१-१-५ ६,७.विष्णु.पु.१-१-३१ ८. अष्टश्लोकी
९,१०.विष्णु.पु.१-१-३१ ११. अष्टश्लोकी १२,१३,१४.विष्णु.पु.१-२-१
१५. अहि.सं.१४-२८ १६. वि.ध.पु.१-५९

पुरुषसूक्तसमाख्यायामपि तत्पुरुषस्य पुरुषत्वमितिवत्, पुरुषशब्दप्रयोगेणैव देवताविशेषपरत्वस्पष्टीकरणात्। समाख्यायाः असाधारण्याऽनुपपत्तेः। **न च-परमपुरुषपदघटितसूक्तं** पुरुषसूक्तमितिवाच्यम्। पदस्य स्वपरत्वेलक्षणापत्तेः। रामायणसमाख्यापि अवतारविशेषमाहात्म्यप्रतिपादनैदम्पर्येण प्रवृत्तिसूचनार्था। अन्यत्राप्येवं यथा सम्भवं समाख्या प्रयोजनमनुसन्धेयम्।

अत एव वैष्णवशब्देन भक्तिनिरूपणमपि विष्णुशब्दाधिक्ये प्रयोजकमिति सिद्धम्। **अर्थपञ्चकतत्त्वज्ञामहाभागवताः स्मृताः** इत्यादिरीत्या **विष्णुषडक्षरी प्रतिपाद्याऽर्थपञ्चकतत्वज्ञाः** इत्येतत्परतया सम्भवतः वैष्णवसमाख्याप्रयोजनस्य त्यागायोगात्। अत एव वासुदेवशब्दघटित वाक्योदाहरणं युक्तम्।

वासुदेवशब्दस्मारितपाञ्चरात्रप्रसिद्धद्वादशाक्षरीप्रतिपाद्यत्वसूचनेन तदर्थाभिज्ञत्वसूचनेन च विष्णुतद्भक्तयोः प्रशंसासम्भवात्।

इत्थञ्च पाञ्चरात्रप्रसिद्धव्यापकसमाख्योपादानमपि युक्तमिति सिद्धम्। सर्वदिव्यमङ्गलविग्रहसाधारणप्राप्तृत्वादिस्वरूपविशिष्टप्राप्यस्वरूपप्रतिपादकत्वस्य मन्त्रान्तरव्यावृत्तत्वात्।

यदपि श्वेताश्वतरादिषु देवतान्तरवाचकशब्दैः जगत्कारणं निर्दिष्टमिति। तदपि रुद्रगायत्रीन्यायेन निरस्तम्। श्वेताश्वतरे पुरुषशब्दस्य देवतानिर्धारकत्वस्य अन्यत्र प्रपञ्चितत्वात्। अथर्वशिरसि **अहमेकः** इत्यादेः अन्तर्यामिपरत्वस्य अथर्वशिखायां विष्णुशब्दस्यैव ध्येयसमर्पकत्वस्य च अन्यत्र समर्थितत्वाच्च। देवतान्तरपरतया रुद्रादिशब्दानां वेदपरिग्रहस्य वक्तुमशक्यत्वात्। भगवद्वाचकशब्दप्रयोगमुखेन रुद्रादिशब्दानां भगवत्परत्वस्य बहूपबृंहणप्रसिद्धत्वेन भगवत्परतया तेषां विष्ण्वादिशब्दाऽपेक्षया वेदपरिग्रहस्य वक्तुमशक्यत्वाच्च। न च विष्ण्वादि शब्दाऽनादरेण रुद्रादिशब्दप्रयोगविनिगमिकाविरहः **'रुद्रो बहुशिरा बभ्रुः 'सर्वश्शर्वश्शिवस्स्थाणुः** इत्यादि सहस्रनाम पाठन्यायेन रुद्रादिशब्दानां भगवन्नामत्वऊ सूचनार्थमेव प्रयोगात्। एवं प्रातर्दनन्यायात् निर्वाहोऽपि अनुसन्धेयः।

---

१,२. विष्णुसहस्रनामम्

किञ्च - अपूर्त्यशिष्टपरिग्रहयुक्तव्यापकमन्त्रद्वयापेक्षया नारायणशब्दाभ्यासस्य मूलमन्त्रो प्रणवनमश्शब्दवत् साधारण्याऽभावेन वासुदेवशब्दवत् नामान्तराऽसमभिव्याहारेण च मूलमन्त्रप्रधाननामत्वेन तत्स्मारकत्वात्, विष्ण्वादिशब्दानादरेण नामविशेषोपादानफलस्य सम्भवतः त्यागायोगाच्च, मोक्षहेतुनिवर्तकज्ञानजनकत्वरूपमन्त्रपदयोगवृत्तिनिमित्तपूर्तिसूचनमुखेन वेदपरिग्रहातिशयसाधकत्वं सिद्धम्। एवञ्च-रुद्रादिशब्दानां भगवन्नामत्वेऽपि नारायणनामसाम्यशङ्का दूरोत्सारिता। तेषामपूर्त्यशिष्टपरिग्रहयोरतिशयितत्वात्। किञ्च - नारायणशब्दस्यैव बहूपनिषदभ्यास इत्यन्यत्र विस्तरः।

आनुष्टुभादेः उत्तारकत्वश्रवणेऽपि मूलमन्त्रेण मोक्षजनकनिवर्तकज्ञानरूपाऽर्थपञ्चकयाथात्म्यज्ञानोत्पत्तौ सत्यामेव तादृशज्ञानोत्पत्तिप्रतिबन्धकदुरितनिवृत्तिद्वारा मुक्तिप्रयोजकत्वमेवेति, न मूलमन्त्रसाम्यशङ्कावकाशः।

अपि च-[1]'प्रत्यगानन्दम्' इत्यादिखण्डेन [2]'ओमित्यग्रे व्याहरेत्' इत्यादि खण्डेन च प्रणवाऽष्टाक्षरयोः स्वरूपेण उपादानपूर्वकमुत्तारकत्वं श्रूयते। एवम् अष्टाक्षरमुपादायैव त्रेधा परत्वनिषेधात् वैदिकपरिग्रहातिशयः सिद्धः। भगवद्दृष्टान्तेनाऽन्यत्रपरत्वनिषेधस्य भगवति वा सङ्कुचितयोग्यसर्वोत्कर्षसाधकतया मुक्तिहेतुनिवर्तकज्ञानपूर्तिहेतुत्वरूपोत्कर्षस्यापि सम्भवतो विवक्षितत्वाऽवश्यम्भावात्। एतेन अष्टाक्षरमुपादाय वैभवप्रतिपादनमपि व्याख्यातम्। सम्भवन्यायात्, असङ्कोचन्यायाच्च। नहिनिन्दान्यायस्तु विपरीतफलः। निन्द्यस्य सर्वथा त्याज्यत्वाभावस्य निन्दितादितरोत्कर्षस्य च सिद्धिहेतुत्वात्। अन्यथा निन्दा न निन्दितुं प्रवर्तते इति व्याघातात्, निन्दितादितरत्प्रशंसितुमितिव्याघाताच्च आनुष्टुभाद्यपेक्षया परिग्रहातिशयश्चाऽर्थपूर्त्यादिना सिद्ध इत्युक्तः।

वस्तुतस्तु दिव्यसूरिपरिग्रहातिशयादष्टाक्षरस्य सर्वमन्त्रोत्कर्षसिद्धिः दुर्वारा। तत्सूक्तीनामपौरुषेयनित्यनिर्दोषतया स्वतः प्रामाण्यस्य सोपबृंहणवेदव्याख्यानरूपवेदविशेषत्वस्य प्रामाण्यांशे प्रसिद्धवेदाधिक्यस्य चाऽन्यत्र सिद्धान्तितत्वेन तत्परिग्रहादेव समीहितनिर्वाहात्। एतादृशवेद परिगृहीतृत्वेन तेषामेव शिष्टाग्रेसरत्वात्। अत

---

१,२. नारायणोपनिषत्

एव तत्परिगृहोपन्यासस्साफल्याच्च। तद्बलादेव वैदिकपरिग्रहसाधकन्यायस्य पूर्वोक्तस्य दार्ढ्यसिद्धेः।

यदपि - किञ्चेत्यादिना भगवन्नाम्नामनन्तानाम् अनुसन्धेयत्वं दिव्यसूक्त्यनुष्ठानाभ्यां सिद्धमित्युक्तम्। तदप्ययुक्तम्। दिव्यसूरीणां भक्तिपारवश्येन प्रपन्नतया मुक्तानामिव [1]**एनक्कैन्नुम् तेनुम् पालममुतुमाय तिरुमाल् तिरुनामम्** इत्यनुगृहीतरीत्या भोग्यतातिशयेन [2]**नन्मालै पलकोण्डु,** [3]**विपन्यवः** इत्युक्तानन्तनामानुसन्धेयत्वस्य द्वेधा प्रकाशनोपपत्तेः। ज्ञानाधिक्यप्रपन्नानां तु स्वरूपज्ञानार्थमेव कस्यचिदनुसन्धेयतया स्वरूपज्ञानपूर्ति हेतुभूतमूलमन्त्रस्यैवाऽनुसन्धेयत्वात्। केवलभगवत्प्रियतया मन्त्रान्तराऽनुसन्धानस्य नित्यनैमित्तिकवत् आज्ञाकैङ्कर्यरूपत्वाभावेनाऽकर्तव्यत्वात् अनन्य प्रयोजनत्वविरोधेन पावनत्वबुद्ध्या कर्तुमशक्यत्वाच्च।

**यन्मुहूर्तं क्षणं वाऽपि** इत्यादेः प्रेमपारवश्यपरत्वाच्च **सकलं कालं "द्वयेन" क्षिपन्** [4]**मन्त्ररत्नानुसन्धानसन्ततस्फुरिताऽधरम्** इत्याद्युक्तरीत्या कालक्षेपादिरूपतया मूलमन्त्रद्वयार्थानुसन्धानेनैव **यन्मुहूर्तं क्षणं वापि** इत्याद्यनुष्ठानसम्भवाच्च [5]**रङ्गेशविज्ञप्तिकरामयस्य** इत्याद्युक्तरीत्या भागवतकैङ्कर्यरूपतया मन्त्रान्तरानुसन्धानस्य अधिकारि विशेषनियतत्वाच्च।

[6]**अष्टोत्तरशतं मूलमन्त्रमावर्तेत** इत्याद्युक्तरीत्या मूलमन्त्रस्यैव विहितस्थले पुरुषसूक्तादिवैष्णवमन्त्राणामनुसन्धेयत्वेऽपि स्वरूपानुसन्धानपूर्त्यर्थं **सन्तताऽनुसन्धेयत्वाऽसिद्धेश्च**। प्रेमातिशयानुकारेण सर्वमन्त्रानुसन्धानस्य **पुकुन्दतुवुमन्त्रियिले कुलैक्कवुम् वेणुमो** [7]**ततो निकृष्टो मयिमन्त्रिकृष्टे** [8]**नाय्कूलै वालाल्** [9]**नायेन् वन्दडैन्देन् न हि शुनालीढापि** इत्याद्यनुगृहीतरीत्या स्वरूपानुसन्धानशालिनां [10]**स्वात्माप्येनं विगर्हते** इत्याद्युक्तरीत्या [11]**गुरुं प्रकाशयेत्** इत्युक्तरीत्याऽनुकारेण धारणस्य साम्प्रदायिकस्य प्रकाशनार्थं, श्रीमन्नाथमुनिप्रभृतिपूर्वाचार्याऽऽज्ञा-

१. पेरियतिरुमोलि.६-१०-६ २. तिरुवायिमोलि ४-२-३ ३. सुबा.उ.-६
४. पू.दि. ५. श्री.रङ्ग.स्तो. ६. श्री.रङ्ग.अष्टो.
७. श्री.रङ्ग.स्तो.८ ८. तिरुवायिमोलि ९-४-३ ९. पेरियतिरुमोलि.१-९-१
१०. रामा.अयो.का.१७-१४ ११. शे.सं.१४-३३

परिपालनार्थं **नल् कन्नुक्किरङ्गुम् पशु तोल् कन्नुक्किरङ्गुमापोले** इत्यनुगृहीतरीत्याकेवलभगवत्प्रियतयाऽनुज्ञाकैङ्कर्यं सिद्ध्यर्थं **यूयं यूयं वयं वयम्** इत्याद्युक्तरीत्या प्रयोजनाऽन्तरपरव्यावृत्तस्वाधिकारप्रकटनार्थञ्च मूलमन्त्रमन्त्ररत्नतद्विवरणदिव्यप्रबन्धानां स्वरूपतः अर्थतोवाऽनुसन्धेयत्वसम्भवेऽपि तत्परित्यागेन केवलमुत्तारकरामकृष्णवासुदेवशब्दानाम् ऐच्छिकानुसन्धानस्य ज्ञानाधिक्यप्रपन्नेषु स्वरूपविरुद्धत्वाच्च। लज्जा भयातिशयेनैव निवृतिसिद्धेश्च।

इत्थञ्च-अज्ञानप्रपन्नेषु तेषामैच्छिकानुसन्धानं कैमुतिकन्यायेन स्वरूपविरुद्धमिति सिद्धम्। तस्मात् दिव्यसूरीणां सर्वेषामैककण्ठ्येन मूलमन्त्रमन्त्ररत्नस्मारकनारायणशब्दाभ्यासस्य विशिष्यदरीदृश्यमानतया तद्बलेन तयोस्सर्वमन्त्रोत्कर्षसिद्धिः। किं बहुना ? **मन्त्रान्तरत्तिनरुकुम् मरन्दुम् पोकक्कडवनल्लन्। तिरुमन्त्रत्तिलुम् द्वयत्तिलुम् नियतनाकैयुम् सकलं कालं द्वयेन क्षिपन्** इत्यादि सूक्तिषु प्रमाणोपपत्ति संप्रदायसूचनमुखेन, अनुष्ठानमुखेन, उपदेशमुखेन, चरमरहस्यत्रयस्यैव पूर्वाचार्यैः अतिशयेन परिगृहीतया पूर्वोक्तवेदवैदिकदिव्यसूरिं परिग्रहातिशयः निष्प्रत्यूहः।

यत्तु-पूर्वाचार्याणाम् आज्ञाकैङ्कर्येषु नामान्तरानुसन्धानमस्तीत्युक्तम्। तदयुक्तम्। तावता **अग्निश्च मामन्युश्च** इत्यादि देवतान्तरमन्त्राणामिव अच्युतानन्तगोविन्देत्यादिनामत्रयादीनामाज्ञाकैङ्कर्यान्तर्भावेन परिग्रहसिद्धावपि, मोक्षजनकनिवर्तकज्ञानपूर्तिहेतुतया सदानुसन्धेयत्वमूलभूतपरिग्रहातिशयाऽसिद्धेः [1]**सततं कीर्तयन्तो माम्** इत्येतद्व्याख्यानावसरे च [2]**नमस्यन्तश्च मां भक्त्या** इत्युक्तानां भक्तिभारावनमितदेहानां भक्तिपरिवाहरूपतयैव नारायणकृष्णवासुदेवेत्याद्यनुसन्धानमनुगृहीतमिति न तद्विरोधगन्धोऽपि।

तस्मात् [3]**यथा ते तत्र वर्तेरन्, यथा ते तेषु वर्तेथाः** इत्युक्तरीत्या पूर्वाचार्यप्रबन्धानुष्ठानोपदेशानुसारेण स्वरूपज्ञानार्थं मूलमन्त्र एव सदाऽनुसन्धेय इति सिद्धम्।

---

१,२. भ.गी.९-१४

३. तै.उ.शि.व.११-४

इदञ्च सप्तममधिकरणं षट्सूत्र्यात्मकम्। तत्राद्यं सूत्रं **भगवन्मन्त्रङ्गल् ताननेकङ्गलित्यादि**। भगवन्मन्त्रास्तु इत्यर्थः। भगवच्छब्देन [1]**इषेत्वा** इत्यादिक्रियाङ्गमन्त्राणां, पञ्चाक्षार्यादि केवलदेवतान्तरमन्त्राणाम् **अग्निश्च** इत्यादि देवतान्तराङ्कितमन्त्राणाञ्च व्यावृत्तिः। साक्षाद्भगवत्परत्वं विवक्षितम्। तेषां भगवत्स्वरूपप्रतिपादकत्वाभावात्, मुमुक्षुरक्षकत्वाभावात्, मुक्तिहेतुज्ञानजनकत्वाभावाच्चेति भावः। तु - शब्देन पूर्वोक्त सकलशास्त्रापेक्षया मन्त्राणां मन्त्रसमाख्यासिद्धं विशेषरक्षकत्वरूपं शङ्काबीजमभिप्रेतम्। **अनेकङ्गल्** इत्यनेन भगवन्मन्त्राणां विविधविचित्रगुणविग्रहचेष्टितविशेषप्रतिपादनेन बुभुक्षुविषये तत्तदिष्टाऽनिष्टप्राप्तिपरिहारार्थतया, मुमुक्षुविषये विविधविचित्रस्वात्मपरमात्मभोगार्थतया च पूर्वोक्तं प्रमाणोपपत्तिसिद्धमानन्त्यप्रेतम्।

**मू।। (१०) अवैतान् व्यापकङ्गलेन्नुम्, अव्यापकङ्गलेन्नु मिरण्डुवर्गम्।**

भगवन्मन्त्राणामवतारप्रयोजनपर्यालोचनयैव व्यापकमन्त्रस्यमुक्तिहेत्वर्थपञ्चकज्ञानजनकत्वलक्षणोत्कर्षसिद्धिमभिप्रेत्य व्यापकाऽव्यापकसमाख्याबलादपि तत्सिद्धिमभिप्रेत्य द्वितीयसूत्रमाह **अवैतानित्यादि । अवैतान्** भगवन्मन्त्रास्त्वित्यर्थः। पूर्वसूत्रे मन्त्राणां भगवच्छब्देन विशेषणात् मन्त्रसामान्ये साक्षात् भगवत्परत्वतदभावाभ्यां वर्गद्वयसूचनेन व्यापकाऽव्यापकरूपेण वर्गद्वयविशिष्टभगवन्मन्त्राणां एतत्सूत्रोक्तानां वैषम्यं, तु - शब्देन द्योतते। नारायणाभ्यामुपस्थानम् इत्यादाविव प्रतिपाद्यप्रतिपादयोः अभेदोपचारेण व्यापकभगवत्स्वरूपप्रतिपादकत्वं व्यापकसमाख्यानिमित्तम्। तच्च सर्वावतारसाधारण भगवद्गुणविग्रहव्यापारविशिष्टभगवत्स्वरूपप्रतिपादकत्वं, मुक्तिहेतुनिवर्तकज्ञानविषयाऽर्थपञ्चकप्रतिपादकत्वं वा। तेन श्रीवेङ्कटेशाक्षरी नवाक्षरी प्रणतार्तिः हरदशाक्षर्यादिषु प्रणवनमोघटितेषु **ओं माधवाय नमः, ओं श्रीधराय नमः** इत्यादिषु च नातिप्रसङ्गः। तदेतत् सर्वमभिसन्धायाह (व्यापकङ्गलेन्नुम्, अव्याप कङ्गलेन्नुम्) इति। व्यापकत्वाव्यापकत्वयोः समुदायद्वयोपाधितया परस्परविरुद्धप्रवृत्तिनिमित्तत्त्वसूचनाय (इरण्डुवर्गम्) इत्युक्तम्। न तु -(इरण्डु पडियायिरुक्कुम्) इति। अन्यथा व्यापकभगवत्स्वरूपप्रतिपादकतया व्यापकत्वम्। अव्यापकगुणविग्रहादिप्रतिपादकतयाऽव्यापकत्वमपि एकस्यैवेति प्रसङ्गात्।

---

१. यजुर्वेदे १-१

**मू ।। (११) अव्यापकङ्गलिल् व्यापकङ्गल् मून्रुं श्रेष्ठङ्गल्**

**(१२) इवै मून्रिलुम् वैत्तुक्कोण्डु पेरियतिरुमन्त्रम् प्रधानम्।**

एवमानन्त्य समाख्यारूपहेतुद्वयमुक्त्वा साध्यं निर्दिशति तृतीयसूत्रेण (अव्यापकङ्गलित्यादि)।

(अव्यापकङ्गलिल्) अव्यापकमन्त्रेभ्यः इत्यर्थः। (व्यापकङ्गल् मुन्रूम्) व्यापकमन्त्रास्त्रयोऽपीत्यर्थः। न्यूनाधिकसङ्ख्याव्यवच्छेदाय त्रित्वेन व्यापकमन्त्रसमुदायोक्तिः। तेन विष्णुपदघटितवैष्णवमन्त्राणां मन्त्ररत्नस्य च आधिक्यशङ्का, विष्णुवासुदेवमन्त्रयोः अव्यापकत्वेन न्यूनत्वशङ्का च पूर्वोक्तरीत्या परिहृता। विष्णुवासुदेवमन्त्रयोः अवतारविशेषाऽप्रतिपादकत्वेन मुक्तिहेतुनिवर्तकज्ञानैदंपर्येण प्रवृत्ततयाऽन्यापेक्षया उत्कृष्टत्वेऽपि वक्ष्यमाणरीत्या मूलमन्त्रापेक्षया निकृष्टत्वेन व्यापकत्वं नस्यादिति शङ्कां परिहर्तुमपि शब्दप्रयोगः। भर्त्रादिशब्दवत आपेक्षिकोत्कर्षविशेषमादाय वैवक्षिको व्यावहारविशेषः सम्भवतीति भावः। त्रित्वेन प्रसिद्धवन्निर्देशात् विष्ण्वादिशब्दत्रयस्य विष्णुगायत्रीस्थत्वेन एकबुद्ध्युपारोहः सूच्यते। तेन श्रैष्ठ्ये तृतीयो हेतुः सूचितः । अत एव तृतीय सूत्रे साध्यस्य पृथङ्निर्देशः (श्रेष्ठङ्गल्) इति। मन्त्रशब्दयोगार्थोत्कर्षशालिन इत्यर्थः।

इत्थं व्यापकमन्त्रत्रयसाधारणधर्ममुखेन मूलमन्त्रे मन्त्रान्तरवैलक्षण्यमुक्तम्। असाधारणवैलक्षण्यं दर्शयति तुरीयसूत्रेण (इवैमून्रिलुमित्यादिना) । इदं शब्देन श्रेष्ठत्वेनोक्ताः परामृश्यन्ते। अनेन-विष्णुगायत्रीस्थत्वेन सारतमेषु त्रिष्वपि सारत्वमुक्तम्। (इवैमून्रिलुम् वैत्तुक्कोण्डु) इत्युक्ते (अव्यापकङ्गल्) इत्यर्थः शङ्क्येतापि अतः ( मून्रिलुम्) इत्युक्तम्। अपि समुच्चये। अव्यापकमन्त्राऽपेक्षया व्यापकानामुत्कर्षः व्यापकद्वयापेक्षया मूलमन्त्रस्य उत्कर्षश्च सम्भवतीत्यर्थः।

अनेन शङ्काविशेषः परिहृतः। अव्यापकमन्त्रापेक्षया व्यापकमन्त्राणामुत्कर्षेऽपि परस्पराऽनुक्तार्थपरतया न कस्यापि वैफल्यम्। मूलमन्त्रोत्कर्षे तु तदनधिकार्थतया व्यापकमन्त्रद्वयवैफल्यमिति शङ्का।

परिहारस्तु, **इष्टं हि विदुषां लोके** इति न्यायेन भोक्तॄणां सङ्ग्रहविस्तराभ्याम् अनुभवविशेषलक्षणभोगविशेषार्थं षाड्गुण्यतद्वितितिरूपवर्गद्वयस्य, व्यूहादि

विग्रहवर्गाणाञ्च [1]**गुणैः षड्भिः तु एतैः** इत्यारभ्य **प्रणतजनभोगं प्रसुवते** इत्यन्तेन श्लोकचतुष्टयेन श्रीवत्साङ्कमिश्राऽनुगृहीतरीत्या [2]**आस्तां ते गुणराशिवत्** इत्यादि श्रीपराशरभट्टार्याऽनुगृहीतरीत्या च आविर्भाववत्।

[3]**पाथेयं पुण्डरीकाक्षनामसङ्कीर्तनामृतम्**, क्वजपो **वासुदेवेति मुक्तिबीजमनुत्तमम्**, [4]**कथयन्तश्च मां नित्यम्**, [5]**सततं कीर्तयन्तो मां श्रुण्वन्ति गायन्ति गृहणन्ति** [6]**मालरि** केशवन् इत्यादि - **ओलमिडवेन्नैप्पणिय-यिट्टि** [7]एनक्केन्रुमु **तेनु म्पालुममुदुमाय तिरुमाल्** तिरुनामम्, [8]**पाराशर्य-वचस्सुधाम् पिबन्तु भक्तामृत विश्वजनानुमोदनम्**, भाष्यामृतप्र**दानाद्यः** इत्याद्यनुगृहतरीत्या विविधविचित्रभोगहेतुभूतमन्त्रमुखेन तद्गुणानुभवार्थं मन्त्रवर्गद्वय-स्यापि भगवता प्रकाशनोपपत्तेः इति।

यद्वा - अपि शब्देन विरोधो द्योत्यते। विरोध शङ्काचेत्थम्। विष्णुमन्त्रापेक्षया मूलमन्त्रस्य प्राधान्येन वासुदेवमन्त्रापेक्षयाप्राधान्यं, वासुदेवपदस्य व्युत्पत्तिद्वयेन व्याप्तिप्रकारस्यापि लाभेन विष्णुशब्द परिग्रहवत् अशिष्टपरिग्रहाभावात् मन्त्रे भगवच्छब्दसत्त्वेन विष्णुमन्त्र इवाऽपूर्त्यभावाच्चेति। परिहारस्तु पूर्वोक्तरीत्या पञ्चमसूत्रे अनुसन्धेयः।

(वैत्तुक्कोण्डु), (उण्णुकोण्डु), (कण्डुकोण्डु) इत्यादिवत्। (भागो भागधेयम्, नाम-नामधेयम्) इत्यादिवच्च समुदायोक्तिः। वैत्तु इत्यर्थः, मनसि निधायेति यावत्। मन्त्रत्रयविषयकपर्यालोचने क्रियमाणे, मूलमन्त्रे प्राधान्यं सिद्ध्य-तीति भावः। मूलमन्त्रे पूर्वाचार्याणां निरूढ व्यवहारः इत्युक्तम्। (पेरिय) इति विशेषणं प्राधान्ये हेतुगर्भम् (मून्रिलुम्) इति त्रित्वोक्तिः - मूलभूतविष्णु- गायत्री-जन्यैक बुद्ध्युपारोहस्य सूचनात्। तत्र प्रथमोपात्तत्त्वं पेरिय इति विवक्षितम्। तस्य हेतुत्वं पूर्वमुपपादितम्। किञ्च - उत्तरसूत्रे अशिष्ट परिग्रहाऽपूर्त्योः प्राधान्याऽभावे हेतुत्वेनाऽभिप्रेततया अस्मिन् सूत्रे 'पेरिय' इति विशेषणेन अर्थपूर्तिः तन्निबन्धनाऽ-शिष्टविरोधित्वञ्च प्राधान्ये हेतुत्वेन विवक्षितमि ति गम्यते। इदमपि हेतुद्वयं

---

१. व.रा.१६ २. श्री.र.रा.२-७४ ३. गा.पु.२२०-१६
४. भ.गी.१०-९ ५. भ.गी.९-१४ ६. तिरुवायिमोलि ८-२-७
७. पेरियतिरुमोलि.६ १० १ ८. श्रीभाष्यम् १-१०

पूर्वमेवोपपादितम्। अपि च (पेरिय) इति सामान्यतः परत्वविशेषणोक्तिमहिम्ना त्रिविधनिषेधमुखेन परशब्दोक्तं वाचनिकं प्रधानमिति, मन्त्रपदस्य योगार्थस्य सर्वोत्कर्षः मूलमन्त्रो साध्यत्वेनाऽभिप्रेतः।

एवं मूलमन्त्रपर्यालोचनलब्धं तत्प्राधान्यमुक्त्वापूर्वसूत्रविवक्षितम् इतरमन्त्रयोः अप्राधान्यम् उपपादयितुं तदुभयपर्यालोचनलब्धमाकारद्वयं दर्शयति पञ्चमसूत्रेण (मल्लैयित्यादिना)।

**मू।। (१३) मल्लैयिवै इरण्डुक्कुम् अशिष्टपरिग्रहमुमपूर्तियुमुण्डु**

(मल्लै) इत्यनेन मूलमन्त्रात् भिन्नत्वं विवक्षितम्। (इवै) इत्यनेन व्यापकमन्त्रत्वं विवक्षितम्। अशिष्टपरिग्रहा पूर्तिसद्भावेऽपि द्वयोर्व्यापकमन्त्रत्वं न विरुद्ध्यत इति भावः। (इरण्डुक्कुम्) इत्यनेन न्यूनाधिकसङ्ख्याव्यवच्छेदकेन पूर्वोक्तरीत्या काशकुशावलम्बनेन, वासुदेवमन्त्रे अशिष्टपरिग्राह्याभावशङ्कायाः, मूलमन्त्रो अशिष्टपरिग्रहादिशङ्कायाश्च, पूर्वोक्तरीत्या निवृत्तिः अभिप्रेता। (अशिष्टपरिग्रहमुम्) इति परिग्रहशब्द समभिव्याहारात् अशिष्टशब्दः [1]**वेदोऽनृतो बुद्धकृतागमोऽनृतः** इत्याद्युक्तकुदृष्टिपरः।

**कार्त्स्न्ये वेदस्तत्वावेदकः** इत्यभ्युपगन्तारः शिष्टाः। **निर्विशेषचिन्मात्रांशे वेदस्तत्वावेदकः, गुणविभूत्याद्यंशे अतत्वावेदकः** इत्यभ्युपहन्तारोऽशिष्टाः [2]**सत्यं ज्ञानमित्यादिना चिन्मात्रस्वरूपस्याऽकल्पितत्वोक्त्या** [3]**एकमेवाद्वितीयम्** इत्यादिना द्वितीयमिथ्यात्वोक्त्या च तदंशे तत्त्वावेदकत्वम् [4]**तदैक्षत, तत्तेजोऽसृजत** इत्यादिषु गुणविभूत्यादेः स्वरूपेण प्रतिपादनेऽपि असत्यत्वसत्यत्वसम्भवात्।

**त इमे सत्याः कामाः** [5]**एतांश्च सत्यान् कामान्** [6]**सत्यकामस्सत्यसङ्कल्पः** इत्यादिषु सत्यशब्दस्य [7]**अथनामधेयं सत्यस्य सत्यं प्राणवै सत्यं तेषामेव सत्यम्** इत्यादिवाक्ये षष्ठ्यन्तसत्यशब्दस्येव आपेक्षिकसत्यत्वपरत्वसम्भवाच्च, तदंशेन तत्त्वावेदकत्वमिति वदतां विष्णुवासुदेवमन्त्रयोः व्याप्तितत्प्रकारव्यापकगुणानां प्रतिपादनेऽपि न विरोधः। तेषां कल्पितत्वसम्भवादिति। अशिष्टत्वेन

---

१,२. तै.उ.आ.१ ३. छा.उ.६-२-१ ४. छा.उ.६-२-३
५. छा.उ. ८-१-६ ६. छा.उ.८-१-५ ७. बृ.उ.४-३-६

निर्दिश्य कुदृष्टि परिग्रहोक्त्या व्यज्यते मूलमन्त्रे तु नारपदेन गुणविभूत्यादीनां कल्पितत्वाभावोक्त्या कुदृष्टिमतविरोधः सर्वोपजीव्य इत्यत्र स्फुट इति भावः। परिग्रहशब्दः स्वमताविरोधसम्भवानाप्रयुक्तादरपरः। स्वविवक्षित ज्ञातव्य सकलार्थप्रतिपादकत्वाऽभावः - अपूर्तिशब्दार्थः।

इत्थं साधारणहेतुत्रयेण, असाधारणहेतुषट्केन च मूलमन्त्रोत्कर्षः साधितः। अथ चतुर्विधपरिग्रहातिशयरूपाऽसाधारणहेतुचतुष्टयेन पूर्वोक्तं मूलमन्त्रप्राधान्यं प्रसाध्यते षष्ठसूत्रेण (इत्तैयित्यादिना)।

**मू।। (१४) इत्तै वेदङ्गलुम्, ऋषिकलुम्, आल्वारुगलुम् आचार्यर् गलुम्, विरुम्बिनार्गल्।**

पूर्वं (तिरुमन्त्रम्) इति प्रथमान्तनिर्दिष्टम् (इत्तै) इति द्वितीयान्तेन परामृश्यते। (इत्तै वेदङ्गलुम्), (ऋषिगलुम्) इत्यनेन चतुर्थसूत्रे परत्वविशेषणलब्धं हेतुचतुष्टयमपि तन्त्रेणऽभिमतमित्यनुसन्धेयम्। प्रधानयुक्तित्वद्योतनार्थं पृथगुक्तम्। अत्र 'वेदङ्गलुम्' इत्यनेन तैत्तिरीये महोपषदि च नारायणानुवाकद्वयं लिङ्गभूयस्त्वाधिकरणन्यायेन सर्वविद्यावेद्यदेवतानिर्धारकम् अष्टकृत्वोऽभ्यस्तेन नारायणशब्देन सर्ववेद्याकारपरिज्ञानपूर्तिहेतुभूतसकलवेदान्तसारार्थमूलमन्त्रस्मारकेण पुरुषसूक्तगायत्रीश्वेताश्वतराऽयर्वशिखामुण्डकबृहदारण्यकच्छान्दोग्यऐतरेयतैत्तिरीयादिगतानां वेद्याकारभूतत्रिंशद्विशेषणानां मूलमन्त्रार्थे देवतापर्यवसानपरं विवक्षितार्थसंवादत्वेन विवक्षितम्। तथा सुबालोपनिषदि [1]चक्षुश्च द्रष्टव्यञ्च नारायणः इत्यादीनां तादात्म्येन शरीरशरीरिभावपराणां तत्रैव अन्तर्यामिब्राह्मणे [2]यस्य पृथिवी शरीरम्।

इत्यादीनां भेदेन तत्पराणां वाक्यानाम् [3]एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देवः एको नारायणः इति वाक्यशिरस्कानाञ्च बहुतराभ्यासः काण्वमाध्यन्दिनशाखागताऽन्तर्यामि वाक्यजातस्य नारायणे पर्यवसानपरो विवक्षितः।

(ऋषिगलुम्) इत्यनेन [4]सर्ववेदान्तसारार्थः [5]आर्ता विषण्णाः [6]नारायणेति शब्दोऽस्ति [7]किं तत्र बहुभिर्मन्त्रैः [8]मन्त्राणां परमो मन्त्रः

१. सुबा.उ २. बृह.उ.५-७-२२ ३. सुबा.उ.७ ४. नार.पु.१-१३
५. विष्णु.स.स्तो. ६. विह.रा.२४-१२ ७. गरु.पु.१७-२४ ८. नार.पु.१७-२५

[1]**ऋचो यजूंषि सामानि** इत्यादिकं विवक्षितम्। अत्र आद्यः श्लोकः तावत् द्वितीयाधिकरणे व्याख्यातः। आर्ता विषण्णाः इत्यादिश्लोके (आर्तशब्दः) नष्टैश्वर्यकामपरः। (विषण्णाः) अपूर्वैः ऐश्वर्यकामाः। (शिथिलाः) भगवत्प्राप्ति-रहिताः, आत्मप्राप्तिकामाः। (भीताः) भगवत्प्राप्तिव्यतिरेकेण संसाराद्भीताः। [2]**यावदात्मभावि अशरीरियाय् तिरिवानोरुवन्** इत्यनुगृहीतरीत्या केवलस्यापि संसारत्वात्। (घोरेषु च व्याधिषु वर्तमानाः) यन्मुहूर्तं क्षणं वापि, **वरं हुतवहज्वाला, तदप्राप्ति महादुःखं** इत्यादि प्रसिद्धाः परमार्ताः। (नारायणशब्दमात्रम्) नारायणशब्दो मूलमन्त्रोपलक्षणम्।

एकदेशेन तद्घटित समुदायस्यापि स्मरणसम्भवात्। तत्र शब्दशक्त्या रक्षणविषयेषु [3]**साङ्केत्यं पारिहास्यं वा** इत्याद्युक्तरीत्या मन्त्रैकदेशस्यापि कार्यकरत्वात् मात्रशब्दप्रयोगः। अर्थबोधनेन रक्षणविषयेषु तु नारायणशब्दस्मारित-मूलमन्त्रस्य परिपूर्णोपदेशरूपतया मन्त्रान्तरनैरपेक्ष्यं मात्रशब्दार्थः। [4]**नारायणेति शब्दोऽस्ति** इत्यादौ [5]**एते वै निरयास्तात** [6]**संसारसागरं घोरम्** इत्याद्युक्तरीत्या संसाराग्निविदीपनं नरकपातत्वेन विवक्षितम्। तथापि इत्यनेन नारायणशब्दस्मारित-मूलमन्त्रस्य परिपूर्णोपदेशरूपस्य [7]**उपदेशाद्धरिं बुद्ध्वा** इत्युक्तरीत्या तज्जन्य श्रवणादिज्ञानस्य सम्भवेऽपीति विवक्षितम्। किन्तत्र इत्यादि श्लोके सप्ताक्षरतया उच्चार्यमाणस्यापि मूलमन्त्रस्य शब्दशक्त्याऽर्थबोधनेन च सर्वार्थसाधकत्वमुक्तम्।

(आल्वार् गलुम्) इत्यनेन श्रीपराङ्कुशमुनिदिव्यसूक्तौ सहस्रशाखोपनिषदि उत्तरखण्डविवरणे पूर्वशतकत्रये नवकृत्वः, पूर्वखण्डविवरणे उत्तरशतकत्रये दशकृत्वः, तदुभयशेषभूते चरमशतकचतुष्टये द्वादशकृत्वश्च नारायणशब्दाभ्यासः। श्रीभट्टनाथसूरिदिव्यप्रबन्धे प्रथमं त्रिवारं मूलमन्त्राभ्यासः। मध्ये दशवारं नारायण-शब्दाभ्यासः। अन्ते नवकृत्वः शृङ्खलितनारायणशब्दाभ्यासः पुनः द्विवारं मूल-मन्त्राभ्यासश्च। श्रीकुलशेखरसूरिदिव्यप्रबन्धे प्रथमचरमदशकसमाप्तौ नारायणशब्द-घटितौ एकरूपोपक्रमसंहारौ, तृतीयसप्तमदशकयोः द्विरभ्यासश्च। श्रीभक्तिसार-मुनीनां प्रथमप्रबन्धे आदिमध्यावसानेषु नवकृत्वो नारायणपदाभ्यासः। द्वितीयप्रबन्धे

१. वृद्ध.हा.सं.३-४५ २. तत्त्वत्रयम् ३. भाग.६२-१४
४. विह.सं.२४-१२ ५,६. जितन्ता.१-४ ७. पू.दि.९

अष्टमदशके **गतिरष्टाक्षरो नृणाम्** इत्यादिरीत्या द्विरभ्यासश्च। श्री परकालसूरि-सूक्तिषु प्रथमप्रबन्धे प्रथमदशके मूलमन्त्रप्रशंसारूपेणैव नवकृत्वशृङ्खलितो नारायणशब्दाभ्यासः। षष्ठशतके चरमदशके श्रीविष्णुचित्तसूर्यनुगृहीतरीत्या **श्रीभक्ति-सारमुनिकृतं** कृष्णव्रीहिनखनिर्भेदनन्यायेन च प्रत्यवायाभावेऽपि अत्रैवर्णिक श्रीवैष्णवानां केवललोकसङ्ग्रहार्थं सप्ताक्षरमूलमन्त्र एवोच्चार्य इति सूचनमुखेन मूलमन्त्रानु-सन्धानविधेः नवकृत्वश्शृङ्कलिताभ्यासः।

अष्टमशतकान्तिमदशके अष्टाक्षरसिद्धिस्थलविषये **अर्थानुसन्धानार्थम्** अष्टाक्षरोच्छारणम् त्रैवर्णिकानामपि श्रीवैष्णवानां गुरुमुखात् कर्तुं योग्यमेवेति सूचयितुं श्रीमतः शौरिराजस्य सकाशात् स्वस्य अष्टाक्षराध्ययनसूक्तिश्च।

प्रथमप्रबन्धे एवमन्यत्रापि बहुधा नारायणशब्दमात्राभ्यासः। तृतीयप्रबन्धे ब्राह्मणधनत्वेन प्रसिद्धमूलमन्त्रः जीवातुः इत्युक्तिः। पञ्चमप्रबन्धे अत्यन्तार्तिदशा-यामपि अवशान्नारायणशब्दाऽभिलापश्च। आदिमदिव्यसूरीणां प्रथमप्रबन्धे सप्ताऽक्ष-रस्यापि कार्यकरत्वसूचकसूक्तिः। **नारायणेति शब्दोऽस्ति** इत्यस्य मूलमन्त्रो-पलक्षणत्वसूचनेन सप्ताक्षरस्य कार्यकरत्वसूचनेन **नरके घोरे** इत्यस्य संसाराग्नि-विदीपनपरत्वसूचनेन च तच्छ्लोकविवरणसूक्तिश्च, द्वितीयप्रबन्धे आदिमध्यावसानेषु पञ्चकृत्वो नारायणशब्दाभ्यासः, तृतीयप्रबन्धे प्रथमदशक एव नारायणनाम्नः सर्वदिव्यनामप्राधान्यसूचकसूक्तिश्च इत्येतत्सर्वमनुसन्धेयत्वेनाभिमतम्।

(आचार्यर् गलुम्) इत्यनेन नाथयामुनयतिवरादिपूर्वाचार्याणां मोक्षहेतुनिव-र्तकज्ञानपूर्तिहेतुत्वेन मूलमन्त्रमन्त्ररत्नव्यतिरिक्तसर्वमन्त्राऽनादरणपूर्वकं मूलमन्त्रादेः **द्वयमर्थसन्धानेन सह सदैवं वक्ता, सकलं कालं द्वयेन क्षिपन् आम्रेडितो दिशति यश्च कृतार्थभावम्, न द्वयवचनतः क्षेमकरणम् मन्त्ररत्नानुसन्धानं,** शिष्याणां तथैवाऽनुसन्धाननियमनञ्च विवक्षितम्। (विरुम्बिनार् गल्) इति-आद्दतवन्त इत्यर्थः। इत्थमस्मिन् सप्तमेऽधिकरणे प्रथमेन सूत्रपञ्चकेन '**यस्तर्केणानुसन्धत्ते सधर्मं वेद नेतरः** इत्युक्तरीत्या षष्ठसूत्रे वक्ष्यमाणप्रमाणपञ्चकानुग्राहकं न्यायाष्टक-मनुगृहीतम्।

---

१. म.स्मृ.१२-१०६

षष्ठसूत्रे (वेदङ्गलुम्) इत्यनेन [1]**वेदोऽखिलो धर्ममूलम्** इत्युक्त मूलप्रमाणस्य (ऋषि गलुम्) इत्यनेन [2]**स्मृतिशीले च तद्विदाम्** इत्युक्त उपबृंहणप्रमाणस्य **वेदविदां शीलस्य च सङ्ग्रहः।** (आल्वार् कलुम) इत्यनेन [3]**उपदेशाद्धरिं बुद्ध्वा** इत्युक्तरीत्या न्यायनिरपेक्षसोपबृंहणवेदार्थनिर्णायकतया उपदेशप्रमाणश्रेष्ठभूतं अपौरुषेयनित्यनिर्दोषतया स्वतः प्रमाणभूतं साङ्गोपाङ्गवेदचतुष्टयात्मकद्रविडोपनिषदाख्यं प्रतितन्त्रसिद्धान्तसिद्धं प्रमाणं तद्विदां शीलञ्च संगृहीतम्। स्मृतिशीलयोः सङ्ग्रहाभावे (वेदङ्गलुम्, उपबृंहणङ्गलुम्, दिव्यप्रबन्धङ्गलुम्) इति सूत्रविन्यासापत्तेः। (आचार्यर् गलुम्) इत्यनेन [4]**आचरश्चैव साधूनाम्** इत्युक्तं प्रमाणं सङ्गृहीतम्। (विरुम्बिनार्गल्) इत्यनेन [5]**सतां हि सन्देहपदेषु वस्तुषु**, [6]**त्वदीयगम्भीरमनोऽनुसारिणः** इत्युक्तरीत्या **आत्मनस्तुष्टिरेव च** इत्युक्तं प्रमाणं सूचितमित्यनुसन्धेयम्।

**।। इति श्रीशुद्धसत्त्वरामानुजाचार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्याये प्रथमपादे**
**मन्त्रान्तरापेक्षया मूलमनोत्कर्षसमर्थनं नाम**
**सप्तमाधिकरणं समाप्तम्।।**

---

१,२. म.स्मृ. ३. पू.दि.९ ४. म.स्मृ.१२-१०६
५. शाकुन्तलम् ६. स्तो.र.२०

श्रीमते रामानुजाय नमः

## प्रथमाध्याये प्रथमपादे

# मूलमन्त्रस्य वाच्यापेक्षया उत्कर्षसमर्थनं नाम अष्टमाधिकरणम्

### मू ।। (१५) वाच्यप्रभावम्बोलन्रु वाचकप्रभावम्

सप्तमेऽधिकरणे मूलमन्त्रस्य भगवद्वाचकसकलमन्त्रान्तरापेक्षया आधिक्यमुक्तम्। अथ तस्य वाच्यभूतभगवदपेक्षयाप्याधिक्यमुच्यते।

तत्र संशयः - मूलन्त्रः - स्ववाच्यभूतभगवदपेक्षया उत्कृष्टो न वेति। तदर्थमिदं विचार्यते। भगवत्प्रभावापेक्षया मूलमन्त्रप्रभावः अधिकः न वेति। तत्सिद्ध्यर्थमपि एतच्चिन्तनीयम्। मूलमन्त्रस्य भगवसन्निधानेन रक्षकत्वमस्ति न वेति। एतदर्थमपि पुनश्चिन्तनीयम्। मूलमन्त्रस्य भगवदसन्निधानेन रक्षकत्वे प्रमाणमस्ति न वेति।

### तत्र पूर्वपक्षः

मूलमन्त्रो भगवदपेक्षया उत्कृष्ट इत्ययुक्तम्। [1]**न तत्समश्चाभ्यधिकश्च दृश्यते** इति प्रमाणविरोधात्। न च-भगवतः शास्त्रयोनित्वेन अर्थापेक्षया शब्दस्य ज्ञापकत्व लक्षणो वैवक्षिकोत्कर्षः सम्भवतीति वाच्यम्। स्वेतरवैलक्षण्यं तृणादेः अपि अस्तीति श्रुतप्रकाशिकासूक्तिरीत्या वैवक्षिकोत्कर्षस्य अव्यावर्तकत्वात्।

अस्तु वा वैवक्षिकोत्कर्षविवक्षा। न च-प्रकृते सापि सम्भवति ज्ञापकत्वेन उत्कर्षविवक्षा। न च-प्रकृते सापि सम्भवति ज्ञापकत्वेन उत्कर्षस्य मन्त्रान्तरसाधारणत्वात्। परिपूर्णभगवत्स्वरूपज्ञापकत्वस्य पूर्वमेव सिद्धत्वेन कृतकरत्वात्।

न च-भगवत्प्रभावापेक्षया मूलमन्त्रप्रभावोऽधिक इति, तस्योत्कर्षसिद्धिरिति वाच्यम्। प्रभावशब्दार्थोत्कर्षस्य आधिक्यशब्दार्तोत्कर्षवत्ताया आत्माश्रयपराहतत्वात्।

---

१. श्वेता.उ.६-८

भगवत्प्रभावापेक्षया मूलमन्त्रप्रभावाधिक्यस्य भगवदपेक्षया मूलमन्त्रोत्कर्षसिद्ध्यधीनत्वेन साध्याविशेषाच्च। न च भगवत्सन्निधानं विनापि रक्षकत्वं मूलमन्त्रस्याऽस्तीति विवक्षितमिति वाच्यम्। एतावता भगवत्प्रभावाऽपेक्षया मूलमन्त्रप्रभावोत्कर्षाऽसिद्ध्या उक्तदोषाऽपरिहारात्।

किञ्च-विभोः भगवत्स्वरूपस्य असन्निधानं बाधितम्। न च देशविशेषादिविशिष्टस्य असन्निधानमुपपद्यत इति वाच्यम्। तस्य रक्षणानुपयोगित्वात्। अन्यथा [1]**एण्णिलुम् वरुम्** [2]**स्मृतो यच्छति शोभनम्** इत्यादि विरोधात्। अपि च सन्निहितस्यैव रक्षकत्वे मूलमन्त्रस्य अमूर्तस्य रक्षकत्वं न स्यात्। उपस्थितिलक्षणसन्निधानस्य भगवत्यपि तुल्यत्वात्।

अन्यच्च **अचेतनस्य मन्त्रस्य रक्षकत्वानुपपत्त्या मन्त्ररक्षणं भगवद्रक्षण एव पर्यवसन्नम्** इति भगवद्रक्षकत्वं विना मन्त्रस्य रक्षकत्वमप्रामाणिकम्। न च द्रौपद्याः वस्त्रवर्धनरूपरक्षणे [3]**शङ्खचक्रगदापाणे** इत्यादि नामोच्चारणमेव हेतुः। न तु दौत्यसारथ्यमुखेनेव तत्र भगवतो रक्षकत्वमस्तीति वाच्यम्। **शङ्खचक्रगदापाणे** इत्याद्युक्तेः अर्थानुसन्धानपूर्वकत्वेनाऽनुसंहितस्य भगवत एव तत्र रक्षकत्वात्। **शङ्खचक्रगदापाणे** इत्यादेः द्रौपद्यनुसंहितार्थाऽनुवादमात्रत्वात्। [4]**महत्यापदि सम्प्राप्ते स्मर्तव्यो भगवान् हरिः** इति वसिष्टोपदेशश्रवणस्यैव द्रौपद्या गोविन्दनामानुसन्धाने मूलतया तदुपदेशस्य भगवत्स्मरणविधायकतया च तन्नामानुसन्धानस्य अर्थानुसन्धानमूलकत्वाऽवश्यम्भावात्।

केवलोच्चारणस्थलेऽपि भगवत एव सङ्कल्पमुखेन फलप्रदतया मन्त्रकरणकरक्षणस्य भगवत्कर्तृकरक्षण एव पर्यवसानावश्यम्भावाच्च। भगवन्मन्त्रस्य वा मन्त्रप्रतिपाद्यभगवतो वा रक्षकत्वमित्यत्र विनिगमना विरहाच्च। न च [5]**गोविन्देति यदाक्रन्दत्** इति वचनं भगवदसन्निधानेन मन्त्रस्य रक्षकत्वे प्रमाणमिति वाच्यम्। तस्य भगवदसन्निधाने प्रामाण्येऽपि भगवत्कर्तृकतात्कालिक, दौपदीरक्षणाभावेऽपि प्रामाण्याऽसम्भवात्। न च-[6]**हृदयान्नापसर्पति** इति श्रीकृष्णस्य शोकानुपपत्तिः प्रमाणम्।

---

१. तिरुवायिमोलि.१-१०-२ २. वि.पु.१-७-७८ ३. म.भा.स.भा.६६-४१
४. म.भा.उ.प. ५. म.भा.स.प.६६-४१ ६. म.भा.

[1]**साऽहं केशग्रहं प्राप्ता त्वयि जीवत्यपि प्रभो** इति न्यायेन **मयि जीवत्यपि शरणागतपरिभवो जातः** इति शरणागतप्रेमातिशयेन आगतशोकोपपत्तेरिति।

## सिद्धान्तस्तु

**मूल**मन्त्रो भगवदपेक्षया उत्कृष्ट इति युक्तमेव। न च-**न तत्समश्च** इत्यादि विरोधः। प्रकृते वाच्यापेक्षया वाचकोत्कर्षस्यैव विवक्षितत्वात्। ब्रह्मरुद्रेन्द्रादिशब्दानामिव **विष्णुर्नारायणः कृष्णः** इत्यादीनां मूर्तिविशेषावच्छिन्नरूढतया देवतान्तरव्यावर्तकमूर्तिविशेषविशिष्टभगवत्स्वरूपापेक्षया ज्ञापकत्वलक्षणोत्कर्षस्य विवक्षितत्वात्। न चैवम् अव्यावर्तकत्वाद्यापत्तिः। मन्त्रपदयोगार्थोत्कर्षस्यैव आदितः आरभ्य सिषाधयिषिततया तस्य च मुक्तिजनक ज्ञानहेतुत्वरूपस्य यमनियमादि पूर्वकयोगिप्रत्यक्षे दिव्यमङ्गलविग्रहस्य शुभाश्रयत्वेन विषयतया [2]**पुंसां दृष्टिचित्तापहारिणम्** [3]**साक्षान्मन्मथमन्मथः** [4]**आदरं पेरुगवैत्तवलिकन्** इत्याद्युक्तरीत्या सकलमनुजयनविषयतावगततया वा मूर्तिविशेषविशिष्टभगवत्स्वरूपे वक्तव्यतया च तदपेक्षया उपदेशप्रमाणसारभूत मूलमन्त्रजनितशाब्दज्ञानमुखेन अविलम्बितमुक्तिहेतुज्ञानजनकत्वस्याऽऽधिक्योपपत्तेः।

न च-रक्षणस्यैव उत्कर्षरूपतया उत्कर्षाश्रयत्वबाधः। **शूरतरः, पण्डिततरः** इत्यादौ, शौर्यज्ञानादेः तारतम्यरूपोत्कर्षाश्रयस्य स्वाश्रयोत्कृष्टापकृष्टव्यवहारहेतुत्वदर्शनेन तारतम्यरूपोत्कर्षस्य उत्कर्षानाश्रयत्वेऽपि प्रकृते मूलमन्त्रवाच्यभूतमूर्तिविशेषविशिष्टस्वरूपापेक्षया मूलमन्त्रे मुक्तिहेतुपरिपूर्णाविलम्बितनिवर्तकज्ञानजनकत्वरूपरक्षणात्मकयोगार्थस्य मन्त्रान्तरव्यावृत्तस्य एतदधिकरणव्युत्पाद्योत्कर्षविशेषाश्रयत्वे बाधकाभावात्। रक्षणविलम्बाविलम्बाभ्यां वाच्यवाचकयोः उत्कर्षापकर्षसाधनसम्भवेन साध्याविशेषाभावाच्च। वाच्यवाचकयोः सन्निधानासन्निधानाभ्यां रक्षणविलम्बाऽविलम्बोपपादनसम्भवाच्च।

न च - विभोः असन्निधानबाधः। देशविशेषमूर्तिविशेषविशिष्टस्य देशान्तरे असन्निधानोपपत्तेः।

---

१. म.भा.स.प. २. रामा.अयो.का.३-२९
३. भाग.१०-३२-२ ४. तिरुवायिमोलि-१६

योगिप्रत्यक्षरूपमानससन्निधानस्य अस्मदादिप्रत्यक्षरूपचाक्षुषसन्निधानस्य च [1]**तस्मिन् दृष्टे परावरे** इत्याद्युक्तरीत्या **अलवलमैतविर्त्तवलकन् शिशुपाल-नैयुमकप्पडत्तिरुत्तिच्चेर्त्तुक्कोल्लुम् सकलमनुजनयनविषयताङ्गतो** विश्वमा-प्याययन् इत्युक्तरीत्या मूर्तिविशेषावच्छिन्नस्वरूपे रक्षणोपयोगित्वसम्भवेऽपि देशकाल-विप्रकर्षदृष्टत्वात् (एण्णिलुम्) इत्यादेः चाक्षुषसन्निधानहेतुपरत्वात्, **स्मृतो यच्छति शोभनम्** इत्यादेः निरुक्तमनस्सन्निधानहेतुप्रयोजनकपरत्वाच्च। अतः वाच्याऽसन्नि-धानेऽपि वाचकस्य **सन्निधानेन रक्षणोत्कर्षात्** वाच्याद्वाचकस्य उत्कर्षो युक्त इति **सिद्धम्**।

अपि चेत्याद्यप्ययुक्तम् - मूर्तिविशेषविशिष्टभगवत्स्वरूपात्मकस्य वाच्यस्य निरुक्तद्विविधसन्निधानाऽभावदशायामपि मूलमन्त्रस्य मुक्तिहेतुपरिपूर्णनिवर्तकमा-नससन्निधानहेतुचाक्षुषसन्निधानफलीभूतज्ञानजनकस्य लोकसिद्धसामग्रीज-न्यशाब्दज्ञानजनकत्वलक्षणसन्निधानेन रक्षणेत्कर्षस्य विवक्षितत्वात्।

अन्यच्चेत्यपि अयुक्तम्। मन्त्रकरणकरक्षणस्य स्वरूपेण भगवत्कर्तृक-रक्षणपर्यवसायित्वेऽपि निरुक्तवाच्यरक्षणापेक्षया वाचकरक्षणोत्कर्षस्य प्रदर्शितरीत्या अव्याहतत्वात्। एतेन मूलमन्त्रगतमुक्तिहेतुज्ञानजननरूपरक्षणाधिक्ये वाच्या सन्निधा-नेऽपि वाचकस्य सन्निधाने न रक्षणोत्कर्षरूपे दार्ष्टान्तिके द्रौपदीवस्त्रवर्धनरूपवा-चकरक्षणोत्कर्षोदृष्टान्त इत्यपि युक्तमिति सिद्धम्। द्रौपदीगोविन्दनामानुसन्धानस्य अर्थानुसन्धानपूर्वकस्यापि प्रदर्शितरीत्या वाच्याऽसन्निधानेऽपि वाचकसन्निधान-रूपत्वात्।

एतेनैव केवलोच्चारणस्थलेऽपि पर्यवसानबलात् विनिगमनाविरहाच्च भगवत एव रक्षकत्वमित्यपि दूरोत्सारितम्। [2]**गोविन्देऽति यदा क्रन्दत्** इति वचनस्यापि वाच्यवाचकयोः सान्निधानाऽसन्निधानाभ्यां रक्षणतारतम्ये प्रामाण्यमपि युक्तमेव। **दूरवासिनम्** इत्यस्य स्वरूपकथनरूपत्वे वैयर्थ्यापत्त्या [3]**क्रुश-आह्वाने रोदने च** इति धातोः अभिव्याप्त्यर्थकाऽऽङुपसृष्टात् अर्थद्वयलाभेन [4]**दूरवासिनं मां गोविन्देत्यक्रन्दत्** इत्यनेन विशेष्यवाचिपदोपादानमुखेन **शङ्खचक्रगदापाणे**

---

१. मु.उ.२-२-१ २. म.भा.स.प.६६-४१

३. भ्वादिप्रकरणम् ४. म.भा.स.प.

इत्याद्युपलक्षणभूतेन वसिष्टोपदेशप्रकारेण **शङ्खचक्रगदापाणे** इति परत्वस्य **द्वारकानिलय** इत्यवतारस्य अच्युत इति [1]**परित्राणाय साधूनाम्** [2]**अक्रूरमालाकारादीन् परमभागवतान् कृत्वा** [3]**ज्ञानीत्वात्मैव मे मतम्** [4]**क्षणेऽपि ते यद्विरहोति दुस्सहः** इत्याद्युक्ताश्रितविश्लेषगन्धासहिष्णुत्वस्य **गोविन्द** इति दौत्यसारथ्यापेक्षयाप्यतिनिहीन व्यापारोक्त्या सौशील्यवात्सल्यातिशयस्य **पुण्डरीकाक्ष** इति कान्तिमय्यापगाया आवर्तभूतस्य सर्वक्लेशविस्मारकदृष्ट्यामृतवृष्टिभोग्यताविशेषस्य **गोविन्द रक्ष** इति मृत्युमृत्युभूतनरसिंहन्यायेन विग्रहविशेषावच्छिन्नकर्तृकतात्कालिकाऽपन्निवारणाविर्भावप्रार्थनस्य **मां शरणागताम्** इति-भगवतः वृणतोऽस्थानीयस्य [5]**किन्तु त्वदग्रे शरणागतानाम्** इत्याद्युक्तार्थस्य चाऽनुसन्धानलाभेन [6]**ऋणं प्रवृद्धमिव** इत्यनेन प्रह्लादविषय इव तात्कालिकापेक्षिताऽविर्भावविशेषाकरणेन निष्फलतारतरदीर्घतराह्वानमेव ऋणस्थानीयम्, तदुपरि तादृशं रोदनं गुणपञ्चकानुसन्धानं शरणागतत्ववचनञ्च मूल्यापेक्षया **दशगुणाभिवृद्ध** धनस्यानीयमिति लाभेन हृदयान्नापसर्पति इत्यनेन चरमदशायामपि **नातिस्वस्थमनाययौ** इत्युक्तस्य [7]**मैत्तुनन्मार् कादलियै** इत्यादि सूक्तिरीत्या सर्वप्रकाररक्षणे कृतेऽपि उत्तमर्णस्य मूलधनं न दत्तम् **अभिवृद्धः - अभिवृद्ध्यंशः, कियानपि न दत्तः** इत्येवं रूपाऽनुवृत्तस्य शोकस्य सूचनलाभेन च वाच्यवाचकयोः सन्निधाना सन्निधानाभ्यां रक्षणतदुपायसूचकतया **दूरवासिनम्** इत्येतत्साफल्यस्य वक्तव्यत्वात्। तस्मात् मूलमन्त्रोवाच्यापेक्षया उत्कृष्ट इति सिद्धम्।

## सूत्रार्थस्तु

वाच्यशब्दः - [8]**तमसः परमो धाता शङ्खचक्रगदाधरः। श्रीवत्सवक्षा नित्यश्रीः** इत्यादि लक्षितनारायणशब्दप्रवृत्तिनिमित्तमूर्तिविशेषावच्छिन्नभगवत्स्वरूपपरः। वाच्यशब्देन प्रकरणबलेन विशेषलाभोपपत्तेः।

विशेषलाभायैव **भगवत्प्रभावम्** इत्यनुक्तिः। प्रभावशब्दोऽपि प्रकरणबलात् रक्षणरूपप्रभावपरः। मुक्तिहेतुपरिपूर्णज्ञानजनकत्वरूपसर्वोत्कृष्टरक्षणसूचनाय

---

१. भ.गी.४-८ २. गी.भा. ३. भ.गी.७-१८
४. स्तो.र.५६ ५. स्तो.र.२५ ६. म.भा.
७. तिरुवायिमोलि ८. रामा.यु.का.११४-१५

**प्रभावम्** इति सामान्योक्तिः। वैवक्षिकोत्कर्षं व्यावर्तयितुं **वाच्यप्रभावात् वाचकप्रभावमधिकम्** इत्यन्वयमुखेनाऽनुक्त्वा (प्रभावम्बोलन्रु) इति व्यतिरेकमुखेनोक्तिः।

अनेन सूत्रेण हेतुपरेण **वाचकप्रभावस्य वाच्यप्रभावसाम्याभावात्** वाचकं वाच्यादुत्कृष्टमिति साध्यं व्यज्यते प्रकरणबलेन साम्याभावस्य उत्कर्षरूपत्वात्। तेन निकृष्टतयापि साम्याभावः सम्भवतीति शङ्कायाः नाऽवकाशः।

## मू।। (१६) अवन् दूरस्थ नानालुम् इदु किट्टितिन्रु उदवुम्

(अवन्) वाच्यमित्यर्थः। पुल्लिङ्गनिर्देशेन चेतनस्यैव फलप्रदतया वाच्यं विना वाचकरक्षणं साधितमिति शङ्काबीजं व्यज्यते। (दूरस्थनानालुम्) इति देशतः कालतः वस्तुतश्च विप्रकर्षो विवक्षितः। आद्यन्तविप्रकर्षौ परव्यूहयोः, मध्यविप्रकर्षः विभवेषु, अर्चाविग्रहेष्वपि सर्वपुरुषसान्निध्याभावात् देशविप्रकर्षः [1]**इतरेभ्य स्त्वितरथा** इति भक्तिशून्यानाम् अतीन्द्रियत्वलक्षणो वस्तुविप्रकर्षश्च। मूलमन्त्रस्य तु लोकसिद्धसामग्रीसत्त्वे सर्वपुरुषसाधारण्येन मुक्तिहेतुपरिपूर्णज्ञानजनकतया देशतः कालतः वस्तुतश्च सन्निकर्षोऽस्तीति विवेकः।

(आनालुम्) इत्यनेन **केवलं स्वेच्छयैवाहं प्रेक्षे कञ्चित्कदाचन** इत्युक्तरीत्या मन्त्रजन्यनिवर्तकज्ञानमात्रेण रक्षणस्य क्वाचित्कतया योगिप्रत्यक्षमुखेन विभावावतारमुखेन च रक्षणस्य प्रायिकतया च दूरस्थत्वस्य रक्षणविरोधः सूच्यते। (इदु) वाचकमित्यर्थः। (इदु) इत्यनेन लौकिकप्रत्यक्षविषयतया वस्तुविप्रकर्षो-नास्तीति व्यज्यते। (किट्टि) इति-देशसन्निकर्षः। (निन्रु) इति कालसन्निकर्षश्चोक्तः। (उदवुम्) मुक्तिहेतु परिपूर्णनिवर्तकज्ञानजननमुखेन रक्षकमित्यर्थः।

अनेन सूत्रेण पूर्वसूत्रोक्तो रक्षणोत्कर्षरूपो हेतुः सन्निधानाऽसन्निधानमुखेनोपपादितः।

## मू।। (१७) द्रौपदिक्कु आपत्तिले पुडवै शुरन्दतु तिरुनाममिरे

इत्थं सम्पूर्णार्थकमूलमन्त्रस्य स्ववाच्यापेक्षया सन्निधानाऽसन्निधान न्यायमुखेन मुक्तिहेतुज्ञानजननेन सर्वोत्कृष्टरक्षणप्रयुक्ततारतम्यं साधितम्।

---
१. व.रा.स्त.१८

अथ अपूर्णार्थकं भगवन्नाम्नः भगवतदपेक्षया सन्निधानाऽसन्निधानन्यायबलेन द्रौपद्यपेक्षितार्थविशेषाविर्भाववत् अत्याश्चर्यकरतया आपन्निवारकत्वरूपे **यदृच्छयापि संस्पृष्टः** इत्युक्तरीत्या अनुसन्धेयाऽर्थस्वभावेन तद्बोधकदिव्यनामस्वभावेनाऽतीन्द्रियशक्तिरूपाऽदृष्टविधया रक्षकत्वे सुदृढप्रमाणसिद्धे सति परिपूर्णार्थकमूलमन्त्रस्य दृष्टाऽदृष्टोभयविधया निवृत्तिहेतुपरिपूर्णज्ञानजननमुखेन परमपुरुषार्थलम्भकत्वं कैमुतिकन्यायसिद्धमिति सूचयितुं द्रौपदीवृत्तान्तप्रदर्शकं तृतीयसूत्रम्।

(द्रौपदिक्कु) [1]**महत्यापदि** इत्यादि वशिष्टोपदेशं श्रुत्वा [2]**शङ्खचक्रगदापाणे** इत्यादिवदन्त्या द्रौपद्या इत्यर्थः। (आपत्तिले) बहिष्टायाः तस्याः अतिमात्रक्लेशकरायाम् अतिमात्रलज्जावहायां महासदसि वस्त्रापहाररूपायां महापदीत्यर्थः। (पुडवै) पुडवैयै इत्यर्थः। (शुरन्दतु) वर्धिप्पित्ततु इत्यर्थः। (तिरुनामम्) **तिरु** इति पूजोक्तिः। **गोविन्देति यदाक्रन्दत्** इत्युक्तं नामेत्यर्थः। (नाममिरे) नामैव हीत्यर्थः। **न** तु तन्नामवाच्यमूर्तिविशेषावच्छिन्नस्वरूपमित्यवधारणार्थः। हि शब्दोहेतौ प्रसिद्धौ च इत्यनुसन्धेयम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे**
**मूलमन्त्रस्य वाच्यापेक्षया उत्कर्षसमर्थनं नाम**
**अष्टमाधिकरणं समाप्तम् ।।**

---

१. म.भा.उ.प. २. म.भा.स.प.६६-४१

श्रीमते रामानुजाय नमः

## प्रथमाध्याये प्रथमपादे
## अक्रमोक्तमूलमन्त्ररक्षकत्वसमर्थनं नाम
## नवमाधिकरणम्

**मू।। (१८) शोल्लुम् क्रममोलियच्चोन्नालुम् तन् स्वरूपम् केड निल्लादु ।**

अत्र मूलमन्त्रस्य वाच्याऽसन्निधानदशायामपि रक्षकत्वनिबन्धयोगार्थोत्कर्षवत् अक्रमेणोक्तावपि रक्षकत्वनिबन्धयोगार्थोत्कर्षः साध्यते। तत्र संशयः मूलमन्त्रस्याऽक्रमणोक्तस्यापि रक्षकत्वं सम्भवति - न वेति ।

### तत्र पूर्वपक्षः

अक्रमेणोक्तो मूलमन्त्रो न रक्षकः। क्रमविधायकप्रमाणव्याकोपापत्तेः। तथाहि - यदृच्छया श्रुतो मन्त्रः, शास्त्रादिषु सुदृष्टाऽपि, अनाचार्योपदिष्टा हि, [१]**आचार्याद्धैव, यस्य देवे पराभक्तिः, मन्त्रे तद्देवतायाञ्च, श्रद्धैव कारणं पुंसाम्, मन्त्रे तीर्थे द्विजे दैवे, यस्य यावांश्च विश्वासः, विश्वासः फल दायकः** इत्यादिभिः उपदेशभक्तिश्रद्धाविश्वासमूलकत्वलक्षणक्रमाः प्रतीयन्ते। न च - **साङ्केत्यं पारिहास्यं वा** इत्यादि विरोधः। तेषामर्थवादमात्रत्वात्। न च उक्तवचनमेव भक्त्यादि प्रशंसापरत्वमस्त्विति वाच्यम्। वैदिकानामवैदिकानाञ्च-वैकुण्ठनामग्रहणादशेषाघविनाशे सर्वमुक्तिप्रसङ्गेन प्रबलवैदिकव्यवस्थाभङ्गप्रसङ्गेन [२]**क्षिपाम्यजस्त्रम् अशुभानासुरीष्वेव योनिषु** इत्यादिवचनविरोधेन साङ्केत्यमित्यादेरेवाऽसदर्थवादत्वावश्यम्भावात् इति।

### अत्रायं सिद्धान्तः

अक्रमेणोक्तेऽपि मूलमन्त्रो रक्षक एव। अक्रमेणोक्तावपि भगवन्नामसामान्यस्य रक्षकतया बहुप्रमाणसिद्धत्वात् तथाहि - **हरिर्हरति पापानि, सकृदुच्चारितं येन, उपपातकयुक्तोऽपि, अतिपापप्रसक्तोऽपि, अपवित्रः पवित्रो वा, अवशेनाऽपियन्नाम्नि, अयं हि कृतनिर्देशः,** [३]**मेरुमन्दरमात्रोऽपि, शमायालम्**

१. म.भा.वि.प.९-३ २. भ.गी. १६-१० ३. वि.ध.पु.६९-११७

**जलं वह्नेः, हरेर्नामैन नामैव, [1]साङ्केत्यं पारिहास्यं च, ध्यायन् कृते जयन् यज्ञैः** इत्यादिषु भगवन्नामसामान्यस्य येन केनापि प्रकारेणोच्चरितस्य रक्षकत्वमविगीतयुक्तम्। न च - उक्तवचनजातमर्थवादमात्रम्। अप्राप्ताऽबाधितार्थकत्वात्। अन्यथा विनिगमनाविरहेण क्रमविधायकानाम् अर्थवादत्वापत्तेः। न च - सर्वमुक्तिप्रसङ्गोविनिगमकः। अपरिच्छिन्नमूलप्रकृतौ साङ्केत्यादिरूपवैकुण्ठनामग्रहणरहितानामपि जीवानां [2]**गौरनाद्यन्तवती** इत्यादिवचनबलेनैव सदातनत्वसिद्धेः न चैवमपि **वेदोक्तं कर्मधर्महेतुः।**

**बौद्धाद्युक्तमधर्महेतुः** इति व्यवस्था भङ्गप्रसङ्गः। ईश्वरो नास्तीति वादिनां वैकुण्ठनामग्रहणसत्वेनाऽशेषाघविनाशापत्तेरिति वाच्यम्। वैदिकाऽवैदिकव्यवस्थाप्रमाणबलेन वैकुण्ठनामग्रहणस्य सद्वारकाऽशेषाघविनाशकत्वाङ्गीकारेण **ईश्वरो नास्ति** इति वदतांनास्तिवादघटितसामग्रीबलेन अधर्मप्राप्त्यवश्यम्भावेऽपि तत्र प्रतियोगितया वैकुण्ठनामग्रहणस्य नास्तिवादहेतुभूतपापनिवर्हणमुखेनाभ्युदयपर्यवसानस्य **पुण्यं प्रज्ञां वर्धयति** इत्यादिरीत्या क्रमेणाशेषाघविनाशकत्वस्य चाभ्युपगमेन उक्तदोषाभावात्। एतदभिप्रायेणैव भगवता स्वयमेवोक्तम्-[3]**नेहाभि क्रमनाशोऽस्ति** इत्यादि। अत एव **कावेरी तोयमाश्रित्य** इत्यादिकमपि सङ्गच्छते। तादृशवातगन्धरहितस्यापि देशस्य सम्भवात्। अत एव च अजामिलोपाख्यानादिकमपि उपपद्यते। तत्रापि स्तोभात्मकनारायणशब्दादेः क्रमेणैव अभ्युदयपर्यवसानस्य विवक्षितत्वेन वक्तव्यत्वात्। अत एव च **द्वेषाच्चैद्योभयात्कंसः कामोद्गोप्यः** इत्यादिकमपि युज्यते। अत एव घण्टाकर्णतदनुजादीनां मोक्षप्रदप्रथा च सम्भवति। दधिभाण्डन्यायश्च प्रसिद्धः।

अत एव **क्षिपामि** इत्यादि वचनविरोधोऽपि अपास्तः। प्रमाणस्वभावपर्यालोचनया **क्षिपामि** इत्यादेः दोषांशघटितसामग्रीफलत्वाऽभ्युपगमात्। तत्सामग्रीविघटनमुखेन क्रमेणाभ्युदयपर्यवसानस्य गुणांशफलत्वाभ्युपगमाच्च। तथा हि - [4]**असत्यमप्रतिष्ठन्ते जमदाहुरनीश्वरम्** इत्यारभ्य -

---

१,२. भाग.६-२-१४ ३. भ.गी.२-४०
४. कौशी.उ.३-९

**तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।**
**क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु।।**

[1]**मद्भक्तं श्वपचं वाऽपि निन्दां कुर्वन्ति ये नराः ।**
**पद्मकोटि शतेनापि न क्षमामि वसुन्धरे।।**

[1]**एष एव साधुकर्मकारयति - तं यमधोविनीषति**
[2]**हरिर्दुःखानि भक्तेभ्यः हितबुध्या करोति वै।**
**शस्त्रक्षाराग्निकर्माणि स्वपुत्राय यथा पिता।।**

**नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि** इत्यादिषु भगवत एव पापफलप्रदत्वं **पापं प्रज्ञां नाशयति, क्रियमाणं पुनः पुनः, नष्टप्रज्ञः पापमेव नित्यमारभते नरः** इत्युक्तरीत्या पूर्वकर्मफलं भूतपापप्रवर्तकत्वम्, अकृतप्रायश्चित्तानां कर्मणां फलाऽविनाभूतत्वञ्च सिद्धम्।

[4]**नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।**
**स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्।।**

इति गीता वचने देवतान्तरसम्बन्धस्य भगवत्सम्बन्धस्य च किञ्चिदंशेऽपि उपक्रान्ते सर्वथा निष्फलत्वं तथैव यथा कथञ्चित्साफल्यं, यत्किञ्चिदंशस्याप्युपक्रान्तस्य त्यागे तदैवानिष्टकरत्वं तदभावश्च, कदापि परमपुरुषार्थसम्बन्धगन्धाभावः क्रमेण तत्पर्यवसाननियमश्चेति त्रेधा वैषम्यमुक्तम्। तद्विवरणानि बहूनि वचनानि । तथाहि - [5]**स्मृतो यच्छति शोभनम्** इति स्मृतिमात्रस्य भगवद्विषये सफलत्वनियमः उक्तः।

[6]**हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः।**
**यदृच्छयामि संस्पृष्टो दहत्येव हि पावकः।।**

इत्यत्र हरिसमाख्यालब्धयोगार्थे अनादि भगवत्कृषिफलीभूतहरिस्मरणसामान्यस्य

---

१,२. कौशी.उ.३-९ ३. बृहन्नारदीयम् ४. भ.गी.२-४०
५.वि.पु.१-७-७८ ६. हर्यष्टकम्

(पापनि हरति) इत्यनेन, प्रथमं चित्तदोषहेतुपापनिवर्तकत्वं, ततश्चित्तदोषनिवर्तकत्वञ्चोक्तम्। (दुष्टचित्तैरपि) इत्यनेन भगवत्सम्बन्धे निर्दोषत्वं नाऽधिकारः। देवतान्तरसम्बन्धेत्वधिकार इति सूचितम्। चित्तदोषश्चहिरण्यकशिपुपौण्ड्रकवासुदेवादिषु प्रसिद्धः।

ननु दोषभरितसामग्रीसत्वे तत्कार्यं स्यादित्यत आह **यदृच्छयापि** इति। संस्पर्शजनकाऽदृष्टघटितसामग्रीमात्रबलेनापीत्यर्थः। वह्नौ गुञ्जापुञ्जभ्रमेण प्रवृत्तिसम्भवादिति भावः। संस्पृष्टोऽपीत्यन्वयः। (दहत्येवेति) दाहक एव भवतीत्ययोगव्यवच्छेदो विवक्षितः। तथा च - अनिष्टस्यापि दाहस्य सामग्रीस्वभावादुत्पत्तिवत् दोषानुचिन्तनार्थतया सामग्रीवंशसिद्धमपि हरिस्मरणं, तेन पापनिवृत्तिः न भवतीति द्वेषरूपचित्तदोषे सत्यपि तदुत्पादकमेवेति भावः। **अनिच्छयाऽपि** इति पाठे इत्थम्भूत लक्षणे तृतीया। इच्छारहितपुरुषसंस्पृष्टोऽपीत्यर्थः।

**सकृदुच्चारितं येन हरिरित्यक्षरद्वयम्।**
**बद्धः परिकरस्तेन मोक्षाय गमनं प्रति।।** (परिकरः)

दृष्टविधया साधनीभूतशमदमादिसम्पदित्यर्थः। अनेन क्रमेण सर्वपापनिवर्तकत्वं स्फुटीकृतम्। मुक्तिपरिकरविरोधिपापनिवृत्तिसम्पादनेन परिकरसम्पादनस्य। तन्मुखेन तत्सहकारितया च मुक्तिविरोधि पापनिवृत्ति सम्पादनस्य, तन्मुखेन मुक्तिसम्पादनस्य च विवक्षितत्वात्।

**उपपातकयुक्तोऽपि महापातक वानपि।**
**यामिन्याः पादमेकन्तु ब्रह्मध्यानं समाचरेत्।।**

अनेन ब्रह्मध्यानेन निर्दोषत्वं नाधिकार इति स्पृष्टम्।

**अतिपातकयुक्तोऽपि ध्यायन्निमिषमच्युतम्।**
**भूयस्तपस्वी भवति पङ्क्तिपावनपावनः।।**

इति योगभ्रंशहेतुपापविशेषेण दृढं सुबद्धोऽपीत्यर्थः। **भूयस्तपस्वी भवति** इत्युक्तेः। अच्युतशब्दः योगरूढिभ्यां देवतान्तरव्यावर्तकः। तत्क्रतुन्यायेन **पवित्राणां पवित्रं यः** इत्याद्युक्तध्येयगुणलाभमाह - **पङ्क्तिपावनपावनः** इति।

**अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।**
**यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः।।**

(अपवित्रः) निर्दोषस्सन् तीर्थस्नानादिनाऽधिकशुद्धिरहितः। (पवित्रः) अधिकशुद्धिमान्। (सर्वावस्थाङ्कतोऽपिवा) **सर्वदोषविशिष्टः**। पुण्डरीकाक्षशब्दः - देवतान्तरव्यावर्तकः। स्मरणीयताहेतुभूतदिव्येक्षणसौन्दर्यपरश्च। **पृथुलोचनो मोहयित्वा जगत्सर्वम्** इति ह्युक्तम्। (स बाह्याभ्यन्तरः शुचिः) बहिरन्तः प्रदेशावच्छिन्नस्सन् शुचिरित्यर्थः। **अपवित्रो यः स्मरेत्, सः बहिश्शुचिः** इत्यनेन भगवत्स्मरणस्य तीर्थस्नानादिस्थानीयत्वमुक्तम्। **अपवित्रः - आभ्यन्तरशुचिः** इत्यनेन तीर्थस्नानाद्यपेक्षया आधिक्यमुक्तम्। पवित्रो बहिः शुचिः इत्यनेन स्मरणाभावे तीर्थस्नानादेः स्मरणकृताऽतिशयितशुद्धिहेतुत्वाभावेन वैयर्थ्यमुक्तम्। **पवित्रः अन्तः शुचिः** इत्यनेन स्मरणसाचिव्ये तीर्थस्नानादेः अधिकफलत्वमुक्तम्। **सर्वदोष-विशिष्टो यः स्मरेत् सः बहिः शुचिः** इत्यनेन निर्दोषस्यैव तीर्थस्नानादिकमधिकः शुद्धिहेतुरिति सूचितम्। **दुष्टोऽन्तः शुचिः** इत्यनेन दुष्टस्यापि अन्तःशुद्धिमपि जनयतीति अधिकोत्कर्षः उक्तः। **सर्वावस्थां गतः** इत्यनेन उपपातकयुक्तोऽपि महापातकवानपि इत्युक्तार्थः सूचितः।

**अवशेनाऽपि यन्नाम्नि कीर्तिते सर्वपातकैः।**
**पुमान् विमुच्यते सद्यस्सिंहः त्रस्तैर्मृगैरिव।।**

इति। स्वेनेतिशेषः। स्वपदम् पुमानिति वक्ष्यमाणपरम्। (अवशेन) शास्त्रवश्यता रहितेनेत्यर्थः। **अवशेनस्वेन** इत्यन्वयः। उत्पत्स्यमानानां सामग्रीनाशः, सद्यः उत्पन्नानां तु पातकानां स्वरूपेण नाशः। सद्यः इत्युक्तम्। **सिंहत्रस्मैः** इत्यनेन मृगाणां सिंहगर्जनमिव, पापानां पुंसामान्यकर्तृकनामकीर्तनमिति गम्यते। (मृगैरिव) मृगैरिव स्थितैः इत्यर्थः।

**अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि।**
**यद्व्याजहार विवशो नामस्वस्त्ययनं हरेः।।**

अनादिकालार्जितानां कर्मणां भोगरूपवेतनावश्यम्भावेऽपि भगवन्नामो-च्चारयितृपुरुषसम्बन्धमेवाऽपराधत्वेन मत्वा दण्डाभाव एव चेतनमिति भावः। (विवशः) **वागस्ति वशवर्तिनी** इत्युक्तस्वाधीनवागिन्द्रियरहित इत्यर्थः।

घण्टाकर्णादिवत् नामोच्चारणद्वेषणोऽपि शिशुपालादिवत् क्रोधादिवशात् नामोच्चारणं भवतीति भावः।

**[1]मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मणः।**
**केशवं वैद्यमासाद्य दुर्व्याधिरिव नश्यति।।**

अत्र औषधपानेन क्रमेण धातुसाम्यसम्पादनमुखेन राजयक्ष्मादिनाशवत् महापापनाशः सूचितः।

**[2]हरेर्नामैव नामैव नामैव मम जीवनम्।**
**कलौ नास्त्यैव नास्त्यैव नास्त्यैव गतिरन्यथा।।**

अत्र निवर्त्यस्य केशवेनाऽक्लेशेन निवृत्तेः, सुखोऽर्कतया च निवृत्तौ दृष्टान्तत्रयं निवर्त्य, तारतम्य निवृत्त्यप्रयोजनकत्वं च विवक्षितम्।

**[3]शमायाऽलं जलं वह्नेः तमसो भास्करोदयः ।**
**क्षान्तिः कलेरघौघस्य नामसङ्कीर्तनं हरेः।।** इति।

अत्र ज्ञानदर्शनप्राप्तिरूपसर्वविधप्राणधारणं जीवनपदेन विवक्षितम्। **ध्यायन् कृते यजन् यज्ञैः** इत्यादिभिः प्रायेण कलावित्युक्तम्। **सत्यं सत्यमितिवत्** अन्वयव्यतिरेकयोः त्रिरुक्तिः। (गतिः) प्राप्यं, प्रापकञ्चेत्यर्थः।

**साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।**
**वैकुण्ठनामग्रहणमशेषाघविनाशनम्।।**

इति। स्वार्येष्यङ्। (सङ्केतः) परेषां स्वेषु वैष्णवत्वबुद्धिर्भूयादिति विप्रलिप्सा। (पारिहास्यं) परिहासः, अनुकारः। (स्तोभम् अजामिलोक्तपुत्रद्वयनामवन्निरर्थकः शब्दः। (हेलनम्) लीला –

**ध्यायन् कृते यजन्यज्ञैः त्रेतायां द्वापरेऽर्चयन्।**
**यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम्।।**

इति। कृतयुगादौ त्रिष्वपि (बद्धदशायाम्) अप्रबुद्धदशायां ज्ञानादिकं सुलभम्। कलियुगे तु कीर्तनेन प्रबुद्धदशायां सुलभेन शरीरविमोकानन्तरं ध्यानादिमुखेनाऽन्य-मुखेन वा तत्तत्फलाऽविनाभूतसामग्रीसम्पादनेन तत्तत्फलं प्राप्नोतीत्यर्थः। अत एव **भक्त्या परमया वापि** इत्यादीनाविरोधः। भक्त्यादेः सामग्रीवशसम्पन्नत्वेन

---

१,२,३. विह.सं.

दृष्टविधया कारणत्वेन च मोक्षं प्रति नियतपूर्ववर्तितया व्याजत्वस्य अन्यत्र प्रपञ्चितत्वात्। व्याजानामपि अबुद्धदशायां विकल्पोपपत्तेश्चेति।

**शोल्लुमित्यादि सूत्रार्थस्तु** (शोल्लुम् क्रमम्) शास्त्रोक्त क्रम इत्यर्थः। अनेन [1]**तद्विद्धि प्रणिपातेन** इत्यादि प्रसिद्धाः पूर्वोक्ताः पूर्वपक्षहेतवः विवक्षिताः। (तान् केड निल्लात) इत्यनुक्त्वा (तन् स्वरूपम्) इत्युक्त्वा, **स्वम् आत्मीयम्, रूपम् आकारः** इति व्युत्पत्त्या रक्षकत्वरूपस्वभावलाभेन वह्नेः दाहकत्ववत् जल तेजः क्षमाणां वह्नि तमः कलिनिवर्तकत्ववत्, औषधस्य रोगनिवर्तकत्ववच्च स्वाभाविकधर्मस्य प्रच्युतिः न सम्भवतीति गम्यते।

(तन् स्वरूपम्) इति स्वशब्देन (केडनिल्लातु) इत्यत्र प्रकरणलब्धं मूलमन्त्ररूपं विशेष्यं परामृश्यते। (तन् स्वरूपमाक्कुम्) इत्यन्वयमुखेन अनुक्त्वा व्यतिरेकमुखेनोक्त्या, न केवलं [2]**स्वल्पमप्यस्य धर्मस्य** इत्युक्तरीत्या परमपुरुषार्थ-पर्यवसायित्वलक्षणस्वरूपस्थैर्यमात्रम्। किन्तु [3]**नेहाभिक्रमनाशोऽस्ति** इत्युक्ताऽल्प-फलहानि लक्षणनाशाभावः, **प्रत्यवायो न विद्यते** इत्युक्तानिष्टप्राप्तिलक्षणनाशाभाव-श्चास्तीति गम्यते। (तन् स्वरूपम् केडादु इत्यनुक्त्वा, केडनिल्लातु) इत्युक्त्या **ईश्वरो नास्ति** इत्यत्र प्रतियोगितया भगवत्स्मरणोत्तरक्षणे स्वसामग्रीबललब्ध-नास्तीत्यनुसन्धान नाऽस्तिवादतज्जन्यविपरीतानुष्ठानोचिताऽननुष्ठान तत्प्रयुक्ता-धोगत्यादि सत्वेऽपि पूर्वोक्तत्रिविधस्वरूपनाशसत्वेऽपि स्मरणमहिम्ना क्रमेण मूल-सामग्रीविरोधेन तात्कालिकेष्टलाभात् कारणपरम्पराप्राप्ताऽधोगत्यादि सत्वेऽपि पूर्वोक्तत्रिविधस्वरूपनाशसत्वेऽपि स्मरणमहिम्ना क्रमेण मूलसामग्रीनिरोधेन तात्कालि-केष्टलाभात् कारणपरम्पराप्राप्ताऽधोगत्याद्यनिष्टपरिहारलाभात्। निरङ्कुशस्वतन्त्र-भगवत्सङ्कल्पसिद्धकर्मज्ञानभक्तिप्रपत्त्याचार्याभिमानरूपव्याजानां [4]**जन्मान्तर-सहस्रेष** इत्याद्युक्तरीत्या तत्तद्विरोधि निवृत्तिपूर्वकान्वयमुखेन परमपुरुषार्थलाभाच्च त्रिविधनाशो न स्थिर इति गम्यत इति अनुसन्धेयम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे अक्रमोक्तमूलमन्त्ररक्षकत्वसमर्थनं नाम नवमाधिकरणं समाप्तम्।।**

❀ ❀ ❀ ❀

---

१. भ.गी.४-३४ २,३. भ.गी.२-४० ४. लघ्वत्रिस्मृतौ

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे

# मूलमन्त्रस्य सर्वफलप्रदत्वसमर्थनं नाम

# दशमाधिकरणम्

**मू।। (११) इदुतान् [1]कुलन्तरुम् एन्गिरपडिये एल्लावपेक्षि तङ्गलैयुम् कोडुक्कुम्**

पूर्वाधिकरणे रक्षणव्यापाराऽसङ्कोचेनमन्त्रशब्दयोगार्थपूर्तिरुक्ता। अथ तद्घटकीभूतफलाऽसङ्कोचेन तत्पूर्तिरुच्यते। अत्र अयोगाऽन्ययोगव्यवच्छेदेन सर्वफलहेतुत्वं **मूलमन्त्रस्य** सम्भवति वा न वेति विचारः।

## पूर्वपक्षस्तु

न तावत्तस्य अयोगव्यवच्छेदेन सर्वफलहेतुत्वं सम्भवति। एकमन्त्रपरिशेषापत्त्या मन्त्रान्तरशास्त्राणां वैयर्थ्यप्रसङ्गात्। लाघवेन एकेनैव सर्वफलसिद्धौ गौरवेणाऽन्येषामनुपदेयत्वात्।

किञ्च पूर्वाधिकरणे वैकुण्ठनामग्रहणस्य अशेषाऽघविनाशनत्वं स्वभाव इत्युक्तम्। तथा सकृच्छुतस्य तत्तत्फलविरोधिपापनिवर्तकत्वे युगपत्सर्वफलाऽवाप्तिप्रसङ्गः।

नाप्यन्ययोगव्यवच्छेदेन सर्वफलहेतुत्वं; श्रीनृसिंह श्रीराममन्त्रश्रीकृष्णमन्त्रादीनां सर्वाभीष्टप्रदत्वस्य तत्तन्मन्त्रशास्त्रसिद्धत्वात्। योगार्थपूर्तिमुखेन मुक्तिहेतु ज्ञानजनकत्वस्याऽन्यत्राऽसम्भवेऽपि, तस्य सप्तमाधिकरणसिद्धत्वेन एतदधिकरण व्युत्पाद्यत्वाभावात्। तस्मात् सर्वफलहेतुरूपोत्कर्षो न व्यावर्तक इति।

## सिद्धान्तस्तु

मूलमन्त्रस्य तावत् अयोगव्यवच्छेदेन सर्वफलहेतुत्वं सम्भवत्येव। [2]**नमो नारायणायेति मन्त्रस्सर्वार्थसाधकः** इत्यादि सामान्योक्तिमात्रेण विना -

---

१. पेरियतिरुमोलि.१-१-९  २. नार.पु.१-४०

**[1]ऐहलौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकम्।**
**कैवल्यं भगवन्तञ्च मन्त्रोऽयं साधयिष्यति।।**

इति त्रिवर्गापवर्गरूपेण पुरुषार्थसामान्यं विभज्य, ऐहिकामुष्मिकरूपेण त्रैवर्गिकफल विभज्य, आपवर्गिकफलमपि जीवात्मपरमात्मप्राप्तिरूपत्वेन विभज्य, सर्वफल-हेतुत्वस्य विशिष्योक्त्या, तात्पर्यातिरेकव्यापनेन दृढीकृतत्वात्। न चैवम् एकमन्त्र-परिशेषापत्तिः। गुणत्रयवैषम्यकृतरुचितारतम्येन व्यवस्थया सर्वमन्त्राणां नानामन्त्र-परिग्रहोपपत्तेः। परमकारुणिकेन भगवता वेदपुरुषेण **[2]त्रैगुण्यविषया वेदाः** इत्युक्तरीत्या सर्वपुरुषाणां तत्तत्पुरुषार्थाभिलाषवैचित्र्यानुसारेण विचित्रतत्तत्पुरुषार्थ-साधनप्रवर्तनवत्, एकस्मिन्नपि फले नानासाधनभूतमन्त्राणां प्रवर्तनोपपत्तेः। नापि पूर्वाधिकरणविरोधः -

**[3]सर्वज्ञोऽपि हि विश्वेशस्सदा कारुणिकोऽपि सन्।**
**संसारतन्त्रवाहित्वाद्रक्षापेक्षां प्रतीक्षते।।**

इत्यादि प्रमाणबलेन सामग्रीविशेषेण नियतकालभाविपुरुषापेक्षा विशेषस्य स्वरूप-मात्रप्रयुक्तसर्वकालसर्वफलप्रदानशक्तिसङ्कोचकत्वाऽवश्यम्भावेन, पुरुषापेक्षितमेव दास्यामीति भगवत्सङ्कल्पोन्नयनेन युगपत्सर्वफलावाप्तिप्रसङ्गाभावात्।

एवमन्ययोगव्यवच्छेदेन सर्वफलहेतुत्वमपि सम्भवत्येव। (कुलन्तरुम्) इत्यादि श्रीमत्परकालसूरिसूक्तौ ब्राह्मणबीजस्यैव गायत्रीब्रह्मविद्याया इव चाष्टाक्षर-ब्रह्मविद्यायाः **कामये वैष्णवत्वन्तु** इत्यादि प्रसिद्धसर्वोत्कृष्टजन्मरूपफलस्य **साहि श्रीरमृता सताम्** **[4]लक्ष्मणो लक्ष्मीसम्पन्नः** **[5]अन्तरिक्षगतः श्रीमान्** **[6]स तु नागवरः श्रीमान्** इत्यादि प्रसिद्धस्वरूपानुरूपसम्पद्विशेषरूपफलस्य **तन्नैप्पेणवुम् पण्णुम् , धरिक्कवुम् पण्णुम्** इत्यादि प्रसिद्धस्य परमार्तिदशायां स्वार्थानुसन्धानेन धारणरूपफलविशेषस्य अनितरसाधारणस्याऽनुगृहीतत्वात्। एवमन्यदपि उदाहर्तव्यम् । इत्थं तत्तन्मन्त्रशास्त्रेषु सर्वाभीष्टप्रदत्वोक्तिः प्रायिकाऽभि-प्रायेण यथोक्तविलक्षणजन्मसम्पद्धारणादिरूपस्य फलस्याऽर्थपञ्चकयाथाम्यज्ञान-मूलकस्य केवलपरार्थानुभवकैङ्कर्यपर्यन्तमोक्षस्यैव मन्त्रान्तरैः सम्पादनसम्भावनायाः अपि अभावात्।

---

१. वृद्ध.हा.सं.३-४७ २. भ.गी.२-४५ ३. लक्ष्मी.तं.१७-१८
४. रामा.बा.का.१८-२९ ५. रामा.यु.का.१७ ६. वि.ध.पु.

तस्मात् मूलमन्त्रस्य सर्वफलहेतुत्वरूपोत्कर्षो मन्त्रान्तर व्यावर्तक इति सिद्धम्। अस्मिंश्च दशमेऽधिकरणे (इदुतानित्यादि) प्रथमसूत्रम्। तत्र इदं शब्देन - मूलमन्त्रः परामृश्यते। (तान्) इत्यनेन स्वशब्दपर्यायेण इदं शब्दोपात्ताऽसाधारण स्वरूपपरामर्शिना, तु शब्दस्थानीयेनाऽन्ययोगव्यवच्छेदेन सर्वफलहेतुत्वं सूच्यते। (कुलन्तरुमेन्निरपडिये) इत्यनेन श्रीमत्परकालसूरीणां प्रथमप्रबन्धे प्रथमशतके मूलमन्त्रार्थपरे प्रथमदशके नवमगाथारूपसूक्तिरभिप्रेता। तत्र च पूर्वाचार्यैः अनुगृहीतं विलक्षणजन्मादिरूपफलपरत्वमपि अभिप्रेतम्। (एल्लावपेक्षितङ्गलैयुम् कोडुक्कुम्) इति साधारणाऽसाधारणसर्वफलप्रदत्वमभिप्रेतम्। अत एव (इतुतान्) कुलन्तरु-मेन्निरपडिये ऐश्वर्यकैवल्यभगवल्लाभङ्गलैक्कोडुक्कुम् इत्येकसूत्रतया नाऽनु-गृहीतम्। प्रथमसूत्रे असाधारणफलहेतुत्वप्रामाण्यस्य प्राधान्येन विवक्षितत्वात्। द्वितीयसूत्रे साधारणफलहेतुत्व प्रामाण्यस्य तथाविवक्षितत्वात्। (कुलन्तरुम्) इत्यादि सूक्तौ कैवल्यस्य कण्ठतोऽनुक्त्या, (रुलन्दरुमेन्निरपडिये कैवल्यत्तैक्को-डुक्कुम्) इत्यनन्वयात्। **ऐहल्लौकिकम्** इत्यादिवचने विलक्षणजन्माद्यनुक्त्या (एल्लावपेक्षितङ्गलैयुम् कोडुक्कुम्) इति तद्वचनसूचनाऽसम्भवाच्च। इत्थं प्रथमसूत्रेणाऽसङ्कोचेन सर्वफलहेतुत्वरूपाऽन्ययोगव्यवच्छेदः सूचितः।

**मू।। (२०) ऐश्वर्यकैवल्यभगवल्लाभङ्गलै आशैप्पट्टवर् कलुक्कु अवट्रै कोडुक्कुम्**

द्वितीयसूत्रम् (ऐश्वर्यकैवल्येत्यादि ) अनेन - (एल्लावपेक्षितङ्गलैयुम् कोडुक्कुम्) इति पूर्वसूत्रसूचिते **नमो नारायणायेति मन्त्रस्सर्वार्थसाधकः, मन्त्रमष्टाक्षरं विद्यात्, सर्वसिद्धिकरं नृणाम्** इत्यादिवचने नृसिंहमन्त्रादिष्विव सामान्योक्तेः सङ्कोचावहत्वशङ्का व्यवार्त्यते। ऐश्वर्यादिविशेषशब्दनिर्देशक्रमेण ऐहलौकिकमित्यादिवचनप्रत्यभिज्ञानात्, तत्र त्रिवर्गभेदस्याऽपवर्गभेदस्यचोक्त्या सङ्कोचतात्पर्याऽतिरेकख्यापनाच्च। तत्र ऐश्वर्यशब्दः प्रमाणप्रसिद्ध्या ग्रामाधि-पत्याद्यण्डाधिपत्यान्तपरः। कैवल्यशब्दोऽपि तथैव केवलस्वात्मानुभूतिरूपमुक्तिपरः। भगवत्स्वरूपेणाऽसाध्यत्वात्। [1]**ब्रह्मविदाप्नोति, सोऽश्नुते** इत्याद्युक्त प्राप्यनु भवादि विशिष्टवेषेण साध्यत्वमभिप्रेत्य भगवल्लाभशब्दः प्रयुक्तः। (आशैप्पट्टवर्

१. तै.उ.आ.१

कलुक्कु) इत्यनेन रक्ष्याऽपेक्षा सर्वदा योग्यसर्वफलप्रदानशक्तिसङ्कोचिकेति सूचितम्। अत एव (ऐश्वर्य कैवल्यभगवल्लाभङ्गलैक्कोडुक्कुम्) इत्यनुक्त्वा ऐश्वर्यदीनामपेक्षा कर्मत्वेन दानक्रियाकर्मत्वेन च द्विरुक्तिः। (कोडुक्कुम्) इत्यत्र (इदु) इति, पूर्वसूत्रस्थ कर्तृपदमनुषज्यत इत्येवमनुसन्धेयम्।

॥ इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते
रहस्यत्रयमीमांसाभाष्ये
प्रथमाध्याये प्रथमपादे
मूलमन्त्रस्य सर्वफलप्रदत्वसमर्थनं नाम
दशमाधिकरणं समाप्तम्॥

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे मूलमन्त्रस्य साधनान्तरसहकारित्वसमर्थनं नाम एकादशाधिकरणम्

## मूलमन्त्रस्य साधनान्तरसहकारित्वसमर्थनम्

**मू।। (२१) कर्मज्ञानभक्तिकलिले इलिन्दवर् कलुक्कु विरोधियैप्पोक्कि अवट्रैत्तलैक्कट्टिक्कोडुक्कुम्।**

इत्थं साक्षात्सर्वफलसाधनत्वमुक्तम्। अथ तत्तत्फलसाधननिष्पादनेन सद्वारकसर्वफलसाधनत्वस्य व्युत्पादनमुखेन [१]**कुलन्तरुम्** इत्यादिसूक्तिसिद्धं **ऐहलौकिकम्** इत्याद्युक्तञ्च मोक्षहेतुत्वं सप्तमाधिकरणव्युत्पादितं मोक्षसाधननिष्पादकतारूपमिति सूच्यते। तत्र संशयः - मूलमन्त्रस्य फलसाधननिष्पादकतया फलहेतुत्वं सम्भवति न वेति -

### तत्र पूर्वपक्षः

मूलमन्त्रस्य सद्वारकफलहेतुत्वं न सम्भवति। साक्षात्फलहेतोः फलसाधननिष्पादकत्वे **तद्धेतोरेव** इति न्यायेन द्वारिण एव फलसाधनत्वसम्भवेनद्वारवैयर्थ्यापत्तेः।

न च श्रीमद्गीताभाष्ये कर्मयोगज्ञानयोगाऽनुगृहीतभक्तियोगस्य ऐश्वर्यकैवल्यभगवल्लाभहेतुतया सिद्धान्तितत्वात्, अष्टाक्षरे सर्वार्थसाधकत्वस्य वाचनिकत्वाच्च तदुभयाऽविरोधेनाऽनुकल्पतया अष्टाक्षरस्य साधनतदङ्गनिष्पादकत्वं कल्प्यत इति वाच्यम्। स्वातन्त्र्येण प्रधानफलसाधकस्याष्टक्षरस्य साधनतदङ्गनिष्पादनेनानुकल्पत्व कल्पनस्याऽन्याय्यतया **सर्वार्थसाधकः** इत्यत्रार्थशब्दः प्रधानफलपर इत्येव कल्पयितुं युक्तत्वात्।

---

१. पेरियतिरुमोलि १-१-९

एतेन (कुलन्तरुम्) इति सूक्तौ ऐहलौकिकमित्यादिवचने च यत् भगवल्लाभहेतुत्वं **मूलमन्त्रस्योक्तं** तत्प्रत्युक्तम्। निवर्तकज्ञानजननमुखेन मोक्षहेतुत्वविवक्षायां तस्य चतुर्थाधिकरणव्युत्पाद्यस्याऽत्रावक्तव्यत्वापत्तेः। (कुलन्तरुम्) इत्यादि नावमगाथासूक्तेः [1]**उणर्वेनुम् पेरुम्बदम् तेरिन्दु** इत्यादि प्रथमगाथासूक्त्या पौनुरुक्त्यापत्तेश्च-साधन निष्पादनेन मोक्षहेतुत्वविवक्षायां **तद्धेतोरेव** इति न्यायापातात्। तद्धेतोरेव साक्षात्तज्जन्यकार्यजनकत्वे तद्वैयर्थ्यम्। तस्मात् साक्षात्फलसाधनस्य मूलमन्त्रस्य सद्वारकफलसाधनत्वं न सम्भवतीति।

**अत्रायं सिद्धान्तः** - साक्षात्फलसाधनस्य साधननिष्पादकत्वं न सम्भवतीति तावदयुक्तम्। **सकलफलप्रदो हि विष्णुः** इत्यादिप्रसिद्धस्य भगवदुपासनेन धर्मादिचतुर्विधपुरुषार्थसाधनत्वस्य भङ्गप्रसङ्गात्। इत्थं धर्मादिफलसाधनत्वमन्यत्रापि उदाहर्तव्यम्। न चात्र तद्धेतोरिति न्यायावतारः सम्भवति। साक्षात्सर्वफलसाधनत्वलक्षणमूलमन्त्रमाहात्म्याऽज्ञानिनः रजोगुणाधिक्येन बहुप्रवृत्तिशीलस्य, उपायफल्गुत्व उपेयदौर्लभ्य स्वदोषभूयस्त्वज्ञानकृतशंकात्रयवतश्च लघुसाधनत्यागगुरुसाधनप्रवृत्त्योः सम्भवात्। अधिकारभेदमादायैव फल्गुगुरुसाधनविधिसम्भवाच्च। महाफलनिष्पादनशक्तिमतः साधनतदङ्गनिष्पादनशक्तेः कैमुतिकन्यायेन सम्भावाच्च।

अत एव श्रीमद्गीताभाष्यानुसारेण **मन्त्रस्सर्वार्थसाधकः** इत्यादिवचनबलेन च **मूलमन्त्रस्य** सद्वारकाऽद्वारकैश्वर्यादिफलसाधनत्वं युक्तम्। जपहोमादिमुखेन साधननिष्पादकत्वस्य मूलमन्त्रे प्रमाणसिद्धत्वेनाऽर्थशब्दस्य प्रधानफलपरत्वस्वकल्पनायाः अशक्यशङ्कत्वात्।

अत एव प्रकृते मूलमन्त्रस्य भगवल्लाभहेतुत्वप्रमाणोपन्यासोऽपि युक्तः। मोक्षसाधनतदङ्गनिष्पादकत्वेन मोक्षहेतुत्वमेतदधिकरणव्युत्पाद्यमभिप्रेत्य, सर्वफलहेतुत्वव्युत्पादके पूर्वाधिकरणे प्रमाणमुखेन मोक्षसाधनत्वस्यापि साधनसम्भवात्। तस्मात् मूलमन्त्रस्य त्रिवर्गापवर्गफलसाधनतदङ्गनिष्पादक तयाऽपि फलहेतुत्वं सम्भवतीति।

इदमेकादशाधिकरणमेकसूत्रात्मकम्। (कर्मज्ञानभक्तिकलिलेयिलिन्दवर् कलुक्कु) इति समप्रधानतया उपादनात् प्रथमं कर्मयोगे ज्ञानयोगे भक्तियोगेवाऽन्वि-

---

१. पेरियतिरुमोलि १-१-१

तानामित्यर्थः। अङ्गाङ्गिभावेन त्रयाणामन्वयविवक्षायां भक्तियोगान्वयविवक्षयैव कर्मज्ञानान्वयसिद्ध्या कर्मज्ञानोक्तिवैफल्यापत्तेः।

तत्र प्रथमं कर्मयोगे प्रवृत्तिः श्रीमद्गीताभाष्यश्रीसूक्त्यनुसारेण स्वारसिकी। तत्र कर्मयोगारम्भविरोधिपुण्यपापरूपकर्मणां नाशः य [1]जन्मान्तरसहस्रेषु इत्यादिप्रकारं विना मूलमन्त्रमेव जपहोमादिमुखेन सन्निपत्योपकारकाङ्गत्वेन कर्मयोगसहायतया यदि कश्चिल्लाघवार्थं स्वीकरोति, तदाकरणशरीरनिष्पादकतया निष्पन्नकरणाऽनुवृत्ति सम्पादकतया च योगक्षेमरूपोपकारद्वयं कर्मयोगविषये मूलमन्त्रः करोति।

यदि तु कश्चिल्लाघविकतरः सुकृतविशेषाधीनरुचिविशेषेण प्रथमं ज्ञानयोगमनुतिष्ठन् कर्मयोगसाध्यायाः ज्ञानयोगोत्पत्तिविरोधिकर्मनिवृत्तेः सिद्धये पूर्वोक्तरीत्या कर्मयोगस्थाने मूलमन्त्रं ज्ञानयोगसहायत्वेन स्वीकरोति। तदा स तथैव ज्ञानयोगोपकारको भवति।

यदि कश्चिल्लाघविकतमः अत्यन्तोत्कटसुकृतविशेषाधीनाऽऽत्यन्तिकाऽभिनिवेशविशेषेण प्रथममेव मुक्तानुभवप्रायं भक्तियोगमनुतिष्ठन् कर्मयोगज्ञानयोगोभयसाध्यफलं सिद्ध्यर्थं मूलमन्त्रमेव तदुभयस्थाने पूर्वोक्तरीत्या सहायतया स्वीकरोति। तदापि मूलमन्त्रः तदुभयस्थाने स्थित्वा तथैव भक्तियोगोपकारको भवतीति तात्पर्यम्।

(इलिन्दवर् कलुक्कु) इत्यनेन दुश्शकस्वरूपविरुद्धसाधनाऽन्वयोऽधोगतिरिति सूच्यते। अज्ञानदुराशादुश्शङ्काकार्यसाधनान्तरप्रवृत्तेः अधोगतित्वोपपत्तेः। (विरोधियैत्पोक्कि) इत्यनेन पूर्वेष्टप्रापणरूपयोगः उक्तः। (अवट्टैत्तलैक्कट्टिक्कोडुक्कुम्) इत्यनेन स्थितेष्टपरिपालनरूपक्षेम उक्तः इत्येवमनुसन्धेयम्।

**।। इति श्रीशुद्धसत्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये प्रथमध्याये प्रथमपादे**
**मूलमन्त्रस्य साधनान्तरसहकारित्वसमर्थनं**
**नामैकादशाधिकरणम् समाप्तम्।।**

❀ ❀ ❀ ❀

---

१. लघ्वत्रिस्मृतौ

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे

# मूलमन्त्रस्य प्रपत्तिसहकारित्वसमर्थनं नाम द्वादशाधिकरणम्

**मू।। (२२) प्रपत्तियिले इलिन्दवर् कलुक्कु स्वरूपज्ञानत्तैपिरपित्तु कालक्षेपत्तुक्कुम् भोगत्तुक्कुम् हेतुवायिरुक्कुम्।**

पूर्वाधिकरणे कर्माद्युपायान्तरसहकारित्वलक्षणो मूलमन्त्रोत्कर्षः उक्तः। इदानीम् **उपायोऽयं चतुर्थस्ते प्रोक्तः शीघ्रफलप्रदः** इत्याद्युक्त प्रपत्तिसहकारित्वलक्षणः स उच्यते। तत्र संशयः - मूलमन्त्रस्य प्रपत्त्युपायसहकारित्वलक्षणोत्कर्षः सम्भवति न वेति।

## तत्र पूर्वपक्षः

न मूलमन्त्रस्य प्रपत्तिसहकारित्वमुपपद्यते। प्रपत्तेः सहकारिसापेक्षत्वे **प्रपत्तेः क्वचिदप्येवं परापेक्षा न विद्यते** इत्यादि प्रसिद्धनिरपेक्षत्वसिद्धान्तभङ्गप्रसङ्गात्।

न च - कर्मादाविव जपहोमादिमुखेन प्रपत्तिस्वरूपनिष्पादकतया मूलमन्त्रस्य सहायता सम्भवति। विरोधिनिवृत्तिमुखेन जपादिद्वारकाङ्गत्वस्य अदृष्टद्वारकस्य प्रातिस्विकशास्त्रेण विना कल्पनायोगात्। प्रपत्तेः प्रार्थनारूपायाः विषयवैलक्षण्यज्ञानमात्राधीनतया चिकीर्षाधीनकृतिसाध्यत्वाऽभावेनाऽदृष्टद्वारकाङ्गरूपसाधनसाध्यत्वासम्भवाच्च। अत एव कर्मादाविवाऽविच्छेदापादकतयाऽङ्गत्वशङ्कापि न सम्भवति। मानाभावात्। अयत्नसिद्धत्वात् प्रपत्तेः सकृत्कृतायाः एव उत्तारकत्वसिद्धान्तविरोधाच्च।

एतेन स्वरूपज्ञानजननेन कालक्षेपहेतुतया भोगहेतुतया च विनियोगः प्रत्युक्तः। स्वरूपज्ञानस्य शब्दविधयामूलमन्त्रजन्यत्वेन तन्मुखेन शास्त्रार्थभूताऽङ्गत्वाऽसम्भवात्। कालक्षेपस्य जीवनकालयापनरूपस्य प्रपन्नविषये साधनानुष्ठान

तद्योग्यतापादकाऽनुष्ठानमुखेन असम्भवेऽपि आवश्यककायिकप्रवृत्तिरूपाऽऽज्ञानुज्ञाकैङ्कर्यमुखेन सम्भवेन सदा मन्त्रार्थानुसन्धानानावश्यकत्वात्। अन्यथा जामितादोषप्रसङ्गात्। भोगहेतुतयेत्यत्र भोगपदेन जीवभोगविवक्षायां नमश्शब्दविरोधात्। भवद्भोगविवक्षायां कालक्षेपहेतुतया इत्यनेन कृतकरत्वात्।

कालक्षेपस्य स्वतः प्रयोजनत्वेन नमश्शब्दविरोधात् कालक्षेपाद्यर्थत्वेऽपि प्रपत्तिसहकारित्वासिद्धेश्च। न च प्रपन्नेष्वपि मूलमन्त्रस्य उपयोगोऽस्तीति विवक्षितमिति वाच्यम्। तस्य इतरवैलक्षण्यरूपत्वाभावेन परमप्रकृताऽनुपयोगादिति।

## सिद्धान्तस्तु

**मूलमन्त्रस्य** प्रपत्तिसहकारित्वमुपपद्यत एव। जपहोमादिमुखेन कर्मयोगादिनिष्पादकत्वादिमुखेन तदङ्गत्ववत् शब्दविधया स्वरूपज्ञानजननमुखेन प्रपत्तिस्वरूपनिष्पादकतया तदङ्गत्वोपपत्तेः।

न चैतावता **प्रपत्तेः क्वचिदप्येवं परापेक्षा न विद्यते** इत्यादिप्रमाणमूलकनिवृत्त्यङ्गत्वसिद्धान्तभङ्गः। अदृष्टद्वारकमोक्षसाधनाऽननुष्ठानाङ्गकत्वस्यैव निवृत्त्यङ्गत्वशब्दार्थतया दृष्टकारणसापेक्षत्वे तद्भङ्गाऽभावात्।

एतेन **न च कर्मादौ** इत्याद्युक्तोपालम्भोऽपास्तः। न चैवं - निवृत्तेः अङ्गत्वभङ्गः। अदृष्टद्वारकस्यैव अङ्गत्वादिति वाच्यम्। दृष्टविधया अदृष्टद्वारकोपकारकत्वस्यैव पञ्चाङ्गषडङ्गाऽष्टाङ्गशब्देष्विव **सर्वधर्मान् परित्यज्य** इति ल्यप्प्रत्ययविवक्षिततत्वात्, तस्यैवात्मज्ञानाङ्गत्वबोधः **के [1]इत्यङ्गमुदितं श्रेष्ठम्** इति वचने विवक्षितत्वाच्च। स्वयंप्रयोजनभगवत्प्रसादरूपाऽदृष्टकारणीभूतशरणागतिसहकारितया पञ्चषडङ्गानामिवधर्मत्यागात्मज्ञानयोः अपि अदृष्टानुविद्धाङ्गत्वसम्भवाच्च। एतेनैव प्रमाणाभावात् अङ्गत्वं न सम्भवतीत्यपि प्रत्युक्तम्। अत एवाविच्छेदापादकतयाऽङ्गत्वमपि युक्तम्।

वस्तुतः प्रायश्चित्तरूपायाः प्रायश्चित्तबुद्ध्या नानुष्ठेयायाः सत्वोद्रेककृतभयातिरेकघटितसामग्रीवशसम्पन्नायाः शरणागतेः सिद्धान्ते यावज्जीवमनुष्ठेयत्वात्। अनुगृहीतञ्च श्रीकृष्णपादलोकाचार्यैः **श्रीवचनभूषणमीमांसाशास्त्रे** -

---

१. श्रीवचनभूषणम्

[1]**भयाभयङ्गलिरण्डुम् मारि मारि प्राप्तितयलवुमनङक्कुम्** इति। अविच्छेदे प्रमाणभावः इति च वर्तमाननिर्देशाच्छ्रवणनिबन्धनमयत्नसिद्धत्वमपि अप्रयोजकम्। अयत्नसिद्धायाः अपि प्रार्थनारूपप्रपत्तेः सत्वज्ञानस्य मन्त्रसंशीलन-जनितस्याऽनुवृत्त्याऽनुवृत्तिसम्भवात्। न च [2]**सकृदेव हि** इत्यादि विरोधः। प्रायश्चित्तस्य साधनानुग्राहकत्वात्। [3]**शरणं ते व्रजम्** इत्यादि भूतनिर्देशबलेन पूर्वकृतप्रपदनस्मरणरूपशरणागतेरेव प्रायश्चित्तत्वात्।

न च - शरणागतिज्ञानस्य शरणागतिरूपत्वाभावेन स्मरणं न पुनः शरणागतिरिति वाच्यम्। अनुव्यवसायस्य व्यवसायविषयविषयकत्वनियमेन प्रमा-रूपशरणागतिविषयकस्य विषयांशे सत्तानिश्चयरूपत्वेन च स्मरणस्य पुनश्शरणागति-त्वोपपत्तेः। द्वयमन्त्रकरणकप्राथमिकशरणागतेरपि शरणागत्यनुसन्धानरूपत्वाच्च। प्रपत्तेः सत्वज्ञानादिरूपत्वेन दृष्टविधया मोक्षकारणत्वाङ्गीकारेण सकृत्कृतायाः प्रपत्तेः प्रायश्चित्ताभावेऽपि व्याजत्वरूपोत्तारकत्वस्य दुर्वारत्वाच्च।

न चैवं प्रायश्चित्तवैयर्थ्यम्। [4]**उपायापाय संयोगे निष्ठया दीयतेऽनया** इति निष्ठाहानिप्रायश्चित्तत्त्वस्यैव वाचनिकत्वेन निष्ठासिद्ध्यर्थं वस्तुतः प्रायश्चित्त-रूपशरणागतेः पुनः पुनः सम्भवात्। तथापि मोक्षसिद्ध्यर्थं प्रायश्चित्ताऽकरणेन सकृत्कृतस्य उत्तारकत्वभङ्गप्रसङ्गाच्च। स्वयंप्रयोजनभगवन्मुखोल्लासार्थस्वरूप-ज्ञानार्थतया तथैव तन्मूलककालक्षेपार्थतया तन्मूलकभोगार्थतया च मूलमन्त्रस्य विनियोगवत्त्वसम्भवाच्च। स्वरूपज्ञानस्य शब्दविधया मूलमन्त्रजन्यत्वेऽपि दृष्ट-विधया उपकारकत्वलक्षणाङ्गत्वसम्भवात्। मन्त्रार्थानुसन्धानस्याऽनुज्ञाकैङ्क-र्यान्तर्भावेन तन्मुखेनापि कालक्षेपसम्भवात्। अनुष्ठानाऽनवरुद्धकालेमन्त्रार्थानु-सन्धानसम्भवेन जामितादोषाप्रसङ्गाच्च। मन्त्रार्थश्रवणमननध्यानतदर्थानुष्ठानमुखेन कालक्षेपेऽपि तदप्रसङ्गाच्च। भोगशब्देन भगवद्भोगार्थकैङ्कर्यानुनिष्पादिजीवभोग-विवक्षायां नमश्शब्दविरोधाभावात्। कालक्षेपहेतुशब्देन कुर्वद्रूपाणां करणानां मन्त्रार्थ-श्रवणादिना विषयान्तरव्यावृत्ततया तन्निवृत्तिमुखेन भगवन्मुखोल्लासार्थत्वस्य भोगहेतु-शब्देन स्वभोगद्वारकभगवन्मुखोल्लासार्थत्वस्य च विवक्षिततया कृतकरत्वाद्यन-वकाशाच्च।

---

१. श्रीवचनभूषणम् २. लक्ष्मी.तं.१७-८५
३. भ.पु. ४. अजामित्वायोपांशुः यष्टव्यः

मन्त्रार्थानुसन्धानाभावे करणानां विषयान्तरप्रवृत्त्यापत्तौ रजस्तमोऽभिवृद्धि-प्रसङ्गेन सकृत्कृतायाः प्रपत्तेः तत्त्वज्ञानादिरूपत्वेनोत्तारकत्वाभावापत्त्या उक्तरीत्या कालक्षेपार्थत्वे प्रपत्तिसहकारित्वसिद्धिसम्भवाच्च। मन्त्रान्तरवैलक्षण्यपर्यवसायितया प्रपन्नेष्वपि मूलमन्त्रस्योपयोगोऽस्तीति विवक्षायामपि परमप्रकृतोपयोगसम्भवाच्चेति।

## सूत्रार्थस्तु

प्रपत्तिशब्देन [1]**अनन्यसाध्ये स्वाभिष्टे त्वमेवोपायभूतो मे भव** इत्यादि प्रसिद्धं भगवच्छरणवरणमुच्यते। अनेन कर्माद्यपेक्षया सुशकत्वस्वरूपानुरूपत्व-लक्षणवैलक्षण्यसूचनेन मूलमन्त्रस्य कर्मादाविव प्रपत्तावयोगाऽसम्भवः सूच्यते। (इलिन्दवर् कलुक्कु) इत्यनेन शङ्कात्रयं दुर्वासनां च विना प्रपत्त्यन्वयो दुर्लभ इति सूच्यते। (स्वरूपज्ञानत्तैप्पिरप्पित्तु) इत्यत्र स्वरूपशब्देन आकारत्रययुक्तजीव-स्वरूपं, शेषित्वात् आकारत्रययुक्तेश्वरस्वरूपं, स्वस्वरूपपरस्वरूपपुरुषार्थ-स्वरूपोपाय स्वरूपविरोधिस्वरूपात्मकमर्थपञ्चकस्वरूपं वा विवक्षितम्।

(ज्ञानत्तैप्पिरप्पित्तु) इत्यनेन स्वरूपज्ञानस्य स्वयंप्रयोजनत्वप्रपत्तिनिष्पा-दकत्ववर्धकत्व कालक्षेपभोगहेतुत्वरूपेण पञ्चधोपयोगो विवक्षितः। कालक्षेप-शब्देन स्वरूपविरुद्धप्रवृत्तिं विना जीवनकालस्य मन्त्रार्थश्रवणमननध्यानतत्प्रवचनत-दर्थानुष्ठानमुखेन पञ्चधायापनं विवक्षितम्। भोगशब्देन भगवद्भोगवर्धकोमन्त्रा-र्थश्रवणादिपञ्चके आनुषङ्गिको जीवभोगो विवक्षितः। (हेतुवायिरुक्कुम्) इत्यत्र सूत्रद्वयव्यवहितपूर्वसूत्रस्थं (इतुतान्) इति पदं पूर्वसूत्रद्वये विशेष्यसमर्पकतयाऽनुष-क्तमिहाऽप्यनुषज्यत इत्यनुसन्धेयम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे**
**मूलमन्त्रस्य प्रपत्तिसहकारित्वसमर्थनं नाम**
**द्वादशाधिकरणम् समाप्तम्।।**

---

१. विष्व.सं.

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे

# मूलमन्त्रस्यार्थपञ्चकपरत्वसमर्थनं नाम

# त्रयोदशाधिकरणम्

**मू।। (२३)** [1]मद्रेल्लां पेशिलुम् एन्निरपडिये **अरियवेण्डुमर्थमेल्लामितुक्कु -ल्लेयुण्डु।**

अत्र पूर्वसूत्रे स्वरूपज्ञानशब्देन सूचितो मूलमन्त्रस्य ज्ञातव्य सकलार्थप्रतिपादकत्वोत्कर्षः साध्यते। तत्र तादृशोत्कर्षः सम्भवति न वेति विचारः। तदर्थं ज्ञातव्यार्थेषु इयत्ता सम्भवति न वेति।

## तत्र पूर्वपक्षः

मूलमन्त्रस्य तादृशोत्कर्षो न सम्भवत्येव। **वेदयतीति वेदः** इति व्युत्पत्त्या बुभुत्सूनाम् आस्तिकानां ज्ञातव्यार्थप्रतिपादकत्वस्यैव वेदशब्दार्थतया वेदार्थस्य सर्वस्य ज्ञातव्यत्वेन मूलमन्त्रेतत्प्रतिपादकत्वस्य बाधितत्वात्।

न च मुमुक्षुज्ञातव्यसकलार्थप्रतिपादकत्वं विवक्षितम्। [2]**त्रैगुण्यविषया वेदाः** इत्युक्ततया वेदार्थः सर्वोऽपि न मुमुक्षुज्ञातव्य इति वाच्यम्। तथापि वेदान्तप्रतिपाद्यसकलार्थप्रतिपादकत्वाभावेन बाधानुद्धारात् धर्मादिपुरुषार्थचतुष्टयतत्साधनतारतम्यपरिज्ञानार्थं पूर्वभागार्थस्यापि मुमुक्षुज्ञातव्यत्वाच्च। अन्यथा वेदे तत्प्रतिपादनवैयर्थ्यात्।

न च - अधिकारिचतुष्टयाऽनुजिघृक्षया स्वातन्त्र्येणैव तत्तद्भागप्रवृत्तिः सम्भवतीति वाच्यम्। तथा सति मूलमन्त्रवेदयोः विवरणविवरणी भावभङ्गप्रसङ्गात्। **यद्वेदादौ स्वरः प्रोक्तः, ब्रह्मणः प्रणवं कुर्यात्, ओङ्कारप्रभवा वेदाः**

[3]**ऋचो यजूंषि सामानि समस्तशब्दमूलत्वात्, मूलमन्त्रः सनातनः** इत्यादि प्रमाणबलेन। सर्ववेदानां मूलमन्त्रविवरणत्वस्य द्वितीयषष्ठाधिकरणन्यायेन

---

१. पेरियतिरुमोलि ८-१०-३ २. भ.गी.२-४५ ३. वृद्ध.हा.सं.३-४५

पूर्वमेव सिद्धत्वात्। फलाध्यायेनिष्ठापादे, **पुरम्बुपिरन्दतेल्लाम्** इत्यादि सूत्रद्वयेन **पूर्व**भागस्य वेदान्तस्य च प्रपत्तिशास्त्रशेषत्वस्य साधयिष्यमाणत्वाच्च।

न च -[1]**प्राप्यस्य ब्रह्मणो रूपम्** इत्यादि वाक्ये अर्थपञ्चकस्य सोपबृम्हण-सर्ववेदप्रतिपाद्यत्वस्योक्ततया तस्मिन् वचने [2]**प्रचयशिष्टायाः पञ्चत्वसङ्ख्यायाः** न्यूनाधिकसङ्ख्याव्यवच्छेदकतया च तादृशार्थपञ्चकप्रतिपादकस्य मूलमन्त्रस्य मुमुक्षुज्ञातव्यसकलार्थप्रतिपादकत्वमुपपद्यते। अत एव **अर्थपञ्चकतत्त्वज्ञाः महाभागवताः स्मृताः** इति वचनमपि सम्भवतीति वाच्यम्। एवं सति तमेवैकं जानथाऽऽत्मानम् [3]**तमेवं विदित्वा** [4]**इदमेकं सनिष्पन्नम् तत्त्वमेकोमहायोगी** इत्यादिषु मुमुक्षुज्ञातव्यत्वेन एकत्वसङ्ख्यायाः **द्वे ब्रह्मणी वेदतव्ये** [5]**पृथगात्मानं प्रेरितारञ्च मत्वा** इत्यादिषु द्वित्वसङ्ख्यायाः [6]**भोक्ता भोग्यं प्रेरितारञ्च मत्वा** [7]**त्रयं यदा विन्दते ब्रह्ममेतत्** [8]**त्रयाणामेव चैवमुपन्यासः स्वज्ञानं प्रापकज्ञानं प्राप्यज्ञानं मुमुक्षुभिः** इत्यादिषु त्रित्वसङ्ख्यायाः, सारार्थचतुष्टयरीत्या चतुष्ट्वसङ्ख्यायाश्च सिद्धत्वेनाऽन्योन्व्याघातापातात्।

**न च हि - साङ्गस्वव्यवधायकम्** इति न्यायेन तत्र तन्त्रोक्तानाम् एकद्वित्रिचतुः पञ्चार्थानां तत्तदुपयोगि ज्ञातव्यार्थान्तरविशिष्टानामेव ज्ञातव्यत्वेन विवक्षिततयान-व्याघात इति वाच्यम्। हन्त तर्हि उपयोग्यर्थान्तराणां सर्वेषां सर्वत्र ज्ञातव्यत्वेन विवक्षिततया मूलमन्त्रे मुमुक्षुज्ञातव्यसकलार्थ प्रतिपादकत्वबाधस्य वज्रलेपत्वात्। **न च** - तात्पर्यतोऽर्थान्तरप्रतिपादकत्वशङ्कापि सम्भवति। तथा सति भगवन्मन्त्र-मात्रे तत्प्रसङ्गेन वृद्धिमिच्छत इति न्यायाऽपातात्।

तस्मात् मूलमन्त्रस्य ज्ञातव्यसकलार्थप्रतिपादकत्वरूपोत्कर्षो न सम्भवतीति। मूलमन्त्रस्य यथोक्तोत्कर्षः सम्भवत्येव। प्राधान्येन मुमुक्षुज्ञातव्यसकलार्थप्रति-पादकत्वस्यैव अत्र उत्कर्षरूपत्वेन सिषाधयिषितत्वात्। प्राधान्यञ्च मोक्षकारणीभूत-त्यागोपादानहेतुज्ञानविषयत्वम्। तच्च अर्थपञ्चकेऽपि अविशिष्टम्। तथा हि - मोक्षस्तावत् सिद्धान्ते भावान्तराभावन्यायेन ब्रह्मप्राप्तिरेव। अत एव [9]**ब्रह्मविदाप्नोति**

---

१. वृद्ध.हा.सं.८-१४१ २. प्रचयः उत्तरोत्तरगणना ३. श्वेता.उ.३-८
४. म.भा.अनु.प. ५. श्वेता.उ.१-६ ६. श्वेता.उ.१-१२
७. श्वेता.उ. १-९ ८. ब्र.सू.१-४-६ ९.तै.उ.आ.१

परम्। [1]**तमेवं विदित्वाऽतिमृत्युमेति** इति ब्रह्मप्राप्तिविरोधिनिवृत्त्योः विद्यासाध्यत्व-श्रवणं स्वरूपः उपपद्यते। प्राप्तिश्च [2]**एतमितः प्रेत्याऽभिसम्भविताऽस्मि** इति। [3]**परात्परं पुरुषामुपैति दिव्यम्** इत्यादि प्रतिपन्नम्। [4]**यो वेद निहितं गुहायां परमे व्योमन्** [5]**आदित्यवर्णं तमसस्तु पारे** इत्याद्यवगतस्थानविशेषविग्रहविशेष-विशिष्टस्य सामीप्यम्, योगनिष्ठविषये [6]**सोऽश्नुते सर्वान् कामान्** [7]**परमं साम्यमुपैति** इत्याद्युवगतगुणाऽनुभवरूपसायुज्यमात्रविश्रान्तम्। प्रपत्तिनिष्ठविषये तु अनुभवजनितप्रीतिकारितकैङ्कर्यपर्यन्तम्। एतादृशब्रह्मप्राप्तौ च भक्तिप्रपत्तिरूप-ब्रह्मविद्यायाः साधनत्वञ्च दुःखजन्मप्रवृत्तीत्यादिसूत्रोक्तन्यायेन मिथ्याज्ञाननिवृत्त्यादि-द्वारकम्।

न चैवं ब्रह्मविद्यायाः दृष्टविधया मोक्षसाधनत्वे अविधेयज्ञानवादापत्तिः। दृष्टविधया मोक्षसाधनत्वस्य अज्ञातस्य ज्ञापनेन भक्तिप्रपत्तिरूपब्रह्मविद्याद्वयस्यापि विधेयत्वाभ्युपगमात्। स्वयंप्रयोजनभगवत्प्रसादसाधनत्वज्ञापनमुखेनाप्रवृत्तप्रवर्तन-स्यापि सम्भवाच्च।

इत्थं ब्रह्मप्राप्तिकारणभूतं ब्रह्मविद्यासामान्यं अर्थपञ्चकस्यापि मूलमन्त्रेण ज्ञानं विना नोपपद्यते। तथा हि - अदृष्टद्वारकमोक्षोद्देश्यकसाधनप्रवृत्तिः, प्रवृत्तिहेतुकाऽत्मभोगेच्छाचजीवस्य मोक्षविरोधिनीति नमश्शब्दार्थविचारावसरे वक्ष्यते। तथा स्वयंप्रयोजनभगवत्प्रसादोद्देश्यकव्यापारः, भगवन्मुखोल्लासवर्धकचे-तनप्रवृत्त्यनुद्देश्याऽऽनुषङ्गिकचेतनभोगश्च मोक्षं प्रति नियतपूर्ववर्तीति वक्ष्यते। ईदृश-त्याज्योपादेयविवेकाभावे निरुक्तत्यागोपादानयोः असिद्ध्या मोक्ष एव न सिद्ध्येत्।

अतः चतुर्थाधिकरणन्यायेनस्वामित्वप्रतिनियतनिरुपाधिकाऽसङ्कुचित-चेतनाऽचेतनविनियोक्तृत्वलक्षणशेषित्वरूपप्राप्याकारविशिष्टब्रह्मज्ञानस्य निरुक्त-साधनानुष्ठानस्वभोगोद्देशविरोधित्वेन चेतनप्रवृत्त्यनुद्देश्याऽऽनुषङ्गिकचेत-नभोगजनितप्रीतिशालित्वलक्षणप्राप्याकारविशिष्टज्ञानस्य कैङ्कर्यप्रवृत्त्या-नुषङ्गिकभोगसम्पादकत्वेन च प्राप्यस्वरूपज्ञानं तावदावश्यकम्।

---

१. श्वेता.उ.३-८  २. छा.उ.३-१४-४  ३. मुण्ड.उ.३-२-८  ४. तै.उ.आ.१
५. पु.सू.  ६. तै.उ.आ.व.२-२  ७. मुण्ड.उ.३-१३

एवं स्वामित्वेश्वरत्वरूपप्राप्याकारानुसन्धानमपिनिरुक्तत्यागोपादानमुखेन मोक्षहेतुरिति द्रष्टव्यम्। तदभावेकर्तृत्वभोक्तृत्वांशाऽविद्यासत्त्वेन मोक्षानुपपत्तेः। इत्थं यत्किञ्चित्फलोद्देश्यकाऽदृष्टद्वारकसाधनानुष्ठानाऽनर्हत्वस्वप्रवृत्त्युद्देश्य भोगाश्रयताऽनर्हत्वलक्षणा आकारद्वयमुक्तप्राप्तृस्वरूपज्ञानंमपि तदधिकरणन्यायेनैव मोक्षहेतुभूतब्रह्मविद्याद्वयाऽऽपेक्षितमित्यवधेयम्।

एवं चेतनप्रवृत्तिप्रतिरुद्धरक्षणप्रवृत्तिमत्त्वव्याजरूपभक्तिप्रपत्तिविषयत्व-लक्षणाऽऽकारद्वयविशिष्टोपायस्वरूपज्ञानं प्रयत्नफलीभूतपरप्रयोजनप्रवृत्ति-रूपकैङ्कर्यलक्षणफलस्वरूपस्य, चैतन्यफलीभूतद्विषयप्रीतिरूपफलस्वरूपस्य भगवत्प्रियतमत्वेन ज्ञानम्, अनादिदुर्वासनाबलेन चेतनस्य स्वभोगोद्देशेन साधना-नुष्ठानसम्पादकतया **प्रकृतिसम्बन्धो, भगवत्प्राप्तिविरोधी** इत्येवं विरोधिस्वरूप-ज्ञानञ्च पूर्वोक्तन्यायेनैव ब्रह्मविद्यापेक्षितमित्यनुसन्धेयम्।

एवं [1]**देहासक्तात्मबुद्धिः** इत्याद्यनुगृहीतरीत्या देहात्मभ्रमादिरूपमिथ्याज्ञा-नवृत्तिपूर्वकत्यागोपादानषट्कमुखेनापि ब्रह्मप्राप्तिरूपमोक्षहेतुत्वम् अर्थपञ्चक-ज्ञानस्याऽनुसन्धेयम्। तथा ब्रह्मप्राप्तिसाधनानुष्ठानस्य प्राप्तिकर्मकर्तृप्राप्त्युपाय-स्वरूपज्ञानं विना असम्भवात्। तत्त्रितयज्ञानं तावदावश्यकम्। न च-तथापि विरोधिस्वरूपफलस्वरूपज्ञानमनपेक्षितमिति वाच्यम्। विरोधिस्वरूपज्ञानाभावे तन्निवृत्त्युपायानुष्ठानाऽसम्भवेन विरोधिनिवृत्तिपूर्वकब्रह्मप्राप्तेरेवाऽसम्भवात् देशविशेषविशिष्टब्रह्मसमीप्यलक्षणब्रह्मप्राप्तेः स्वतः पुरुषार्थत्वाभावेन प्राप्तिफली-भूतानुभवकैङ्कर्यपर्यवसितायाः तस्याः ब्रह्मविद्याफलत्वेन ज्ञातव्यतया अनुभव-कैङ्कर्यरूपफलस्वरूपज्ञानावश्यम्भावाच्च।

एवं मोक्षोपयोगि बहुप्रकारत्यागोपादानहेतुज्ञानविषयत्वलक्षणम्, ब्रह्मविद्या-साध्यप्राप्तौ कर्मकर्तृभावेन, साध्यसाधनभावेन, प्रतिबन्ध्यप्रतिबन्धकभावेन च निरूपकतया ज्ञातव्यत्वलक्षणञ्च प्राधान्येन मुमुक्षुज्ञातव्यत्वमर्थपञ्चकेऽप्यनुगतम्, अनतिप्रसक्तञ्च।

अत एव [2]**प्राप्यस्य ब्रह्मणो रूपम्** इत्यादिवाक्ये अर्थपञ्चकमपि

१.अष्टश्लोकी.४ २. वृद्ध.हा.सं.८-१४१

प्राप्तिसम्बन्धितयैव **निर्दिष्टम्**। **षष्ठाधिकरणन्यायेन** उपदेशप्रमाणभूतमूलमन्त्रेण निरवशेषनिष्कलङ्कार्थपञ्चकज्ञाने **सति** तदुपपादकार्थान्तरप्रतिपादकश्रुतिस्मृत्यादिशास्त्रजन्यज्ञानस्य **कालक्षेपभोगत्त्वनिर्णयविजयाद्यर्थतया** योग्याधिकारिणां सम्पादनीयत्वेऽपि योग्यायोग्यसर्वमुमुक्षुसाधारण्येन **मोक्षार्थं प्राधान्येन** ज्ञातव्यत्वमर्थपञ्चकोपपादके क्वापि वेदार्थेन कथञ्चिदपि शङ्कितुं शक्यम्।

अत **एव प्राप्यस्य ब्रह्मणो रूपम्** इत्यादौ [1]**ऋचो यजूंषि सामानि** इत्यादौ च अर्थपञ्चकस्यैव प्राधान्याभिप्रायेण सर्वाध्यात्मशास्त्रेषु साक्षात् परम्परया वा प्रतिपाद्यत्वमुक्तम्। तस्मात् मूलमन्त्रस्य प्राधान्येन मुमुक्षुज्ञातव्यसकलार्थप्रतिपादकत्वरूपोत्कर्षः सम्भवतीति सिद्धम्।

अत एव भगवन्निर्हेतुककटाक्षलब्धदिव्यज्ञानेन श्रीमत्परकालसूरिणा, सर्वाध्यात्मशास्त्रार्थप्रतिपादकत्वं मूलमन्त्रस्य सिद्धवत्कृत्याऽनूदितम्। [2]**मट्रेल्लाम् पेशिलुम्** इति। अत एव एतदधिकरणप्रथमसूत्रेऽपि तत्सूक्तिमेव मुख्यप्रमाणत्वेन पुरस्कृत्यानुगृहीतम्। (मट्रेल्लाम् पेशिलुमेनिरपडिये) इत्यादि।

यद्यपि **मट्रुमोर् दैवमुलतेन्निरुप्पारोडु लल्लेन्** इत्यादि श्रीमत्परकालसूरिदिव्यसूक्तौ देवतान्तरशेषत्वगन्धाऽसहिष्णुत्वस्य मन्त्रार्थज्ञानं प्रति प्रधानफलत्वमेव विधेयम्। (कण्णपुरत्तुयम्माने इति सम्बोध्य, मान् निन् तिरुवेट्टेलुत्तुम् कट्रु) इति स्वस्य गुरुपदेशपूर्वकाऽर्थज्ञानपर्यन्ताऽष्टाक्षराध्ययनमुक्त्वा, तत्फलत्वेन भगवच्छेषवृत्त्यादिकमनुक्त्वा [3]**न दैवं केशवात्परम्** इत्यादिरीत्या भगवत्पारम्यज्ञानशालिनां देवतान्तरमसत्प्रायमित्यध्यवसायसिद्धवत्कारेण देवतान्तरमस्तीति भ्रान्तघोष्ठीषु **यूयं यूयं वयं वयं** इत्यादिरीत्या सल्लापसहवासादिकमपि **मम** नास्तीत्येव तत्फलस्याऽनुगृहीतत्वात्। तथा देवतान्तरशेषत्वनिवृत्त्यपेयापि सारार्थतया ज्ञातव्यत्वं नमश्शब्दार्थोपपादकभागवतशेषत्वस्यैवाऽवधेयम्। (नानुल्लतुमुन्नडिथारक्कडिमै) इति मया मूलमन्त्रसारार्थतया ज्ञातार्थः तदीयशेषत्वमेवेत्यनुगृहीतत्वात्।

---

१. वृद्ध.हा.सं.३-६५

२. पेरियतिरुमोलि. ८-१०-३

३. हरिवंशे शेषधर्मः

ज्ञातव्यसकलार्थप्रतिपादकत्वन्तु प्राधान्येन विधेयम्। (मट्रेल्लाम् पेशिलम् नानुल्लतुम्) इति - अन्यार्थमनूदित्वात्।

तथापि अनुवाद्यार्थे सत्तानिश्चयाभावे अन्यशेषत्वनिवृत्तिभागवतशेषत्वयोः प्रधानफलत्वसारार्थत्वाऽसिद्धिप्रसङ्गेन, विधेयार्थोपपादकतयैवाऽनुवाद्यार्थे सत्तायामपि तात्पर्यं दृढतरमित्यभिप्रायेण (मट्रेल्लाम् पेशिलुम्, एन्गिरपडियें) इत्यनुगृहीतम्।

(अरियवेण्डुमर्थमेल्लाम्) इति प्राधान्येन मुमुक्षुज्ञातव्यार्थं जातमित्यर्थः। **ओम्** इत्यप्ययं ब्रह्मपरम्। **नमः** इति अखण्डाख्यं नमनक्रियापरम्। **नारायणाय** इति नमश्शब्दयोगात् चतुर्थीति स्थूलप्रकारेण योजनायाम् अर्थपञ्चकसिद्धिः न स्यादिति आशङ्क्य, प्रणवस्याक्षरत्रयात्मकत्वं नमश्शब्दस्य सखण्डत्वञ्च-श्रुतिस्मृत्यादिबहुप्रमाणेषु विवरणात्सिद्धम्। व्यक्तचतुर्थ्याः वृत्तितादर्थ्यपरत्वमपि तथैवेत्यधिकविषयलाभे तत्त्यागो न युक्त इति च तान्त्रिकैः निर्णीतम्। उपपदविभक्तित्वाश्रयणेनविभक्तेः नैरर्थक्यञ्चायुक्तम्। अत एव वाक्यचतुष्टयकल्पनमपि सोढव्यम्। अत एव म् इति प्रथमान्तपदत्रयानुषङ्गः। तुरीयवाक्ये **नमः** शब्दावृत्तिः अस्मि **स्याम्** इति क्रियापदद्वयाध्याहारः, तत्पदद्वयानुषङ्गश्च प्रामाणिकत्वात् न दोष इत्यभिप्रायेण, (इतुक्कुल्ले उण्डु) इत्यनुगृहीतम्। अनेन **सर्वमष्टाक्षरान्तस्थम्** इति प्रमाणं स्मारितम्। अत एव (इति ले उण्डु) इति नानुगृहीतम्। अनन्याधीनरक्षकत्वाभावाऽनन्यार्थभोक्तृत्वाभावपरतया विवक्षितार्थपञ्चकसिद्धेः चलनमाशङ्क्य अरियलाम् इति नाऽनुगृहीतम्।

इत्थं प्रमाणद्वयमुखेन मूलमन्त्रस्य ज्ञातव्यसकलार्थप्रतिपादकत्वरूपं विवक्षितार्थं प्रसाध्य, ज्ञातव्यार्थेषु एकत्वद्वित्वादिसङ्ख्योक्तीनाम् अन्यथा सिद्ध्यभिप्रायेण ज्ञातव्यार्थेषु अर्थञ्चकस्यैव प्राधान्ये प्रमाणतया प्रचयशिष्टपञ्चत्व सङ्ख्यापरं **प्राप्यस्य ब्रह्मणो रूपम्** इत्यादिवचनं स्मारयति द्वितीयसूत्रेण।

## मू।। (२४) अदावतु-अञ्जर्थम्।

(अदावतु) तत् किमित्यर्थः। तत्पदम्-मूलमन्त्रान्तस्थत्वविशिष्टज्ञातव्यार्थजातपरम्। किं शब्दः - क्षेपे। मूलमन्त्रान्तस्थं ज्ञातव्यार्थजातं न सम्भवती-

त्यर्थः। ज्ञातव्यवेदार्थानामनन्तत्वात्, पञ्चत्वसङ्ख्योक्तिवत्, एकत्वादिसङ्ख्या-चतुष्टयोश्चेति भावः। (अञ्जर्थम्) इति प्राधान्येन ज्ञातव्यार्थाः पञ्चैव। एकत्वादि-सङ्ख्योक्तिश्च **न हि स्वाङ्गम्** इति न्यायेनाऽर्थान्तरविशिष्टैकाद्यर्थपरा, अर्थान्तरान्त-र्भावपरा च। प्रचयशिष्टज्ञातव्यार्थव्यक्तिगतपञ्चत्वसङ्ख्यातु पूर्वोक्तन्यायेनन्यूनाधिक-सङ्ख्याव्यवच्छेदिकेति भावः।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे**
**मूलमन्त्रस्यार्थपञ्चकपरत्वसमर्थनं नाम**
**त्रयोदशाधिकरणं सम्पूर्णम्।।**

श्रीमते रामानुजाय नमः

# प्रथमाध्याये प्रथमपादे

# मूलमन्त्रोत्कर्षसमर्थनं नाम

# चतुर्दशाधिकरणम्

## मूलमन्त्रोत्कर्षसमर्थनम्

**मू।। (२५) पूर्वाचार्यर्कल् इदिलर्थमरिवतर्कुमुन्बुतङ्गलैप्पि रन्दार् कलाक निनैत्ति रार् गल्।**

इत्थं, शब्दस्वभावप्रयुक्तं मूलमन्त्रस्य मन्त्रान्तरापेक्षया वैलक्षण्यमुक्तम्। अथ प्रस्तुतार्थपञ्चकोत्कर्षनिबन्धनं तदुच्यते। तत्र संशयः - मूलमन्त्रस्य स्वापेक्षया उत्कृष्ठार्थकत्वलक्षणं मन्त्रान्तरात् वैलक्षण्यं सम्भवति न वेति।

### तत्र पूर्वपक्षः

मूलमन्त्रस्य स्वापेक्षया उत्कृष्टार्थकत्वमयुक्तम्। अर्थबोधनार्थत्वे शब्दस्य तदपेक्षया अर्थस्य उत्कर्षविवक्षायां तादृशोत्कृष्टार्थकत्वस्याऽव्यावर्तकत्वापत्तेः। शब्दैकगम्यार्थसत्तानिश्चयस्य शब्दाधीनतया वैवक्षिकोत्कर्षविवक्षायां तादृशोत्कृष्टार्थकत्वस्य चतुर्थाधिकरणसिद्धत्वेन कृतकरत्वापत्तेः। भगवत्स्वरूपमादायतादृशोत्कृष्टार्थकत्वस्य भगवन्मन्त्रमात्रे सत्त्वाच्च। तादृश यावदर्थकत्वविवक्षायांत्रयोदशाधिकरणेन गतार्थत्वापत्तेः। तस्य शब्दस्वभावकृतवैलक्षण्यरूपत्वेनाथोत्कर्षकृतवैलक्षण्यस्य प्रस्तुतस्यासिद्धिप्रसङ्गाच्च।

न च - स्वार्थज्ञानमात्रस्य सत्तालाभहेतुत्वं विवक्षितम्। मात्रपदेनन्यूनार्थकमन्त्रेषु नातिप्रसङ्गः। अस्य सत्ता हेतुज्ञानविषयत्वलक्षणार्थोत्कर्षनिबन्धनत्वेन च (अरिवतर्कुमुन्बु) इति प्रस्तुतसिद्धिश्चेति वाच्यम्। सत्ताशब्देन आत्मस्वरूपसत्ताविवक्षायाम् आत्मस्वरूपस्य नित्यप्राप्तत्वेन लाभासम्भवात्, विवक्षाया दत्तोत्तरत्वात्, विलक्षणजन्महेतुत्वविवक्षायां दशमाधिकरणे गतार्थत्वापत्तेः। एतेन स्वार्थज्ञानमात्रेण कालक्षेपहेतुत्वंविवक्षितमिति अपास्तम्। क्षुत्पिपासादिशमन-

रूपाऽनिषिद्धप्रवृत्त्या, नित्यनैमित्तिकाद्यनुष्ठानेन च कालक्षेपस्य दरीदृश्यमानत्वात्, [१]**आमोक्षं लक्ष्मणाय** इत्याद्यनुगृहीतरीत्या स्वमतस्थापनपरमतनिरसनार्थप्रवृत्त्या द्रविडोपनिषद्भाष्यश्रवणमननप्रवचनैश्च कालक्षेपस्य दरीदृश्यमानत्वाच्च।

एतेनैव स्वापेक्षयाऽत्यन्ताभिनिवेशेन ज्ञायमानार्थकत्वं मन्त्रान्तरात् वैलक्षण्यमिह विवक्षितमिति निरस्तम्। भगवन्मन्त्राणां सर्वेषामपि अर्थानुसन्धानार्थम् अनुसन्धेयतया निरुक्तवैलक्षण्यस्य मन्त्रान्तरसाधारणत्वम्।

न च -जपहोमादिमुखेन शब्दशक्त्या रक्षणबलेन नार्थाभिनिवेश इति वाच्यम्। **अविदित्वा ऋषिच्छन्दोदैवतं योगमेव च** इत्याद्यनुसारेण जपादेरपि देवताध्यानपूर्वकस्यैव कार्यकरतया, तत्राप्यर्थज्ञानभिनिवेशस्याऽशिष्टत्वात्।

न च - उपासकानामर्थज्ञानाभिनिवेशेनैव मूलमन्त्रस्याऽनुसन्धेयतया स्वापेक्षयाऽत्यन्ताभिनिवेशेन अधिकारिविशेषेण ज्ञायमानार्थकत्वंमूलमन्त्रस्य सम्भवतीति वाच्यम्। अस्य मन्त्रान्तरसाधारण्येन दत्तोत्तरत्वात्।

न च -उपासकानां देवताध्यानवत् जपादेरपि अवश्यकर्तृव्यत्वेन अर्थानुसन्धाने नाभिनिवेश इति वाच्यम्। अस्यार्थस्य मूलमन्त्रेऽपि अविशेषेण प्रस्तुतरिसिद्धिप्रसङ्गात्।

न च-स्वापेक्षयाऽन्यन्ताभिनिवेशेन मुमुक्षुज्ञायमानार्थकत्वं विवक्षितम्। मूलमन्त्रश्चमुमुक्षुभिः अर्थज्ञानार्थमेवाऽनुसन्धीत्वं विवक्षितम्। मूलमन्त्रस्य मुमुक्षुभिः अर्थज्ञानार्थमेवाऽनुसन्धीयतम् इति नोक्त दोष इति वाच्यम्। निरुक्तवैलक्षण्यस्य मोक्षजनकज्ञानविषयार्थकत्वपर्यवसायितया मन्त्रान्तरव्यावर्तत्वेऽपि गतार्थत्वेन पराहतत्वात्। कर्मयोगादिसाधनान्तरनिष्ठानां जपाद्यर्थमेवमूलमन्त्रस्य अनुसन्धेयतया मुमुक्षुणामपि मूलमन्त्रतदर्थानुसन्धानयोः विशेषाभावाच्च।

न च - नाथयामुनयतिवरादिपूर्वाचार्याणां अर्थानुसन्धानार्थमेव मूलमन्त्रस्य अनुसन्धेयतया स्वापेक्षयाऽभिनिवेशेन ज्ञायमानार्थकत्वं मूलमन्त्रस्यैवेति वाच्यम्। साधनान्तरनिष्ठानामपि मुमुक्षुत्वाविशेषेणात्यन्तभिनिवेशेन प्रपन्नज्ञायमानार्थकत्वस्य वैवक्षिकतया परिभाषामात्रत्वात्।

---

१. रामानुजचतुःश्लोकी

अन्यथा - **पशुर्मनुष्यः पक्षी वा** इत्याद्युक्ताऽऽचार्याभिमानाऽन्तर्भूतानां शब्दानुसन्धानस्यापि अनावश्यकत्वेन पुनरुक्तन्यायापत्तेः।

न च - अभिनिवेशेन उत्कृष्टाधिकारिज्ञायमानार्थकत्वं विवक्षितम्। अभिमानान्तर्भूताश्च ज्ञानानुष्ठानहीनतया नोत्कृष्टा इति वाच्यम्। तथापि अष्टमाधिकरणोक्तन्यायेन वाच्यात् वाचकस्यैव उत्कृष्टतयाऽत्यन्ताभिनिवेशेनऽनुसन्धेयत्वापत्तेः, द्वादशाधिकरणन्यायेन प्रपन्नानामपि मूलमन्त्रस्य अनुसन्धेयत्वाच्च साधनान्तरनिष्ठानामपि उत्कृष्टत्वऽविशेषेण केषुचित् कृष्टधिकारिषु शब्दार्थानुसन्धानसाम्येन विनिगमनाविरहाच्च।

न च - **नार्हन्ति शरणस्थस्य** इत्याद्युक्तरीत्या साधनान्तरनिष्ठापेक्षया प्रपन्ना एव उत्कृष्टा इति वाच्यम्। **भजनसुखमेकस्य विपुलम्** इत्यादि रीत्या साधनान्तरनिष्ठानामपि उत्कृष्टत्वेन वैपरीत्यापत्तेः।

न च - साधनान्तरानुष्ठानं भ्रान्तिकृतमेव, तथा च मुमुत्रसामान्यस्य प्रपन्नत्वेन अर्थानुसन्धानार्थमेव मूलमन्त्रानुसन्धानमिति वाच्यम्। तथा सति कर्माद्युपायान्तरसहकारित्वरूपोत्कर्षव्यूत्पादकैकादशाधिकरणविरोधापत्तेः। उपायान्तरनिष्ठस्वप्रयोजनपररूपाऽधिकारिद्वयस्योद्देश्योपायोपेयभेदव्युत्पादकश्रीवचनभूषणमीमांसासूक्तिविरोधापत्तेश्च मुमुक्षूणां सर्वेषां प्रपन्नत्वे प्रपत्तेः भक्तेश्च प्रारब्धनाशतदभावरूपफलभेदस्य भङ्गप्रसङ्गाच्चकैङ्कर्यपर्यन्तानुभवकेवलानुभवरूपप्रतितन्त्रसिद्धान्तसिद्धफलभेदभङ्गप्रसङ्गाच्च।

तस्मात् प्रपन्नेषु स्वगतस्वीकारपरगतस्वीकारूपसाधनभेदवत् स्वार्थपरार्थानुभवकैङ्कर्यरूपफलभेदवच्च [1]**वैकुन्दत्तमररुम् मुनिवरुम् वियन्दनर्** [2]**भक्तैर्भागवतैस्सह** इत्यादि प्रसिद्धानुभवकैङ्कर्यरूपफलभेदशालिनां साधनान्तरनिष्ठत्वतदभावरूपवैलक्षण्यमपि प्रामाणिकमिति तेषामपि उत्कृष्ठाधिकारिकात्वाऽविशेषात्। तेन जपहोमादिमुखेन मूलमन्त्रस्वरूपानुसन्धानस्य देवताध्यानरूपेण तदर्थानुसन्धानस्य चाविशेषाच्च। मूलमन्त्रस्य स्वापेक्षयाऽत्यन्ताभिनिवेशेन उत्कृष्टाधिकारिभिः ज्ञायमानार्थकत्वलक्षणमन्त्रान्तरात् वैलक्षण्यं न सम्भवतीति।

---

१. तिरुवायिमोलि.१० २. वायु.पु.

## सिद्धान्तस्तु

मूलमन्त्रस्य स्वापेक्षया उत्कृष्टार्थकत्वं युक्तमेव। अर्थपञ्चकरूपस्वार्थज्ञानमात्रस्य सत्तालाभहेतुत्वेन **अर्थस्य स्वापेक्षया** उत्कृष्टत्वात्।

न चैवं चतुर्थदशमाधिकरणाभ्यां गतार्थता। मूलमन्त्रार्थज्ञाने मोक्षहेतुत्वस्य विलक्षणजन्महेतुत्वस्य तदुभयाधिकरणव्युत्पाद्यत्वात्, इह च मोक्षहेतुज्ञानलाभरूपविलक्षणजन्मान्वयव्यतिरेकानुविधायिन्याः [1]**असन्नेव स भवति** [2]**अन्रुनान् पिरन्दिलेन्** इत्यादि प्रसिद्धायाः [3]**दासभूतास्स्वतस्सर्वे** इति वचने [4]**स्वोज्जीवनेच्छा यदि ते स्वसत्तायां स्पृहा यदि** इति वचनेन च - भूतपदेन, सत्तापदेन च मोक्षापेक्षया पृथङ्निर्दिष्टायाः भगवत्प्रियतमत्वरूपायाः [5]**प्रियतम एव हि वरणीयो भवति** इति श्रीभाष्यसूक्त्यनुगृहीतायाः सत्तायाः लाभहेतुत्वस्य व्युत्पाद्यत्वाच्च।

एवं स्वार्थज्ञानमात्रेण कालक्षेपहेतुत्वमपि मन्त्रान्तराद्वैलक्षण्यमिति युक्तं वक्तुम्। [6]**देहधारणं परमात्मसमाराधानसमाप्तिप्रसादप्रतिपत्ति येनिगरबुद्धिविशेषमुम्** इति श्रीवचनभूषणमीमांसासूक्त्यनुगृहीतरीत्या क्षुत्पिपासादिशमनरूपाऽनिषिद्धप्रवृत्तेः मूलमन्त्रार्थज्ञानजनिताऽनुष्ठानरूपत्वात्, अन्यथा तस्य अनन्यभोगत्वस्वरूपविरुद्धतया निषिद्धत्वापत्तेः, नित्यनैमित्तिकाद्यनुष्ठानस्यापि केवलाज्ञाकैङ्कर्यरूपत्वात्, स्वमतस्थापनपरमतनिरसनार्थप्रवृत्तेः नमश्शब्दार्थानुसन्धानजनितविरोधिनिवर्तनरूपत्वात्, उभयवेदान्तप्रवचनस्यापि [7]**पठित्वाभाष्यंतत्प्रवचनम्** इत्याद्याऽनुज्ञाकैङ्कर्यरूपत्वाच्च। यद्यपि सत्तालाभार्थं मन्त्रार्थानुसन्धानम्, तेनैव कालक्षेपञ्चेत्येतद्द्वयमपि न लोकप्रसिद्धम्। तथापि नाथयामुनयतिवरादिपूर्वाचार्येषु प्रसिद्धमेवेति नाऽननुष्ठानपराहतत्वदोषः। अत एव **यन्मुहूर्तं क्षणं वापि, वरं हुतवहज्वाला, वासुदेवे मनो यस्य** [8]**पिरन्दपिन् मरन्दिलेन्**, [9]**मरप्पनो विनियानेन् मणियैये** इत्यादि प्रमाणजातमुपपद्यते।

इत्थं स्वापेक्षयाऽत्यन्ताभिनिवेशेन ज्ञायमानार्थकत्वं मन्त्रान्तरात् वैलक्षण्यमित्यपियुक्तम्।

---

१. तै.उ.आ.६-१ २. तिरुच्छन्दविरुत्तम् ३. रामा.यु.का.
४. रामा.यु.का. ५. श्रीभाष्ये जिज्ञासाधिकरणे ६. श्री.व.भू.
७. भाष्यकारमुक्तकं ८. तिरुच्छन्दविरुत्तम्-६४ ९. तिरुवायिमोलि १-१०-१०

न च - मन्त्रान्तराणाम् अर्थानुसन्धानार्थत्वेनाऽनुसन्धेयतया तत्साधारण्यम्। उपासकानांदेवताध्यानवत्, जपहोमादिमुखेन शब्दशक्त्या रक्षणस्थले अर्थानुसन्धानाभिनिवेशाभावात्।

न च - तत्रापि देवताध्यानार्थं तदावश्यकमिति वाच्यम्। मन्त्राणामुच्चारणमात्रेण पापक्षयार्थत्वस्य काम्यफलार्थत्वस्य चाऽविगीतत्वात्। न चैवं वृद्धिमिच्छतः इति न्यायापातः। स्वापेक्षयाऽभिनिवेशेन अधिकारिविशेषेण ज्ञायमानार्थकत्वस्य विवक्षितत्वात्, उपासकानामर्थानुसन्धानाभिनिवेशेनैव मूलमन्त्रस्य अनुसन्धेयत्वात्।

न चैवं, मन्त्रान्तरसाधारण्यम् उपासकानां देवताध्यानवत् जपादेः अपि अवश्यकर्तव्यत्वेन अर्थज्ञानेनाभिनिवेश इत्युक्तौ प्रस्तुताऽसिद्धिप्रसङ्गमिति वाच्यम्। स्वापेक्षयाऽभिनिवेशेन मुमुक्षुज्ञायमानार्थस्य विवक्षितत्वात्।

न चैवं, गतार्थतापत्तिः। मुमुक्षुज्ञायमानपदेन मोक्षार्थं ज्ञायमानत्वस्य अविवक्षितत्वात्। मुमुक्षूणां सिद्धोपायनिष्ठतया स्वयंप्रयोजनभगवत्प्रसादार्थमेव मूलमन्त्रार्थस्याऽनुसन्धेयतया तेषां जपहोमादिमुखेन मन्त्रस्वरूपानुसन्धानमनपेक्षितमिति विवक्षितत्वात्।

न च-कर्मयोगादि साधनान्तरनिष्ठानां जपाद्यर्थमेव मूलमन्त्रस्याऽनुसन आधेयतया मुमुक्षूणां मूलमन्त्रतदर्थानुसन्धानयोः न विशेष इति वाच्यम्। नाथयामुनयतिवरादिपूर्वाचार्याणाम् अर्थानुसन्धानार्थमेव मुलमन्त्रस्य अनुसन्धेयत्वात्। तेषाम् अन्योन्योपायत्वेन उच्चारणमात्रेण पापक्षयाद्यर्थं जपादिद्वारकोपासनमुखेन काम्यफलार्थं वा मूलमन्त्रस्वरूपस्याऽननुसन्धेयत्वात्। अनन्योपायत्वेन मोक्षार्थमपि तदभावाच्च।

न च-साधनान्तरनिष्ठानामपि मुमुक्षुत्वमस्त्येव। प्रपन्नज्ञायमानार्थकत्वविवक्षातु परिभाषामात्रम्। अन्यथा आचार्याभिमाननिष्ठानां शब्दानुसन्धानस्येवाऽर्थानुसन्धानस्यापि अनावश्यकत्वेन पुनरुक्तन्यायापत्तिरिति वाच्यम्। स्वापेक्षया अभिनिवेशेन उत्कृष्टाधिकारि ज्ञायमानार्थकत्वस्य विवक्षितत्वात्। मन्त्रानुसन्धानस्यार्थानुसन्धानार्थत्वविचारावसरे अभिमाननिष्ठोदाहरणस्याऽस्थानविजृम्भितत्वाच्च।

न च - अष्टमाधिकरणन्यायेन वाच्याद्वाचकेऽपि अनुसन्धानाभिनिवेशः सम्भवतीति वाच्यम्।

तत्र विग्रहावच्छिन्नभगवत्स्वरूपात्मकवाच्यापेक्षया रक्षणांश एव वाचकस्योत्कर्षसाधनेन अर्थपञ्चकरूपवाच्यापेक्षयानुऽनुसन्धानांशेमूलमन्त्रस्याभिनिवेशाऽसिद्धेः। अर्थपञ्चकानुसन्धानार्थमेव मूलमन्त्रस्य अनुसन्धेयत्वात्।

न च - द्वादशाधिकरणन्यायेन प्रपन्नानामपि स्वरूपेण मूलमन्त्रो अनुसन्धेय इति वाच्यम्। [1]**पुण्डरीकाक्षानामसङ्कीर्तनामृतम्** [2]**भक्तामृतम्** [3]**भाष्यामृतम्** [4]**पाराशर्यवचस्सुधाम्** इत्यादिवत् अर्थभोग्यतानिबन्धनभोग्यतयैव तत्र मूलमन्त्रस्यानुसन्धेत्वोक्तेः।

न च - साधनान्तरनिषानामप्युत्कृष्टत्वाऽविशेषेण विनिगमनाविरहः। साधनान्तरानुष्ठानस्य भ्रान्तिमूलकत्वेन तेषामपि अपकृष्टत्वात्। न चैवमेकादशाधिकरणविरोधः। भ्रान्तिमूलकसाधनान्तरसहकारित्वस्यैव तत्र व्युत्पादनात्। न च अतत्वज्ञानां मोक्षाभावेन साधनान्तरत्वव्याघातः। अनादिस्वयत्नस्वभोगवासनया प्रथमं भ्रान्त्या प्रवृत्तानां [5]**नेहाभिक्रमनाशोऽस्ति** इत्याद्युक्तरीत्या कर्मयोगाद्यनुष्ठाननिर्मलीकृतमनस्कानां सत्वविवृद्ध्या तत्त्वज्ञानोदयेन कर्ममोहादौ साधनत्वभ्रमस्य प्रवृत्त्युद्देश्यफलभोक्तृत्वभ्रमस्य च निवृत्तिसम्भवात्।

न चैवमपि प्रपन्नत्वे फलभेदो न स्यादिति वाच्यम्। प्रथममेव मूलमन्त्रेण स्वरूपयाथात्म्यज्ञानपूर्वकं मन्त्ररत्नचरमश्लोकार्थानुसन्धानेन साधनान्तरपरित्यागपूर्वकं उत्तरवाक्यप्रतिपन्नकैङ्कर्याभिरुच्या पुरुषकारवरणपूर्वकं सिद्धोपायस्वीकारभावेन तत्त्वज्ञानदशायां भगवदेकोपायत्वाध्यवसाये सत्यपि **कर्मम् कैङ्कर्यत्तिलेपुगुम्** इत्याद्यनुगृहीतरीत्या प्रारब्धकर्मयोगाद्यनुवृत्तिसद्भावेन च साधनान्तरनिष्ठानां कर्मयोगादेरेव मुक्तिव्याजतया फलभेदोपपत्तेः।

[6]**इवल् यैधर्ममेन्गिरतु भ्रमित्तवर्जुनन् करुत्ताले, वेदपुरुषन् उपायान्तरङ्गलैविधित्ततु ओरुफलत्तुक्करियवलियैयुम् एलियवलियैयुम्** इत्यादि

१.गा.पु.२२०-१६ २. तिरुवायिमोलि तनियन् ३,४. श्रीभाष्यम्
५. भ.गी.२-४० ६. मुमुक्षुप्पडि - चरमश्लोके

निष्कर्षकरहस्यत्रयमीमांसारसूक्तिषु [1]**वेदान्तङ्गल् इवल् यै उपाय मार्गविधिक्किर-पडि येत्रेत्रिल्** इत्यादिनिष्कर्षकश्रीवचनभूषणमीमांसूक्तिषु च साधनान्तरमेव नास्तीति सिद्धान्तितत्वेन (उपायान्तरनिष्ठर्क्कु उद्देश्यन्) इत्यादि सूक्तौ (स्वप्रयोजन-परर्क्कु) उद्देश्यन् इत्यादि सूक्तौ च नैयायिकस्य वायुरप्रत्यक्षः [2]**यस्यामतं तस्य मतम्** इत्यादाविव मतत्वद्वारकः सम्बन्धः षष्ठ्यर्थ इति वक्तव्यत्वेन तत्सूक्ति-विरोधाभावाच्च।

एतेन प्रापकान्तरमज्ञर्क्कु उपायं ज्ञानिकलुक्कु अपायम् इत्यादि सूक्तिः व्याख्याता। प्रपत्तिव्याजव्यतिरिक्तव्याजरूपं कर्मयोगादिकमज्ञैः अदृष्टद्वारकमोक्ष-करणरूपोपायत्वेन ज्ञायते। ज्ञानिभिस्तु तादृशोपायत्वेनऽज्ञायमानं तद्रक्षणप्रवृत्ति-विरोधित्वेन निषिद्धरूपाऽपायत्वेन ज्ञायत इत्यर्थः। अत एव श्रीमद्द्रमिडोप-निषद्द्वितीयशतकतृतीयदशकतुरीयगाथाभाष्यसूक्तौ कलिजिज्जगदाचार्यैः अनुगृहीतम्। (आत्मसमर्पणं पण्णाविडिल् सर्वमुक्तिप्रसङ्गमाम्, पण्णिल् अवनतै अवनुक्कु-क्कोडुत्तताम्, आकिल् शेय् व तेत्रित्रिल्। भ्रान्तिदशैयिल् समर्पिक्कवुम् वेणुम्, तेलिन्ददशैयिल् समर्पिक्कवुम् वेणुम्, तेलिन्ददशैयिल् अनुशयिक्कवुम् वेणुम्) [3]**अहमद्यैव मया समर्पितः** (एन्रुवैत्तु) अथवा किं नु समर्पयामि ते (एन्नारिरे) इति।

यद्यपि [4]**एनताावियुल् कलन्दु** इत्यादिसूक्तौ सर्वेश्वरविषये प्रत्युपकारश्रद्धा-जाड्यकृतप्रपदनमेव विवक्षितम्। न तु -(अकलकिल्लेत्) इत्यादाविव सर्वमुक्ति-प्रसङ्गपरिहारार्थं प्रपदनम्। तदेकोपायत्वोध्यवसायरूपप्रपदनवत् स्वीयस्य परकीय-त्वापादनरूपात्मसमर्पणात्मकप्रपदनस्य तत्त्वज्ञानरूपत्वाभावात्। अतत्वज्ञा-नान्मोक्षानुपपत्तेश्च। तथापि प्रत्युपकाररूपात्मसमर्पणस्य स्वीयत्वांशे भ्रान्तिरूपस्यापि जीवगतदेहातिरिक्तत्वाद्यंशे जीवपरमात्मनोः शेषशेषिभावांशे च तत्त्वज्ञानरूपत्वेन मुक्तिव्याजत्वस्य तदंशे सम्भवात् नोक्तदोषः।

सर्वांशे तत्त्वज्ञानरूपस्यापि प्रपदनस्याऽदृष्टद्वारकमोक्षसाधनत्वानभ्यु-पगमात्, अतो भ्रान्तिरूपमपि आत्मसमर्पणं मुक्तिव्याजत्वेन कर्तव्यमेव इत्यभिप्रायेण अनुगृहीतम् **आत्मसमर्पणं पण्णाविडिल्** इति। इष्टापत्तिमाशङ्क्य अनुगृहीतम्

१.श्री.व.भू. २. केनो.उ.२-३ ३. स्तो.र.५२ ४. तिरुवायिमोलि २-३-४

(पण्णिल्) इति। स्वीयस्य परकीयत्वापादनस्यैव समर्पणशब्दमुख्यार्थत्वेन भ्रान्तित्वे प्रत्युपकाररूपसमर्पणस्वरूपसिद्धिरेव **न** स्यादिति भावः। इत्थं शङ्काबीजमुक्त्वा **परिहारं वक्तुं** शङ्कामुत्थापयति (आकिल्) इति। भ्रान्तिरूपात्मसमर्पणं कर्तव्य-मित्येतदभ्युपगमेन परिहरति (भ्रान्तिदशैयिल्) इति। तदेव समर्पणस्वरूपासिद्धिं परिहरति (तेलिन्ददशैयिल्) इति। [1]**नेहाभिक्रमनाशोऽस्ति** इत्याद्युक्तरीत्या भ्रान्तिरूपस्यापि समर्पणस्य तत्तद्ज्ञानांशमादाय सर्वांशे तत्त्वज्ञानपर्यवसयित्वात्, सर्वांशे तत्त्वज्ञानं विना मुक्त्यसम्भवाच्चेति भावः। (अनुशयिक्कवुं वेणुम्) इति **सर्वांशे** तत्त्वज्ञानघटितसामग्रीसद्भावात्।

किञ्चिदंशेप्यतत्त्वज्ञानाभावेन भ्रान्तिरूपाऽपराधपरिहारस्याऽनुशये सत्येव-सम्भवात्। सर्वापराधक्षये सत्येव मोक्षसम्भवाच्च, अनुतापरूपानुशय आवश्यक इति भावः। भ्रान्तिरूपसमर्पणानुशययोः परमाचार्यसूक्तिरूपश्लोकद्वयं संवादत्वेन दर्शयति [2]**अहमद्यैव** इत्यादिना।

यद्यपि, भ्रान्तिरूपसमर्पणस्य मोक्षार्थतयासमर्पणविधायकशास्त्रार्थत्वाऽ-सम्भवात् समर्पणशास्त्रं न स्वीयस्य तदीयताज्ञानरूपमुख्यार्थपरम्। अपि तु परकीयस्य वस्तुनः परकीयत्वेनाऽज्ञातस्य परकीयताज्ञानपरमित्येवं समर्पणशास्त्र-व्याख्यानरूपमिदं श्लोकद्वयमिति वक्तुं युक्तम्। तथापि [3]**एनताावियुल् कलन्दु** इत्यादिसूक्तेः भ्रान्तितत्कृतानुशयपरत्वावश्यम्भावात्। आचार्यसूक्तिषु दिव्यसूरिसूक्ति अर्थानुसन्धानस्य प्रायिकत्वात्। **अहं समर्पितः** [4]**किं नु समर्पयामि** इति विहितस्यैव निषेध्यत्वप्रतीतिविरोधाच्च। प्रत्युपकारश्रद्धाजाड्यकृतभ्रान्तिरूपात्मसमर्पणतत्कृता-नुशयपरमेव श्लोकद्वयमिति कलिजिज्जगदाचार्याणामभिप्रायोऽनुसन्धेयः।

**ज्ञानविपाककार्यमाण** इत्याद्यनुगृहीतरीत्या भक्तिकृतभ्रान्तेः अतिशयावह-त्वात्। अन्यथा **अहं समर्पितः** इति समर्पितशब्दस्य **त्वदीयोऽहंत्वदीयत्वेन ज्ञातः** इत्यर्थे लक्षणापत्तेः। **प्रबुद्धधीः** इत्युत्तरत्रप्रबोधोक्त्यनुपपत्तेश्च। **किं नु समर्पयामि** इति स्वीयस्य तदीयत्वाऽपादनरूपमुख्यार्थनिषेधानन्वयाच्च। [5]**अकल-किल्लेनिरैयुम्** इति वत्। [6]**न धर्मनिष्ठोऽस्मि** इत्यादिना सर्वांशे तत्त्वज्ञान-

१.भ.गी.२-४०  २. स्तो.र.५२  ३. तिरुवायिमोलि २-३-४
४. स्तो.र.५३  ५. तिरुवायिमोलि ६-१०-१०  ६. स्तो.र.२२

रूपप्रपदनस्य कृतत्वाच्च। इत्थं प्रत्युपकाररूपप्रपदनस्य भ्रान्तिरूपस्यापि प्रबोधांशमादाय मुक्तिन्याजत्ववत् प्रपत्त्युपायत्वभ्रमपूर्वकप्रपदनस्य प्रबोधदशामादाय मुक्तिव्याजत्वं सम्भवति। तथैव साधनताभ्रमपूर्वककर्माद्यनुष्ठानस्यापि मुक्तिव्याजत्वं सम्भवतीत्यभिप्रायेण [1]**मल्लैड्रुमनुग्रहत्तुक्किलक्कु** इति श्रीकृष्णपादलोकायार्यैः श्रीवचनभूषणमीमांसायाम् अनुगृहीतम्।

अत एव च [2]**प्रपत्त्युपायत्तुक्कु** इक्कुल् लन्नालोन्रुमिल्लै इति श्रीवचनभूषणमीमांसासूक्तेः (उपायम्-कर्म, ज्ञानम्, भक्तिप्रपत्ती, आचार्याभिमानम्, एन्नञ्जु) इत्यर्थपञ्चकसूक्तेश्च इवल् लैधर्मम् एन्निरतु इत्यादिभिः (व्योमातीतवादम् शोल्लुवारैप्पोले) इत्यादि द्रमिडोपनिषद्भाष्योपात्त श्रीमद्वेदान्तमुनिसूक्त्याश्च न विरोधः।

**तस्मात् प्रथममेव** प्रपत्तिव्याजनिष्ठानां तत्त्वज्ञानदशायां कर्मयोगादिव्याजनिष्ठानञ्च, प्रामाणिकयोः प्रारब्धनाशतदभावरूपफलयोः कैङ्कर्यकेवलानुभवरूपफलयोश्च प्रमाणबलेन व्यवस्थासम्भवेऽपि कर्मयोगादि चतुष्टये अदृष्टद्वारकमोक्षकरणत्वस्य स्वार्थकैङ्कर्यफलत्वस्य च नमश्शब्दादि निषिद्धत्वेनाप्रामाणिकतया मुमुक्षूणां सर्वेषां तत्त्वज्ञानदशामारभ्य, अभ्रान्तत्वेऽपि, प्रथममेव स्वरूपयाथात्म्यज्ञानेन प्रपत्तिव्याजनिष्ठानां पूर्वाचार्याणां **सत्कर्मनिरताः शुद्धाः** इत्याद्युक्तरीत्या प्रथमं साधनान्तरनिष्ठाऽपेक्षया उत्कृष्टतमत्वात् [3]**अगाधभगवद्भक्तिसिन्धवे** इत्याद्युक्तरीत्या स्वयंप्रयोजनभक्तिनिष्ठत्वेन **भजनसुखमेकस्य विपुलम्** इत्युक्तार्थहानिप्रयुक्तनिकर्षशङ्कायाः अपि अभावाच्च। तेषामर्थानुसन्धानार्थतयैवमन्त्रानुसन्धानस्य वक्तव्यतया सार्वकालिकाऽर्थानुसन्धानानुसारेण उत्कृष्टाधिकारिभिः शब्दस्वरूपापेक्षया अभिनिवेशेन ज्ञायमानार्थकत्वलक्षणमूलमन्त्रस्य मन्त्रान्तरात् वैलक्षण्यं सम्भवत्येवेति।

अस्मिंश्चाधिकरणे (पूर्वाचार्यर्कल्) इत्यादिप्रथमसूत्रम्।

तत्र ज्ञानाधिक्यप्रपन्नेष्वेव सिद्धान्तन्यायप्रवृत्तिः इत्याभिप्रायेण (पूर्वाचार्यर्कल्) इत्युक्तम्। उक्तसिद्धान्तन्यायानां मन्त्राधीनज्ञानवद्विषयत्वात्, उत्तमाधिकारिविषयत्वाच्च। (इति लर्थम्) मूलमन्त्रस्थमर्थपञ्चकमित्यर्थः। (अरिवतर्कु मुन्बु)

---

१. श्री.व.भू.    २. श्री.व.भू.    ३. स्तो.र.१

ज्ञानात्पूर्वमित्यर्थः। (तङ्गलै) अर्थपञ्चकेऽपि विपरीतज्ञानशालिनः स्वानित्यर्थः (पिरन्दार् कलाग निनैत्ति रार्कल्) सत्तालाभहेतुत्वेन उत्कृष्टज्ञानलाभरूपजन्मशालिन इति ज्ञात्वा न तिष्ठन्तीत्यर्थः।

**जन्माभावः - स्वात्मसाक्षिकः** इति सूचनाय (पिरक्कवातवर्गल्) इति नाप्नुगृहीतम्। अन्वयव्यतिरेकानुविधानसूचनाय (इतिलर्थमरिन्दाल् पिरिन्दार् कलाकनिनैत्तिरूप्पार् कल्) इत्यनुक्तिः (पिरन्दार् कलाक) इत्यनेन सत्तालाभहेतुज्ञानवानेवजातः। अन्यस्तु जातोऽपि मृत एवेति सूच्यते। प्रतियोगितयाऽपि जन्मज्ञानं नास्तीति सूचयितुम् (अन्रुनान् पिरन्द्रिलेन्) इतिवदनुक्त्या जन्मज्ञानं नास्तीत्युक्तम्। जन्मज्ञानवत्तया क्षणमपि न तिष्ठन्तीति सूचनाय (निनैत्तिरार्कल्) इत्यनुगृहीतम्। अत्र च (अन्नुनान् पिरन्दिलेन्) इत्यादिप्रमाणमाभिप्रेतम्।

एवं सत्तालाभहेतुज्ञानविषयत्वरूपार्थोत्कर्षः उक्तः। अथ मुख्यप्रमाणोक्तिपूर्वकं कालक्षेपहेतुज्ञानविषयत्वरूपार्थोत्कर्षमाह - (इतिलित्यादि) द्वितीयसूत्रेण-

**मू।। (२६) इतिलर्थज्ञानं पिरन्दपिन् [1]पिरन्दपिन् मरन्दिलेन् एङ्गिरपडिये इत्तैयोलियवेरोन्राल् कालक्षेपम् पण्णियरियार्कल्**

**मू।। (२७) वाचकत्तिर्कोट्टिल् वाच्यत्तिले ऊन्रुकैक्कडि ईश्वरने उपायोपेयम् एन्रुनिनैत्तिरुक्कै।**

(इतिलर्थज्ञानम् पिरन्दपिम्बु) मूलमन्त्रस्थार्थपञ्चकज्ञानोत्पत्त्यनन्तरमित्यर्थः। श्रीभक्तिसारमुनिसूक्तिं प्रमाणयति - (पिरन्दपिन् मरन्दिलेन् एन्गिरपडिये) इति। (पिरन्दपिन् मरन्दिलेन्) ज्ञानलाभरूपजन्मानन्तरं भक्तिपारवश्यात् न विस्मरामीत्यर्थः। (एन्गिरपडिये) इत्यनुगृहीतप्रकारेणेत्यर्थः। ज्ञानाधिक्यप्रपन्ननिष्ठायां भक्तिपारवश्यप्रपन्ननिष्ठा प्रमाणीकृता, भक्तिपारवश्यप्रपन्नेषु मन्त्राधीनज्ञानवत्त्वाभावेन एतदधिकरणपूर्वपक्षसिद्धान्तयोः अप्रवृत्तेः। मन्त्रार्थानुसन्धानान्तर्भावेनैव अन्यमुखेन कालक्षेप इति सूचयितुम् (इत्तैयोलिय) इत्यनुगृहीतम्। इति लर्थज्ञानत्तैयोलियवित्यर्थः। ज्ञायमानार्थकमन्त्रं विनेतिवेत्यर्थः। (वेरोन्दाल्) क्षुप्तिसादिशमनेन, नित्यनैमित्तिकाद्यनुष्ठानेन, उभयवेदान्तप्रवचनेनेत्यर्थः। (कालक्षेपम्) जीवकाल-

१. तिरुच्चन्दविरुत्तम्.६४

यापनमित्यर्थः। (पण्णार्कल्) इत्यनुक्त्वा (पण्णियरियार् कल्) इत्युक्त्वा, अनुष्ठेयार्थज्ञानमेव नास्ति, कुतोऽनुष्ठानमिति सूच्यते।

अथ-उत्कृष्टाधिकारिषु मूलमन्त्रतदर्थानुसन्धानयोः शेषशेषिभावरूपं मन्त्रान्तरात् वैलक्षण्यमाह - (वाचकत्तिलित्यादि) तृतीयसूत्रेण।

(वाचकत्तिकाट्टिल्) वाचकापेक्षयेत्यर्थः। शब्दशक्त्या सर्वफलप्रदत्वरूपं शङ्काबीजं सूचयितुं (तिरुमन्त्रत्तिल्) इत्यनुक्त्वा, (वाचकत्तिल्) इत्युक्तम्। किञ्च वाच्याद्वाचकोत्कर्षमुक्त्वा, वाचकाद्वाच्योत्कर्षोक्तिर्वहतेत्यपि शङ्काबीजं सूच्यते। **रक्षणांशे सन्निधानाऽसन्निधानाभ्यां वाच्याद्वाचकोत्कर्षः पूर्वमुक्तः।** अनुसन्धानांशे शेषशेषिभावेन वाचकाद्वाच्योत्कर्ष इदानीमुच्यते इति परिहाराभिप्रायः। (वाच्यत्तिले) शेषित्वशरण्यत्वप्राप्यत्वाकारत्रययुक्ततया मूलमन्त्रबोध्ये भगवत्स्वरूप इत्यर्थः। (ऊन्नुकैक्कडि) जपहोमादिमुखेन मूलमन्त्राऽनुसन्धानं विहाय, उक्तरीत्या सार्वकालिक भगवत्स्वरूपानुसन्धाने अभिनिवेशस्य कारणमित्यर्थः। (ऊन्नुकैक्कडि-निनैत्तिरुक्कै) इत्यन्वयः।

(निनैत्तु) इति पदोक्तानुसन्धानमभिनीय दर्शयति (ईश्वरने उपायोपेयमेन्नु) इति। (ईश्वरन्) इत्यनेन सर्वप्रवर्तकत्वात् तस्यैवोपायोपेयभावो युक्त इति सूच्यते। अवधारणेकर्मज्ञानभक्तिप्रपत्त्याचार्याभिमानानां व्याजत्वमेवेति सूच्यते। एवं पुरुषकार-गुणविग्रहविभूतीनाम् अनुभाव्यत्वेऽपि भगवत्प्रियत्वेनाऽनुभाव्यत्वम्, न तस्वत इत्यपि अवधारणार्थोऽनुसन्धेयः।

उपेयांशेऽपि अवधारणान्वयात्। (उपायोपेयम्) इत्यत्र उपायशब्दः - भगवत्प्रसादरूपाऽदृष्टद्वारकमोक्षकरणपरः। उपेयशब्दः - अनुभवकैङ्कर्यार्थसमीप-गमनकर्मपरः। (एन्नु निनैत्तिरुक्कै) इति दृढाध्यवसाय इत्यर्थः। (निनैक्कै) इत्यनुक्त्वा (निनैत्तिरुक्कै) इत्यनुगृहीतत्वात् मन्त्रशेषस्थपदद्वयार्थनिष्ठैवमन्त्ररत्न-वर्धिता चरमश्लोकविसृम्भिता त्रिवर्गार्थम्, अपवर्गार्थं वा जपहोमादिमुखेन मूलमन्त्र-स्वरूपानुसन्धानत्यागे कारणम् । सकलकल्याणगुणगर्भत्वेन उपायोपेय भावरूप-मूलमन्त्र प्रधानार्थस्य स्वयं भोग्यतया सदा मुलमन्त्रार्थानुसन्धाने च कारणमिति भावः।

तस्मात् मूलमन्त्रस्य त्रेधा स्वापेक्षया उत्कृष्टार्थकत्वलक्षणं मन्त्रान्तरात् वैलक्षण्यम् अर्थात्सिद्धमिति।

**।।इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये प्रथमपादे मूलमन्त्रोत्कर्षसमर्थनं नाम चतुर्दशाधिकरणं सम्पूर्णम्।।**

### प्रथमाध्यायस्य प्रथमपादस्य श्लोकरूपसारः

पादेऽत्राध्येऽधिकरणे चतुर्भिस्साधितानयैः।
अधिकार्यादिसद्भावैः शास्त्रस्याऽरम्भणीयता।। १।।
द्वितीये तु त्रिभिर्न्यायैरुपबृम्हणताक्रमात्।
सर्वोत्कृष्टत्वसामान्यं तृतीये त्रिभिरीरितम्।। २।।
चतुर्थे द्वादशनयैर्मोक्षार्थ ज्ञानहेतुता।
पञ्चमे तेषु दशमोन्याय आक्षिप्य साधितः।। ३।।
न्यायाभ्यामुपदेशस्य प्राबल्यं षष्ठ ईरितम्।
प्रधानैर्द्वादशन्यायैर्मन्त्रश्रैष्ठ्यन्तु सप्तमे।। ४।।
न्यायाभ्यामष्टमे वाच्याद्वाचकोत्कर्ष ईरितः।
अक्रमोक्तेऽपि नवमे त्रिधा रक्षणमीरितम्।। ५।।
सर्वार्थदो द्विधा मन्त्रो न्यायाभ्या दशमोदितः।
द्विधा कर्मादि साह्यन्तु त्रिभिरेकादशोदितम्।। ६।।
द्वादशे पञ्चभिर्द्वेधा प्रपत्त्यर्थत्वमीरितम्।
त्रयोदशे प्रधानार्थं कृत्स्नो बोध्यस्त्रिभिर्मतः।। ७।।
चतुर्दशे त्रिभिर्मन्त्रादर्थोत्कर्षस्समीरितः।
द्वादशाधिकरण्येषा मन्त्रवैभवपेटिका।। ८।।

**।। इति श्रीमत्कुशिककुलतिलकस्य श्रीशुद्धसत्त्वगुरुचरणतनूजरत्नस्य तत्प्रसादलब्धसकलविद्यावैशद्यस्य रामानुजदासस्य कृतौ रहस्यत्रयमीमांसाभाष्ये प्रथमाध्यायस्य प्रथमादः समाप्तः।।**

❀ ❀ ❀ ❀

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे

# मूलमन्त्रवाक्यार्थसमर्थनं नाम

## प्रथमाधिकरणम्

**मू।। (२८) इतुतन्निल् शोल्लुकिरवर्थम् स्वरूपमुम् स्वरूपानुरूपमान प्राप्यमुम्।**

प्रथमे पादे करिष्यमाणमूलमन्त्रव्याख्यानोपाद्घाततया मूलमन्त्रे परिचिक्षिषा सिद्ध्यर्थं मूलमन्त्रस्य प्रभावः प्रपञ्चितः। अथ मूलमन्त्रः त्रिपाद्यां व्याख्यायते। तत्र द्वितीयपादे प्रणवो व्याख्यायते। तदुपोद्घाततया च प्रथमधिकरणत्रयमारभ्यते। तत्र प्रथमेऽधिकरणे –

**पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।**
**आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्।।**

इत्युक्तरीत्या वाक्ययोजनामुखेन मूलमन्त्रो व्याख्यायते।

यद्यपि पदार्थज्ञानमेव वाक्यार्थज्ञानहेतुः। तथापि पदजन्यपदोर्थोपस्थितेः शाब्दबोधहेतुत्वेऽपि वाक्यार्थस्य दुर्निरूपत्वज्ञाने पदार्थनिरूपणे प्रेक्षावतां प्रवृत्त्यसम्भवात् वाक्यार्थनिरूपणं पदार्थनिरूपणे हेतुरेवेति युक्तमुपोद्घातम्। न हि - **दशदाडिमानि** इत्यादि महाभाष्योदाहृतश्लोकोऽनन्वितार्थक इति जानतः परीक्षकस्य मुख्यार्थनुपपत्त्याऽन्वय प्रतियोग्यर्थविचारे प्रवृत्तिरस्ति।

यद्यपि च मूलमन्त्रस्य वाक्यार्थे दुर्निरूपत्वनिरासः। मूलमन्त्रस्थसर्वपदार्थ-निरूपणेषूपयुज्यते। तथापि सर्वोपोद्घातस्य प्रणवार्थनिरूपणोपोद्घातत्वमप्यस्तीति सर्वार्थं प्रणवार्थपाद एव अस्याधिकरणस्य निवेशो युक्तः।

### तत्र संशयः

मूलमन्त्रस्य वाक्यार्थो दुर्निरूपः। उत सुनिरूप इति।

## तत्र पूर्वपक्षः

मूलमन्त्रस्य वाक्यार्थो दुर्निरूप एव। **अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चे-द्विभागे स्यात्** इति पूर्वमीमांसासूत्रे एकप्रयोजनकत्वे सति विभागे साकाङ्क्षत्वस्य एकवाक्यलक्षणतया उक्तत्वेन तत्र एकप्रयोजनकत्वस्य एकेष्टसाधनतावच्छेद-काऽवच्छिन्नशाब्दज्ञानजनकत्वरूपत्वेन, तस्य **घटमानय, येन जलमाहर्ताऽस्मि** इत्यादाविव विशिष्टैकार्थप्रतिपादकतयैव वक्तव्यत्वेन मूलमन्त्रस्थपदार्थानाम् एकशाब्दज्ञाननिष्ठैकेष्टसाधनताऽवच्छेदकघटविषयताकाऽन्वय प्रतियोगित्वा-ऽसम्भवेन च मूलमन्त्रस्य वाक्यत्वस्यैवाऽभावेन वाक्यार्थस्य सुदुरूपास्तत्वात्।

अथ स्यान्मूलमन्त्रस्य, स्वरूपं स्वरूपानुरूपं प्राप्यञ्च वाक्यार्थः। मूलमन्त्रे प्रथमद्वितीयपदार्थभूतस्य स्वरूपस्य तृतीयपदार्थभूतस्य प्राप्यस्य च परस्परानु-रूपत्वलक्षणवैशिष्ट्यसद्भावेन मूलमन्त्रस्य स्वरूपप्राप्यरूपार्थद्वयमादाय विशिष्टै-कार्थप्रतिपादकत्वसम्भवात्। नचैवमपि प्रथमद्वितीयपदार्थयोः मिथोऽनन्वयः। अनेककारकान्वितैकक्रियापदस्थलेमिथोऽनन्वितार्थकानामपि कारकपदानां क्रियापदेन एकवाक्यत्ववत्, मूलमन्त्रस्य प्रथमद्वितीयपदयोः तृतीयपदेन एकवाक्य-त्वोपपत्तेरिति।

मैवम्। स्वरूपशब्देन जीवात्मविवक्षायां **नारायणाय स्याम्** इत्यस्यापि स्वरूपप्रतिपादकतया, प्राप्यशब्देन परमात्मविवक्षायाम् अकारस्यापि प्राप्यप्रतिपाद-कतया च **स्वरूपं प्रथमद्वितीयपदार्थः। प्राप्य तृतीयपदार्थः**। इति व्यवस्थाऽ-नुपपत्तेः। अयनशब्दस्य प्राप्यत्वेन प्राप्यप्रतिपादकत्ववत् **अव रक्षणगतिहिंसादिषु** इति धातुपाठानुसारेण अकारस्यापि तत्सम्भवाच्च। स्वरूपशब्देन कण्ठोक्तजीवरूप-विवक्षायां तस्य मकारमादाय प्रथमपदे सम्भवेऽपि द्वितीयपदे असम्भवात्।

षष्ठ्यन्तपदे विशेषणतया कण्ठोक्तिविवक्षायां, नारपदमादाय तृतीपदेऽपि तत्प्रसङ्गात्, स्वरूपानुरूपप्राप्यप्रतिपादनार्थं पदद्वयेन स्वरूपोक्तिवैफल्याच्च।

प्राप्ये स्वरूपाऽऽनुरूप्यस्य दुर्वचत्वाच्च। पित्रपुत्रादेरिव सादृश्यस्य बाधितत्वात्। **ब्राह्मणस्वरूपानुरूपं वेदाध्ययनादिकम्** इत्यादाविव बलवदनिष्ठाऽ-ननुबन्धीष्ठसाधनत्वविवक्षायां व्युत्पत्तिविरोधेन तस्य वाक्यर्थत्वाऽसम्भवात्। न

हि **ब्राह्मणकम्बलः** इत्यादौ ब्राह्मणसमीपवर्तित्वादेरिव निरुक्तानुरूप्यस्य क्वापि वाक्यार्थविधयाऽनुभवपथानारोहे कस्यापि विमतिरस्ति।

किञ्च निरुक्तवैशिष्ट्येन प्रथमद्वितीयपदार्थविशिष्टतृतीयपदार्थविषयकशाब्दज्ञानत्वस्य एकेष्टसाधनतावच्छेदकत्वेन मानाभावेन नोक्तवैशिष्ट्यमादाय विशिष्टैकार्थ प्रतिपादकत्वं मूलमन्त्रस्योपपद्यते। इष्टत्वेन ज्ञातेष्टसाधनताज्ञानमात्रस्य प्रयोजनपर्यवसायितया क्वापि कदापि कस्यापि प्रमाणपथाऽनारूढत्वात्।

अपि च कृत्यनन्तरभविष्यत्वरूपप्राप्यवत्तयाज्ञातस्यैवेष्टसाधनताज्ञानं प्रयोजनपर्यवसायीति प्राप्यत्वेन अयनपदोपात्तस्यापि सिद्धवस्तुनः ज्ञानं न प्रयोजनपर्यवसायीति न तस्य वाक्यार्थत्वमुपपद्यते। न च सिद्धोपसञ्जकं किञ्चित्साध्यं श्रूयते।

अन्यच्च **स्वरूपं प्राप्यञ्च वाक्यार्थः** इत्ययुक्तम्। समन्वयाधिकरणन्यायेन पुरुषार्थतत्साधनयोरिव वाक्यार्थत्वात्, प्राप्यमात्रस्वरूपज्ञानस्य चाऽतथात्वात्।

एतेन स्वरूपोपायफलरूपं पदत्रयप्रतिपाद्यं वाक्यार्थं इति परास्तम्। स्वरूपपदेन जीवात्मविवक्षायां तृतीयपदे अतिप्रसङ्गात्। नमः पदस्य सखण्डस्य स्वसम्बन्धनिषेधपरतया च तत्र उपायस्य शक्त्या लक्षणया व्यञ्जनया वा प्रत्येतुमशक्यत्वाच्च। श्रुत्यर्थापत्त्यभावेन लक्षणाया असम्भवाच्च। श्रुत्यर्थापत्त्यभावेन व्यञ्जनायाः असम्भवाच्च। करणव्युत्पन्नायनपदेन उपायस्य कण्ठोक्ततया मध्यमपदबोध्यत्वोक्त्यसम्भवग्रस्तत्वाच्च।

फलपदेनापि स्वरूपेण साध्यविवक्षायां तृतीयपदे तत्प्रतीतिगन्धाऽभावात्। अयनपदार्थस्य किञ्चिदुपरक्तस्य साध्यत्वसम्भवेऽपि तदुपरञ्जकाऽनुपादानेन तस्य फलत्वे तात्पर्यासम्भवाच्च। **नारायणाय स्याम्** इति स्वरूपस्यैव साध्यत्वप्रतीत्या नारायणस्योद्देश्यत्वेनाऽऽकारेण **फलमपिहेतुः** इति शाब्दिकोक्तरीत्या **अध्ययनेन वसति** इत्यादौ अध्ययनादेरिव साधनत्वेनैवऽन्वयस्य वक्तव्यत्वाच्च। फलपदेन केवलसाध्यविवक्षायां पुरुषार्थपर्यवसानाऽभावप्रसङ्गाच्च।

इष्टरूपसाध्यविवक्षायाम् इष्टत्वेन प्रतीतस्य साधनत्वेनैव अन्वयस्य प्रकृते वक्तव्यतया साध्यत्वालाभप्रसङ्गाच्च। स्वरूपोपाययोः वैशिष्ट्याऽसम्भवेन स्वरूपविशिष्टोपायस्य वाक्यार्थत्वाऽसम्भवाच्च। फलोपाययोः साध्यसाधनभावरूपैकेष्ट-

साधनतावच्छेदकाऽवच्छिन्नज्ञानविषयतावच्छेदकवैशिष्ट्यस्यसत्त्वेन फलविशिष्टोपायस्य वाक्यार्थत्वसम्भवेऽपि फलस्वरूपयोः तादृशवैशिष्ट्याभावेन स्वरूपस्य **उपायान्वयं विना स्वातन्त्र्येण फलान्वयमासाद्यवाक्यार्थवर्णनाऽसम्भवाच्च।** स्वरूपोपाययोः अनुरूपत्वं **न फलेऽनन्वयः** इत्युक्तप्रायम्।

पदोपस्थितपदार्थयोरेव मिथोऽन्वयप्रतियोगितया फलोपायवाचिपदाभावेन स्वरूपोपाययोः फलोपायाभ्याम् अन्वयाऽसम्भवाच्च। नमश्शब्दव्यङ्ग्यत्वेनाऽभिमतस्य उपायस्य भगवत्स्वरूपात्मकस्य निरपेक्षोपायत्वे सर्वमुक्तिप्रसङ्गेन सापेक्षत्वे निर्हेतुकत्वसिद्धान्तप्रसङ्गेन च फलोपाययोः विशिष्टयोः वाक्यार्थत्वाऽसम्भवाच्च। **आवृत्तिप्रसङ्गेन तात्पर्यग्राहकाभावेन च वाक्यार्थद्वयवर्णनाऽसम्भवाच्च।**

तृतीयपदव्यङ्ग्यकैङ्कर्यस्य फलत्वासम्भवाच्च। सुखस्यैव स्वतइष्टत्वेन फलपदमुख्यार्थत्वात्। अस्मत्सिद्धान्ते ज्ञानस्यैव सुखरूपत्वाच्च। अनुगृहीतञ्च भगवता भाष्यकारेण **अनुकूलविषयज्ञानमेव हि आनन्दः इत्युच्यते** इति। तस्मान्मूलमन्त्रस्य वाक्यार्थो दुर्निरूप इति।

## सिद्धान्तस्तु

**मूलमन्त्रस्य** वाक्यार्थः सुनिरूप एव। एकेष्टसाधनतावच्छेदकाऽवच्छिन्नशाब्दज्ञानजनकत्वरूपैकप्रयोजनकत्वमादाय एकवाक्यत्वस्य **घटमानय, येन जलमाहर्ताऽस्मि** इत्यादौ वाक्यत्वे मूलमन्त्रस्थपदार्थानामेकशब्दज्ञाननिष्ठैकेष्टसाधनतावच्छेदकघटकविषयताकाऽन्वयप्रतियोगित्वसम्भवेन मूलमन्त्रस्य एकवाक्यतावाक्यार्थस्य सूपपादत्वात्।

तथा हि मूलमन्त्रस्य स्वरूपम्, स्वरूपानुरूपं प्राप्यञ्च वाक्यार्थः। मूलमन्त्रौ प्रथमद्वितीयपदार्थभूतस्य स्वरूपस्य तृतीयपदार्थभूतस्य प्राप्यस्य च परस्परानुरूपत्वलक्षणवैशिष्ट्यसद्भावेन मूलमन्त्रस्य स्वरूपप्राप्यरूपार्थद्वयमादाय विशिष्टैकार्थप्रतिपादकत्वसम्भवात्।

न चैवं प्रथमद्वितीयपदयोः मिथोऽनन्वयः, तयोः तृतीयपदेनैव एकवाक्यत्वसम्भवात्। प्रथमद्वितीयपदयोः वक्ष्यमाणरीत्या विवरणविवरणिभावेन एकवाक्यत्वोपपत्तेश्च।

**न च स्वरूपशब्देन** विशिष्टैकार्थप्रतिपादकजीवात्मविवक्षायां तृतीय-पदेऽतिप्रसङ्गः। स्वपदस्य आत्मीयपरत्वाश्रयणेन **स्वञ्च तत् रूपञ्च स्वरूपम्** इति व्युत्पत्त्यास्वरूपशब्दस्य शेषत्वपारतन्त्र्यरूपयावदात्मभाव्याकारपरतया तस्यानतिप्रसङ्गात्।

**न च** - लुप्तव्यक्तचतुर्थ्योः तादर्थ्यपरतयाऽनुशासनाऽविशेषेण कथं नापि प्रसङ्ग इति वाच्यम्। **अहमपि न मम, भगवत एवाहमस्मि** इत्यादि श्रुत्यनुसारेण प्रणवस्य सिद्धवन्निर्देशतया तत्र च नित्यवच्छ्रवणबाधपरिहाराय अकारवाच्य - भगवत्प्रतीच्छाजन्यकृत्यर्हत्वलक्षणस्वरूपतादर्थपरतया, तृतीयपदस्य पौनरुक्त्यपरि-हाराय **नारायणाय स्याम्** इत्येवं भगवत्प्रतीच्छाजन्यप्रवृत्तिलक्षणकैङ्कर्य-फलोपाधानप्रार्थनामुखेन वृत्तितादर्थ्यपरतया च तृतीयपदस्य यावदात्मभाव्याकाररूप-स्वरूपपरत्वशङ्काऽनवकाशात्।

न चैवं **रहस्यत्रयं क्रमेण स्वरूपोपायपुरुषार्थपरम्** इति सिद्धान्त-व्याकोपः। तत्र स्वरूपपदस्य अनन्यार्हशेषत्वाऽनन्यशरणत्वाऽनन्य भोगत्वज्ञानानन्द-स्वरूपत्वज्ञानानन्दमयत्वाणुत्वादिविशिष्टजीवात्मस्वरूपपरतया तादृशस्वरूप-विशेष्यकशाब्दबोधजनकत्वरूपतत्परत्वस्य मूलमन्त्रे कात्स्न्येन सम्भवात्। अन्यत्राऽ-सम्भवाच्च।

न च प्राप्यप्रतिपादकत्वस्य प्रथमपदेऽतिप्रसङ्गः। भगवतः किञ्चिदुपर-क्तस्यैव अयनपदवाच्यप्राप्यत्वस्य वक्तव्यतया **नारायणाय स्याम्** इत्यत्र साध्यवन्नि-र्दिष्टस्य जीवात्मनो नारायणप्रीतीच्छाजन्यप्रवृत्तिविष्यत्वलक्षणतादर्थ्यघटकप्रवृत्ति-लक्षणकैङ्कर्य विशिष्टवेषेण साध्यत्वमादाय भगवतः प्राप्यत्वस्य तादृश-कैङ्कर्यप्रतिसम्बन्धित्वेन उपपादनीयतया च व्यञ्जनया स्वरूपेण प्राप्यभूतकैङ्कर्य-परत्वस्य नारायणपद एव सम्भवात्।

**अव-रक्षणे** इति धातुपाठप्रसिद्ध्यनुसारेण रक्षणबोधकस्य प्राप्यपरत्वे मानाभावेन, प्रणवस्य **भगवत एवाहमस्मि** इति सिद्धवन्निर्देशरूपतया तादृश-कैङ्कर्यस्वरूपयोग्यतापरस्य व्यञ्जनया स्वरूपेण प्राप्यभूतकैङ्कर्यफलोपधानलम्भ-कत्वाभावेन च प्राप्यपरत्वासम्भवाच्च। अदृष्टद्वारकस्वरक्षणे स्वान्वयानर्हत्वरूपस्य

प्रवृत्त्युद्देश्यस्वभोगानर्हत्वरूपस्य च पारतन्त्र्यस्य स्वरूपशब्दार्थस्य नमश्शब्द-विवक्षिततया, षष्ठ्यन्तमकाकारेण नारशब्देन च जीवस्वरूपकण्ठोक्तेः अप्रयोजनकत्वाच्च। **भगवत्प्रीत्यर्थप्रवृत्तियोग्योऽहं, तथैव स्याम्** इत्येवं तृतीयपदोक्तकैङ्कर्यनायां प्रणवस्य शेषत्वरूपहेतुपरतया **अन्यशेषत्वापेक्षयाऽतिक्रूरभूतस्वशेषत्वाऽयोग्योऽहं स्वशेषत्वरहितस्स्याम्** इत्येवं नारायणनिरुपाधिकरक्षकत्वस्योक्ततया, नमश्शब्देन स्वरक्षणानर्हत्वस्योक्ततया च, भगवत एव स्वरक्षणे प्रवृत्त्युद्देश्य फलाश्रयत्वस्य वक्तव्यतया स्वरक्षणे स्वान्वयाऽनर्होऽहं भगवत एव स्याम्। इत्येवम् अनुषक्तनमश्शब्दान्विततृतीयपदार्थभूताया भगवत्प्रीतिमात्रोद्देश्यकैङ्कर्यरूप-निष्कृष्टप्राप्यप्रार्थनायां नमश्शब्दस्य साधनपारतन्त्र्यरूपहेतुपरतया च प्रणवनमश्शब्दाभ्यां स्वरूपद्वयोपादानस्य प्रयोजनवत्तरत्वात्, नान्यतरोपादनवैफल्य-शङ्कावकाशः।

न च-प्राप्ये स्वरूपानुरूपत्वं दुर्वचनम्। भगवत्प्रीतिमात्रोद्देश्यकप्रवृत्तियोग्यता लक्षणानन्यार्हशेषत्वस्य नित्यस्य स्वरूपयोग्यस्येत्यादि व्याप्त्यनुरोधेन तादृश-प्रवृत्तिफलोपधानव्याप्ततया व्याप्यव्यापकयोः एकाधिकरणवृत्तित्वरूपसादृश्य शालितया सादृश्यस्यैवाऽत्र अनुरूपशब्देन विवक्षितत्वात्। न च अनुरूप्यस्य वाक्यर्थतया भानं व्युत्पत्तिविरुद्धम्। पदैकवाक्यतास्थले पदार्थद्वयसंसर्गस्य सांसर्गिकविषयताऽपेक्षनेऽपि वाक्यैकवाक्यतास्थले अवान्तरवाक्यार्थतया संसर्गस्य स्वरूपत एव महावाक्यतानिर्वाहकत्वेन लोकसिद्धतया शाब्दबोधे सांसर्गिक विषयत्वनपेक्षणात्। न हि **धूमवानयं पर्वतः** इत्यत्र पदार्थयोः अभेदसंसर्गस्येव **धूमवानयं पर्वतः तत्र पर्वते वह्निरस्ति** इति वाक्यार्थयोः ज्ञाप्यज्ञापकभाव-रूपसंसर्गस्य वाक्यैकवाक्यतानिर्वाहकस्य शाब्दबोधे संसर्गविधया भानमस्ति।

इत्थञ्च-प्रकृतेऽपि **अनन्यार्हशेषत्वादनन्यशरणत्वाच्च भगवद्भोग-मात्रोद्देशेन प्रवर्ते** इत्याभिप्रायेण प्रवृत्तस्य महावाक्यस्य स्वरूपद्वयं वस्तुतः तदनुरूपं प्राप्यञ्च वाक्यार्थएवेति सिद्धम्।

न च निरुक्तानुरूप्यलक्षणवैशिष्ट्येन प्रथमद्वितीयपदार्थविशिष्टतृतीय-पदार्थविशिष्टशाब्दज्ञानत्वस्य एकेष्टसाधनतावच्छेदकत्वे मानाभावः। येनोक्त-

वैशिष्ट्यमादाय मूलमन्त्रस्य विशिष्टैकार्थप्रतिपादकत्वं न स्यात्। मूलमन्त्रेण भगवत्प्रीतिमात्रोद्देश्यकप्रवृत्तिरूपफलोपधाने शेषत्वपारतन्त्र्यरूपलिङ्गद्वयविशिष्ट-प्रार्थनायोग्यतारूपसाध्यवैशिष्ट्यं जानतः प्रवृत्त्या भगवत्प्रीतिरूपेष्टसाधनताज्ञानपूर्वकं **भगवत्प्रतीच्छायाः तद्धेतुभूतकैङ्कर्यप्रार्थनायाः** स्वभोगार्थप्रवृत्तिनिवृत्तीच्छायाः भगवत्प्रवृत्तिप्रतिबन्धक स्वरक्षणान्वयनिवृत्तेः भगवत्प्रीत्युद्देशेन कैङ्कर्यप्रवृत्तेश्च आनुभाविकतया निरुक्तशाब्दज्ञानस्य शेषत्वरूपयोग्यताज्ञानपारतन्त्र्यरूपयोग्यता-ज्ञानपरार्थप्रवृत्तिस्वार्थप्रवृत्तिनिवृत्तिप्रार्थनायोग्यताज्ञानपूर्वकभगवत्प्रीतितद्धेतु-प्रवृत्तीच्छामुखेन परार्थप्रवृत्तिस्वार्थप्रवृत्तिनिवृत्त्योः सम्पादकतया निरुक्तवैशिष्ट्येन निरुक्तशाब्दज्ञानस्य एकेष्टसाधनतावच्छेदकावच्छिन्नत्वात्, योग्यताज्ञानस्य इष्ट-साधनताज्ञानरूपत्वात्, अयोग्यताज्ञानस्याऽनिष्टसाधनताज्ञानपर्यवसायित्वाच्च।

एतेन-इष्टत्वेन इष्टज्ञानं न प्रवर्तकमिति निरस्तम्। अकारवाच्यनिरुपाधिक-रक्षक भगवत्सुखार्थव्यापारविषयत्वस्यैव प्रणवपर्यवसन्नार्थतया इष्टसाधकता-वच्छेदकरूपेण उपस्थितेष्टसाधनताज्ञानसत्वात्। अत एव अनिष्टत्वेनानिष्टज्ञानं न निवर्तकम्। अपि तु अनिष्टतावच्छेदकरूपेण तज्ज्ञानमिति तान्त्रिकैः अङ्गीकारेऽपि न प्रकृतार्थसिद्धिविरोधः। स्वभोगार्थप्रवृत्त्यनर्हत्वस्वरक्षणप्रवृत्त्यनर्हत्वरूप-पारतन्त्र्यद्वयज्ञानस्य निरुपाधिकरक्षकभगवत्प्रीतिकरत्वज्ञानपर्यवसायितया तादृश-प्रवृत्तिनिवृत्तिप्रार्थनायाः तादृशनिवृत्तेश्च मन्त्रजन्यज्ञानेन सुलभत्वात्। निवृत्तिहेतुभूत-स्याऽनिष्टतावच्छेदकरूपेणोपस्थिताऽनिष्टसाधनताज्ञानस्य सत्त्वात्। इत्थं फलसाधनविषयतया द्विविधायाः प्रवृत्तेः तथा भूताया निवृत्तेश्च सामग्रीचतुष्टय-सद्भावशेषत्वद्विविधपारतन्त्र्यरूपषड्विधतात्पर्यलिङ्गान्तर्गतोपनिषत्युपन्यासमुखेन प्रवृत्तिनिवृत्तिप्रार्थनाद्वयोक्त्या दृढीकृतत्वाच्च।

न च अयनपदेन प्राप्यत्वेनोपात्तस्य सिद्धवस्तुनः स्वरूपेणाऽसाध्यत्वात्, स्वरूपेण साध्यज्ञानस्यैव प्रयोजनपर्यवसायित्वात्, अन्यस्य स्वरूपेण साध्यस्या-ऽनुपादानाच्च, नाऽत्र प्राप्यं वाक्यार्थ इति वाच्यम्। **नारायणाय** इति चतुर्थ्यास्ता-दर्थ्यवाचितया तदतिशयेच्छासाध्यव्यापारविषयत्वस्यैव तादर्थ्यशब्दार्थतया च **नारायणाय स्याम्** इत्युक्तमव्यङ्ग्यात्मन एव व्यापारविशिष्टवेषेण साध्यतया,

जीवात्मसाध्यत्वोपपादकतयाव्यक्तचतुर्थ्यन्तपदक्रियापदयोः समभिव्याहारव्यङ्ग्यस्य केवलपरार्थकैङ्कर्यस्य स्वरूपेण साध्यस्य वाक्यार्थत्वसम्भवात्।

एतेन समन्वयाधिकरणविरोधात् केवलस्वरूपं केवलप्राप्यञ्च न वाक्यार्थः इत्यपास्तम्। निरुपाधिकरक्षकभगवत्प्रीत्यर्थव्यापारस्य स्वरूपयोग्यताप्रतियोगितया प्रणवेन सर्वविधबन्धुभगवत्प्रीत्यर्थव्यापारस्यफलोपधानप्रतियोगितया, तृतीयपदेन च लाभेन भगवत्प्रीतिकैङ्कर्ययोः पुरुषार्थतत्साधनयोः प्रतिपादनात्। **नासाधितं करणम्** इति न्यायेन कैङ्कर्यस्य स्वरूपेण साध्यत्वलाभाय प्राप्यं वाक्यार्थ इत्युक्तिसम्भवाच्च।

इत्थं स्वरूपोपायफलरूपं पदत्रयप्रतिपाद्यं वाक्यार्थ इत्युक्तिसम्भवाच्च युक्तम्। स्वरूपशब्देन स्वार्थकैङ्कर्यनिवृत्तिपरार्थकैङ्कर्यप्रवृत्तिहेतुज्ञानविषयप्रणव-प्रतिपाद्यऽनन्यार्हशेषत्वस्य सिद्धवन्निर्दिष्टस्य स्वरूपयोग्यतारूपस्य स्वरूपतादर्थ्यस्य विवक्षिततया तृतीयपदेऽनतिप्रसङ्गात्, नमश्शब्दस्य नमनक्रियावाचित्वेऽपि सखण्डस्य स्वसम्बन्धमात्रनिषेधपरतया, अकारोक्तरक्षकत्वसम्बन्धस्य विषेध्यसम्बन्धरूपतया च, नमश्शब्देन स्वरक्षणे स्वान्वयनिषेधे सति भगवदुपायत्वस्याऽर्थात् लाभ-सम्भवाच्च, जीवपरमात्मनोः उभयोरपि रक्षणान्वयाभावे तृतीयपदोपात्तफलस्य आकस्मिकत्वप्रसङ्गेन श्रुतार्थापत्तिसत्त्वात्, **उपाये गृहरक्षित्रोः** इति प्रथमनिर्देशेन रक्षकत्वस्यचेतनैकान्तस्य, चरमकारणत्वरूपकरणत्वात्मकोपायत्वस्य च भिन्नभिन्नत्वेन अकारेण भगवतो रक्षकत्वसिद्धावपि नमश्शब्देन भगवदुपायत्वस्य आर्थिकसिद्धिसम्भवाच्च।

करणव्युत्पन्नाऽयनशब्देन उपायत्वसिद्धावपि सिद्धस्वरूपस्य भगवतश्चरम-कारणत्वेऽतिप्रसङ्गेन उपरञ्जकापेक्षायां मकारोपात्ताऽऽत्मस्वरूपयाथात्म्य-ज्ञानकार्यस्य भगवद्रक्षणप्रवृत्तिविरोधिस्वरक्षणाऽऽन्वयनिवृत्तेरेव नमश्शब्दोपात्तायाः सिद्धसाध्यसमभिव्याहारन्यायेन तृतीयपदोक्तफलोपरञ्जकत्वेन वक्तव्यतया नम-श्शब्देनैव उपायत्वस्यार्थात् सिद्धिरिति वक्तुं युक्तत्वाच्च।

नमश्शब्दस्य स्वभोगार्थप्रवृत्त्यनर्हत्वलक्षणपारतन्त्र्यपरत्वे अवधारणार्थ-कद्वितीयाक्षरेण गतप्रायत्वापत्त्या करणोवरञ्जकस्वरक्षणान्वयनिषेधफलो-

पधानव्याप्यतदयोग्यतालक्षणशक्तिविशेषपरतयैवाऽनन्यथासिद्धार्थकत्वस्य वक्तव्यत्वाच्च फलपदेन स्वरूपेण साध्यविवक्षायामपि **नारायणाय स्याम्** इत्यनेन जीवात्मन एव साध्यत्वप्रतीत्या विरोधगन्धाभावाच्च। **नारायणाय स्याम्** इति जीवगतसाध्यत्वरूपश्रुतार्थापत्तिसिद्धपरोद्देशप्रवृत्तिरूपतादर्थ्यचतुर्थीसिद्धकैङ्कर्य-प्रतिसम्बन्धित्वेन अयनपदार्थस्य फलत्वे तात्पर्यसम्भवाच्च।

नारायणपदार्थस्य **स्याम्** इत्युक्त साध्यान्वयार्थमुद्देश्यत्वेन साधनत्वा-न्वयावश्यम्भावेऽपि, कैङ्कर्यप्रतिसम्बन्धित्वेन साध्यत्वस्य वास्तवस्य सम्भवाच्च। **स्याम्** इति पदसमभिव्याहारसिद्धकैङ्कर्यप्रतिसम्बन्धित्वेनाऽर्थसाध्यत्वस्य चतुर्थ्यतादर्थ्यघटकत्वेन शब्दत इष्टत्वस्य च सिद्धिसम्बवेन नारायणपदार्थस्य स्यामित्युक्तसाध्ये उद्देश्यतया साधनत्वेनाऽन्वयेऽपि तस्येष्टरूपसाध्यपरत्वसम्भवेन केवलसाध्यपरत्वनिबन्धनपुरुषार्थापर्यवसानाऽप्रसङ्गाच्च।

स्वरक्षणाऽन्वयानर्हत्वपरनमश्शब्दबलादेव स्वरक्षणान्वयस्य भगव-दनिष्टत्वसिद्ध्या नमश्शब्दार्थस्य स्वफलीभूतस्वरक्षणान्वयनिवृत्तिमुखेन भगव-त्प्रीतिमात्रोद्देश्यकप्रवृत्त्यर्हत्वलक्षणस्वरूपोपादकत्वेन नमश्शब्दार्थोपरकतोपायस्य स्वरूपोपपादकत्वलक्षणवैशिष्ट्यसिद्ध्या तेन सम्बन्धेन तद्विशिष्टोपायज्ञानस्य केवलपरार्थप्रवृत्तिरूपैकेष्टसाधनतावच्छेदकाविच्छिन्नत्वेन तादृशवैशिष्ट्यस्य विशिष्टैकार्थप्रतिपादकत्वलक्षणोक्तवाक्यत्वोपपादकत्वसिद्ध्या च स्वरूपविशिष्टो-पायस्य वाक्यार्थत्वसम्भवाच्च।

इत्थं साध्यानिर्देशात्मकतृतीयपदव्यङ्ग्यकेवलपरार्थं कैङ्कर्यफलोपधान-हेतुतया फलस्वरूपयोः एकवाक्यार्थताप्रयोजकवैशिष्ट्यसद्भावेन स्वरूपस्योपा-यान्वयमन्तरेण स्वातन्त्र्येण फलान्वयमासाद्य वाक्यार्थवर्णनसम्भवाच्च। व्याप्यस्य यद्यदधिकरणं तत्तदधिकरणतत्त्वमेव व्यापकस्य व्याप्यसादृश्यं, तदेव तस्य तदानुरूप्यञ्चं इति पूर्वमेवोक्तम्। न च फलोपाययोः पदवाच्यत्वाभावात् ताभ्यां स्वरूपाऽऽनन्वयः। अनन्यार्हशेषत्वरूपस्वरूपस्यापि वाक्यार्थत्वेनाऽपदार्थतयाऽन्व-यानपेक्षणात्। महावाक्यता प्रयोजकसांसर्गिकविषयतारहितवैशिष्ट्यस्य

हेतुहेतुमद्भावरूपस्य उपायोपरञ्जकनमश्शब्दप्रतिपाद्यस्वरक्षणान्वयनिवृत्तौ तृतीयपदार्थभूतजीवात्मस्वरूपे च केवलपरार्थकैङ्कर्यरूपफलोपरक्ते शेषत्वात्मकस्वरूपस्य सम्भवेन स्वरूपविशिष्टयोः फलोपाययोः महावाक्यार्थत्वसम्भवात्।

न च-प्रकृतोपायस्य निरपेक्षत्वेन सर्वमुक्तिप्रसङ्गेन, सापेक्षत्वे एव सिद्धान्तप्रसङ्गेन च न फलावच्छिन्नोपायो वाक्यार्थः, इति वाच्यम्। नमश्शब्दार्थफलीभूतस्वरक्षणान्वयनिवृत्त्युपरक्तोपायस्य फलान्वयेऽतिप्रसङ्गाभावात्। अदृष्टद्वारकफलसाधनानुष्ठानस्यैव नमश्शब्दार्थफलतया अपसिद्धान्तप्रसङ्गाभावाच्च।

न चैवं भक्तिप्रपत्त्यनपेक्षाप्रसङ्गः। भक्तिप्रपत्त्योः तत्वज्ञानादिरूपत्वेन दृष्टविधया मोक्षकारणत्वस्य अन्यत्र प्रपञ्चितत्वेन भूतभव्यसमुच्चारणन्यायेन तृतीयपदव्यङ्ग्यफलकारणीभूततृतीयाक्षरोपात्तज्ञानरूपत्वात्। न च भक्तिप्रपत्त्योः प्रसादहेतुत्वावश्यम्भावेन मोक्षस्य नियतपूर्ववृत्तित्वेन च अदृष्टद्वारकसाधनत्वापत्तिः।

तयोः स्वयंप्रयोजनभगवत्प्रीतिहेतुत्वेऽपि सर्वपापेभ्यो मोक्षयिष्यामि इति सङ्कल्पहेतुप्रीतिजनकत्वाभावेनाऽदृष्टद्वारकत्वाभावात्।

न चैवं भक्तिप्रपत्तिभ्यामेव मोक्षसिद्धौ, सिद्धोपायस्य अन्यथासिद्ध्यापातः। स्वर्गहेतुशरीरान्तरासम्भवात्, मोक्षहेतुभूतार्चिरादिगतिवच्च, भक्तिप्रपत्त्योः द्वारफलत्वेन मोक्षवदेव उपायलक्ष्यस्य प्रमाणबलेनाभ्युपगन्तव्यतया अन्यथा सिद्धिशङ्काऽनवकाशात्।

न च-द्वारफलेऽपि उपायस्य सापेक्षत्वनिरपेक्षत्वविकल्पापत्तिः। उत्तरोत्तरद्वारफलानां पूर्वपूर्वस्वरक्षणान्वयाभावोपरक्त सिद्धोपायफलत्वाभ्युपगमात्, अद्वेषादीनां केवलपरार्थकैङ्कर्यपयन्तानां नमश्शब्दार्थफलीभूतसिद्धोपायोपरञ्जक - स्वरक्षणान्वयनिवृत्तिरूपत्वस्य, तृतीयपदव्यङ्ग्यफलरूपत्वस्य च इष्टं हि विदुषाम् इति न्यायेन प्रमेयशेखराख्यप्रबन्धे निष्कृष्टोपदेशमुखेनाऽर्चिरादिनामकप्रबन्धे प्रमाणोपपत्तिसम्प्रदाय प्रदर्शनमुखेन च प्रपञ्चितत्वात्। अनुगृहीतञ्च वेदान्ताचार्यैः तल्लब्धस्वावकाशप्रथममुरुकृपागृह्यमाणः कदाचिन्मुक्तैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित् इति।

न च मूलमन्त्रस्य योजनाद्वयाङ्गीकारे आवृत्तिप्रसङ्गः। सैन्धवादिपदेषु अश्वलवणाद्यनेकार्थपरत्वे अश्वत्वलवणत्वादि प्रकारकोपस्थितिद्वयार्थपदोपस्थिति-द्वयरूपाऽऽवृत्ति प्रसङ्गवत् स्वयंप्रयोजनकेवलभगवत्प्रीतिरूपेष्टसाधनकैङ्कर्यपरत्वे केवलपरार्थकैङ्कर्यरूपेष्टसाधनस्वरूपानुरूपस्वरक्षणान्वयनिवृत्त्युपरक्तसिद्धोपायपरत्वे च मूलमन्त्रस्याऽकारादिपदषट्के कस्यापि पदस्य भिन्नप्रकारकोपस्थितिजनकत्व-निबन्धनावृत्तिप्रसङ्गगन्धाभावात्।

इयांस्तु विशेषः। स्वरूपप्राप्यपरत्वे स्वरूपद्वयं योग्यतारूपं शाब्दम्, तद्घटकीभूतं भगवत्प्रीतिरूपं तत्फलं व्यङ्ग्यम्। केवलपरार्थकैङ्कर्यरूपं साधनमपि व्यङ्ग्यम्। स्वरूपेण साध्यञ्च। स्वरूपोपायफलपरत्वे तु, स्वरूपं शाब्दं, किञ्चिदुपरक्तसिद्धस्वरूपं करणम्। तत्र स्वरक्षणान्वयनिवृत्तिरूपसिद्धोपायोपरञ्जकं स्वरक्षणान्वयानर्हत्वरूपस्वरूपोक्त्या व्यङ्ग्यं फलम्। अद्वेषादिद्वारा परार्थकैङ्कर्यरूपं व्यङ्ग्यमिति। आवृत्तिप्रसङ्गाभावादेव सैन्धवादिष्विव न तात्पर्यग्राहकापेक्षा। विनिगमनाविरहेण योग्यतासहकृतशब्दस्यैव योजनाद्वयतात्पर्यग्राहकत्वात्।

तस्मात् मूलमन्त्रस्य वाक्यार्थः सुनिरूप इति। इदञ्चाधिकरणं त्रिसूत्र्या-त्मकम्। तत्रेदमाद्यं सूत्रम्। (इतुतन्निलित्यादि) (इतुतन्निल्) अस्मिंस्त्वित्यर्थः। इदं शब्देन मूलमन्त्रः परामृश्यते। (तन्निल्) इत्यनेन स्वशब्दपर्यायेण असाधारण-स्वरूपपरामर्शिना अस्मिंस्तु इति लभ्यते। तेनाऽन्यत्र शेषत्वपारतन्त्र्यलक्षणस्वरूपं तदनुगुणकेवलपरार्थकैङ्कर्यञ्च न क्वापि मन्त्रे प्रतिपाद्यत इति अर्थः सिद्ध्यति। तथा च पूर्वपादान्त्यधिकरणे स्वापेक्षयाऽतिशयितार्थकत्वलक्षणमन्त्रान्तरवैलक्षण्य-मुक्तम्। अत्रातिशयितवाक्यार्थमुखेन तदुच्यत इति सङ्गतिः सूचिता। (शोल्लुकिर) प्रतिपाद्यमित्यर्थः। (इतिल् शोल्लुकिर) इति समुदायरूपेण मूलमन्त्रं परामृश्य तत्प्रतिपाद्यत्वमहिम्ना अर्थशब्दः वाक्यार्थपर इति गम्यते।

यद्यपि शेषत्वपारतन्त्र्यलक्षणस्वरूपद्वयस्य शब्दतः प्रतिपाद्यत्वेऽपि, परार्थकैङ्कर्यरूपं प्राप्यं न शब्दतः प्रतिपाद्यम्। **नारायणाय स्याम्, मः न स्याम्** इति तृतीयचतुर्थवाक्याभ्यां परार्थकैङ्कर्यप्रार्थनायाः स्वार्थकैङ्कर्याभावप्रार्थनायाश्च प्रतिपाद्यत्वात्। तथापि **नारायणाय स्याम्** इत्यनेन धातोरुत्पत्त्यर्थकत्वमाश्रित्य

आत्मनो नारायणविषयकेच्छासाध्यत्वस्य **मः न स्याम्** इत्यनेन आत्मनः स्वसाध्यत्वाभावस्य च प्रार्थना प्रतिपाद्यते। तत्र आत्मनः स्वरूपेण साध्यत्वासम्भवेन कैङ्कर्योपरक्तस्यैव आत्मनः साध्यत्वेन वाच्यतया विधिनिषेधयोः एकरूपतया च कैङ्कर्यतदभावप्रार्थनयोः लाभः। तथा च प्रार्थनाविषयतया आत्मनः साध्यत्वकण्ठोक्त्या (शोल्लुकिरवर्थम्) **प्राप्यम्** इति वक्तुं युक्तम्। (स्वरूपम्) **चेतनस्य** स्वरूपम् इत्यादिना पूरणीयम्। (सकलशास्त्रङ्गलाल् पिरक्कुम्) इत्यत्र (चेतनरुक्कुप्पिरक्कुम्) इतिवत्। तेन **स्वरूपम्** इत्यत्र स्वशब्देन आत्मीयवाचिना समभिव्याहृतचेतनसम्बन्धित्वलाभात्, चेतनस्य यावदात्मभाविधर्मभूतं शेषत्वं पारतन्त्र्यञ्च विवक्षितम्। तत्र आत्मीयत्वस्य यावदात्मभावित्वरूपसम्बन्धरूपतया शेषवृत्त्यनर्हत्वलक्षणशक्तिविशेषः स्वरक्षणान्वयाऽनर्हत्वलक्षणशक्तिविशेषश्च स्वरूपशब्दविवक्षितः। (स्वरूपमुम्) इति -च शब्दः इतरेतरयोगार्थः। स्वरूपप्राप्ययोः परस्परविशिष्टयोः वाक्यार्थत्वात्। प्राप्यस्य वाक्यार्थत्वनिर्वाहकं स्वरूपेण वैशिष्ट्यमाह (स्वरूपानुरूपमान) इति। **अनुरूपत्वञ्च अनुगुणत्वम्**। निर्वाहकत्वमिति यावत्। नित्यस्य स्वरूपयोग्यस्येति न्यायेन शेषवृत्त्यर्हतारूपस्वरूपव्यापकत्वात्। शेषवृत्तिफलोपधानरूपप्राप्यस्य व्याप्यस्य व्यापकोपपाद्यत्वाच्च। **स्वरूपाऽनुरूपमानप्राप्यम्** इत्येतावन्मात्रोक्तौ प्राप्यमात्रं वाक्यार्थ इति भ्रमः स्यात्। प्रथमद्वितीयपदयोः प्राप्यपदविवक्षितकैङ्कर्यफलोपधानप्रतिपादक-त्वाभावेन प्राप्यमात्रं वाक्यार्थ इति हि न युक्तम्। अतः (प्राप्यमुम्) इति।

यद्यपि **नारायणाय स्याम्** इत्यत्र उत्पत्तेरेव अध्याहृतधात्वर्थतया (साध्यमुम्) इति वक्तव्यम्। तथापि **स्याम्** इत्युक्तात्मनः स्वरूपेण नारायणविषयकेच्छारूपचतुर्थ्यर्थसाध्यत्वाभावेन न कैङ्कर्योपरक्तस्यैव आत्मनः साध्यत्वेनवाच्यतया **ग्रामं गच्छति** इत्यादौ ग्रामादेरिव आत्मनः प्राप्यत्वलक्षणं साध्यत्वमित्यभिप्रायेण (प्राप्यमुम्) इत्युक्तम्। तथा च **प्राप्यम्** इत्यस्य स्वरूपेण साध्यं कैङ्कर्यं व्यञ्जनया वाक्यार्थ इति फलितार्थः।

यद्यपि च (स्वरूपानुरूप प्राप्य प्रार्थनैयुम्) इत्येव वाच्यम्। प्राप्यप्रार्थनायाः एव स्यामिति लिङा प्राधान्येन प्रतिपाद्यत्वात्। तथापि निरुपाधिकरक्षकभगवत्प्रीतिमात्रोद्देश्यकप्रवृत्तिफलोपहित स्यामिति स्वरूपप्रतिपादनपूर्वकप्राप्यप्रार्थनाप्रति-

पादनस्य **निरुपाधिकरक्षको भगवान् जीवस्य स्वरक्षणान्वयाभावे केवल-परार्थ कैङ्कर्यरूपं फलं सम्पादयति** इत्येतदर्थपरतया प्रार्थनाप्रतिपादनं प्रार्थनीयार्थ-प्रतिपादनशेष इत्यभिप्रायेण प्राप्यं वाक्यार्थ इत्युक्तम्। च शब्दः पूर्ववत्।

**मू।। (२९) स्वरूपमुम्, उपायमुम्, फलमुमेन्रवुमाम्।**

इत्थम् **केवलभगवत्प्रीतिः परमपुरुषार्थः, अनन्यप्रयोजनकैङ्कर्यो-परक्तो जीवात्मा व्याजभूतचरमोपायः** इत्येवं पुरुषार्थ तत्साधनपरत्वेन योजनां प्रदर्श्य, सूत्राणां विश्वतोमुखत्वे तदुपबृंहणीयस्य सर्ववेदसङ्ग्रहस्य विश्वतोमुखत्वस्य कैमुत्यसिद्धतया लक्षणाऽनुषङ्गविपरिणामाध्याहारपदतदर्थवाक्यतदर्थतदुभय-तात्पर्यार्थ विषयगौरवषट्कबहुप्रमाणप्रसिद्धबहुवाक्यान्तराऽस्वारस्यादिबाधकरहित-तात्पर्यभेदमात्रनिबन्धनयोजनाभेदः सर्वत्र ग्राह्य इति सूचयन्, **केवलपरार्थकैङ्कर्यं** परमपुरुषार्थः। **स्वरूपज्ञानपूर्वकस्वरक्षणान्वयस्वभोगान्वयनिवृत्त्युपरक्तः परमात्मा-अदृष्टद्वारकफलकरणरूपचरमोपायः** इत्येवं पुरुषार्थतत्साधनपरत्वेन योजनान्तरं दर्शयति द्वितीयसूत्रेण (स्वरूपमित्यादिना)।

अत्र (इतुतन्निल् शोल्लुकिरवर्थम्) इति आदावनुषज्यते स्वरूपशब्दः - **पूर्ववत्** यावदात्मभाव्याकारपरः। तत्र च अनन्यार्हशेषत्वमात्रं विवक्षितम्। पूर्वं पदत्रयार्थस्य वक्तव्यतया स्वरूपशब्देन शेषत्वपारतन्त्र्योभयविवक्षायामपि प्रकृते अर्थत्रयोक्त्या क्रमप्रमाणेन नमश्शब्देन पारतन्त्र्यप्रतिपादने उपायप्रतिपादनशेषत्वस्य विवक्षितत्वात्। अत्रापि शब्दत्रयं पूर्ववत्। (स्वरूपमुम्) इत्यनन्तरं **स्वरूपानु-रूपमान** इत्यनुषज्जनीयम्। तच्च उपाये फले चान्वेति। उपायशब्देन अदृष्टद्वारक-करणं विवक्षितम्। तच्च प्रकृते फलोपदायकरूपम्। तस्य स्वरूपानुरूपत्वं सिद्धोपायोपरञ्जकस्य नमश्शब्दार्थस्वरक्षणान्वयानर्हतारूपशक्तिविशेषफली तस्य स्वरक्षणान्वयाभावस्य भगवत्प्रीतिहेतुप्रतियोगिकतया भगवत्प्रीतिमात्रोद्देश्यक-प्रवृत्त्यर्हतारूपप्रणवार्थशक्तिविशेषोपपादकत्वात्। तथा च तेन सम्बन्धेन स्वरूप-विशिष्टोपायो मूलमन्त्रस्यावान्तरवाक्यार्थ इति भावः।

(फलमुम्) इति फलपदेन भगवत्प्रीत्युद्देश्यकप्रवृत्तिप्रार्थनायाः **नारायणाय स्याम्** इत्युक्तायाः विषयीभूतं केवलपरार्थकैङ्कर्यपर्यन्तं भगवत्प्रियतमम्। अत

एव स्वस्यापि प्रियतमं विवक्षितम्। तादृशफलस्य स्वरूपानुरूपत्वं तादृशप्रवृत्तिफलोपधानस्य तादृशप्रवृत्तियोग्यतोपपादकत्वात्। तथा च स्वरूपानुरूपोपायसाध्यस्वरूपानुरूपं फलं महावाक्यार्थ इति भावः।

(एत्रवुमाम्) - इत्युक्तिरपि सम्भवतीत्यर्थः। पूर्वयोजनायां भगवत्प्रीतेः सुखरूपत्वेन फलत्वसम्भवेऽपि प्रकृते कैङ्कर्यस्य सुखरूपत्वाभावेन फलत्वमुक्त्या सम्भवग्रस्तमिति शङ्कायां, ज्ञानमेव सुखम्, तस्य च सुखत्वम् अनुकूलविषयकत्वम्। विषयानुकूलञ्च शक्तिविशेषः। तथा च कैङ्कर्यस्यापि भगवदपेक्षया स्वापेक्षया च अत्यन्तानुकूलत्वात् सुखत्वं सम्भवतीति परिहारमभिप्रेत्य (एत्रवुमाम्) इत्यनुगृहीतम्। अत एव (अन्तर्यामित्वमुम्, उपायत्वमुम्) इति नानुगृहीतमित्यनुसन्धेयम्।

कैङ्कर्यस्य सिद्धोपायफलत्वं सर्वमुक्तिप्रसङ्गादपसिद्धान्तात् सिद्धोपायस्य भक्तिप्रपत्तिभ्याम् अन्यथा सिद्धत्वापाताद्वाऽनुपपन्नमिति शङ्कायां तृतीयसूत्रमाह (फलमित्यादि)।

**मू।। (३०) फलमिरुक्कुम्बडि प्रमेयशेखरत्तिलुम्, अर्चिरादिगतियिलुम् शोन्नोम्।**

फलशब्देन सिद्धोपायसाध्यमिष्टमुच्यते। (इरुक्कुम्बडि) अवस्थितिप्रकार इत्यर्थः। केवलपरार्थकैङ्कर्यस्य यावदात्मभावित्वमात्रं न फलावस्थितिः। अपि तु अद्वेषप्रभृतेः सर्वस्यापि चिकीर्षापूर्वकचेतनव्यापारस्य उत्पत्तिक्षणमारभ्य यावत्कालभावित्वमित्यभिप्रायः। (प्रमेयशेखरत्तिलुम्) प्रतिपाद्यप्रतिपादकयोः अभेदोपचारः। प्रमेयशेखराख्यप्रबन्ध इत्यर्थः। एवमुत्तरत्रापि प्रमेयशेखराख्यप्रबन्ध इत्यर्थः। एवमुत्तरत्रापि प्रमेयशेखरशब्देन अर्चिरादिनामकप्रबन्धे प्रमाणोपपत्तिः सम्प्रदायमुखेन प्रसाधितः। सारार्थ उच्यते। अनेन समासव्यासाभ्यां धारणं प्रबन्धद्वयप्रयोजनमिति सूचितम्।

(अर्चिरादिगतियिलुम्) अर्चिरादिशब्देन - अर्चिर्दिनपूर्वपक्षेत्याद्युक्ताष्टादशदेवता विवक्षिताः। **गम्यते अनेनेति गतिः**। अर्चिरादिसम्बन्धिनी - गतिः - अर्चिरादिगतिः। अर्चिरादिदेवताति वा व्योमार्ग इति यावत्। तदादि फलपरम्परा-

प्रतिपादके प्रबन्ध इत्यर्थः। अपेक्षितार्थस्याऽत्रकुतोन प्रतिपादनमित्यत्र आह (शोन्नोम्) इति। स्वातन्त्र्येण भोग्यतया सदानुसन्धेयत्वेन वैलक्षण्यसूचनार्थं प्रमाणोपपत्तिसम्प्रदायमुखेन विशदप्रतिपत्त्यर्थञ्च सङ्ग्रहविस्तराभ्याञ्च प्रबन्धद्वये अद्वेषोपक्रमत्वमुक्तैश्वर्यान्तत्वलक्षणफलावस्थितिप्रकारः उक्तः, तत्रैवानुसन्धेयः इति भावः।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्याये द्वितीयपादे**
**मूलमन्त्रवाक्यार्थसमर्थनं नाम**
**प्रथमाधिकरणम् समाप्तम्।।**

श्रीमते रामानुजाय नमः

## प्रथमाध्याये द्वितीयपादे

# सप्रणवाष्टाक्षरसमर्थनं नाम

## द्वितीयाधिकरणम्

**मू।। (३१) इदुतान् एट्टुत्तिरुवक्षरमाय् मून्रुपदमायिरुक्कुम्**

इत्थं वाक्ययोजनामुखेन मूलमन्त्रो व्याख्यातः। अथ **पदच्छेदः पदार्थोक्तिः** इत्यादिव्याख्यानलक्षणश्लोके **पदच्छेदशब्दो व्याख्येयस्वरूपोपलक्षणार्थः** इत्यभिप्रेत्य अक्षरपदसङ्ख्याप्रदर्शनमुखेन मूलमन्त्रो व्याख्यायते। यद्येवं वाक्यार्थः तर्हि अष्टाक्षरत्वं पदत्रयत्वञ्च मूलमन्त्रस्य न स्यादित्युत्थितेः अवान्तरसङ्गतिः। पूर्वं मूलमन्त्रवाक्यार्थानुपपत्तिः निरस्ता। इदानीं मूलमन्त्रस्वरूपानुपपत्तिरिति सङ्गतिः।

तत्र संशयः। मूलमन्त्रस्य प्रणवसहितस्य वाक्यत्रयत्वे अष्टाक्षरत्वं पदत्रयत्वञ्च उपपद्यते न वेति। तदर्थं पदत्रयत्व प्रयोजकम् अर्थत्रयं सम्भवति न वेति। तदर्थं शेषत्वपारतन्त्र्यकैङ्कर्यरूपमर्थत्रयं पदत्रयत्वप्रयोजकं न वेति। शेषत्वाद्यर्थत्रयं अष्टाक्षरत्वविरोधि न वेति च।

### तत्र पूर्वपक्षः

**मूलमन्त्रस्याष्टाक्षरत्वं** तावदयुक्तम्। पूर्वोक्तरीत्या वाक्ययोजनाङ्गीकारे [1]**नम इति द्वे अक्षरे; नारायणायेति पञ्चाक्षराणि** इति श्रुत्युक्तसप्ताक्षरत्वसम्भवेऽपि प्रणवस्य [2]**ओमित्येकाक्षरम्** इत्युक्तैकाक्षरत्वाऽसम्भवात्। प्रणवस्य वर्णत्रयात्मकत्वं विना उक्तवाक्ययोजनायाः असम्भवात्।

न च एकद्वित्र्यादिहल्सयुक्तस्य तद्वियुक्तस्य वा अजन्तरवियुक्तस्यैकस्याऽच एव एकाक्षरपदार्थतया प्रणवस्यैकाक्षरत्वं सम्भवतीति वाच्यम्। तथा सति प्रथमं प्रणवरूप एकाक्षरस्यानन्तरं नकारमकाररूपाक्षरद्वयस्य ततः क्रमिकपञ्चाक्षराणां उपदेशपूर्वकमष्टाक्षरोद्धारस्याऽमूलकत्वापत्तेः।

---

१,२. ना.उ.

**ओं न इति द्वे अक्षरे, मः** इत्येकाक्षरम् इत्यादिरूपेण, **ओं नमः इति त्रीण्यक्षराणि** इत्यादिरूपेण वा **नमो नाराय इति पञ्चाक्षराणि णाय इति द्वे अक्षरे इति वा**, अन्यथा वा मन्त्रोद्धारसम्भवात्। ऐच्छिकत्वस्य अगतिकगतित्वाच्च। **ओमित्यग्रे व्याहरेत्** इत्यादि क्रमविधायकपूर्ववाक्यत्रयेणैव मन्त्रस्वरूपोद्धारस्य प्रचयशिष्टमन्त्राक्षरसङ्ख्यायाश्च सिद्ध्या **ओमित्येकाक्षरम्** इत्यादिवाक्यत्रयवैयर्थ्याच्च। **एकाक्षरं प्रथमपदं, द्व्यक्षरं द्वितीयपदं, पञ्चाक्षरं तृतीयपदम्** इति द्योतनाय यथाश्रुतनिर्देश इति प्रयोजनस्य सम्भवतः त्यागाऽयोगाच्च।

एवं प्रणवस्य अक्षरत्रयात्मकस्य पदत्रयरूपस्य **अस्मि** इत्यध्याहृतक्रियापदसहितस्य अनन्यार्हशेषत्वपरतया **येन स्याम्** इत्यनुषक्तवाक्यान्तरविशिष्टस्य अनन्यभोग्यत्वविशिष्टभगवद्भोगार्थप्रवृत्तिप्रार्थनाप्रतिपादनमुखेन अनन्यभोग्यत्वपरतया एकवाक्यत्वमिति स्वीकर्तव्यतया अष्टाक्षरत्वे निरुक्तवाक्ययोजनाभङ्गप्रसङ्गो दुर्वार इति मूलमन्त्रस्य अष्टाक्षरत्वमयुक्तम्।

ननु **ओमित्यग्रे व्याहरेत्** इत्यादि वाक्यबलादेव निरुक्तपदत्रयसिद्ध्या **ओमित्येकाक्षरम्** इत्यादि निर्देशवैफल्यतादवस्थ्यम्। अन्यथा **ओमित्यग्रे व्याहरेत् नम इति रूपेण** वा अन्यथा वा निर्देशसम्भवात्। तस्य वाक्यत्रयपरत्वे एकाक्षरत्वोक्त्या व्याघाताच्च। अतः ऐच्छिकत्वमेव गतिरिति चेन्मैवम्। ओमित्यग्रे व्याहरेत् इत्यादि वाक्यत्रयं निरुक्तवाक्यत्रयद्योतकम्। **ओमित्येकाक्षरम्** इत्यादि वाक्यत्रयम् ओम् इति ब्रह्मवाचकम्, अव्ययरूपं पदम्। **नमः** इति, नमनक्रियावाचकमव्ययरूपं पदम्। **नारायणाय** इति नमश्शब्दप्रयोगात्, **उपपदविभक्त्यन्तं पदम्** इत्येवं पदत्रयद्योतकम्। न च - विनिगमनाविरहः। **ओमित्येकाक्षरम्** इति निर्देशस्य विनिगमकत्वात्। प्रणवस्य अक्षरत्रयात्मकतया पृथक् वाक्यत्वे तदनुपपत्तेः।

अतः वाक्यत्रयाङ्गीकारेण मूलमन्त्रस्वरूपमष्टाक्षरमित्युक्तम्। स्यादेतत्। [1]**ऋचो यजूंषि सामानि** इत्यादि प्रमाणानुसारेण मूलमन्त्रस्य सर्ववेदसङ्ग्रहत्वं तावत्सम्प्रतिपन्नम्। तच्च [2]**प्राप्यस्य ब्रह्मणोरूपम्** इत्याद्यनुसारेण अर्थपञ्चकप्रतिपादकत्वम्। तच्च वाक्यत्रयत्वं विना न सम्भवतीति एतादृशस्य अष्टाक्षरत्वं कथं निर्वाह्यमिति।

१. वृद्ध.हा.सं.३-६५ २. वृद्ध.हा.सं.८-१४१

उच्यते। **मूलमन्त्रबीजभूतेन** मध्यमाक्षररहितेन **प्रणवेन** विशिष्टस्य **मूलमन्त्रस्य** पूर्णप्रणवरहितस्य **अर्थपञ्चकप्रतिपादकत्वमष्टाक्षरत्वञ्चोपपद्यते।** **उकारार्थस्य** नमश्शब्देन **उपलक्षणविधया** सिद्धेः। यद्वा समस्ते नारायणशब्दे नारपदं पृथक्कृत्य प्रणवविमुक्तस्यैव **अर्थपञ्चकप्रतिपादकत्वम्** अष्टाक्षरत्वञ्चोपपन्नम्। तत्रापि उकारार्थस्य नमश्शब्देन, अकारार्थस्य **नारायणाय स्याम्** इतिवत् **नारायणायास्मि** इत्यावृत्त्या मकारार्थस्य उत्तमपुरुषेणाक्षेपात्, नारपदे नरशब्दाच्च सिद्धेः इदञ्च कल्पद्वयं **तत्रोत्तरायणस्यादिर्विन्दुमान् विष्णुरव्ययः बीजमष्टाक्षरस्य स्यात् तेनाष्टाक्षरता स्मृता** इति वचनेन सिद्धम्। तत्र तेन इत्यनेन बीजत्वाकारविशिष्टपरामर्शे मध्यमाक्षररहितप्रणवविशिष्टवेषेण मूलमन्त्रस्य अष्टाक्षरत्वसिद्धिः। आदित्वाकारविशिष्टपरामर्शे सन्ध्याविवक्षया पृथक्कृतेनायनपदेन तत्सिद्धिरिति।

इत्थं निरुक्तवाक्ययोजनाङ्गीकारेण **मूलमन्त्रस्वरूपं** पदत्रयात्मकमित्यपि अयुक्तम्। पदशब्दस्य तार्किकरीत्या शक्तपरत्वे, शाब्दिकरीत्या विभक्त्यन्तपरत्वे वा निरुक्तवाक्यत्रयाभ्युपगमे, पदत्रयासम्भवात्। तार्किकरीत्या अकारमकारयोः प्रकृतिप्रत्ययात्मकत्वे वर्णत्रयात्मकस्य प्रणवस्य पदरूपत्वात्, मकारानुषङ्गपक्षे पदचतुष्टयरूपत्वात् **क्रियापदं विना वाक्यमबोधकम्** इति पक्षे प्रणवस्य पदचतुष्टयरूपत्वात्, नमश्शब्दस्य पदपञ्चकरूपत्वात्। व्यक्तचतुर्थ्यन्तस्य **स्याम्** इत्यध्याहृतक्रियापदसहितस्य मकारानुषङ्गविशिष्टस्य **मम: न स्याम्** इति वाक्यान्तरसहितस्य नारपदघटितस्य च चतुर्दशपदात्मकत्वाच्च। शाब्दिकरीत्या प्रणवस्य पदचतुष्टयात्मकवाक्यरूपत्वात्, मध्यमपदस्यापि तथात्वात्, तृतीयपदस्यापि सप्तपदघटितवाक्यरूपत्वाच्च।

तस्मात् मूलमन्त्रस्य पूर्वोक्तयोजनाद्वयेऽपि अष्टाक्षरत्वं पदत्रयत्वञ्चानुपपन्नमिति। अत्रोच्यते – मूलमन्त्रस्य अष्टाक्षरत्वमुपपद्यत एव। पूर्वोक्तरीत्या वाक्ययोजनाङ्गीकारेऽपि **ओमित्येकाक्षरम्** इत्युक्तैकाक्षरत्वसम्भवात्। प्रणवस्य अकारोकारयोः सन्ध्यविवक्षया वर्णत्रयात्मकत्वेऽपि सन्धिविवक्षया अकारोकारयोः गुणेकृतेव्यञ्जनस्याभेदकतया एकाक्षरत्वस्याप्युपपत्तेः।

न च एकद्विपञ्चाक्षरमुखेन मन्त्रोद्धारस्यामूलकत्वापत्त्या तस्य पदत्रयसूचकतया, सम्भवतः प्रयोजनस्य अत्याज्यतया च [१]**ओमित्यग्रे व्याहरेत्** इत्यादिकमक्षरत्रयात्मकप्रणवविशिष्टवेषेण अष्टाक्षरस्य निरुक्तवाक्यत्रयात्मकत्वपरम्। [२]**ओमित्येकाक्षरम्** इत्यादिकन्तु ब्रह्मवाचकाव्ययैकाक्षरप्रणवविशिष्टतया तस्य पदत्रयत्वपरमित्येव अवश्यवक्तव्यतया तस्य वाक्यत्रयत्वपरत्वाङ्गीकारे [३]**ओमित्येकाक्षरम्** इत्युक्तमेकाक्षरत्वं सम्भवीति वाच्यम्।

[४]**ओमित्येकाक्षरम्** इति वाक्येन ब्रह्मरूपैकार्थशक्तप्रणवविवक्षायां मानाभावात्। त्र्यात्मन एव अस्यैकाक्षरत्वस्योपपादितत्वात्। एतेन [५]**ओमित्यग्रे व्याहरेत्** इत्यादि वाक्येन गतार्थतया [६]**ओमित्येकाक्षरम्** इत्यादि वैयर्थ्यान्न पदत्रयपरत्वसिद्धिरिति प्रत्युक्तम्। [७]**ओमित्येकाक्षरम्** इत्यादेः मूलमन्त्रवाक्यत्रयपरत्वेऽपि त्र्यात्मकरस्यैव प्रणवस्य एकाक्षरपरत्वोपपत्तेः। अतः निरुक्तवाक्य योजनापरत्वेऽपि मूलमन्त्रस्वरूपस्य अष्टाक्षरत्वं युक्तम्।

किञ्च [८]**ओमित्यग्रे व्याहरेत्** इत्यादि वाक्यत्रयनिर्देश शैलीमहिम्नैव प्रचयशिष्टमूलमन्त्राक्षरसङ्ख्यावत्, तत्पदत्रयत्वस्यापि सिद्ध्यागतार्थत्वमपरिहार्यम्। [९]**ओमित्यग्रे व्याहरेत्** इत्यादिवाक्यत्रयस्य मूलमन्त्रवाक्यत्रयत्वपरत्वमेकाक्षरत्वोक्त्या व्याहतञ्च।

न च **ओमित्यग्रे व्याहरेत्** इत्यादि वाक्यत्रयमेव मूलमन्त्रवाक्यत्रयत्वपरम्। **ओमित्येकाक्षरम्** इत्यादि वाक्यत्रयन्तुमूलमन्त्रपदत्रयत्वपरम्। एतद्व्यवस्थापकञ्च **ओमित्येकाक्षरम्** इति वाक्यमिति न व्याघातोऽपीति वाच्यम्। पदत्रयत्वस्यापि प्राथमिकवाक्यत्रयनिर्देशशैलीमहिम्नैव सिद्धिसम्भवेनवाक्यत्रयान्तरवैफल्यतादवस्थ्यात्। स्थितगतिचिन्ताश्रयणे प्रचयशिष्टाक्षरसङ्ख्याऽनाश्रयणेनाऽक्षरसङ्ख्याकण्ठोक्तिर्दार्ढ्यार्थेति वक्तुं शक्यत्वात्।

प्रणवस्य सर्ववेदसङ्ग्रहत्वप्रसिद्ध्यनुसारेण वेदाद्यन्तानुसन्धानाऽनुसारेण अकारस्य प्रणवप्रकृतित्वश्रुत्यनुसारेण **प्रत्यगानन्दम्** इत्यादिखण्डे **तानेकधा-**

---

१,२,३,४,५,६,७,८,९. ना.उ.

**समभरत्तदेतदोम्** इति वचनानुसारेण च ब्रह्मरूपैकार्थशक्ताऽव्ययरपैकपदात्मकत्वपरत्वेन (प्रणवस्याष्टाक्षरान्तर्भावानुपपत्तेश्च। अत एव **ओमित्येकाक्षरम्** इत्यादेः मूलमन्त्रपदत्रयात्मक) एकार्थशक्तैकपदतया प्रणवस्य अनेकाक्षरत्वोक्तिव्याघात इत्यस्य असम्भवाच्च। एकार्थशक्तैकपदतया एकाक्षरत्वाभ्युपगमे योजनाद्वयतात्पर्यकल्पनागौरवप्रसङ्गाच्च। **ओं नारायणाय नमः** इति मन्त्रविन्यासापत्त्या व्यक्तचतुर्थीवैयर्थ्यापत्त्या च मूलमन्त्रस्य पदत्रयात्मकत्वानुपपत्तेश्च। **ओं मित्येकाक्षरम्** इत्यादि वाक्यत्रयस्य मूलमन्त्रवाक्यत्रय परत्वेऽपि **तानेकधा समभरत्** इत्युक्त्या सन्धिमादाय एकाक्षरत्वोक्तेः उपपादितत्वाच्च।

अतः वाक्यत्रयाङ्गीकारेणैव मूलमन्त्रस्य अष्टाक्षरत्वसिद्धिरिति सिद्धम्। अपि च **ओमित्येकाक्षरम्** इत्यादिवाक्यत्रयस्य मूलमन्त्रपदत्रयत्वपरत्व एव एकाक्षरत्वोक्त्युपपत्तिरित्ययुक्तम्। मूलमन्त्रस्य सर्ववेदसङ्ग्रहत्वाऽष्टाक्षरत्वयोः एकत्र एकदा बहुप्रमाणप्रतिपाद्यत्वविरोधात्, अष्टाक्षरत्वस्य विशेषणत्वे सम्भवत्युपलक्षणत्वस्य अन्याय्यत्वात्, सर्ववेदसङ्ग्रहत्वस्य अर्थपञ्चकप्रतिपादकतयैव वक्तव्यत्वात्। तस्याश्च प्रणवस्य अक्षरत्रयात्मकत्वं विनानुपपत्तेः। अतः सन्ध्याक्षरमादाय त्र्यात्मकस्य मूलमन्त्रस्थस्य प्रणवस्य एकाक्षरत्वमुररीकार्यम्। नत्वेकार्थशक्तैकपदरूपत्वेन एकाक्षरत्वम्।

यत्त्वत्रोक्तम्, उकारवियुक्त प्रणवविशिष्टस्य वा सन्धिरहितायनपदविशिष्टस्य वा मन्त्रस्यार्थपञ्चकप्रतिपादकस्य अष्टाक्षरत्वं स्मृतिसिद्धमिति। तदयुक्तम्। मन्त्रोद्धारप्रकरणे प्रणवसहितस्यैव मन्त्रस्य अष्टाक्षरत्वेन **ओमित्यग्रे व्याहरेत्** इत्यादिखण्डे **प्रत्यगानन्दम्** इत्यादि खण्डे च प्रणवस्वरूपनिर्देशमुखेन वर्णत्रयसमुदायरूपत्वोक्तिमुखेन च श्रुतिसिद्धतया बीजाक्षरविशिष्टस्य पृथक्कृताऽयनपदविशिष्टस्य वा मन्त्रस्य अष्टाक्षरत्वप्रतिपादकस्मृतेः अप्रमाणत्वात्। यद्यपि विरोधाधिकरणे विरुद्धस्मृतेः अप्राण्यं भाष्यएवोक्तम्। वार्तिकेतुविरुद्धप्रत्यक्षश्रुतिद्वयवत्, विरुद्धश्रुतेरपि स्मृत्यनुमेयत्वं सम्भवतीत्युक्तम्। तथापि वार्तिकेऽपि अननुष्ठापकत्वलक्षणं विरुद्धस्मृतेः अप्रामाण्यं प्रपञ्चितमिति वैदिकाष्टाक्षरत्वविरुद्धं स्मार्ताष्टाक्षरत्वमनादरणीयमेव।

किञ्च [1]**नमो नारायणायेत्युक्तो श्वपाकः पुनरागमत्।** [2]**नमो नारायणायेति मन्त्रस्सर्वार्थसाधकः** इत्यादिषु सप्ताक्षरादेरपि कार्यकारित्वंसम्प्रतिपन्नम्। तच्च सर्वाधिकारार्थमिति च । तथैव श्रीविष्णुचित्तसूरिभिः श्रीमत्परकालसूरिभिश्च क्रियासमभिव्याहारेण सप्ताक्षरादेरेव अनुसन्धेयत्वमनुगृहीतम्।

यद्यपि अर्थपञ्चकज्ञानार्थमेव मुमुक्षुणां मूलमन्त्रानुसन्धानम्। अनन्यप्रयोजनानां तेषां मन्त्रोच्छारणमात्रजन्यफलविशेषाऽनपेक्षत्वात्। न च प्रणवानुसन्धानं विना अर्थपञ्चकज्ञानं सम्भवतीति न सप्ताक्षरादेः कार्यकरत्वसम्भवः। न च प्रणवस्वरूपानुसन्धानमात्रेण मानसेनार्थपञ्चकज्ञानसम्भवात्, उच्चारणे सप्ताक्षरादेरेव विनियोगोऽभिप्रेत इति वाच्यम्। अत्रैवर्णिकानां अष्टाक्षरजपस्या प्रसक्तत्वेन सप्ताक्षरादेरेव उच्चारणे विनियोग इत्यभिप्रायाऽसम्भवात्। तथापि अर्थपञ्चज्ञानार्थमेव प्रणवसहितोच्चारणस्य प्रसक्तस्यात्रैवर्णिकेषु निषेधाभिप्रायः सप्ताक्षरादिपरिग्रहः।

तथा हि - वेदवाक्यस्य स्वरक्रमविशेषविशिष्टस्यैव अत्रैवर्णिकेषु एकाक्षरमात्रस्यापि प्रणवस्याध्ययनविषेधः साधनानुष्ठातृविषय एव। अध्ययनविधेः अदृष्टद्वारकफलसाधनाऽनुष्ठातृविषयतया **पर्युदासः** स विज्ञेयः यत्रोत्तरपदेन नञ् (मीमांसा शास्त्रे) **प्रसक्तप्रतिषेधन्यायेन** विधिनिषेधयोः एकविषयत्वस्य न्याय्यत्वात्। अत्रैवर्णिकमुमुक्षूणां मूलमन्त्रार्थानुसन्धानञ्च न साधनानुष्ठानशेषभूतम्। मन्त्रार्थभूताऽऽकारत्रयानुसन्धानस्य अदृष्टद्वारकफलसाधनानुष्ठानविरोधित्वात्। एवं स्थिते अत्रैवर्णिकमुमुक्षूणां प्रणवोच्छारणमनिषिद्धमेव। तथापि दिव्यसूरीणां सर्वाधिकारार्थं प्रवृत्तेषु दिव्यप्रबन्धेषु सप्ताक्षरादिपरिग्रहोलोकसङ्ग्रहार्थम्। अत्रैवर्णिकमुमुक्षूणाम् अधिकारिविशेषाऽपरिज्ञानेनाऽमुमुक्षुभिः अत्रैवर्णिकैः लौकिकैः तदीयप्रणवोच्चारणनिन्दने तत्प्ररिग्रहणे वा क्रियमाणे प्रत्यवायापत्त्या, मुमुक्षुणामपि तेषां लोकांतराजनितप्रत्यवायापत्तिः। इदञ्च [3]**यद्यदाचरति श्रेष्ठः लोकसङ्ग्रहमेवापि** इत्यादि गीताभाष्यंतात्पर्यचन्द्रिकयोः स्पष्टम्।

इत्थम् अत्रैवर्णिकमुमुक्षुप्रणवोच्चारणस्य लोकनाशद्वारक प्रत्यवायकरत्वं

---

१. वरा.पु. २. नार.पु.१-४० ३. भ.गी.३-२१

विना शूद्राणां वेदवाक्योच्चारणवत् **स्वातन्त्र्येणोदाहरणे जिह्वाच्छेदः** इत्युक्त प्रत्यवायकरत्वाभ्युपगमे **धारणे शरीरभेदः** इति निर्दिष्टप्रत्यवायस्यापि आपत्त्या प्रणवस्वरूपानुसन्धानस्यापि अनापत्तौ मूलमन्त्रार्थानुसन्धानमेव तेषामुच्छिद्येत। अत एव **कृष्णानां व्रीहिणां नखनिर्भिन्नम्** इति वाक्यमध्येतॄन् प्रति अर्थानुष्ठान-मुखेनैव लोकसङ्ग्रहार्थं श्रीभक्तिसारसूरिभिः स्मारित इति सम्प्रदायोऽपि उपपद्यते। इत्थञ्च प्रणववियुक्ताष्टाक्षराभ्युपगमे तन्मुखेनैव अर्थानुसन्धानसम्भवात्। महर्षीणां सप्ताक्षराद्यभ्युपगमो निर्मूलः स्यात्। अतः वैदिकाष्टाक्षरविरुद्धं स्मार्ताष्टाक्षर कस्यापि न परिग्राह्यमित्येवतेषामभिप्रायः इत्येव सिद्धम्।

अपि च प्रणवविरहितमूलमन्त्रमेव स्वप्रबन्धे क्रियासमभिव्याहारेण अनुसन्ददद्भिः श्रीमत्परकालसूरिभिः अष्टमशतके चरमदशके **मट्रुमोर्दैवम्** इत्यादि **गाथायां मट्रेल्लां पोदीलुंम्बिन् तिरुवेट्टेयित्तुम् कल्लुनान् कण्ठ-पुरत्तुरैयम्माने** इति स्वेषां गुरुमुखादष्टाक्षराध्ययनं कण्ठतोऽनुगृहीतम्। श्रीकृष्ण-पुरस्याष्टाक्षरसिद्धिस्थलत्वप्रसिद्धिः वैदिकाष्टाक्षरविषयैव। अतः वैदिकेनैव अष्टाक्षरेण अर्थपञ्चकानुसन्धानं कार्यमिति पूर्वाधिकरणोक्तरीत्या वाक्ययोजना-ङ्गीकारेऽपि मूलमन्त्रस्य प्रणवसहितस्यैव अष्टाक्षरत्वमुपपद्यत इति स्थितम्।

यदपि निरुक्तवाक्ययोजनाङ्गीकारे मूलमन्त्रस्वरूपं पदत्रयात्मकमिति तार्किकरीत्या शाब्दिकरीत्या वा वक्तुमयुक्तमिति। तदपि मन्दम्। प्रणवस्य ब्रह्मरूपै-कार्थशक्ततया अव्ययरूपतया च द्वेधापदत्वेऽपि मूलमन्त्रस्थप्रणवस्य मन्त्रोद्धारशास्त्रे [1]**संहितायाम्** इत्याधिकारसूत्रानुसारेण सन्धिविवक्षया एकाक्षरत्वस्य तदविवक्षया-त्र्यक्षरत्वस्य च प्रमितत्वेन मूलमन्त्रस्य तार्किकरीत्या शाब्दिकरीत्या वा पदत्रयात्म-कत्वे मानाभावात्।

**न च ओमित्यग्रे व्याहरेत्** इत्यादिवाक्यत्रयनिर्देशशैली महिम्ना विभक्त्यन्तत्र-यात्मकत्वमवगम्यत इति वाच्यम्। वाक्यत्रयात्मकत्व सूचकतयापि तादृशनिर्देशोप-पत्तेः। न च **ओमित्येकाक्षरम्** इत्यादि वाक्यत्रयमेव तत् सूचकमिति वाच्यम्। विनिगमनाविरहेण क्रमविधायकस्य अक्षरसङ्ख्याविधायकस्य च वाक्यत्रिकद्वयस्य निरुक्तवाक्ययोजनादार्ढ्यार्थं वाक्यत्रयत्वसूचकत्वोपपत्तेः।

---

१. नारा.उ.

**ओमित्येकाक्षरम्** इत्युक्तेः वाक्यत्रयत्वपरत्वेपि उपपत्तेः उक्तत्वात्, न च विनिगमनाविरहेण पदत्रयत्वसूचकत्वं **न स्यादिति** वाच्यम्। **प्रत्यगानन्दम्** इत्यादिमूलमन्त्रान्तर्गतप्रणवोद्धारवाक्यविरोधात्। प्रणवस्य **सर्ववेदसङ्ग्रहत्व-**वेदाद्यन्तानुसन्धानाऽऽकारप्रकृतिकत्वविरोधात्। **ओं नमो नारायणाय** इति मन्त्रविन्यासापत्तेः व्यक्तचतुर्थीवैयर्थ्यापत्तेश्च।

न चैवं पूर्वाचार्याणां मूलमन्त्रे पदत्रयात्मकत्वव्यवहारविरोधः। **पद्यते गम्यते अनेन** इति व्युत्पत्त्या अर्थत्रयगामकत्वरूपेण वाक्यत्रयस्यैव पदत्रयशब्द विवक्षितत्वात्। **एतद्वै नारायणस्याष्टाक्षरं पदम्, यो ह वै नारायणस्याष्टाक्षरं पदमध्येति** इति प्राकरणिकपदशब्दस्य एकमहावाक्यार्थगमकत्वरूपेण महावाक्य-परत्वद्योतनाय **ओमित्यग्रे व्याहरेत्** इत्यादि द्विविधवाक्यत्रयनिर्देशप्रयोजन भूत-वाक्यत्रयत्वं वक्तुं वाक्यशब्दस्थाने पदशब्दप्रयोगोपपत्तेश्च।

**एकाक्षरां द्विपदां षट्पदाञ्च** इत्यत्र मन्त्रशेषमन्त्ररत्नस्थनमश्शब्दद्वये शाब्दिकोक्तरीत्या नञो निपातत्वेन द्योतकतामात्रम्। अर्थबोधकतया विभक्त्यन्ततया च **मः** इत्येतदेव योगवृत्त्या परिभाषया च पदशब्दार्थः इत्यभिप्रायेण तयोः द्विप-दत्वषट्पदत्वयोः वक्त्युपपत्तेश्च। अत एव [1]**अधिगतनिगमषट्पदोऽयं द्विखण्डः** इति श्रीपराशरभट्टार्यसूक्त्यविरोधाच्च। अन्यथा **प्रबलतरविरोधिप्रहाणम्** इति सखण्डनमश्शब्दं व्याख्याय अखण्डनमश्शब्दाभिप्रायेण केवल शाब्दिक परिभाषा-श्रयणेन **षट्वदोऽयम्** इत्युक्तिव्याघातापातात्।

**सर्वज्ञ इति लोकेश मिथ्यात्वं कथ्यते बुधैः।**
**पदमेकं न जानीषे वक्तुं नास्तीति याचके।।**

इति **महाकविप्रयोगोपि** उपपद्यते। अत एव चरमश्लोके **मा शुचः** इत्यस्य **शुचिर् - पूतीभावे** इति धातोः निष्पन्नस्य इरित्वात्। अङन्तस्यात एव गुणरहितस्य चरमपदत्वव्यवहारः साम्प्रदायिकः समञ्जसः।

अथ स्यात्, प्रकृते पदभेदप्रयोजकोऽर्थभेदो दुर्वचः। न च शेषत्वपार-तन्त्र्यकैङ्कर्यमिति क्रमेण पदत्रयार्थाः इति वाच्यम्।

---

१. अष्टश्लोकि - ५

तादर्थ्यरूपशेषत्वस्य **तादर्थ्ये चतुर्थी वक्तव्या** इत्यनुशासनबलेन चतुर्थी शक्यार्थतया वाक्यभेदरूपपदभेदप्रयोजकार्थरूपत्वासम्भवात्। **शेषः परार्थत्वात्** इति सूत्र व्याख्यानावसरे **परोद्देशप्रवृत्तिश्च परार्थ्यभिधीयते** इति तान्त्रिकैरुक्ततया, परगतातिशयाधानेच्छाजन्य प्रवृत्तिविषयत्वस्यैव **शेषशब्दप्रवृत्तिनिमित्तत्वेन प्रणवस्य मू - आयैवास्मि** इत्येवं **भगवत एवाहमस्मि** इत्यादेरिव वर्तमानापदेशरूपत्वे प्रत्यक्षबाधेन नित्यवच्छ्रवणविरोधात्। **म् - आयैव स्याम्** इत्युक्तौ **नारायणाय स्याम्** इत्यनेन पौनरुक्त्यात् आय **नारायणाय स्याम्** इति पदैकवाक्यत्वसम्भवेन प्रणवस्य प्राथमिकवाक्यान्तरत्वाऽसम्भवप्रसङ्गाच्च। **परः स - स्वव्यतिरिक्तः, तन्त्रम् नियामको, यस्य, सः परतन्त्रः** इति व्युत्पत्त्या पराधीनत्वस्यैव **पारतन्त्र्य-शब्दार्थतया तस्य सखण्डनमश्शब्दबोध्यवाक्यार्थत्वासम्भवाच्च।**

स्वरूपस्थितिप्रवृत्तीनां भगवता स्वरूपेण सङ्कल्पतश्च धार्यत्वलक्षण-पराधीनत्वस्य **प्रणवप्रतिपन्नरक्ष्यरक्षकभावशेषशेषिभावलक्षणसम्बन्धद्वयविरोधि-**निवर्तकत्वाभावेन, यत्किञ्चिन्निषेधपरत्वे तु अप्रसक्तप्रतिषेधतापत्तेश्च, स्वभोगोद्देशेन प्रवृत्तेः स्वरक्षणे स्वान्वयस्य च मम नास्तीत्येवं निषेधे प्रत्यक्षबाधापत्तेश्च।

**म् - मः, न स्याम्** इत्येवं प्रार्थनापरत्वे, **स्वरूपानुरूपमानप्राप्यमुम्** इति पूर्वोक्तस्य **नमश्शब्दे स्वरूपपरत्वस्य** भङ्गप्रसङ्गाच्च। स्वरूपं निर्दिश्य, **म् - मः, न स्याम्** इति निषेधप्रार्थनायाः अनवकाशपराहतत्वाच्च। अन्यथा प्रणवे **स्वरूपोपदेशवैयर्थ्यस्य** वज्रलेपत्वापाताच्च। शेषकिङ्करशब्दयोः पर्यायत्वेन कैङ्कर्यस्य तृतीयवाक्यार्थत्वाऽसम्भवाच्च। कैङ्कर्यस्य शेषत्वरूपस्यचतुर्थी वाच्यत्वेन वाक्यार्थत्वासम्भवाच्च। **नारायणायास्मि** इति सिद्धवत् निर्देशाभ्युपगमे प्रणवेन पौनरुक्त्यापत्त्या पदैकवाक्यत्वापत्त्या गतार्थत्वापत्त्या च **नारायणाय स्याम्** इत्यध्याहारवश्यम्भावेन तादर्थ्यप्रार्थनायाः एव वाक्यार्थतया वक्तव्यत्वाच्चेति।

उच्यते-शेषत्वादित्रयं वाक्यार्थ इति युक्तमेव। [१]**परगतातिशयाऽऽधानेच्छया उपदेयत्वमेव यस्य स्वरूपं - सः - शेषः, परः - शेषी** इति श्रीभाष्यकारसूक्त्यनु-सारेण शेषत्वस्य नानापदार्थघटिततया **ब्रह्मणाय सूपः** इत्यादौ परांशस्य चतुर्थप्रकृति-भ्यतया, तद्गतातिशयाधानांशस्य सिद्धे चतुर्थी प्रकृत्यर्थे विषयत्वान्यथानुपपत्ति

१. श्रीभाष्यम्

बलवदलभ्यतया, इच्छापेक्षया विषयत्वांशस्य प्रकृतिप्रत्ययार्थसंसर्गत्वेन लभ्यतया, इच्छापेक्षया साध्यत्वरूपयोग्यतालक्षणशक्तिविशेषस्य प्रत्ययस्य च। अपरपदार्थस्य च **संसर्गत्वेन** लभ्यतया, उपादानार्हत्वरूपव्यापारविषयात्मकशक्तिविशेषस्य सिद्धे अपरपदार्थे साध्यत्वानुपपत्तिलभ्यतया च इच्छांशस्यैव अनन्यलभ्यतया चतुर्थी-वाच्यत्वेन शेषत्वरूपोपाधेः अपदार्थत्वेन वाक्यार्थत्वसम्भवात्। उकारार्थोऽनन्यार्हत्व-विशिष्टशेषत्वविशिष्टस्य मकारार्थस्य वाक्यार्थत्वसम्भवाच्च। शेषलक्षणश्रीभाष्य-कारसूक्तौ उपादेयत्वमेव इत्यत्र उपादानार्हत्वस्यैव साध्यत्वानुपपत्तिलभ्यार्थस्योक्तत्वेन प्रत्यक्षबाधानवकाशाच्च।

**[1]स एकाकी न रमेत, [2]ईश्वराय निवेदितुम् [3]स्वमुद्दिश्य श्रीमानिति वदति वागोपनिषदी** इत्याद्यनुसारेण भगवतस्स्वार्थमेव सकलजगज्जन्मस्थिति-लयनिमित्तोपादानभूततया चेतनस्य स्वभोगोद्देशेनापि प्रवृत्तौ सर्वशेषिभूतपरभोगा-न्यूनताप्रसङ्गेन, पारतन्त्र्यशब्दस्य पराधीनत्ववाचित्वेऽपि **परभोगोद्देशेनैव प्रवृत्त्यर्ह-त्वंस्वभावः**, इत्येवं रूपस्य फलभोगे पराधीनत्वस्य निरुपाधिकसौहार्दशालिनो भगवतः सत्यसङ्कल्पस्य चेतनप्रवृत्तिसामान्यम् अनपेक्ष्य स्वाभाविकसौदार्दरूप-निर्हेतुकानुग्रहेण **अहमेव रक्षिष्यामि** इत्येवं रूपसङ्कल्पविरोधितया, फलार्थभगव-त्प्रसादोद्देश्यकचेतनप्रवृत्तेः भगवदीयचेतनरक्षणप्रवृत्तिप्रतिबन्धकत्वेन केवलपरभोग-रूपचेतनोद्देश्यस्याऽदृष्टद्वारकसाधनानुष्ठानं परकीयमेव इत्येवं रूपस्य फलसाधना-ऽनुष्ठानेपराधीनत्वस्य च प्रकृते पारतन्त्र्यशब्दविवक्षिततया, नमश्शब्देन स्वभोगो-द्देश्यकप्रवृत्त्यनर्हत्वलक्षणस्य परभोगं प्रति अदृष्टद्वारकसाधनानुष्ठानानर्हत्वरूपस्य च शक्तिविशेषस्य स्वसम्बन्धनिषेधत्वरूपेण प्रतिपादने प्रणवावगतसम्बन्धद्वयविरोधि-निवर्तकतया नमश्शब्दस्याऽप्रसक्तप्रतिषेधत्वानापत्तेश्च।

स्वभोगोद्देश्यकप्रवृत्त्यनर्हत्वलक्षणस्य अदृष्टद्वारकस्वरक्षणप्रवृत्त्यनर्हत्व-रूपत्वस्य च स्वसम्बन्धनिषेधाभ्युपगमेन अत्रापि प्रत्यक्षबाधाऽनवकाशाच्च। शेषकिङ्करशब्दयोः पर्यायत्वेऽपि प्रणवे शेषवृत्त्यर्हत्वलक्षणस्वरूपतादवस्थ्यस्य तृतीयपदे शेषवृत्तिफलोपधानलक्षणवृत्ति तादर्थ्यस्य च विवक्षिततया पौनरुक्त्यानव-

१. महा.उ.१ २. विष्णु.त. ३. श्री.र.स्त.२-८७

काशाच्च, पूर्वोक्तशेषत्वरूपस्वरूपयोग्यतावत् कैङ्कर्यलोपधानस्यापि वाक्यार्थत्व-सम्भवाच्च।

**नारायणाय स्याम्** इत्यध्याहृतकैङ्कर्यप्रार्थनायाः महावाक्यार्थत्वेऽपि तत्प्रार्थनोक्तेः केवलभगवद्भोगार्थप्रवृत्तिरूपं भगवत्प्रियतमत्वेन चेतनस्य परमपुरुषार्थ इत्येवं सिद्धोपायफलभूतकैङ्कर्यप्रतिपादन एव तात्पर्यात् कैङ्कर्यस्य व्यङ्ग्या-र्थस्यापि अर्थतः प्राधान्यमादाय कैङ्कर्यवाक्यार्थ इत्युक्तेः उपपत्तेश्चेति।

इदमप्यधिकरणं त्रिसूत्र्यात्मकम्। तत्राद्यं सूत्रं (इदुतानित्यादि) इदं शब्देन द्विविधवाक्यार्थत्रयविशिष्टवाक्यत्रयस्वरूपेण मूलमन्त्रः परामृश्यते। (तात्) इति-स्वशब्देन असाधारणस्वरूपपरामर्शिना वाक्यत्रयात्मकमूलमन्त्र एव इत्यर्थो लभ्यते। अवधारणेन पदैकवाक्यस्यैव मूलमन्त्रस्य अष्टाक्षरत्वं पदत्रयत्वञ्च, न तु महा-वाक्यरूपस्येति, पूर्वपक्षे व्यावर्त्यते। अनेन वाक्यत्रयपक्षे प्रणवराहित्येन अष्टाक्षर-त्वविवक्षापि अपास्ता।

(एट्टुत्तिरुवक्षरमाय्) इत्यत्र अष्टाक्षरत्वसङ्ख्यया, वाक्यत्रयपक्षे सप्ताक्षरत्वं मूलमन्त्रस्य स्यात्। अत्रैवर्णिकानां प्रणवोच्चारणासम्भवेन तेषामष्टाक्षरोच्चारणमुखेन आकारत्रयपरिज्ञानाऽसम्भवादिति शङ्किता न्यूनसङ्ख्या, वाक्यत्रयपक्षे प्रणवस्य अक्षरत्रयात्मकत्वेन मूलमन्त्रस्य दशाक्षरत्वं स्यादिति शङ्किता अधिकसङ्ख्या च व्यावर्त्यते। सप्ताक्षरोच्चारणस्य केवललोकसङ्ग्रहार्थत्वेन अत्रैवर्णिक मुमुक्षुणामपि प्रणवसहिताऽष्टाक्षरस्वरूपस्य मानसानुसन्धानपूर्वकम् आकारत्रय-रूपार्थपरिज्ञानसम्भवात्। त्र्यक्षरस्यापि संहितायाम् एकाक्षरत्वसम्भवेन अष्टाक्षरत्व-सम्भवाच्च। (तिरु) इत्यनेन प्रणवसहिताऽष्टाक्षराणां वैदिकत्वप्रयुक्ता पूज्यता सूच्यते। तेन स्मार्ताष्टाक्षराणामनादरणीयत्वं सूचितम्।

अष्टाक्षरशब्दः - हल् संयोगेन तद्वियोगेन च उच्चार्यमाणैकाच् परः। '**एकाक्षरां द्विपदां षट्पदाञ्च** इति वाक्येन मन्त्रशेषस्य द्विपदत्वोक्त्या सूचितं मूलमन्त्रस्य पदत्रयत्वं वाक्यत्रयत्वपक्षेऽपि साधयितुमुक्तम् (मून्रुपदमायिरुक्कुम्) इति। (मन्रु) इत्यनेन पदशब्दस्य केवलयोगवृत्त्याऽर्थगमकपरत्वे **एतद्वै नारायण-**

---
१. नारा.उ.

**स्याष्टाक्षरं पदम्** इत्याद्युक्तरीत्या एकपदत्वं स्यात्, केवलपरिभाषया विभक्त्यन्तपरत्वे षट्पदत्वं **स्यात्** । **योगरूढ्या** शक्तपरत्वे चतुष्पदत्वं **स्यात्**, **कारनञोः द्योतकमात्रत्वात्**। इति शङ्कितन्यूनाधिकसङ्ख्याव्यवच्छेदोऽभिप्रेतः।

[1]**ओमित्यग्रे व्याहरेत्** इत्यादि वाक्यषट्कनिर्देशशैली सिद्धाऽवान्तरवाक्यत्रयविवक्षया केवलयौगिकत्वमाश्रित्य पदत्रयत्वोक्ति सम्भवात्। इत्थं (तिरु) इति पूजोक्तिमुखेन स्मार्ताष्टाक्षरसूचनेन **इदमेवाऽष्टाक्षरम्** इत्युक्त्या वाक्यत्रयपक्षे अष्टाक्षरत्वसमर्थनेन च पदत्रयत्वमुपपादयति द्वितीयसूत्रेण (मून्रुपदमुम्) इत्यादिना।

## मू।। (३२) मुन्रुपदमुम् मून्रु अर्थत्तै शोल्लुकिरतु।

(मून्रुपदमुम्) इति त्रित्वसङ्ख्यया विरोधद्योतकापिशब्देन च **न तु नारायणाय इत्येकपदमात्रमर्थगमकम्** इति सूच्यते। तथा च **अर्थगमकत्वरूपकेवलयोग प्रवृत्तिनिमित्तमादाय वाक्यमेव अत्र पदशब्दविवक्षितम्** इति भावः। पूर्वोक्तरीत्या द्वादशदूषिण्या वाक्यार्थत्रयाऽसम्भव शङ्कां परिहरति तृतीयसूत्रेण (अतावतित्यादिना)।

## मू।। (३३) अदावदु - शेषत्वमुम्, पारतन्त्र्यमुम्, कैङ्कर्यमुम्

(अदु) **मून्रर्थमुम्** इत्यर्थः। (आवदु) भवितुं योग्यमित्यर्थः। शेषत्वं पारतन्त्र्यं कैङ्कर्यञ्च अर्थत्रयं भवतीति यावत्। भवतीत्यनेनसम्भवतीत्यर्थकेन पूर्वोक्तरीत्या अर्थत्रयाऽसम्भवशङ्का परिहारः सूच्यते। शेषत्वम् परगतातिशयाधानेच्छया उपादानार्हत्वमित्यर्थः। पारतन्त्र्यम् अदृष्टद्वारकफलसाधनाऽनुष्ठाने फलभोगे च परकीयत्वप्रयुक्तं पराधीनत्वमित्यर्थः। कैङ्कर्यम् किङ्करवृत्ति - फलोपधानमित्यर्थः। अत्र शेषत्वं शाब्दम्। पारतन्त्र्य कैङ्कर्यञ्च स्वसम्बन्धनिषेधेन तादर्थ्यप्रार्थनया च व्यङ्ग्यमित्यनुसन्धेयम्।

**।। इति श्रीशुद्धसत्त्वरामानुजाचार्यविरचिते रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये द्वितीयपादे सप्रणवाष्टाक्षरसमर्थनं नाम द्वितीयाधिकरणम् समाप्तम्।।**

❀ ❀ ❀ ❀

---

१. नारा.उ.

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे

# मूलमन्त्रे पदत्रयक्रमसमर्थनं नाम

# तृतीयाधिकरणम्

## मू।। (३४) इदिल् मुदल् पदम् प्रणवम्

पूर्वत्र मूलमन्त्रस्य पदत्रयात्मकत्वं साधितम्। अथ तत्पदत्रयं क्रमेण व्याख्यातुं पदत्रयक्रमः समर्थ्यते। तत्र संशयः। मूलमन्त्रस्थपदत्रयस्य क्रमः सम्भवति न वेति। तदर्थं प्रणवस्य मन्त्रशेषापेक्षया प्राथम्यं सम्भवति न वेति। तदर्थं प्रणवस्य अक्षरत्रयात्मकत्वं सम्भवति न वेति। अक्षरत्रयस्य सर्ववेदसारार्थकत्वं सम्भवति न वेति च। तुरीयसंशयार्थमिदं विचार्यते। अकारादिवर्णत्रयस्य वेदत्रयादुद्धरणं सम्भवति न वेति।

## तत्र पूर्वपक्षः

मूलमन्त्रस्थ पदत्रयस्य क्रमेणोपपद्यते। वेदवाक्यानां तत्रत्यपदानामिव च क्रमस्य स्वाभाविकत्वेनऽमूलकत्वात्। स्यादेतत्। प्रणवस्य अभ्यर्हितत्वेन प्रथमोपादानमुपपद्यते। न चाप्रयोजकत्वम्। वेदस्थवाक्यपदसमुदायस्यैव स्वाध्यायाध्ययन विध्मध्यापितत्वेन **समिधो यजति** इत्यादि विधिक्रमस्य अनुष्ठानक्रमनियामकत्वेन सप्रयोजनत्ववत्, अभ्यर्हितत्वसूचकत्वेन प्रणवप्रथमोपादानप्रयोजनस्य सम्भवतः त्यागायोगात्। अभ्यर्हितत्वञ्च प्रणवस्य अनन्यार्हशेषवृत्त्यर्हत्वलक्षणस्वरूपपरतया, नमश्शब्दस्यापि अनन्यार्हत्वघटकान्यांश्य विशिष्योक्तिमुखेन तत्परतया, तस्य स्वरक्षणान्वयानर्हत्वरूपस्वरूपपरतया च **स्वरूपमुं स्वरूपानुरूपमान प्राप्यमुम्** इत्यनुगृहीतरीत्या नमश्शब्दनारायणशब्दयोः हेतुहेतुमद्भावापन्नार्थप्रतिपादकतया पदत्रयक्रमः उपपद्यत इति।

उच्यते। अस्तु, अभ्यर्हित्वस्य प्रथमोपादानम्। प्रकृते तु प्रणवस्य अभ्यर्हितत्वे मानाभावः। तस्य अकाराद्यात्मकत्वे मानाभावात्। स्वरादिसूत्रे

**स्वरादिराकृतिगणः** इत्युक्तिविवरणावसरे ओमिति अङ्गीकारे, ब्रह्मणि च इत्यव्ययरूपैकार्थशक्तैकपदत्वेन प्रणवस्य शाब्दिकैः पठिततया मूलमन्त्रस्थप्रणवस्य ब्रह्मवाचित्वेनाप्युपपत्तेः। न च विनिगमनाविरहः। अनेकार्थशक्ताऽनेकपदत्वेन वाक्यत्वकल्पनापेक्षया एकार्थशक्तैकपदत्वकल्पनस्य ज्यायस्त्वात्। नमश्शब्देऽपि नमनरूपैकार्थशक्तैकपदत्वकल्पनस्यैव तथात्वाच्च। नमसोऽखण्डत्वेऽपि मकारानुषङ्गकल्पनाविरहाच्च। अन्यथा प्रणवनमसोः वाक्यद्वयत्वकल्पनापत्तेश्च। नमसः फलसाधनपारतन्त्र्यरूपवाक्यद्वयत्वकल्पनाप्रसङ्गाच्च। **अस्मि** इति पदानुषङ्गप्रसङ्गाच्च। नारायणपदेऽपि मकारानुषङ्गप्रसङ्गात्। **स्याम्** इत्यध्याहारापत्तेश्च। मन्त्रस्य वाक्यत्रयत्व कल्पनापाताच्च। **म्- मः न स्याम्** इति तुरीयवाक्यकल्पनाप्रसङ्गाच्चा। तस्य वाक्यस्य पारतन्त्र्यद्वयनिषेध प्रार्थनापरत्वापाताच्च। **ओं नमो नारायणाय, नमोऽस्तु** इत्येकरूपक्रियासम्भवे, **अस्मि, स्याम्** इति विरूपक्रियाद्वयकल्पनायाः असम्भवाच्च। **म् - मः न स्याम्** इत्यापि विरूपक्रियापाताच्च। इत्थं द्वादशदूषणीप्रसङ्गेन **प्रत्यगानन्दम्** इत्यादि खण्डोक्ताकाराद्यात्मकत्वाभ्युपगमेन प्रणवस्य स्वरूपपरत्वस्य प्रमाणकार्यस्यापि अभ्युच्चयमात्रत्वाच्च। अतः भगवच्छब्दस्य अक्षरश्चतुष्टयात्मकत्वेन अर्थचतुष्टयपरत्वस्य प्रामाणिकत्वेऽपि, षाड्गुण्यपूर्तिपरत्वेन मत्वर्थीयान्तत्वे स्वारस्यवत् मूलमन्त्रस्थ पदत्रयस्य पदैकवाक्यत्व एव स्वारस्यम्।

न च पूर्वाधिकरणे वाक्यत्रयत्वसमर्थनविरोधः। प्रणवस्य अक्षरतयात्मकत्वं विनापृथग्वाक्यत्वासिद्धेरिति वाच्यम्। एतदधिकरणवुत्पाद्यमक्षरत्रयात्मकत्वमुपजीव्य, पूर्वाधिकरणे सप्रणवस्यैव मूलमन्त्रस्य अष्टाक्षरत्वपदत्रयत्वयोः समर्थितत्वात्।

इत्थं प्रणवनमसोः स्वरूपपरत्वासम्भवेन मूलमन्त्रस्थ पदत्रयस्य हेतुहेतुमद्भावापन्नाऽर्थपरत्वाभावात् न तत् क्रम उपपद्यते। अस्तु वा प्रणवस्य त्र्यात्मकत्वम्, तथापि नाभ्यर्हिततत्वसिद्धिः। न च [१]**भूरिति ऋग्वेदादजायत** इत्यादिश्रुतिबलात् [२]**अकारञ्चाप्युकारञ्च** इत्यादि स्मृतिबलाच्च अकारादिवर्णत्रयस्य वेदत्रयोद्धृतत्वे **ओङ्कारश्चाथ शब्दश्च** [३]**ओङ्कारप्रभवा वेदाः** इत्याद्यर्थवादात् तत्सिद्धिरिति वाच्यम्। अद्रव्यस्य अकारादिवर्णत्रयस्य अद्रव्याद्वेदवाक्यात्, मृदादिभ्यो

१. अथ.वे.गो.ब्रा.१-६ २. मनु.स्मृ.२-७६
३. ध्यानबिन्दूपनिषत् -१५

घटादेरिव उत्पत्त्यसम्भवेन श्रुतिस्मृत्योः कूपोत्खननादिवाक्यवदसदर्थवादमात्रत्वे अनभ्यर्हितत्वात्।

**न च वेदत्रयस्य** अकाराद्यात्मना परिणामासम्भवेऽपि चतुर्मुखस्य वेदत्रयाविर्भावानन्तरं व्याहृतित्रयस्य तदाविभावानन्तरं प्रणवस्य च आविर्भावः सम्भवतीति **वाच्यम्। तथा सति व्याहृतित्रयस्य प्रणवस्य च** वेदान्तर्भावभङ्गप्रसङ्गात्। सकृदाविर्भूतस्य पुनराविर्भावोक्तौ प्रयोजनाभावाच्च। **यद्वेदादौ स्वरः प्रोक्तः** इत्यादि श्रुतिस्मृतिबलेन चतुर्मुखस्यापि प्रणवाविर्भावानन्तरमेववेदाविर्भावस्य वक्तव्यत्वाच्च।

न च विधिं विना स्तुत्यालम्बनञ्च विना अर्थवादत्वासम्भवः। [1]**यमुक्त्वा मुच्यते योगी** इत्यादि सार्थकप्रणवानुसन्धानफलविधिशेषतया **प्रत्यगानन्दम्** इत्यर्थ वादेन ब्रह्मपरत्वेन प्रशस्तस्य प्रणवस्य [2]**तानेकधासमभरत्** इत्यकाराद्यात्मकत्वोक्तेः, वर्णान्तरसमानाकृतिभूतसन्ध्यक्षरैकदेशपरत्वसम्भवेन अर्थत्रयशक्तस्वतन्त्रवर्णत्रयरूपत्वे मानाभावात्।

न च - भूरित्यादेः अर्थवादत्वेऽपि प्रणवप्रशंसासिद्धिः अविकलेति वाच्यम्। एतावता प्रणवोच्चारणस्य बलवदनिष्टाऽननुबन्धीष्टसाधनत्वलाभेऽपि प्रणवस्य वेदादपि अभ्यर्हितत्वे मानाभावात्।

न च - दधिपूर्णपात्रत्रयादुधृतस्य नवनीतस्येव वेदत्रयादुद्धृतस्य प्रणवस्य वेदसारत्वसिद्धिरितिवाच्यम्। तक्रादिमिश्रदध्यपेक्षयानवनीतोत्कर्षस्य प्रत्यक्षत्वेन तस्य तदपेक्षया सारत्वसम्भवेऽपि, प्रणवस्य वेदत्रयादुद्धरणोक्तिमात्रेण सारत्वाऽसिद्धेः। असारांशस्यापि उद्धरणसम्भवात्। मूर्तस्यैव मूर्तादुद्धरणस्य वक्तव्यतया, अमूर्तवेदत्रयादमूर्तप्रणवोद्धरणस्य वेदत्रयान्तर्गतवर्णस्य पृथक्ज्ञानरूपत्वेन **इषेत्वा** इत्याद्यन्तर्गतेकारादेरित पृथक्ज्ञानमात्रेण प्रणवस्य सारत्वासम्भवाच्च। यद्यपि मूलमन्त्रे प्रथमोपादानबलादेव प्रणवस्य सर्वशब्दाभ्यर्हितत्वं युक्तं वक्तुम्।

तथापि, तावतापि प्रणवोच्चारणमात्रेण अतिशयिता अदृष्टलम्भकत्वरूपस्य सर्ववेदापेक्षया प्राशस्त्यस्य सिद्धत्वेऽपि व्याख्यानक्रमनियामकप्रथमोपादानप्रयोजकप्राशस्त्याऽसिद्धिः। प्रथमोपादानस्य प्राशस्त्यप्रयोजकत्वम्, वेदे पूर्वपूर्ववाक्यस्य

---

१,२. नारायणोपनिषत्

उत्तरोत्तरवाक्यापेक्षया अभ्यर्हितत्वस्य वैदिकसम्प्रदायसिद्धत्वाभावात् बाधितञ्च। इत्थं प्रणवप्राथम्ये मानाभावात् पदत्रयक्रमेणोपपद्यत इति।

## अत्रायं सिद्धान्तः

यदुक्तम्-प्रणवस्याक्षरत्रयात्मकत्वे मानाभावः। ब्रह्मरूपैकार्थशक्तैकपदत्वस्यापि सम्भवात्। द्वादशदूषणी परिहाराय मूलमन्त्रस्य विभक्त्यन्तरूपपदत्रयात्मकत्वस्यैव न्याप्यत्वाच्च। अतः भगवच्छब्दस्य **अर्थचतुष्टयबोधकवर्णचतुष्टयात्मकतया प्रमाणसिद्धस्यापि, षाड्गुण्यपरतया मत्वर्थीयान्तशब्दरूपत्वे स्वारस्यवत्, मूलमन्त्र**स्यापि अर्थत्रयशक्तपदत्रयरूपत्व एवं स्वारस्यमिति।

तत्र मानाभावः तावदयुक्तः। अथर्वणोपनिषदि मूलमन्त्रोद्धारप्रकरणे **प्रत्यगानन्दम्** इत्यादि खण्डे **अकारोकारमकार इति, तानेकधासमभरत्तदेतदोमिति** इति प्रमाणस्य जागरूकत्वात्। न च एकार्थशक्तैकपदत्वेनाप्युपपत्तिः। तटस्थप्रमाणभूतशाब्दिकव्यवहारापेक्षया मन्त्रोद्धारप्रकरणस्थवचनस्यैव मूलमन्त्रस्थप्रणवस्वरूपनिर्णायकप्रमाणत्वेन ग्राह्यत्वात्। न हि वचनविरोधे न्यायः प्रभवतीति न्यायेन एकार्थशक्तैक पदत्वकल्पनालाघवादिन्यायानामनादरणीयत्वात्।

किञ्च मूलमन्त्रस्य प्रणवस्य ब्रह्ममात्रपरत्वे तद्वैयर्थ्यम् निरतिशयबृहत्त्वरूपब्रह्मत्वस्य प्रवृत्तिनिमित्तत्वे तस्य नारायणपदयोगवृत्त्या विशिष्यसिद्ध्या, देवताविशेषत्वस्य निमित्तत्वे तस्य प्रसिद्धरूढ्यासिद्ध्या ओतत्वादिरूपव्युत्पत्त्यन्तरसिद्धार्थस्य निमित्तत्वे तस्यापि नारायणपदव्युत्पत्तिबलेन सिद्ध्या च वक्तव्यार्थविशेषाभावात्।

अपि च - प्रणवनारायणपदयोः पदैकवाक्यत्वे **नम ओम् नारायणाय** इति मन्त्रविन्यासापत्तिः। प्रणवनमसोः विवरणविवरणीभावाऽनभ्युपगमेन, अस्मद्रीत्या क्रमोपपादनाऽसम्भवात्। प्रणवनमसोः शेषत्वपारतन्त्र्यरूप स्वरूपपरत्वाभावेन अस्मद्रीत्या प्रणवनमसोः नारायणपदस्य च हेतुहेतु मद्भावापन्नार्थकत्वाभावेन, नारायणपदेचारम्भोपपादनासम्भवाच्च। त्वद्रीत्या प्रणवस्य नारायणविशेषणसमर्पकतया सामानाधिकरण्येन बोधाय **ओं नमो नारायणाय** इत्येव विन्यासौचित्याच्च।

अन्यच्च-एवं सति नमश्शब्दस्यापि **नारायणाय नमः** इत्येवं चारम्यापत्तिः दुर्वारा। नमश्शब्दबोध्यनमनक्रियाया नारायणकत्वेन तदन्विततत्वात्।

इतरच्च पूर्वोक्तद्वादशदूषण्यां प्रणवस्यैकार्थशक्तैकपदत्वकल्पने लाघवमिति, प्रथमदूषणं तावदयुक्तम्। परमपुरुषार्थहेतुभूताऽर्थपञ्चकज्ञानजनकत्वलक्षण-मन्त्रशब्दयोगार्थपूर्तिलम्भकतया मन्त्रोद्धारवचनसिद्धवाक्यत्रयाऽभ्युपगमस्यैव ज्याय-स्त्वात्। एतेन नमश्शब्दस्यापि एकार्थशक्तैकपदत्वकल्पने लाघवमिति द्वितीयदूषण-मपि अपास्तम्। **न हि वचनविरोध** इति न्यायविरोधात्।

किञ्च **अहमपि न मम, भगवत एवाहमस्मि** इत्यादि विवरणश्रुति-विरोधः। अत एव मकारानुषङ्गरूपतृतीयदूषणमपि न युक्तम् प्रामाणिकत्वात्।

अपि च **सर्वमष्टाक्षरान्तरस्थम्** इति वचनेन प्राप्यस्य ब्रह्मणो रूपम् इत्याद्यवगतार्थपञ्चकप्रतिपादकत्वावश्यम्भावेन मूलमन्त्रस्य प्रणवस्यत्र्यात्मकत्वमेव न्याय्यम्। अत एव प्रणवनमसोः वाक्यद्वयत्वकल्पनापत्तिः अस्मन्मत इति, तुरीयदूषणमपि प्रत्युक्तम्। सर्ववेदसङ्ग्रहत्वाय तस्यावश्यकत्वात्। वाक्यत्रयत्वाभावे **मन्त्राणां परमोमन्त्रः** इति मन्त्रशब्दयोगार्थपूर्तिवचनविरोधः। अत एव फलसाधन-पारतन्त्र्यरूपार्थद्वयकल्पनापत्तिः इति पञ्चमदूषणमपि प्रामाणिकत्वात् प्रत्युक्तम्।

इतरच्च वाक्यत्रयत्वेन अर्थपञ्चकप्रतिपादकत्वाभावे मूलमन्त्रसमाख्या-विरोधः। अत एव **अस्मि** इति पदानुषङ्गप्रसङ्ग इति षष्ठदोषोऽपि प्रत्युक्तः।

एतच्च **यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः** इति श्रुत्या वेदाद्यन्ताऽनुसन्धानस्य प्रणवप्रशंसार्थमुक्तस्य **दृष्टो सम्भवति** इति न्यायेन वेदाध्य-यनारम्भसमाप्त्योः नियमादृष्टानुविद्धसर्ववेदपरमतात्पर्य विषयीभूतार्थानुसन्धान-रूपदृष्टप्रयोजनसम्भवे तत्त्यागोन युज्यते। तत एव नारायणपदेऽपि मकारानुषङ्गो न सप्तमो दोषः। न्यायानुगृहीत श्रुतिसिद्धत्वात्। इदञ्च –

**ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा।**
**स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यते।।**

इति वचने (ब्रह्मणः) वेदस्य ( आदौ) अध्ययनारम्भे (अन्ते) अध्ययनसमाप्तौ

च (सर्वदा) न केवलम् एकशाखाध्ययनारम्भसमाप्त्योः। अपि तु तत्तत्पञ्चाशत् तत्तद्नुवाकतत्तद्दशकतत्तत्प्रश्नाध्ययनारम्भसमाप्तिकाले सर्वस्मिन् (पूर्वम्) एक-वेदाध्ययनारम्भवकाले (अनोङ्कृतम्) **ओम्** इति सङ्ग्रहेणाऽऽननुसंहितार्थकम्, (ब्रह्म) वेदः, (स्रवति) वेदस्य विस्तृतत्वेन अतिविलम्बित भिन्नभिन्नज्ञानविषयार्थकं भवति। (परस्तात्) एकवेदाध्ययनसमाप्तिकाले, अनोङ्कृतं ब्रह्म (विशीर्यते) पूर्ववत्। इत्येवम् अर्थस्य विवक्षिततत्वेन प्रणवस्य अक्षरत्रयात्मकत्वं सर्ववेदसारत्वञ्च सिद्धम्।

प्रणवोच्चारणं विना वेदाध्ययनारम्भसमाप्त्योः प्रत्यवायकरत्वाङ्गीकारे दृष्टसम्भवन्यायविरोधात्। न च **वेदार्थज्ञानं विना प्रणवोच्चारणमध्ययनारम्भसमाप्त्योः सम्प्रदायसिद्धं भज्येत** इति वाच्यम्। **हरिरोम्** इति हरिशब्द-विशिष्टप्रणवोच्चारणस्यैवाध्येतृसम्प्रदायसिद्धत्वेन, तत्र [1]**वेदैश्च सर्वैरहमेव वेद्यः** [2]**हरिः परायणम् परम्** इत्याद्युक्तरीत्या **हरिरेव सर्ववेदप्रतिपाद्यः** इत्यभिप्रायेण [3]**मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते, अध्येतारश्च सिद्धार्था यथा स्युः** इति महाभाष्यवचनप्रमाण्यात् [4]**स्मृतो यच्छति शोभनम्** इत्युक्तरीत्या मङ्गलार्थं हरिनाम्ना भगवत्स्मरणवत्, **प्रणवार्थ एव सर्ववेदार्थः** इत्यभिप्रायेण मङ्गलार्थं ज्ञातृभिः सङ्ग्रहेण सर्ववेदसारार्थानुसन्धानसम्भवेऽपि बालैरपि हितैषिवचनानुसारेण सवाग्विसर्गोजनताऽघविप्लवः इत्याद्युक्तरीत्या मङ्गलार्थं हरिनामोच्चारणवदेव, सर्ववेदार्थपरतया त्रयीसारस्य प्रणवस्यापि उच्चारणोपपत्तेः। **एतेन स्याम्** इत्यध्याहारापत्तिः इति अष्टमदोषोऽपि अपास्तः।

अतश्च **अकारो वै सर्ववाक्** इत् तादात्म्यं मूलमूलिभावकृतम्। अत एव **तस्य प्रकृतिलीनस्य** इति प्रणवप्रकृतित्वमकारस्य श्रूयते। **ओङ्कारप्रभवा वेदाः प्रणवाद्यास्तथा वेदा** इत्यादि च स्मर्यते। सर्ववेदमूलभूतप्रणवप्रकृतिभूतस्य सर्ववाङ्मूलत्वोपपत्तेः। प्रणवाकारयोः मूलत्वञ्च व्याख्येयत्वमेव। प्रणववेदयोः अकारप्रणवयोश्च अद्रव्ययोः उपादानोपादेयभावाऽसम्भवेन मृद्घटयोरिव मुख्या-तादात्म्यासम्भवात्। तस्मात् अकारो वै सर्वा वाक्, वाङ्मयं प्रणवं सर्वमिति सामानाधिकरण्यम्, एकार्थत्वनिबन्धनाऽभेदोपचारादेव।

---

१. भ.गी.१५-१५ २,३. महाभाष्यम् ४. विष्णु.पु.१-७-७८

अत एव [1]**ओङ्कारप्रभवं सर्वं जगत् स्थावरजङ्गमम्** इत्यत्र [2]**वेदशब्देश्च एवादौ देवादीनाञ्चकार सः** इत्युक्तरीत्या अर्थानुसन्धानद्वारकमेव प्रभवत्वं विवक्षितम्। प्रणवार्थं बुद्ध्वा तस्य विस्तरेण बुबोधयिषया वेदस्य प्रवृत्तत्वात्।

इत्थं व्याख्यानव्याख्येयभावस्य अभिप्रेतत्वादेव **तस्मात् प्रणवमभ्यसेत्** इति हेतुहेतुमद्भावोऽपि युज्यते। व्याख्येयार्थ मननस्यैव व्याख्यानफलत्वेन **प्रणवस्य सर्वापेक्षया व्याख्येयत्वात्**। तदर्थ एव सदा मन्तव्य इति हि वक्तुं युक्तम् अन्यथा प्रणवस्वरूपमात्रोच्चारणावृत्तिविवक्षायां **वाङ्मयं प्रणवं सर्वम्** इत्युक्त **तादात्म्यस्य तस्मात्** इति हेतुत्वेन निर्देशस्य चानुपपत्तेः। एतेन मन्त्रस्य वाक्यत्रयत्वकल्पना पत्तिरिति नवमदोषोऽपि निरस्तः।

> [3]**समस्तशब्दमूलत्वादकारस्य स्वभावतः।**
> **समस्तवाच्यमूलत्वाद्ब्रह्मणोऽपि स्वभावतः।**
> **वाच्यवाचकसम्बन्धः तयोरर्थात्प्रतीयते।।**

इति वचने अकारस्य समस्तशब्दमूलत्वलक्षणात् स्वभावात्, समस्तवाच्यमूलत्वलक्षणात् ब्रह्मणः स्वभावादपि तयोः अकारब्रह्मणोः प्रसिद्धो वाच्यवाचकभावः वस्तुस्वभावात् प्रतीयत इति स्वभावविशेषेण सम्बन्धशेषस्य प्रतीयमानत्वं साध्यते। अत्र स्वभावद्वयेन वाच्यवाचकभावसम्बन्धः प्रतीतोभवतीति सिद्धवत् उक्तिः अनुमानस्य सार्वजनीनत्वज्ञापनाय। अत्र **समस्तशब्दमूलत्वात्** इत्यनेन, आकारस्य व्याख्यानस्य व्याख्येयार्थनिर्णयार्थत्वेन सर्ववेदान्तसारार्थत्वं, ब्रह्मणोऽपि सर्वकारणत्वं जन्मादिसूत्रे जगत्कारणत्वस्य ब्रह्मत्वरूपसर्वोत्कर्षज्ञापकत्वेन निर्देशात् **समस्तवाच्यमूलत्वात्** इत्यनेन विवक्षितम्। **ब्रह्मणः** इति पदम् **वेदेभूरिप्रयोगाच्च** इत्यादि प्रमाणानुसारेण भगवत्परम्। तथा च अकारस्य सर्वोत्कृष्टार्थकत्वात्, नारायणस्य सर्वोत्कृष्टस्वरूपत्वात् अकारो नारायण वाचकः इति लभ्यत इति वाक्यार्थः।

इत्थमस्मिन् वचने समस्तशब्दमूलत्वस्य निर्देशात् सर्ववेदसङ्ग्रहस्य प्रणवस्य अकाराद्यक्षरत्रयत्मकत्वं सर्ववेदसारत्वञ्च सिद्धम्। एतेन तुरीयवाक्यकल्पनापत्तिरिति दशमदोषोऽपि दूरीकृतः।

---

१. ध्यानबिन्दूपनिषत् २,३. विष्णु.पु.१-५-६३

**यथा स्थातुं योग्यः, तथा स्याम्** इत्युक्तौ यथास्थातुमयोग्यस्तथा न स्याम् इत्यस्यापि अवश्यं वक्तव्यत्वात्।

अपरञ्च **भूरितिऋग्वेदादजायत** इत्यादि श्रुतौ **ऋग्भिरेतं यजुभिरन्तरिक्षं सामभिब्रह्मलोकमुन्नीयते** इति वेदान्तप्रक्रियया ऋग्यजुस्साममुखेन भूर्भुवस्स्व-र्लोकानां प्राप्यत्वेन प्रधानतयाव्याहृतित्रयस्य वेदत्रयापेक्षया सारत्वेनाविर्भावमभिधाय, **मकारार्थं** निष्कृष्टजीवसामान्यस्वरूपापेक्षया लुप्तचतुर्थ्यन्ताकारेण निरुपाधिक-रक्षकत्वेनतादृशशेषित्वेन च भगवतः प्रतिपादनेन साक्षात्कारमप्राप्यतया भगवत्स्व-रूपप्रतिपादकस्य प्रणवस्यैव अक्षरत्रयात्मकस्य व्याहृतित्रयापेक्षयपि सारत्वेनाऽ-विर्भावमभिधाय, **संहितायाम्** इत्यनुशासनानुसारेण सन्धिविवक्षया एकाक्षरत्वमपि अभिहितम्।

इदञ्च वाक्यम् **अकारञ्चाप्युकारञ्च** इत्यादिस्मृत्योप बृंहितम्। (निरबृहत्) सारत्वेनप्राचीकशदित्यर्थः । **भूर्भुवः स्वरितीति च** इति एकैकस्मात् वेदात् एकैकव्याहृतेः सारत्वेनाविर्भावं सूचयितुम् इति शब्दावृत्तिः। तथा च त्रिवारमिति शब्दमनुषज्य, भूरिति, भुव इति, सुवरिति च वेदत्रयन्निरबृहदित्यर्थः। एतेन तुरीयवाक्यस्य पाठतन्त्रद्वयनिवृत्तिप्रार्थनाद्वयपरत्वापत्तिरित्येकादशदूषणमपि अपास्तम्।

प्रणवेन भगवतो जीवापेक्षया रक्षकत्वशेषित्वोक्त्या नमश्शब्दे सम्बन्ध-सामान्यषष्ठीश्रुत्या स्वरक्षकत्वस्वशेषित्वरूपसम्बन्धद्वयस्यापि निषेध्यतया सम्बन्ध-द्वयाऽनर्हत्वोक्तौ, तदुभयनिवृत्तिप्रार्थनायाः अपि दाढर्यार्थम् अवश्यवक्तव्यत्वाच्च। दूषणान्तरञ्च –

**आद्यन्तु त्र्यक्षरं ब्रह्म त्रयी यत्र प्रतिष्ठिता।**
**स गुह्योन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित्।।**

इति स्मृतिवचने अक्षरत्रयात्मकप्रणवरूपवेदस्य व्याख्येयर्थनिर्णयविश्रान्तत्वं व्याख्याने अभिप्रेत्य, त्रयीप्रतिष्ठात्वेन हेतुना व्याख्येयत्वलक्षणाद्यत्वोक्त्या **त्रिवृत् रूपेण वर्तते** इति त्रिवृत् त्रिरूप इत्यर्थः। (सः) सर्ववेदप्रतिष्ठत्वेन श्रुतः (त्रिवृद्वेदः) प्रणवरूपो वेदः (अन्यः गुह्यः) लोकविलक्षणो गुह्यः, इति सर्वगुह्यतमत्वोक्त्या प्रणवार्थविदः सर्ववेदार्थवित्त्वोक्त्या च प्रणवस्य सर्ववेदसारार्थसङ्ग्रहत्वं स्पष्टम्।

इत्थञ्च - विरूपक्रियाद्वयाप्रवृत्तिः विधिनिषेधयोः इति द्विविधं द्वादशदूषणमपिदूरोत्सारितम्। दूषणान्तरञ्च। **आयनारायणाय नमः** इति उपपदविभक्त्याश्रयणेन पदैकवाक्यत्वाभ्युपगमे, अर्थपञ्चकपरत्वाभावेन सर्ववेदसारसङ्ग्रहत्वभङ्गप्रसङ्गात्, व्यत्यासद्वयेन मन्त्रविन्यासापत्तेः, विभक्तिवैयर्थ्यापत्तेः **आयैव नमः** इति अनन्वयेन पदैकवाक्यत्वे सति उकाराऽनन्वयापत्तेः, **भगवत** एवाहमस्मि इत्यादि श्रौतविवरणविरोधापत्तेश्च द्विविधविरूपक्रियाद्वयाऽवश्यम्भावात्।

तस्मात् भगवच्छब्दे षाड्गुण्यपूर्तिरूपप्रसिद्धार्थस्यापि वाचनिकत्वेन अक्षरचतुष्टयात्मकतया अप्रसिद्धार्थान्तरपरत्वस्य अभ्युच्चयमात्रत्वेऽपि प्रणवे अक्षरत्रयात्मकस्यैव वाचनिकतया अनन्यार्हशेषत्वरूपस्वरूपपरत्वस्यैव प्रसिद्धार्थतया च अभ्युच्चयेन अर्थान्तरपरत्वं न मूलमन्त्रस्थप्रणवस्य मूलमन्त्रस्यचेति सिद्धम्। अत एव मूलमन्त्रस्थयोजनाभेदानां वाचविकत्वेऽपि न दोषः। मन्त्रोद्धारश्रुतिप्राबल्येन मूलमन्त्रसमाख्यादिबलेन च वाक्यत्रयाक्षरत्रयस्यैव ज्यायस्त्वात्।

अत एव **भूरितिऋग्वेदादजायत** इत्यादौ अर्थवादत्वमनवकाशात् पराहतम्। वेदव्याहृतिप्रणवानां स्वरूपपर्यालोचनेन सारसारतरसारतमत्वाविर्भावस्य विवक्षितत्वात्। प्रणवस्य वर्णान्तरसमानाकृति भूतवर्णैकदेशानादाय त्र्यात्मकत्वञ्च वर्णान्तराव्येवोपादाय, श्रुतिस्मृतिषु सम्भरणोक्त्या विरुद्धम्। अकाराद्यर्थपरश्रुतिस्मृतिविरुद्धञ्च। प्रणवस्य सारत्वोक्तिरुच्चारणमात्रेण अतिशयिताऽदृष्टासाधनत्वपरेत्यन्यथासिद्धारपि अर्थपञ्चकप्रतिपादनमुखेन परमपुरुषार्थोपयोगितया दृष्टार्थत्वसम्भवेन दूरोत्सारिता।

अत एव पात्रत्रयोद्धृतनवनीतदृष्टान्तोऽपि उपपद्यते। नवनीतोद्धर्तुः नवनीते सारत्वानुसन्धानसद्भावेन तद्दृष्टान्तोक्त्या **त्रयो वर्णा अजायन्त वेदत्रयान्निरबृहत्** इत्यादेः प्रणवे वेदसारत्वाविर्भावपरत्वलाभात्, वेदवाक्यक्रमस्य दृष्टाऽसम्भवेन केवलादृष्टार्थत्वसम्भवेऽपि, मूलमन्त्रस्थपदक्रमस्य दृष्टार्थत्वसम्भवेन तत्र प्रणवस्य प्रथमोपादानं व्याख्यानक्रमनियामकाभ्यार्हितत्वसाधकमेव। अत एव प्रथमोपादनस्य अभ्यर्हितत्वप्रयोजकत्वमपि सम्भवन्यायेनाऽबाधितम्।

इत्थं प्रणवप्राथम्यस्य बहुप्रमाणोपपत्तिसिद्धत्वात्, पदत्रयक्रम उपपद्यत एव। न तु केवलस्वाभाविक इति सिद्धम्।

इदञ्चाधिकरणं सूत्रचतुष्टयात्मकम्। तत्राद्यं सूत्रम् (इतिलित्यादि) (इतिल्) तिरुमन्त्रत्तिल्। **पद्यते - गम्यते, अनेन इति पदम्** (मुदल् पदम्) प्रथमवाक्यमित्यर्थः। प्रणवरूपमूलार्थज्ञानेसत्येव **मन्त्रशेषरूपविवरणप्रवृत्तेः** वक्तव्यत्वादिति भावः। **प्रणवपदेन '** **प्रणवो धनुश्शरोह्यात्मा** इत्यादिवचने प्रणवस्य आत्मसमर्पणे करणमन्त्रत्वोक्त्या, त्र्यात्मकतया स्वरूपपरत्वं प्रत्यभिज्ञामुखेन सूचितम् **प्रणवाद्याः** इत्यादिवचनमपि अत्र प्रत्यभिज्ञाप्यते।

**मू।। (३५) इतु, अ एन्रुं, उ एन्रुम्, म् एन्रुम्, मून्रु तिरुवक्षरम्।**

इत्थं धर्मनिर्देशकपदेन वक्ष्यमाणहेतूपपादकसूचनमुखेन प्रथमवाक्यत्वरूपसाध्यं प्रतिज्ञाय हेतुमाह द्वितीयसूत्रेण (इतुवित्यादिना)। (इतु) प्रणव इत्यर्थः। यथा मकारस्तथा अकारउकारश्च वर्णान्तरम्। न तु सन्ध्यक्षरैकदेश इत्यर्थः। **प्रत्यगानन्दम्** इत्यादिखण्डे **भूरिति ऋग्वेदादजायत** इत्यादिखण्डे **भूरिति ऋग्वेदादजायत** इत्यादि वाक्ये च **अकार-उकार-मकार** इति वर्णान्तरयोरेव कण्ठोक्तेः मकारसाहचर्यात् **तानेकधासमभरत्** इति वर्णान्तरयोः एव सन्धिविवक्षया **समर्पणश्रवणाच्चेति** भावः। (मून्रु) इति नत्वेकार्थशक्ताऽव्ययरूपैकाक्षरमित्यर्थः। तटस्थशाब्दिकवाक्यात् मन्त्रोद्धारवाक्यस्य बलीयस्त्वादिति भावः। (तिरु) इति मन्त्रोद्धारश्रुतिसिद्धत्वेन पूज्यत्वं विवक्षितम्।

यद्यपि इदं सूत्रद्वयमज्ञातज्ञापनपरमिति वक्तुं शक्यम् । तथापि सूत्राणां न्यायनिबन्धनत्वेन उपदेशज्ञापनपरत्वाभावात् सिद्धार्थानुवादे प्रयोजनाभावात्, (नारायणपदत्तुक्कु सङ्ग्रहयिरुक्कैयाले) इति रीत्या पूर्वोत्तरसूत्रेषु न्यायकण्ठोक्तेः, (चतुर्थि एरिनपडियेन्नेन्निल्) इत्यादिरीत्या आक्षेपसमाधानदर्शनात्, सर्वत्रन्यायसूचकसद्भावात्, अत्रापि तुरीयसूत्रे सकलवेदसारत्वरूप हेतुकण्ठोक्तेश्च, पृथक् साध्यनिर्देशरूपमिदं सूत्रद्वयमपि पृथङ्न्यायपरमेव इत्यनुसन्धेयम्। अथ हेतोः अप्रयोजकत्वं तुरीयसूत्रेण परिहर्तुम्, अकारादिवर्णत्रयस्य वेदत्रयादुद्धृतत्वमाहतृतीयसूत्रेण (मून्रित्यादिना) ।

**मू।। (३६) मून्रुतालियले तयिरै निरैत्तुक्केडैन्दु वेण्णेय्तिरट्टिणार्पोले, मून्रुवेदत्तिलुम् मून्रक्षरत्तैयुमेडुत्ततु।**

---

१. ध्यानबिन्दूपनिषत् - १

(तालि) महाकुम्भः। (मून्रु तालियिले) **इत्यस्य दार्ष्टान्तिकम्** (मून्रुवेदत्तिलुम्) इत् वक्ष्यते। (तयिरै) इत्यस्य धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टय-तत्साधनङ्गतैः इति **दार्ष्टान्तिकमभिप्रेतम्**। (निरैत्तु) इत्यनेन कार्त्स्न्येन आपातप्रतीतिः विवक्षिता। (कडैन्दु) इत्यनेन विचारो विवक्षितः। **वेण्णयै** इत्यस्य (मून्रक्षरत्तैयुम्) इति दार्ष्टान्तिकं वक्ष्यते। (तिरट्टुमापोले) इत्युक्त पिण्डीकरणस्य - (एडुत्ततु) इति पदविवक्षितम्, **वेदत्रयापेक्षया** सारार्थत्वेन संहत्याऽनुसन्धानं, दार्ष्टान्तिकत्वेनाभिप्रेतम्।

(**मून्रुतालियिले**) इतिवदनुक्त्वा, (मून्रुवेदत्तिलुम् मून्रक्षरत्तैयुम्) इति च शब्दद्वयप्रयोगमहिम्ना, **दृष्टान्ते**, **पात्रत्रयस्य** साराऽसारमिश्रभिन्नदधिमत्त्वं प्रत्येकमसाराऽसङ्कीर्णसारभूतभिन्नभिन्ननवनीतत्वञ्चास्ति। दार्ष्टान्तिके तु **भूरिति ऋग्वेदादजायत** इत्यादि श्रुतिबलेन व्याहृतित्रयस्य, प्रत्येकम् **ऋग्भिरेतम्** इत्यादि वचनसिद्धवेदत्रयप्राप्यत्वलक्षणसारत्ववत्, वेदत्रयस्य प्रत्येकं धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयतत्साधनरूपं सारासारमिश्रार्थकस्यापि, प्रत्येकमकाराद्येकैकवर्णापेक्षया असारार्थकत्वेन अनुसन्धाने अकारादेश्च प्रत्येकम् ऋग्वेदाद्यपेक्षया सारार्थत्वाऽनुसन्धाने च मानाभावेन अकारादिवर्णत्रयस्य समुदितवेषेणैव ऋग्वेदादि-प्रत्येकापेक्षया सारार्थत्वेन अनुसन्धानलक्षणमुद्धरणं सम्भवतीति सूच्यते।

यद्यपि, एवं सति (मून्रुवेदत्तिलुम्) इति वक्तुमयुक्तम्। ऋग्वेदादेः प्रत्येकमेव अकारादि समुदायापेक्षया असारार्थत्वात्। तथापि वेदेषु नैकस्यैव अकारादि समुदायापेक्षया असारार्थकत्वम्। किन्तु त्रयाणामपि प्रत्येकम् अकारादि समुदाया-पेक्षया असारार्थकत्वमित्यभिप्रायेण (मून्रु वेदत्तिलुम्) इत्यनुगृहीतमिति न दोषः।

यद्यपि वृत्तौ (अक्षरङ्गल् मून्रुम् अदै वेतोन्रुम्बडिपण्णि) इति क्रमेण आविर्भावस्य अनुगृहीतत्वात्, अक्षरत्रयमुम् (ओरो वेदत्तिनुडैयसारमाकसमुद्धृत-माकैयाले) इति प्रत्येकम् एकैकवेदस्यापि सारत्वावधित्वेनानुगृहीतत्वाच्च। सौत्रचकारद्विकारस्य निरुक्तार्थपरत्वाभावः शङ्कितुं शक्यते। तथापि **अकारो वै सर्वा वाक्** इति सर्ववेदसारत्वेन प्रमाणसिद्धस्याकारस्य, ऋग्वेदमात्रसारत्वानु-पपत्तेः। अवधारणमात्रस्योकारस्य यजुर्वेदसारत्वानुपपत्तेः, चेतनवाचिमकारमात्रस्य सामवेदसारतायाः शारीरकमीमांसा प्रतिषिद्धत्वात् [1]**वैदैश्च सर्वैरहमेव वेद्यः**

१. भ.गी.१५-१५

इति भगवत एव सर्ववेदवेद्यत्ववचनविरोधात् [१]**वेदानां सामवेदोऽस्मि** इति प्रतिपाद्यप्रतिपादकभावनिबन्धनसामानाधिकरण्यविरोधात्, सम्बन्धमात्रस्योकारार्थस्य विशेषणमात्रस्य मकारार्थस्य च वस्तुत्वस्यैव दुर्लभतया तयोः एकैकवेदसारत्वासम्भवात्, ब्रह्मस्वरूपनिरूप्ययोः तयोः ब्रह्मस्वरूपज्ञानान्तरेण दुर्ज्ञेयतया पार्थक्येन वेदसारत्वेन प्रतिपत्तुमशक्यत्वात्, सूत्रस्थचकारद्वयवैयर्थ्यापातात्, वार्तिकसूक्तौ **अदैवे** इति क्रमोक्तेः सारतमसारतरसाराणामकरोकारमकाराणामुद्धरणे कालिकक्रमपरत्वेन अन्यथासिद्धेः 'ओरो वेदत्तिनुडैय' इति प्रत्येकवेदसम्बन्धोक्तेश्च अक्षरत्रयस्यापि प्रत्येकमेकैक वेदसारांशवत्त्वज्ञापनमात्र परत्वात्, वेदान्तसारभूतयोः उकारमकारयोः वेदान्तसारभूते अकारे लयासम्भवेन **तस्य प्रकृति लीनस्य** इति श्रुतिविरोधस्य दुष्परिहरत्वापाताच्च यथोक्तार्थ एव तात्पर्यमिति अनुसन्धेयम्।

ननु वेदत्रयादक्षरत्रयोद्धरणमयुक्तम्। **ऋचोयजूंषि सामानि** इत्यादि वचने वेदान्तरादपि सारार्थकत्वप्रतीतेः। किञ्च उद्धरणमपि न सारार्थकत्वेन अनुसन्धानम्। उच्चारणमात्रेण अतिशयितादृष्टसाधनत्वेन अन्यथासिद्धि सम्भवादिति शङ्काद्वयं परिहरति चतुर्थसूत्रेण (आकैयालित्यादिना)। **आकैयाल् इदु सकलवेदसारम्।**

(आकैयाल्) वेदत्रयादकाराद्यक्षरत्रयस्योद्धृतत्वात्। (इतु) प्रणवः। **सकलवेदसारम्** इत्यत्र सकलशब्देन प्रथमशङ्का व्यावृत्तिः। पुरुषार्थतत्साधनावबोधनांशे बुभुक्षूणां मुमुक्षुणाञ्च उपयोगाधिक्येन **भूरिति ऋग्वेदादजायत** इत्यादौ वेदत्रयस्य पृथगुपादानेऽपि, **यमृषयस्त्रयी वेदो विदुः** इत्यादिवत् श्रुतिस्मृत्योः वेदत्रयादक्षरत्रयोद्धारवचनमुप(पद्यते) लक्षणमिति भावः। (वेदसारम्) इत्यनेन वेदशब्देन द्वितीयशङ्कापरिहारः। वेदयतीति व्युत्पत्त्या आस्तिकाग्रेसरान् तत्त्वबुभुत्सून् प्रति स्वार्थबोधकत्वं वेदशब्दप्रवृत्तिनिमित्तम्। तादृशवेदानां सारमुत्कृष्टमित्यर्थः। [२]**तद्ज्ञानमज्ञानमतोऽन्यदुक्तम्** इति न्यायात् ज्ञानं प्रमा इत्युत्सर्गाच्च [३]**मायां न सेवे** इत्यादि **भक्त्या शास्त्राद्वेदिम जनार्दनम्** इत्यादि वचनाच्च। अत्र वेदत्वस्य विशेषणत्वविवक्षया सारतमार्थप्रतिपादकत्वं सारपदेन विवक्षितम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते रहस्यत्रयमीमांसाभाष्ये प्रथमाध्याये द्वितीयपादे मूलमन्त्रे पदत्रयक्रमसमर्थनं नाम तृतीयाधिकरणम् समाप्तम्।।**

---

१. भ.गी. २. विष्णु.पु.६-५-८७ ३. म.भा.उ.प.६८-५

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे
# मूलमन्त्रे अकारार्थसमर्थनं नाम
# चतुर्थाधिकरणम्

**मू।। (३८) इदिल्, अकारम् सकलशब्दत्तुक्कुम् कारणमाय्, नारायणपदत्तुक्कु सङ्ग्रहमायिरुक्कैयाले सकलजगत्तुक्कुम् कारणमाय् सर्वरक्षकनान एम्बेरुमानैच्चोल्लुकिरतु।**

इत्थं करिष्यमाणव्याख्यानोपोद्घाततया, मूलमन्त्रवाक्यार्थस्वरूपं तत्क्रमनियामकञ्च निरूपितम्। इदानीमुपपत्तिसिद्धेन प्राथम्येन प्रथमम् अकारो व्याख्यायते। तत्र संशयः - अकारस्य कारणत्वरक्षकत्वविष्णुत्वनिमित्तकत्वं सम्भवति न वेति। तदर्थं तस्य नारायणपदसङ्ग्रहत्वं सम्भवति न वेति। तदर्थं तस्य सकलशब्दकारणत्वं सम्भवति न वेति।

यद्यपि सकलाध्यात्मशास्त्रव्याख्येयत्वरूपसमस्तशब्दमूलकत्वात्मक सकलशब्दकारणत्वलक्षमं सर्ववेदसारत्वं पूर्वाधिकरणे व्युत्पादितम्। तथापि तत् व्याख्येयक्रमनियामकत्वेन पूर्वं व्युत्पादितम्। इदानीं तदेवकारणत्वनिमित्तकत्वे नियामकं सम्भवति न वेति विचार्यत इति न कृतकरत्वदोषः।

## तत्र पूर्वपक्षः

न तावत्, अकारस्य कारणत्वं रक्षकत्वञ्चोभयं निमित्तमिति युक्तम्। **अव-रक्षणे** इति धातुपाठानुसारेण योगवृत्त्या रक्षणस्य निमित्तत्वेऽपि, कारणत्वस्य निमित्तत्वे मानाभावात्। कारणत्वविशिष्टविषयतया प्रयोगप्रत्यययोः लोके वेदे च अदर्शनेन रूढिकल्पनायाः अनवकाशाच्च।

न च **अव-रक्षणगति हिंसादिषु** इति धातुपाठबलेन कारणत्वमपि योगवृत्तिनिमित्तम्। अत एव [१]**अकारार्थोविष्णुः जगदुदयरक्षाप्रलयकृत्** इति

---

१. अष्टश्लोकी

श्रीपराशरभट्टार्यैः अनुगृहीतमिति वाच्यम्। तथा सति रक्षकत्वस्य कारणत्वान्तर्भावेन कारणत्वं रक्षकत्वञ्च उभयं निमित्तमित्युक्तिभङ्गापत्तेः। अनुगृहीतञ्च श्रुतप्रकाशिकायाम् **स्थेमान्तर्भूतस्वर्गादिफलप्रदत्वस्य पृथगुक्तिरनपेक्षिता** इति।

किञ्च **गम्लृ-गतौ, हिसि-हिंसायाम्** इत्यादि धातु निष्पन्नगन्तुहिंसादिशब्दानमिव **अव-रक्षणगतिहिंसादिषु** इति धातुनिष्पन्नस्यापि अकारस्य गन्तृत्वादिविशेषधर्मनिमित्तकत्वमेव। न तु **संयोगहेतुरपरोऽपि दृष्टः नान्यो हेतुर्विद्यत ईशानाय** [1]**स कारणं करणाधिपाधिपः** इत्यादिहेतुकारणादीनामिव कारणत्वरूपसामान्यधर्मनिमित्तकत्वम्।

अपि च **सत्ताद्यर्थनिर्देशश्च उपलक्षणम्** इति शाब्दिकोक्तरीत्या धातूनामनेकार्थत्वेऽपि अर्थविशेषप्रसिद्धिप्राचुर्यानुसारेण तत्परत्वमेव युक्तम्। अत एव **धातुलीनमुपसर्ग इवार्थम्** इत्यर्थविशेषतात्पर्यग्राहकतया उपसर्गापेक्षा तान्त्रिकैरुक्ता।

एवञ्च **अवरक्षणगतिहिंसादिषु** इति पाठेऽपि रक्षणार्थ एव प्रसिद्धिप्राचुर्यात् अर्थद्वयाङ्गीकारे विलम्बिताविलम्बितवृत्तिद्वयविरोधः।

नापि - विष्णुत्वनिमित्तकत्वम्। विष्णुरक्षकत्वप्रसिद्धिनिबन्धनप्रयोगप्राचुर्येण **अ इति ब्रह्म, अकारो विष्णुवाचकः** इत्यादि वचनोपपत्तेः। न च - नारायणपदसङ्ग्रहत्वात् कारणत्वादिनिमित्तकत्वम्। हेतोरसिद्धेः अप्रयोजकत्वाच्च। अष्टाक्षरस्य मूलमन्त्रसमाख्याबलेन **सर्वमष्टाक्षरान्तस्थम्** इत्यादि वचनबलेन, अर्थपञ्चकपरत्वरूपापत्तिबलेन च सर्ववेदसङ्ग्रहत्ववत्, अकारस्य विशिष्यनारायणपदसङ्ग्रहत्वे मानाभावात्। तदेकार्थ्येन तत्सङ्ग्रहत्वे वैपरीत्यापत्तेः। अकारोपात्तरक्षकत्वापेक्षया नारायणपदे तत्पुरुषबहुव्रीहिसिद्धसर्वाधारत्वसर्वव्यापकत्वयोः विशेषधर्मत्वाभावाच्च। सर्वज्ञत्वसर्वशक्तित्वादिवत् कारणत्वस्य निमित्तत्त्वाभावेऽपि अकारस्य प्रसिद्धरक्षकत्वमादायैव नारायणपदसङ्ग्रहत्वसम्भवाच्च। प्रसिद्धिबलादेव रक्षकत्वस्य निमित्तत्वसम्भवेन नारायणपदसङ्ग्रहतया रक्षकत्वनिमित्तकत्वोक्त्यसम्भवाच्च। सङ्ग्रहविस्तरपदयोः एकनिमित्तकत्वे पौनरुक्त्यापत्त्या, नारायणपदसङ्ग्रहत्वस्य विष्णुत्वनिमित्तकत्वप्रयोजकत्वोक्त्यसम्भवाच्च।

---

१.श्वेता.उ.६-९

नापि - सकलशब्दकारणत्वात् अकारस्य कारणत्वादिनिमित्तकत्वमिति वक्तुं शक्यम्। शब्दत्वाच्छब्दत्वनिमित्तकत्वमितिवत्, कारणत्वात् कारणत्वनिमित्तकत्वमित्यस्योपहारस्य त्वात्।

शब्दार्थयोः वाच्यवाचकभावप्रयोजकसाजात्यस्य अनुगताऽनतिप्रसक्तस्य औत्सर्गिकस्य वा क्वाप्यदर्शनेन दुर्वचत्वेन च **कारणीभूतशब्दः कारणीभूतस्यार्थस्य वाचकः** इत्यस्यापि उक्त्यसम्भवपराहतत्वाच्च।

अथ स्यात्, स्वेतरसर्वशब्द कारणस्य अकारस्य स्वेतरसर्वार्थकारणब्रह्मवाचकत्वं न्याय्यम्। स्वस्वेतरसर्वशब्दार्थाभावकाले तु अकारब्रह्मणोः सत्वे न तयोः वाच्यवाचकभावाभावे अकारस्य अर्थशून्यत्वाऽनित्यत्वयोः अन्यतरप्रसङ्गात्। अकारस्य कदाचिदर्थशून्यत्वे **अथैवास्मि** इत्यादिषु नित्यवत् श्रुतस्याकारवाच्यापेक्षया आत्मनित्यशेषत्वस्य भङ्गापत्तौ, मूलमन्त्रस्य अप्रामाण्यप्रसङ्गात्। अत एव देवताधिकरणे नित्यस्य वेदस्य अनित्यार्थसंयोगादप्रमाण्यमाशङ्क्य, अर्थानां प्रवाहानादित्वेन परिहृतमिति।

मैवम्। अस्मत्सिद्धान्ते सत्कार्यवादाभ्युपगमेन सूक्ष्मचिदचितां महाप्रलयेऽपि सत्वेन स्वेतरसर्वार्थाभावकाले असत्त्वस्य ब्रह्मण्यसम्भवात्। सिद्धान्ते, अद्रव्यस्य शब्दसामान्यस्य आकाशावस्थारूपस्य अवस्थावत्वरूपकार्यत्वाभावेन प्रलयकाले असत्त्वोपपत्त्या स्वेतरसर्वशब्दाऽभावकाले असत्त्वस्य अकारे असम्भवाच्च। सिद्धान्ते सर्वशब्दानाम् आहङ्कारिकतया अकारस्य सर्वशब्दकारणत्वाऽनभ्युपगमाच्च।

न च, सकलाध्यात्मशास्त्रपरमतात्पर्यविषयीभूतयावदर्थप्रतिपादकत्व - रूपसकलशास्त्रव्याख्येयत्वात्मकसमस्तशब्दमूलत्वमेव, सकलशब्दकारणत्वमिति वाच्यम्। विकल्पासहत्वात्।

निरुक्तं सकलशब्दकारणत्वम्, किं नारायणपदसङ्ग्रहत्वमुखेन कारणत्वादिनिमितितलकत्वे हेतुः, उत साक्षात्। नाद्यः - व्याप्तिसामान्यप्रतिपादकयोः विष्णुवासुदेवशब्दयोः व्याप्तिविशेषप्रतिपादकनारायणशब्दसङ्ग्रहत्ववत् अकारस्य व्याप्तिसामान्याऽप्रतिपादकस्य समस्तशब्दमूलत्वमात्रेण नारायणपद सङ्ग्रहत्वाऽ-

सिद्धेः। नारायणपदसङ्ग्रहत्वाभावेऽपि स्वरक्षकत्वसर्वशेषित्वरुपसर्ववेदपरमतात्पर्यविषयार्थप्रतिपादकत्वेन समस्तशब्दमूलत्वोपपत्तेश्च।

नान्त्यः - उक्तरीत्या कारणत्वनिमित्तकत्वाऽभावेऽपि समस्तशब्दमूलत्वोपपत्तेः रक्षकत्वोक्तिमात्रेण सर्वशास्त्रतात्पर्यविषयार्थसिद्धकारणत्वोक्तिमात्रेणापि तदसिद्धेः तुल्यत्वात्। अन्यथा **स कारणं करणाधिपाधिपः** इत्यादौ कारणत्वसमभिव्याहारेण गुणान्तरोक्तिवैपरीत्यापत्तेः वज्रलेपत्वात्। कारणत्वेन सर्वाक्षेपे रक्षकत्वेनैव तत्सम्भवाच्च। रक्षकत्वस्य धातुपाठप्रसिद्धार्थत्वेन तन्निमित्तकत्वस्य समस्तशब्दमूलत्वाप्रयुक्तत्वाच्च। समस्तशब्दमूलत्वेन विष्णुत्वनिमित्तकत्वसाधनस्य कथमपि शङ्कितुमशक्यत्वाच्च।

न चैवं **समस्तशब्दमूलत्वात्** इति वचनविरोधः। **ऊर्ग्वा उदुम्बरः** इत्यादौ सजातीयात्सजातीयोत्पत्तिः उक्तेत्यौचित्वालम्बनेन प्रशंसावत्, सजातीययोः सम्बन्धो युक्त इति औचित्यावलम्बनेन, सजातीयसर्वकारणत्वरूपसदसत्साजात्यगुणमादाय वाच्यवाचकभावदार्ढ्यप्रशंसासम्भवात्। तस्मिन् वचने कारणत्वादिनिमित्तकत्वानुक्तेश्च।

न च पूर्वोधिकरण एव **समस्तशब्दमूलत्वात्** इत्यादि वचनार्थो व्युत्पादित इति, तद्विरोधेन अत्र अर्थवादत्वशङ्कोत्थितिः नेति वाच्यम्। एतदधिकरणव्युत्पाद्यस्य समस्तशब्दमूलत्वे कारणत्वादिनिमित्तकत्वसाधनत्वांशस्य उपजीवनपूर्वकं मूलमन्त्रस्थपदत्रयक्रमनियामकतया, सर्ववेदसारत्वरूपसमस्तशब्दमूलत्वस्वरूपव्युत्पादनार्थमेव तत्रैतद्वचनोपादानात्।

इत्थं समस्तशब्दमूलत्वस्य कारणतारूपस्य व्याख्येयत्वरूपस्य वा साक्षात्परम्परया वा कारणत्वादिनिमित्तकत्वे साधकत्वाभावात्, न अकारस्य कारणत्वादिनिमित्तकत्वं सम्भवतीति।

## सिद्धान्तस्तु

अकारस्य कारणत्वं रक्षकत्वञ्च निमित्तमिति तावद्युक्तमेव। अ इति ब्रह्म इति वचनानुसारेण, रूढिवृत्त्या कारणत्वरूपनिरतिशयबृहत्वस्यापि धातुपाठानुसारेण, योगवृत्त्या रक्षकस्यैव निमित्तत्त्वाऽवश्यम्भावात्।

[1]**अथातो ब्रह्मजिज्ञासा** इत्यत्र योगरूढब्रह्मशब्दानुसारेण निरतिशयबृहत्त्वविशिष्टस्य भगवतो नारायणस्य जिज्ञास्यतया उद्देशे कृते, तस्य भगवतः निरतिशयबृहत्त्वज्ञापकं किमिति एवमुद्देश्यतावच्छेदकव्यञ्जकरूपलक्षणस्य लक्ष्यव्यक्तिविशेषजिज्ञासायाम् [2]**जन्माद्यस्य यतः** इति [3]**यतो वा इमानि** इति श्रुतिप्रत्यभिज्ञापकसूत्रेण जगज्जन्मादिकारणत्वं निरतिशयबृहत्त्वज्ञापकत्वेन श्रुतिविवक्षितमिति अभिप्रायेण लक्षणकथनेन कारणत्वस्यैव निरतिशयबृहत्त्वरूपत्वात्। तस्य श्रुतप्रकाशिकायामेव विस्तरेण आचार्यैः उपपादितत्वाच्च।

[4]**अ इति ब्रह्म** इति वचने निरतिशयबृहत्त्वस्य प्रवृत्तिनिमित्तत्वेन विशेषणत्वे सम्भवत्युपलक्षणत्वस्य अन्याय्यतया अकारवाच्यं निरतिशयबृहत्त्वविशिष्टं भगवत्स्वरूपमिति तात्पर्याश्रयणेन अकारस्य कारणत्वविशिष्टविषयतया प्रयोगप्रत्ययाभावेऽपि, ब्रह्मशब्दस्येव न्यायानुगृहीतवचनबलेन निरतिशयबृहत्त्वविशिष्टभगवत्स्वरूपे रूढिकल्पनायाः सावकाशत्वाच्च।

किञ्च-**अवरक्षणगतिहिंसादिषु** इति धातुपाठानुसारेण कारणत्वमपि योगवृत्त्यैव निमित्तम्। अत एव **अकारार्थो विष्णुः** इत्याद्यनुगृहीतम्। न चैवं-रक्षकत्वं पृथङ्निमित्तं न भवेदिति वाच्यम्। उत्पत्तिक्षणादनन्तरं नाशक्षणात्पूर्वं वस्तुनः कालसम्बन्धरूपाऽवस्थानं स्थितिः इति इष्टप्राप्त्यनिष्टनिवृत्तिमत्तया अवस्थानस्यापि स्थेमशब्दार्थस्थितौ सामान्यरूपेणाऽन्तर्भावेऽपि, इष्टप्रापणानिष्टनिवारणलक्षणरक्षात्वेन रक्षकत्वस्य स्थितिकारणत्वोक्त्या लाभेन, भगवति विशिष्य सकलफलप्रदत्वरूपगुणाऽनुसन्धानाय रक्षणस्य पृथङ्निमित्तत्वेन निर्देशोपपत्तेः। अत एव भगवता बादरायणेन **जन्माद्यस्य यतः** इत्युक्त्वा [5]**फलमत उपपत्तेः** इति पृथक् सूत्रितम्। अनुगृहीतञ्च श्रुतप्रकाशिकायां **शास्त्रासाधारणस्य परमप्रयोजनस्यैव हि पृथगुक्त्यपेक्षा** इति।

न च धातुपाठानुसारे गन्त्रादिशब्देष्विव, विशेषधर्माणां बहूनां प्रकारत्वापत्त्या, ब्रह्मशब्द कारणशब्दादिष्विव निरतिशयबृहत्त्वरूपं कारणत्वं निमित्तं न

---

१. ब्र.सू.१-१-१ २. ब्र.सू.१-१-२ ३. तै.उ.भृ.व.-१
४. बह्वृचोपनिषत् ५. ब्र.सू.३-२-३८

भवेत् इति वाच्यम्। लाघवानुगृहीतवचनबलेन निरतिशयबृहत्त्वरूपजगज्जन्मादि कारणतासामान्यात्मकैकधर्मस्य निमित्तत्वे सिद्धे धातुपाठस्य रूढिनिमित्तविवरणत्वोपपत्तेः।

न चैवमपि रक्षकत्वमपि सामान्यरूपेणैव निमित्तं स्यादिति वाच्यम्। अवनादिशब्देषु रक्षणस्य विशिष्योपस्थित्यनुसारेण योगवृत्त्यैव पृथङ्निमित्तत्वात्। यदि च अवनादिशब्देषु गमनादेरपि विशिष्योपस्थितिर्धातुपाठस्वारस्यादवगम्यते।

तथापि विशिष्योपस्थितानामपि धर्माणां समुदायरूपेण जगज्जन्मादिकारणत्वरूपतया वस्तुतः जगज्जन्मादिकारणत्वं विशेषधर्मरूपमेव योगवृत्तौ निमित्तमिति न विरोधः।

न चैवमपि रक्षकत्वरूपार्थस्य प्रसिद्धिप्राचुर्येण प्रथमोपस्थित्या, विलम्बिताऽविलम्बितवृत्तिद्वयविरोधः। **अ इति ब्रह्म** इत्यादि वचनरूपतात्पर्यग्राहकबलेन तस्यादोषत्वात्। **भगवत एवाहमस्मि, उकारेणोच्यते लक्ष्मीः** इत्यादिवचनबलेन उकारे अवधारणार्थकत्वलक्ष्मीवाचकत्वयोः नमश्शब्दे साधनपारतन्त्र्यफलपारतन्त्र्यपरत्वस्य सखाण्डाऽखण्डरूपत्वस्य, नारायणशब्दे तत्पुरुषबहुव्रीहिनिमित्तद्वयस्य, अयनशब्दे कर्मकरणाधिकरणरूपव्युत्पत्तित्रयस्य च प्रमाणबलेन अभ्युपगमात्। सर्ववेदसारस्य मूलमन्त्रस्य गुणानुभवजनितप्रीतिकारितकैङ्कर्यरूपपरमपुरुषार्थपरत्वाऽन्यथानुपपत्त्या वचनबलेन सकलकल्याणगुणसमष्टिरूपजगज्जन्मादिकारणत्वसामान्यान्तर्गताऽनेकगुणविशेषपरत्वस्य विलम्बिताविलम्बितयोगवृत्तिद्वयेन अवश्याभ्युपेयत्वाच्च।

न चैवं **जगदुदयरक्षाप्रलयकृत्** इति सूक्तौ रक्षायाः कारणत्वान्तर्भावविरोधः. इष्टप्राप्त्यनिष्टनिवृत्तिमत्तया अवस्थानलक्षणजीवस्थितिपरस्य रक्षापदस्य अजहल्लक्षणया स्थितिसामान्यपरत्वात्। तस्याश्च **विष्णुः पाल्यञ्च पाति च** [1]**स एव पात्यत्ति च** इति वचनानुसारित्वेनऽदोषत्वात्। विष्णुत्वनिमित्तकत्वमपि युक्तमेव। **अकारो विष्णुवाचकः** इत्यादौ विष्णुत्वस्य वाचकतायां विशेषणत्वस्वारस्यात्, वाचकशब्दस्वारस्याच्च विष्णुत्वोपलक्षितवस्तुनि प्रसिद्ध इत्यर्थवर्णनायोगात्।

१. विष्णु.पु.१२-६७

किञ्च नारायणपदसङ्ग्रहत्वात् कारणत्वादिनिमित्तकत्वं युक्तम्। तथा हि - तत्र न तावद्धेतोरसिद्धिः **सर्वमष्टाक्षरान्तस्थम्** इतिवत् **अकारो वै सर्वावाक्** इत्युक्ततादात्म्यस्य पूर्वाधिकरणन्यायेन सर्वशास्त्रव्याख्येयत्वात्मकसर्ववाङ्मूलत्वरूपतया सर्ववाङ्मूलत्वस्य च नारायणरूपविशेष्यांशमादायोपपादने [1]**वेदैश्च सर्वैरहमेव वेद्यः** इत्युक्तप्रकारेण अव्यावर्तकतया [2]**कारणन्तु ध्येयः** इति परमपुरुषार्थलक्षणमोक्षार्थमुपास्य कारत्वेनोक्तस्य समस्तकल्याणगुणसमष्टिरूपस्य कारणत्वस्य निमित्तत्वमादाय सर्वेषुवेदान्तवाक्येषु कारणवाक्यानामिव अकारस्य सर्ववाक्प्राधान्यमित्येवमुपपाद्यतया सर्ववागन्तर्गततत्सारभूतनारायणपदसङ्ग्रहत्वस्यापि कैमुतिकन्यायेन सिद्धेः।

अत एवं सद्विद्यादि सकलकारणवाक्यानां [2]**एको ह वै नारायण आसीत्** इत्यादि वाक्यानाञ्चेव अकारनारायणपदयोः सामान्यविशेषसमर्पकत्वसम्भवाच्च नाप्यप्रयोजकत्वम्। कारणत्ववत् गुणसमष्ठिरूपत्वाभावेन रक्षकत्वमादाय सङ्ग्रहत्वासम्भवात्।

रक्षकत्वस्य प्रसिद्धार्थत्वेऽपि वचनसिद्धत्वेन कारणत्वनिमित्तकत्वावश्यम्भावे तदन्तर्भावेन रक्षकत्वस्यापि सिद्ध्या, विलम्बिताविलम्बितवृत्तिद्वयविरोधेन रक्षकत्वं विशेषरुपेण पृथङ्निमित्तमिति शङ्कायाम् **एकाक्षरां द्विपदां षट्पदाञ्च** [3]**वाचं देवा उपजीवन्ति विश्वे** इत्यस्मिन् प्रणवमन्त्रशेषमन्त्ररत्नानां त्रयाणामपि प्रशंसापरवाक्ये **त्रिपदाम्** इत्यनुक्त्वा, **एकाक्षराम्** इति प्रणवस्य **द्विपदाम्** इति मन्त्रशेषस्य च, पृथङ्निर्देशस्य च प्रणवमन्त्रशेषयोः मूलमूलिभावपरतयैव साफल्यस्य वक्तव्यतया, अकारस्य प्रणवकृतित्वेन श्रुतिसिद्धतया च सिद्धेन नारायणपदसङ्ग्रहत्वेनैव हेतुना परिहर्तव्यात्वाच्च।

अकारोक्तनिरुपाधिकरक्षकत्वस्य नियमनार्थधारणतदर्थव्यापनयोः प्रकृत्योक्तिमुखेन निरूपाधिकरक्षकत्वात्, तदेकप्रीत्यर्थप्रवृत्तिप्रार्थनातत्फलीभूतप्रवृत्तिश्च युज्यत इत्येव प्रत्ययांशेनोक्तिमुखेन च नारायणपदेन विवरणेन नारायणपदसङ्ग्रहत्वे निरुक्तशङ्कापरिहारसम्भवाच्च।

---

१. भ.गी.१५-१५ २. महा.उ.-१ ३. विष्णु.पु.

[1]**वेदैश्च सर्वैरहमेव वेद्यः**, [2]**विष्णुनामा स वेदेषु वेदान्तेषु च गीयते** [3]**ये च वेदविदो विप्राः ये चाध्यात्मविदो जनाः** इत्यादिषु समस्तकल्याणगुणविशिष्टत्वेन नारायणरूपदेवताविशेषस्यैव सर्ववेदान्ततात्पर्यविषयत्वेन सर्ववेदसङ्ग्रहप्रणवप्रकृतिभूताकारस्य न नारायणरूपदेवताविशेषस्यैव सर्ववेदान्ततात्पर्यविषयत्वेन सर्ववेदसङ्ग्रहप्रणवप्रकृतिभूताकारस्य नारायणरूपदेवताविशेष एव सकलकल्याणगुणसमष्टिभूतकारणत्वादिगुणबोधकत्वावश्यम्भावे सति रूढ्या देवताविशेषपरनारायणपदसङ्ग्रहप्रणवप्रकृतिभूताकारस्य कारणत्वादिगुणबोधकत्वावश्यम्भावे सति कैमुतिकन्यायेन कारणत्वरक्षकत्वशेषित्वप्रतिपादकत्वाऽवश्यम्भावाच्च।

रूढिनिमित्तैक्येऽपि कारणत्वरक्षकत्वादेः व्यापकत्वधारकत्वादेश्च योगवृत्तिनिमित्तस्य भिन्नत्वेन अपौनरुक्त्याच्च। एकावाक्यस्थपदद्वयस्य एकरूढिनिमित्तमुखेनपौनरुक्त्यादबोधकत्वेऽपि वाक्यैकवाक्यस्थपदद्वयस्यपौनरुक्त्यशङ्काऽनवकाशाच्च। न च **विष्णवे अस्मि, विष्णवे स्याम्** इत्यनयोः पौनरुक्त्यशङ्का गन्धावकाशः।

अपि च - सकलशब्दकारणत्वात् **कारणत्वादिनिमित्तकत्वं** युक्तम्। **कारणत्वात् कारणत्वनिमित्तकत्वम्** इति वा **कारणत्वसाजात्यात् स्वेतरस्वसजातीयकारणत्वलक्षणसाजात्याद्वा वाच्यवाच्यकभावः** इति वा अविवक्षितत्वात्। शब्दत्वात् शब्दत्वनिमित्तकत्वमिति तौल्यस्य वा **ऊर्वा उदुम्बरः** इत्यादिवत् असदर्थवादत्वस्य वा न शङ्कावतारः। किन्तु सर्वाध्यात्मशास्त्रव्याख्येयत्वमेव विवक्षितम्। अत एव सिद्धान्ते प्रलये सर्वशब्दाभावेऽपि शब्दस्याहङ्कारिकत्वेऽपि न क्षतिः।

न च तत्रोक्तविकल्पाऽसहत्वम्। सर्ववाङ्मूलस्य अकारस्य भिन्नभिन्नार्थकसार्ववेदवाक्यसङ्ग्रहत्वावश्यम्भावें सति उक्तरीत्या स्वपर्यायभूतनारायणपदसङ्ग्रहत्वस्य कैमुतिकन्यायेन सिद्धत्वात्, रक्षकत्वशेषित्वातिरिक्तफलत्वोपायत्वादिगुणविशेषाणामपि सर्वशास्त्रपरमतात्पर्यविषयतया, तत्प्रतिपादनार्थंकर्मकरण-

---

१. भ.गी.१५-१५  २. विष्णु.पु.६-४-४  ३. म.भा.अर.प.८८-२६

व्युत्पत्तिसिद्धनारायणपदसिद्धार्थसङ्ग्रहत्वाऽवश्यम्भावेन नारायणपदसङ्ग्रहत्वाभावे **समस्तशब्दमूलत्वासिद्धेश्च**, आद्यकल्पे दोषाभावात्। अत एव अन्त्यकल्पेऽपि दोषाभावाच्च।

रक्षकत्वोक्त्याफलत्वोपायत्वपरशास्त्रसङ्ग्रहत्वासिद्धेः, कारणत्वस्य सकलगुणसमष्टिरूपत्वस्य आचार्यैः एव अनुगृहीतत्वात्। [1]**स कारणं करणाधिपाधिपः** इत्यादौ गुणान्तरोक्तेः विवरणविवरणिभावेन साफल्यात्। सकलजगज्जन्मादिनिमित्तोपादानभावस्य सर्वकल्याणगुणात्मकत्वं विनाऽनुपपत्तिवत्‌रक्षकत्वस्य तदभावात्। कारणत्वरूपरक्षकत्वेसर्वकल्याणगुणानाम् अघटकत्वात्। रक्षकत्वस्यफलत्वोपेयत्वाऽनियमाच्च।

न चैवं प्रथमकल्पानुत्थितिः। समस्तशब्दमूलत्वस्य साक्षादेवहेतुत्वसम्भवेन द्वारहेतूक्तिवैफल्यादिति वाच्यम्। महावाक्यविधया सकलकल्याणगुणपराऽनन्तवेदवाक्यसङ्ग्रहस्य अकारस्य नित्यवस्तुसमूहवाचिनारपदघटिततया पदविधया सकलकल्याणगुणनारायणपदसङ्ग्रहत्वमावश्यकम्। तादृशनारायणपदसङ्ग्रहस्य गुणसमष्टिरूपकारणत्वनिमित्तकत्वमावश्यकमितिहेत्वन्तरः सूचनार्थत्वात्। विलम्बिताविलम्बितवृत्तिद्वयगम्यार्थतात्पर्यग्राहकतया समस्तशब्दमूलत्वस्य रक्षकत्वनिमित्तकत्वप्रयोजकतया उक्तत्वाच्च। व्यक्तिविशेषे सर्वगुणसङ्ग्रहाभावे व्यक्तिविशेषे गुणविस्तारानुपपत्त्या समस्तशब्दमूलत्वस्य विष्णुत्वनिमित्तकत्वप्रयोजकतयापि उक्तप्रायत्वाच्च।

अन्यच्च समस्तशब्दमूलत्वस्यकारणत्वादिनिमित्तकत्वे प्रयोजकत्वं **समस्तशब्दमूलत्वात्** इत्यादिवचनसिद्धम्।

तथा हि - तस्मिन् वचने शब्दशब्दः - अध्यात्मशास्त्रपरः। अपशुन्यायेन सामान्यशब्दस्य प्रशस्तशब्दपरत्वात्। मूलपदम्-व्याख्येयपरम्। व्याख्येयतात्पर्यज्ञानार्थमेव व्याख्यानप्रवृत्त्या, व्याख्येयोपस्थितिपूर्वकव्याख्येयार्थज्ञानं विना तत्तात्पर्यबुबोधयिषया तत्र प्रवृत्त्यसम्भवेन, व्याख्येयस्य व्याख्याने परम्परया कारणत्वेन मूलशब्दार्थत्वसम्भवात्।

---

१. श्वेता.उ.६-९

अकारस्य **मूलमन्त्र**गतप्रणवस्थाऽकारस्येत्यर्थः। **समस्तशब्दमूलत्वात्, स्वभावतः** इति समानाधिकरणे पञ्चम्यौ। **स्वभाव**पदम् सनातनत्वपरम्। **मूलमन्त्रः सनातनः** इत्यत्र **मूलत्वस्य** सनातनत्वोक्तिवत् (समस्तवाच्य**मूलत्वात्**) शब्दतदितरसाधारण्ये समस्तवस्त्वपेक्षया **निमित्तोपादानत्वरूपकारणत्वादित्यर्थः** (ब्रह्मणः) योगवृत्त्या जगज्जन्मादिकारणत्वसकलफलप्रदत्वरूपद्विविधनिरतिशयबृहत्त्वविशिष्टस्य रूढ्या विष्णुत्वविशिष्टस्यचेत्यर्थः। ब्रह्मशब्दयोगरूढत्वस्य आचार्यैः **समर्थि**तत्त्वात्, स्वभावतः इति पूर्ववत्।

अनादिकालमारभ्य [१]**तदैक्षत बहुस्यां प्रजायेय** इति [२]**सोऽकामयत बहुस्यां प्रजायेय** इति [३]**तदात्मानं स्वयमकुरुत** इत्याद्युक्तज्ञानचिकीर्षाप्रयत्नवतः स्वयमेव स्वेच्छया सर्वविकारान् प्रतिधारकतया अधारभूतस्य ब्रह्मणः स्वयमेव रक्षकत्वं शेषित्वञ्च युक्तम्। इत्येवं धातुचतुर्थीसिद्धयोः स्वप्रसादोद्देशेन चेतनप्रवृत्तिसामान्यनिरपेक्षतया निरुपाधिकयोः रक्षकत्वशेषित्वयोः उपपादकतया कारणत्वमपि अकारार्थ इति, **स्वभावतः** इति पदसामर्थ्यात् ज्ञाप्यते। (वाच्यवाचकसम्बन्धः) वाच्यवाचकयोः शक्तिविशेषरूपः। (अर्थात्) वस्तुस्वभावादित्यर्थः। अकारस्य समस्तशब्दमूलत्वलक्षणात् स्वभावात्, ब्रह्मणः समस्तवाच्यमूलत्वलक्षणात् स्वभावादपि। (तयोः) अकारब्रह्मणोः। **वाच्यवाचकसम्बन्धःअर्थात्प्रतीयते** इत्यन्वयः।

अयमभिप्रायः। वेदशब्दस्य तावत्-**वेदयतीति** व्युत्पत्त्या अपशुन्याये प्रशस्तज्ञानजनकत्वं प्रवृत्तिनिमित्तम्। ज्ञानप्राशस्त्यं ज्ञेयोत्कर्षात्। स च-समन्वयाधिकरणन्यायेन सकलकल्याणगुणविशिष्टस्य भगवतः स्वरूपतः धर्मतश्च निरतिशयभोग्यत्वम्। एवम्भूतसकलवेदतात्पर्यविषयार्थप्रतिपादकत्वं समस्तशब्दमूलत्वम्। तच्च [४]**अकारो वै सर्वा वाक्**, [५]**अक्षराणामकारोऽस्मि** इत्यादिवचनसिद्धम्।

किञ्च [६]**यद्वेदादौ स्वरः** इत्यादौ **तस्य प्रकृतिलीनस्य** इति प्रकृतित्वात् सिद्धम्। प्रकृतिशब्दस्य आदिकारणपरत्वात्। प्रकृतित्वञ्चवेदापेक्षया, स्वरशब्दितप्रणवापेक्षया वा। वेदप्रकृतित्वं सर्ववेदव्याख्येयत्वम्।

---

१. छा.उ.६-२-३ २. तै.उ.आ.व.६ ३. तै.उ.आ.व.७
४. बह्वृचोपनिषत् ५. भ.गी.१०-३३ ६. तै.उ.ना.व.११-२४

सर्ववेदप्रकृतिभूतप्रणवप्रकृतित्वोक्तावपि तदेव फलितम्। (तस्य प्रकृतिलीनस्य) इत्यनेन अकारत्वावस्थापन्नस्येति विवक्षितम्। (यः परः) प्रधानः वाच्यतया उत्कृष्टः। **तात्पर्यं-तत्परत्वम्** इत्यादौ बहुव्रीह्यन्तर्गतपरशब्दे तस्यैवाभिधानात्। **यः परः** इति वाच्यस्य प्रसिद्धवन्निर्देशेन, अकारवाच्यत्वेन **प्रमाणान्तरप्रसिद्धो** विष्णुः **यः परः** इत्यनूद्यते। एवञ्च, महेश्वरशब्दः - रुद्रे रूढः। विष्णुमनूद्यरुद्रत्वविधानासम्भवात्, तस्मात् इदं वाक्यं विष्णोः **सर्वनियन्त्वेन पारम्यपरम्**। न तु रुद्रस्य अकारवाच्यत्वपरम्। **मशेश्वरः - सः** इत्युद्देश्य विधेयत्वव्यत्यासप्रसङ्गात्।

इत्थञ्च - सर्ववेदसङ्ग्रहस्य अकारस्य सर्ववेदप्रतिपाद्योत्कृष्टार्थ प्रतिपादकत्वं सिद्धम्। उत्कृष्टर्थश्चनः भगवत्स्वरूपमात्रम्। [1]**तदेवाग्निस्तद्वायुः** इत्याद्युक्तरीत्या भगवत्पराणाम् अग्न्यादिशब्दानामपि समस्तशब्दमूलत्वप्रसङ्गात्। अतः सकल-कल्याणगुणविशिष्टभगवत्प्रतिपादकतया एव उत्कृष्टार्थप्रतिपादकत्वं वाच्यम्। तच्च समस्तकल्याणगुणसमष्टिभूतकारणत्वविशिष्टभगवत्प्रतिपादकत्वे नैवोपपा-दनीयम्। अतः सर्वार्थापेक्षया उत्कृष्टार्थप्रतिपादकः अकारः सर्वोत्कर्षरूपकराणत्व-विशिष्टभगवत्प्रतिपादक इति, **वाच्यवाचकसम्बन्धः** इत्यत्रवाचकशब्दप्रयोग-महिम्ना [2]**अ इति ब्रह्म** इत्यादिवचनस्वारस्यसिद्धो रूढ्या कारणत्वनिमित्तकत्वपक्षो व्यज्यते। एतेन **समस्तशब्दमूलत्वात्** इति वचनस्य असदर्थवादत्वशङ्का, तस्मिन् वचने कारणत्वादिनिमित्तकत्वशक्तिशङ्का च दूरोत्सारिता।

तस्मात् समस्तशब्दमूलत्वात् नारायणपदसङ्ग्रहत्वेऽपि सकलशब्द-कारणत्वं हेतुरेव इत्यभिप्रायेण (सकलजगत्तुक्कुम्, कारणमाय्) इत्याद्युक्तिः।

हेतुद्वयस्यापि प्रत्येकं साध्यत्रयं निर्दिशति - (सकलजगत्तुक्कुम्) इत्यादिना। अत्रापि अपिशब्देन चिदचिदात्मकसर्वकार्याऽसङ्कोचोऽभिप्रेतः। (कारणमाय्) निमित्तोपादानसहकारिकारणरूपेण साक्षादुत्पादक इत्यर्थः। अत्र साध्यक्रमनिर्देश-महिम्नाकारणत्वात् रक्षकः, रक्षकत्वात् अस्मत्स्वामीति गम्यते। (सर्वरक्षकनाय्) इति सर्वशब्दः **विश्वतः पृष्टेषु सर्वतः पृष्ठेषु** इत्यादाविव समष्टिचेतनानाम्

१. तै.उ.१७ २. बह्वृचोपनिषत्

अप्राकृतचेतनानाञ्च सङ्ग्रहार्थः। अत एव जगत्पदानुपादानम्, सर्वशब्दोपादानञ्च। सर्वशब्दप्रयोगे पूर्वप्रत्यभिज्ञापत्तेः, सर्व शब्दो योग्यतया चेतनपरः।

(एम्बेरुमानै) अस्मत्स्वामिनमित्यर्थः। अनेन **भक्तैर्भागवतैस्सह** इत्यादि रीत्या भक्तानामेव मुख्यं देवताविशेष निरूपकत्वमिति सम्प्रदायः सूचितः। अत एव **श्रीमन्नारायणो नः पतिः** इति वेदान्ताचार्यैः अनुगृहीतम्। (शोल्लुकिरतु) रूढ्यायोगेन च प्रतिपादयतीत्यर्थः।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्याये द्वितीयपादे**
**मूलमन्त्रे अकारार्थसमर्थनं नाम**
**चतुर्थाधिकरणम् समाप्तम्।।**

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे भगवतोऽसङ्कुचितरक्षकत्वसमर्थनं नाम पञ्चमाधिकरणम्

**मू।। (३९) रक्षिक्कै यावदु - विरोधियैप्पोक्कुकैयुम् अपेक्षितङ्गलैक्कोडुक्कैयुम्**

अत्र पूर्वाधिकरणोक्तं भगवतोऽसङ्कुचितसर्वरक्षकत्वं प्रसाध्यते। तदर्थं किं सुखप्रदमेव रक्षकत्वम्। उत दुःखनिवर्तकत्वमपीति। तदर्थं सुखत्वं दुःखत्वञ्च किं पुरुषभेदेन दुर्ज्ञेयम्। उत सुज्ञेयमिति। तदर्थं - संज्ञारित्वमुमुक्षुत्वमुक्तत्वनित्यत्वानि, पुरुषभेदेन सुखदुःखत्वप्रयोजकानि। उत नेति। प्रथमसंशयार्थमिदं चिन्त्यते। ब्रह्मरुद्रादीनां रक्षकत्वं भगवद्रक्षकत्वसङ्कोचको न वेति।

## तत्र पूर्वपक्षः

भगवतोऽसङ्कुचितसर्वरक्षकत्वं न सम्भवति। सुखप्रदत्वस्यैव रक्षकत्वरूपतया **एते वै निरयास्तात स्थानस्य परमात्मनः** इति वैकुण्ठस्थानापेक्षया अन्येषां दुःखावहत्वस्य उक्ततया, **क्षेत्राणि** इत्यादिश्लोके **त्वत्पादपद्मप्रवणात्मवृत्तेः भवन्ति सर्वेप्रतिकूलरूपाः** इति गृहक्षेत्रादेः तत्त्वज्ञानिनां दुःखावहत्वेनोक्ततया च, सांसारिकशब्दादिविषयानुभवेषु सुखत्वभ्रान्तेरेव **अनुकूलविषयं ज्ञानमेवानन्द** इत्युच्यते इति वदतां मते वक्तव्यतया, शब्दादिविषयानुभवप्रदत्वस्य रक्षकत्वरूपत्वासम्भवे, संसारिचेतनान् प्रति भगवतो रक्षकत्वानुपपत्तेः।

[1]**वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च** इत्यादौ [2]**तदेव प्रीतये भूत्वा** इत्यादौ च **वस्तु वस्त्वात्मकं कुतः** इति [3]**तस्मात् दुःखात्मकं नास्ति, न च किञ्चित् सुखात्मकम्** इति च सर्वस्यापि वस्तुनः संसारदशायाम्

---

१. विष्णु.पु.२-६-४७ २. विष्णु.पु.२-६-४८
३. विष्णु.पु.२-६-४९

**अनुभूयमानं भोग्यत्वं भ्रान्तिसिद्धम्, न तु वास्तवम् इत्युक्ततया** अप्राकृतपदार्थानां भोग्यत्वमेव, प्राकृतपदार्थानां कार्त्स्न्येन अभोग्यत्वमेवधर्मः इति सूचनाच्च।

**न च एकस्यैव देशकालभेदेन भोग्यत्वमभोग्यत्वञ्च सम्भवतीति** वाच्यम्। ज्ञानातिरिक्तसुखदुःखवादे, सुखदुःखानुभवहेतु ज्ञानविषयत्वलक्षणभोग्यत्वाऽभोग्यत्वयोः एकत्र सम्भवेऽपि **सुखं दुःखं च अनुकूलप्रतिकूलवस्तुविषयकज्ञानद्वयम्** इति सिद्धान्ते, अनुकूलत्वप्रतिकूलत्वयोः शाम्यत्वरक्तत्वयोरिव पुरुषभेदे नैकस्मिन् वस्तुनि असम्भवात्। विरुद्धधर्माणां देशकालरूपावच्छेदकभेदेन एकत्र सम्भवेऽपि पुरुषभेदेन एकदेशकालावच्छेदेन एकत्रासम्भवस्य सार्वजनीनत्वात्।

किञ्च **अनुकूलप्रतिकूलान्वयविरहे स्वरूपेणावस्थितिः दुःखनिवृत्तिः** इति श्रीभाष्यसूक्त्यनुसारेण भगवतः चेतनविषये केवलानिष्टनिवर्तकत्वदशायां रक्षकत्वं न स्यात्। सुखप्रदत्वस्याभावात्। दुःखनिवर्तकत्वस्यापि रक्षकशब्दार्थत्वे, नानार्थत्वप्रसङ्गात्। लाघवेन सुखप्रदत्वस्यैव रक्षति धात्वर्थत्वाच्च।

अपि च वर्तमानदुःखस्य तन्निवृत्तिं विना स्वरूपेण अवस्थानदशायां भगवतः चिदचिदपेक्षया रक्षकत्वं न स्यात्। दुःखनिवर्तकत्वस्यापि अभावात्।

अन्यच्च सुखदुःखनिवृत्त्योः परम्परासाधनप्रदानदशायां रक्षकत्वं न स्यात्। न च साक्षात्परम्परया वा सुखदुःखनिवृत्तिप्रयोजककर्तृत्वमेव रक्षकत्वमिति वाच्यम्। दुःखस्य तन्निवृत्तिप्रतियोगितयाकारणत्वेन दुःखसाधनादि प्रदस्यापि रक्षकत्वापत्तेः।

अस्तु वा, अनुकूलत्वप्रतिकूलत्वयोः पुरुषभेदेन एकदेशकालावच्छेदेन एकत्र सम्भवः। तथापि असङ्कुचितसर्वरक्षकत्वं दुर्निरूपम्। चेतनव्यक्तीनाम् आनन्त्येन तत्तद्व्यक्तित्वेन तत्तत्पुरुषापेक्षया तत्तत् वस्तुषु अनुकूलत्वप्रतिकूलत्वयोः दुर्ज्ञेयतया, वस्तुमतानुकूल्यप्रातिकूल्यज्ञापकपुरुषगतानुगताकारस्य दुर्निरूपत्वात्।

न च तत्तदधिकारानुगुण्येन तत्तत्पुरुषापेक्षया सुखप्रदत्वदुःखनिवर्तकत्वरूपं रक्षकत्वं ज्ञातुं शक्यमिति वाच्यम्। अधिकारशब्देन फलेच्छाविवक्षायां फलस्य सुखदुःखाभावाऽन्यतररूपतया सुखत्वदुःखत्वयोः पुरुषभेदेन व्यवस्थायाः असिद्धौ

फलेच्छारूपाधिकारानुगुण्येन सुखप्रदत्वदुःखनिवर्तकत्वरूपरक्षकत्वव्यवस्थायाः ज्ञातुमशक्यत्वात्।

न च - शत्रुपीडादीनां सांसारिकत्वाऽवच्छेदेन दुःखत्वम्। अन्नपानादीनां सुखत्वञ्च ज्ञातुं शक्यमिति वाच्यम्। देहविशिष्टवेषेण सञ्चरणरूपसंसारित्वस्य मुमुक्षुष्वपि सत्वात्। एवं मुमुक्षुत्वावच्छेदेन संसारसम्बन्धःदुःखरूपः। परमपदप्राप्तिः सुखरूपेति ज्ञातुं शक्यमिति निरस्तम्। मुमुक्षूणामपि इदानीन्तनानां संसारसम्बन्धस्य सुखरूपत्वदर्शनात्। विद्यमानस्यैव सुखरूपत्वदर्शनेन भाविन्याः परमपदप्राप्तेः सुखरूपत्वासम्भवाच्च। एतद्देहावसानानन्तरं नित्यसुखस्थानप्राप्तिः भवति चेत्, अवश्यं स्यादित्येवं नित्यस्थानप्राप्तेः सुखरूपत्वेन अनुभवस्य संसारिष्वपि सम्भवाच्च।

इत्थं मुक्तानां नित्यसूरिणाञ्च अनुगतरूपेण कैङ्कर्यहानिः दुःखरूपा, कैङ्कर्यवृद्धिः सुखरूपेति च न युक्तम्। [1]**नित्यकिङ्करः प्रहर्षयिष्यामि,** [2]**नित्य-किङ्करो भवामि** इत्यादि प्रसिद्धकैङ्कर्यस्य हानेरेव शशशृङ्गायमाणत्वात्। कैङ्कर्यस्य नित्यत्वादेव, कैङ्कर्यमादाय दुःखनिवर्तकत्वापूर्वसुखप्रतिलम्भन-रूपरक्षकत्वासिद्धेश्च। केवलानुभवपरमुक्तविषये कैङ्कर्यमादाय रक्षकत्वलाभा-सम्भवाच्च। मुक्तानां नित्यसूरिणाञ्च प्रयोजकद्वयोः। रक्षकत्वविवक्षायां मुक्तत्वस्य कैवल्यार्थिषु अतिप्रसङ्गाच्च।

वस्तुतस्तु भगवतः असङ्कुचितसर्वरक्षकत्वं, विषयसङ्कोचात् बाधितम्। ब्रह्मरुद्रेन्द्रादीनां रक्षकत्वस्य बहुप्रमाणसिद्धत्वात्। लोके नृपमात्रादीनां रक्षकत्व-प्रसिद्धेश्च। न च भगवतः सर्वरक्षकत्वप्रमाणानुसारेण तत्रापि अन्तर्यामित्वेन कर्तृप्रेरकतया प्रयोजककर्तृत्वेन सर्वरक्षकत्वोपपत्त्या साक्षात्सर्वरक्षाकर्तृत्वे मानाभावात्। अत एव ब्रह्मरुद्रेन्द्राणां रक्षकत्वव्यभिचारो बहुप्रमाणसिद्धः। तस्मात् मातापितृ-भर्तृभ्रातृपुत्राणां धनस्य च रक्षकत्वव्यभिचारो लोकसिद्ध इत्यपास्तम्। ब्रह्मादीनां कादाचित्करक्षकत्वमादायापि भगवतः सर्वसमानेऽपि रक्षणे साक्षात्कर्तृत्वभङ्गादिति।

## सिद्धान्तस्तु

भगवतः असङ्कुचितसर्वरक्षकत्वं सम्भवत्येव। कुतः, सुखप्रदत्वस्य

---

१. स्तोत्ररत्नम्.६ २. श्रीरङ्गगद्यम्

रक्षकत्वरूपत्वेऽपि **एते वै निरयास्तातस्थानस्य परमात्मनः** इत्यत्र वैकुण्ठस्थानापेक्षयैव अन्येषां दुःखावहत्वेनोक्ततया **क्षेत्राणि मित्राणि धनानि** इत्यादि श्लोके **गृहक्षेत्रादीनां** तत्त्वज्ञान्यपेक्ष्यैव दुःखावहत्वेन उक्ततया च, सांसारिकशब्दादिविषयानुभवे **अनुकूलविषयकज्ञानमेव हि आनन्द इत्युच्यते** इति वदतां मतेपि सुखत्वप्रतीतेः औपाधिकसुखत्वविषयकतया औत्सर्गिकप्रमाणस्य सम्भवतः त्यागायोगेन सुखत्वभ्रान्ते अवक्तव्यतया शब्दादिविषयानुभवप्रदत्वस्य रक्षकत्वरूपत्वसम्भवेन सांसारिकचेतनम् प्रति भगवतो रक्षकत्वोपपत्तेः।

**वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च** इत्यादौ **वस्तु वस्त्वात्मकं कुतः**? इति स्वभाववाचिना आत्मशब्देन अनुकूलत्वप्रतिकूलत्वधर्मिस्वरूपवस्तुनः अनुकूलत्वप्रतिकूलत्वधर्मरूपं वस्तुस्वभावो न भवति यावदात्मभाव्याकारो न भवतीति उक्ततया [1]**तदेव प्रीतये भूत्वा** इत्यादौ **तस्मात् दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम्** इति स्वरूपवाचिना आत्मशब्देन, सर्वं वस्तु तत्तच्चेतनकृतविविधविचित्रपुण्यपापरूपोपाधितो देशकालपुरुषभेदेन सुखरूपम्। न तु स्वरूपेण इत्युक्ततया च सर्वस्यापि वस्तुनः संसारदशायां अनुभूयमानं भोग्यत्वं भ्रान्तिसिद्धम्। न तु वास्तवमिति अनुक्ततया **अप्राकृतपदार्थानामेव भोग्यत्वं धर्मः। प्राकृतपदार्थानामभोग्यत्वमेव धर्मः** इत्यसूचनाच्च। **प्राकृतपदार्थानामभोग्यत्वमेव धर्मः** इत्युक्तौ, [2]**कामान्नी कामरूप्यनुसञ्चरन्** [3]**तस्य सर्वेषु लोकेषु कामचारो भवति** इत्यादिश्रुतिविरोधाच्च।

न च विरुद्धधर्माणाम् एकत्रदेशकालभेदेन सम्भवेऽपि, पुरुषभेदेन एकदेशकालावच्छेदेन एकत्रासम्भवस्य सार्वजनीनतया **सुखं दुःखञ्च अनुकूलप्रतिकूलवस्तुविषयकज्ञानद्वयमेव** इति सिद्धान्ते, अनुकूलत्वप्रतिकूलत्वधर्मयोः श्यामत्वरक्तत्वयोरिव पुरुषभेदेन एकस्मिन् वस्तुनि असम्भव इति वाच्यम्। विरुद्धधर्माणां तथाभावेऽपि अस्मत्सिद्धान्ते [4]**शक्तयस्सर्वभावानाम् अचिन्त्यज्ञानगोचराः** इत्यादि प्रमाणबलेन सर्वेष्वपि वस्तुषु विविधविचित्रभावरूपशक्तिविशेषाभ्युपगमेन तत्तद्वस्तु गतस्यैकधर्मस्य शक्तिविशेषस्यैव **इदं मे भूयात्, इदं मे मा**

---

१. विष्णु.पु.२-६-४८ २. तै.उ.भृ.व.१०-५
३. छा.उ.७-२५५ ४. विष्णु.पु.१-३-२

**भूयात्** इति पुरुषभेदेन एकदेशकालावच्छेदेन एकवस्तुगतानुकूलत्वप्रतिकूलत्व-रूपतया, तस्यैव शक्तिविशेषस्य एकशब्दव्यक्तिगतैकधर्मस्येव भिन्नभिन्नशब्दापेक्षया तारत्वमन्द्रत्वादिरूपत्ववत्, पुरुषभेदेन अनुकूलत्वप्रतिकूलत्वोपपत्तेः।

किञ्चेत्याद्यपि अयुक्तम्। **दुःखस्य प्रतिकूलतया तन्निवृत्तिः इष्टा भवति। नत्वनुकूलतया** इति श्रीभाष्यसूक्त्यनुसारेण इष्टत्वस्य सुखदुःखनिवृत्ति-साधारणतया अनुगतेष्टप्रदत्वस्यैव रक्षति धात्वर्थत्वेन नानार्थत्वाप्रसङ्गेन, केवल-दुःखनिवर्तकत्वदशायामपि भगवतो रक्षकत्वाऽक्षतेः।

न च - लाघवेन सुखप्रदत्वमेव रक्षति धात्वर्थ इति वाच्यम्। सुखत्वस्य अनुकूलविषयकज्ञानत्वरूपतया, आनुकूल्यस्य च **इदं मे भूयात्** इति इच्छाहेतु-साक्षात्कारविषयाऽननुगताऽऽकृत्यनुमेयशक्तिविशेषरूपतया प्रत्यक्षोपस्थितानुगतोप-जीव्यभूतेष्टत्वस्यैव रक्षति धातुप्रवृत्तिनिमित्तघटकत्वौचित्यात्। तस्य पदानन्यप्रतीति-प्रकारत्वाभावेऽपि परिचायकतया प्रवृत्तिनिमित्तत्वोपपत्तेः।

अपि चेत्याद्यपि अयुक्तम्। दुःखनिवृत्तिवत् दुःखात्यन्ताभावस्यापि इष्टतया, वर्तमानदुःखस्य तन्निवृत्तिं विना स्वरूपेण अवस्थानदशायामपि इष्टप्रदत्वलक्षण-रक्षकत्वस्या व्याहतत्वात्। अन्यच्च इत्याद्यपि अयुक्तम्। इष्टत्वस्य सुखसाधनाद्यनु-गतत्वेन दुःखसाधनादिव्यावृत्तत्वेन च तत्तत्प्रदत्वस्यैव अनुगतानतिप्रसक्तस्य रक्षकपदार्थत्वात्। अत एव दुःखात्यन्ताभावस्यापि नेष्टत्वं दुःखनिवृत्तित्वाभावात्।

न च - दुःखसंसर्गाभावत्वमिष्टतावच्छेदकम्। दुःखसाधननिवृत्तौ अव्याप्तेः इत्यपि दुषमं दूरीकृतम्। इष्टविरोधि संसर्गभावत्वस्यैव सर्वानुगतस्य दुःखनिवृत्तौ इष्टतावच्छेदकत्वात्।

अस्तु वा इत्यादिना अनुकूलत्वप्रतिकूलत्वोभयनिरूपकपुरुषभेदस्य दुर्ज्ञेयतया, भगवतोऽसङ्कुचितरक्षकत्वं दुर्निरूपम् इत्युक्तमपि अयुक्तम्। तत्तदधिकारानुगुण्येन अनुकूलत्वप्रतिकूलत्वयोः सुज्ञेयत्वात्। अधिकारपदेन फलसाधनानुष्ठान हेतुभूत-धर्मस्य विवक्षितत्वात्। तत्तत्पुरुषापेक्षितस्यैव फलपदेन विवक्षितत्वाच्च। स च धर्मः संसारित्वं मुमुक्षुत्वं मुक्तत्वं नित्यत्वञ्च।

न च-संसारित्वस्य मुमुक्षुषु अतिप्रसङ्गः। शत्रुपीडादीनां तदभिमत-विरोधित्वाभावात्। अन्नपानादीनां तदपेक्षितत्वाभावाच्चेति वाच्यम्। संसारिशब्देन **देहविशिष्टतया सञ्चरणकारणानां प्रवहरूपेण** तत्कार्यणाञ्च, अहङ्कारममकार-**विषयप्रावण्यानां** सदानुवृत्तानां विवक्षितत्वात्। भगवद्भक्तिकृतविषयप्रावण्यस्य **मुमुक्षुष्वपि सत्त्वात्** तद्व्यावृत्यर्थम् अहङ्कारादिकार्यत्वलाभाय, अहङ्काराद्युक्तिः। चेतनोज्जीवनाय भगवत्संकल्पेन मुमुक्षूणामपि कादाचित्काऽनिषिद्धविषयप्रावण्य-सद्भावात्, **सदानुवृत्तानाम्** इत्युक्तम्।

मुमुक्षुत्वाधिकारदूषणमपि अयुक्तम्। संसारार्तिकार्योत्कटमोक्षाभिलाषस्य मुमुक्षुपदेन विवक्षितत्वात्। **तस्य भवन्ति सर्वे प्रतिकूलरूपाः** इति न्यायेन कार्त्स्न्येन संसारसम्बन्धे प्रातिकूल्योपपत्तेः। अत एव इदानीन्तनेषु मन्दाधिकारिषु संसारसम्बन्धे सुखरूपत्वदर्शनेऽपि बाधकाभावाच्च। भाविन्या नित्यसुखस्थानप्राप्तेः सुखरूपत्वस्येदानीमननुभवेऽपि अपेक्षितत्वे बाधकाभावेन तस्यैव सुखरूपशब्देन विवक्षितत्वाच्च। निरुक्तमोक्षाभिलाषकार्योत्कटपरमपदप्राप्त्यपेक्षया इदानीन्तनायाः संसारिषु अनतिप्रसङ्गाच्च।

मुक्तत्वनित्यत्वाधिकारदूषणमपि अयुक्तम्। पूर्ववत् निवर्त्यविरोधिनोऽत्र विवक्षितत्वेन, मुमुक्षुषु अप्रसिद्धस्य कैङ्कर्यविच्छेदस्य मुक्तिषु नित्येषु च अपेक्षितविरोधित्वसम्भवेन, अप्रसिद्ध्यभावाच्च। पूर्ववत् अपूर्वसुखप्राप्तेः अविवक्षि-तत्वेन, सिद्धस्यैव कैङ्कर्यस्य उत्तरोत्तरकालसम्बन्धेनाभिलाषस्य तत्प्रदानेन रक्षकत्वस्य च सम्भवाच्च। मुक्तेषु गुणवृत्तिनिष्ठाभेदे सत्यपि, नित्यसूरिषु तदभावेन तत्समभिव्याहारेण मुक्तपदस्य अनुभवजनितप्रीतिकारितकैङ्कर्य-निष्ठपरतया, केवलानुभवपरेषु अनतिप्रसङ्गाच्च। अत एव वृत्तिनिष्ठत्वरूपानुगत-प्रयोजकत्वस्य विवक्षिततया कैवल्यार्थिषु अतिप्रसङ्गशङ्कायाः अपि अनवका-शाच्च। अनुगतप्रयोजकविवक्षायामपि द्वैराश्यव्युत्पादनाय नित्यमुक्तरूपेणोक्ति-सम्भवाच्च।

वस्तुतस्तु इत्यादिकमपि अयुक्तम्। [1]**तेजोऽतः तथाप्याह** इत्याद्यधिकरण-न्यायेन ज्योतिराद्यधिष्ठानाधिकरणन्यायेन संज्ञामूर्त्यधिकरणन्यायेन च जीवानां

---

१. ब्र.सू.२-३-१० (तेजोधिकरणम्)

रक्षकत्वस्य भगवत्पर्यन्तस्यैव वक्तव्यतया, जीवकर्तृकरक्षणे साक्षात्करणीभूतानां ज्ञानचिकीर्षाप्रयत्नानां निरपेक्षाश्रयत्वेन, भगवतः असङ्कुचितसर्वरक्षणकर्तृत्वोपपत्तेः। अत एव ब्रह्मरुद्रादीनां रक्षकत्वव्यभिचारोक्तेः। कादाचित्करक्षकत्वे भगवदधीनत्वोक्तिमुखेन तत्रापि भगवत एव कर्तृत्वं मुख्यमितिद्योतनार्थत्वाच्चेति।

इदञ्चाधिकरणं नवसूत्र्यात्मकम्। तत्रेदमाद्यं सूत्रम्। (रक्षिक्कैयावतु) रक्षकत्वरूपत्वेन भवितुं योग्यमित्यर्थः। (विरोधियैप्पोक्कुकैयुम्) विरोधिशब्देन-अपेक्षितविरोधिभूतं दुःखतत्प्रयोजकसुखनिवृत्तितत्प्रयोजकसुखात्यन्ताभावादिकं विवक्षितम्। अत्र दुःखनिवृत्तिं विनाऽस्वरूपेणावस्थानस्याभावोऽपि विरोधिपदेन विवक्षितः दुःखनिवृत्तिं विना सूक्ष्मस्थूलशरीरविशिष्टतया स्वरूपेणावस्थानस्य सुखानुभवयोग्यतारूपतया अपेक्षितत्वेन, तद्विरोधित्वात् स्वरूपेण अवस्थानाभावस्यापि। (पोक्कुकैयुम्) इत्यनेन अभिमतविरोधि संसर्गाभावत्वमिष्टतावच्छेदकमिति अभिप्रेतम्। (अपेक्षितङ्गलै) इत्यनेन भावरूपापेक्षितं विवक्षितम्। अत एव विरोधिसंसर्गाभावस्य पृथगुक्तिः। अष्ट इष्टप्रदत्वमेव रक्षकपदप्रवृत्तिनिमित्तत्वेन विवक्षितम्। इष्टप्रदत्वं भावरूपेष्टप्रापकत्वम्, इष्टविरोधिसंसर्गाभावसम्पादकत्वञ्चेति द्विविधमितिद्योतनायद्वयोरुक्तिः। अनेन सुखप्रदत्वदुःखनिवर्तकत्वादिकं न रक्षकप्रदप्रवृत्तिनिमित्तमिति सूच्यते।

इत्थं रक्षकत्वं निरुच्य, भगवतोऽसङ्कुचितरक्षकत्वसिद्धिः तत्फलमिति दर्शयति द्वितीयसूत्रेण (इवैयिरण्डुमित्यादिना)।

**मू।। (४०) इवैयिरण्डुम् चेतनर् निन्रनिन्रवलवुक्कीडायिरुक्कुम्।**

(इरण्डुम्) इष्टत्वघटितभावरूपरक्षकत्वम्, इष्टविरोधित्वघटितमभावरूपरक्षकत्वञ्चेत्यर्थः। एवं रूपत्वात् तत्तदधिकारानुगुणमिति वक्तुम् इदं शब्दप्रयोगः। (इरण्डुम्) इति अन्योन्यनिरपेक्षतया एकक्रियान्वयरूपसमुच्चयो विवक्षितः। न तु इतरेतरयोगः। तेन भावरूपेष्टप्रदत्वस्य इष्टविरोधिसंसर्गाभावसम्पादकत्वस्य च प्रत्येकं रक्षकतारूपत्वभावात्, केवलदुःखनिवृत्तिदशायां दुःखनिवृत्तिमपि विना स्वरूपेण अवस्थान दशायाञ्च रक्षकत्वसिद्धिः। (चेतनर्) संसारिणः मुमुक्षुमुक्तनित्यरूपेण चतुर्विधजीवा इत्यर्थः। (निन्र निन्र वळवुक्कु) तत्तच्चेतनैः

प्राप्तानाम् अनुगताननतिप्रसक्तानां तत्तदिष्टसाधनानुष्ठानहेतुभूतधर्माणामित्यर्थः। (ईदायिरुक्कुम्) अनुगणमायिरुक्कुमित्यर्थः। तत्तदधिकारज्ञाप्यमिति यावत्। वह्निमत्त्वं धूमवत्त्वस्यानुगुणमितिवत्, साध्यस्य साधनोपपादकत्वात्, उपपादकस्य उपपाद्यनुगुणत्वात्।

इत्थं पूर्वसूत्रेण रक्षकत्वस्य दुर्ज्ञेयत्वशङ्कानिवृत्ता अथ तेषामधिकाराणां प्रदर्शनार्थं स्थलत्रयमुदाहरतिसूत्रषट्केन। तत्र प्रथमं संसारिचेतनान्प्रति भगवतो रक्षकत्वं सुज्ञेयमित्याह तृतीयसूत्रेण (संसारिकलुक्कित्यादिना)।

## मू।। (४१) संसारिकलुक्कु विरोधि - शत्रुपीडादिकळ्

संसारिपदेनकार्ये कारणलक्षणया, कारणेकार्यलक्षणया वा अहङ्कार-ममकारकार्यं विषयप्रावण्यं विवक्षितम्। विरोधिपदम् संसारित्वविशिष्टस्य स्वाभिमतविरोधिपरम्। विरोधित्वञ्च - एकदेशकालावच्छेदेनैकस्मिन् विषये इच्छा-समानाधिकरणभिन्नदेशविषयत्वम्। एकवचनम् - जात्यभिप्रायम्। (शत्रुपीडादिकल्) शत्रपीडादिपदम् शत्रुप्रयुक्तस्वकीयदुःखपरम्। आदिपदम् - आधिव्याध्यादिपरम्।

इत्थं संसारिविषये अभावरूपं रक्षकत्वं भगवतः सम्भवतीति अनुगत धर्मावच्छेदेन विरोधप्रदर्शनेन सूचयित्वा, भावरूपरक्षकत्वमपि तद्विषये तस्य सम्भवतीति सूचयति तुरीय सूत्रेण (अपेक्षितम् इत्यादिना)।

## मू।। (४२) अपेक्षितम् अन्नपानादिकल्

(संसारिकलुक्कु) इति पदम् अत्रादावनुषज्यते। अपेक्षितपदं भावरूपा-पेक्षितपरम्। एकवचनं पूर्ववत्। (अन्नपानादिकळ्) **अन्नञ्च पानञ्च** इति विग्रहः। पानशब्दः - पानीये लाक्षणिकः। आदिशब्दः - स्रग्वस्त्राभरणाङ्ग - रागाङ्गना-लिङ्गनादिपरः। पूर्वसूत्रे शत्रुपीडात्वादिकं द्विष्टतावच्छेदकम् अस्मिन् सूत्रे अन्नत्वपानीयत्वादिकमिष्टतावच्छेदकमभिप्रेतम्। अथ मुमुक्षुत्वावच्छेदेन अभावरूप-रक्षकत्वं भगवतः सूचयति पञ्चमसूत्रेण (मुमुक्षुक्कलुकुल्यादिना)।

## मू।। (४३) मुमुक्षुक्कलुक्कु विरोधि - संसारसम्बन्धम्

अत्र संसारार्तिभूमिकार्यसंसारनिवृत्त्युत्कटेच्छासाधनपरमपदप्राप्त्यभिनि-

वेशातिशयनत्वं विवक्षितम् मुमुक्षुपदेन। तेन मन्दाधिकारिणां मुमुक्षूणां संसार-सम्बन्धत्वस्य द्विष्टतावच्छेदकत्वाभावेऽपि न क्षतिः। न वा मुमुक्षुत्वस्य संसारसम्बन्धे अपेक्षितविरोधि त्वज्ञाप्यतया मुमुक्षुत्वेन संसारसम्बन्धे अभिमतविरोधित्वं ज्ञातुं शक्यमिति शङ्कावकाशः। मुमुक्षुकारणपरमपदप्राप्त्यभिनिवेशातिशयपरत्वात् मुमुक्षुपदस्य '**रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति** इत्यादि प्रमाणानु-सारेण परमपुरुषार्थभूतपरमपदप्राप्तेः स्वत इष्टत्वात्, तत्प्रतिबन्धकतयैव संसारनिवृत्तौ उत्कटेच्छोदयाच्च। विरोधिपदं पूर्ववत्। (संसारसम्बन्धम्) संरारपदम् सूक्ष्म स्थूल-देहविशिष्टतया सञ्चरणलक्षणसंसारकारणमूलप्रकृतिपरम्। तत्सम्बन्धे द्विष्टता-वच्छेदकम् अहङ्कारममकारेणाऽविद्यापुण्यपापरूपकर्मवासनारुचिमूलकमल-भाण्डदेहसम्बन्धापादकत्वं विवक्षितमिति।

अथ मुमुक्षुत्वावच्छेदेन भगवतो भावरूपरक्षकत्वं दर्शयति षष्ठसूत्रेण (अपेक्षितमित्यादिना)।

**मू।। (४४) अपेक्षितम् परमपदप्राप्तिः**

अत्रापि (मुमुक्षुक्कलुक्कु) इत्यनुषज्यते। अत्र पाषाणकल्पमोक्षेच्छावतः परमपदप्राप्तेः अनपेक्षितत्वात्, मुमुक्षुपदस्य परमपदप्राप्तीच्छया तत्प्रतिबन्धक-मोक्षेच्छावतः परमपदप्राप्तिः अपेक्षितेत्युक्तिपर्यवसानेन सध्याऽविशेषप्रसङ्गाच्च, परमपदप्राप्तीच्छावतो गुणानुभवकैङ्कर्योत्कटेच्छावत्त्वनियमाच्च, परमपदप्राप्ति-शब्दः गुणानुभवकैङ्कर्यलाभोपलक्षणार्थः।

अथ मुक्तविषये नित्यविषये च भगवतोऽभावरक्षकत्वसिद्धिं सूचयति सप्तमसूत्रेण (मुक्तर्क्कुमित्यादिना)।

**मू।। (४५) मुक्तर्क्कुम् नित्यर्क्कुम् विरोधि - कैङ्कर्यहानि**

मुक्तपदम् निवृत्तसंसारपरम्। नित्यपदम् - अस्पृष्टसंसारगन्धसूरिपरम्। अनेन पदद्वयेन नित्यसूरिवाचकपदसमभिव्याहारानुगृहीतेन गुणानुभवजनितप्रीति-कारितकैङ्कर्यपरत्वमनुगतमिष्टाऽनिष्टज्ञापकमभिप्रेतम्। तेन कैवल्यार्थिनां केवलानु-भवपराणाञ्च कैङ्कर्यहानेः अभिमतविरोधित्वाभावेऽपि न क्षतिः। अत्र

कैङ्कर्यपरत्वम्। न कैङ्कर्येच्छावत्वम्। कैङ्कर्येच्छावत्वस्य कैङ्कर्यहानेः द्विष्टत्वे कैङ्कर्येष्टत्वे च ज्ञापकत्वासम्भवात्। द्विष्टतावच्छेदकेष्टतावच्छेदकयोरेव द्विष्टत्वेष्टत्वज्ञापकत्वात्। कैङ्कर्येच्छावत्वस्य मुमुक्षुसाधारण्याच्च। किन्तु भगवद्गुणानुभवजनितप्रीतिकारितकैङ्कर्यशालित्वम्। अत्रानुगतरूपेण अनिर्देशः। कैङ्कर्यपरेषु द्वैविध्यसूचनाय। विरोधिपदं प्राग्वत्। (कैङ्कर्यहानि) इत्यत्र कैङ्कर्यपदं न राजभृत्यादिसाधारणशेषवृत्तिमात्रपरम्। (मुक्तर्क्कुम् नित्यर्क्कुम्) इति विशेषोपादानाऽनुपपत्तेः। किन्तु - अनुभवजनितप्रीतिकारितकेवलपरार्थशेषवृत्तिपरम्। हानिशब्दः - संसर्गाभावसामान्यपरः।

अथ नित्यमुक्तविषये भगवतो भावरूपरक्षकत्वसिद्धिं सूचयति अष्टमसूत्रेण (अपेक्षितमित्यादिना)।

**मू।। (४६) अपेक्षितम् कैङ्कर्यवृद्धिः।**

अत्रापि (मुक्तर्क्कुम् नित्यर्क्कुम्) इत्यनुषङ्गः। कैङ्कर्यशब्दः पूर्ववत्। वृद्धिशब्दः उत्तरोत्तरकालसम्बन्धवैयत्यपरः। न च-इत्थमिष्टप्रापकत्वमेव रक्षकपद प्रवृत्तिनिमित्तम्।

तच्च - द्विविधमित्यङ्गीकारे **इष्टप्रापणपर्यन्ताऽनिष्टनिवारणलक्षणा-रक्षा** इति श्रुतप्रकाशिकासूक्तिविरोधः। तत्रानिष्टनिवारणे इष्टप्रापणवैयत्यप्रतीतेरिति वाच्यम्। तस्याः सूक्तेः **विनतविविधभूत** इत्युक्तप्रकृतरक्षाकर्माभिप्रायेण, रक्षता दृश्येवेत्यभिप्रायात्।

न च - अनिष्टनिवारणमपि इष्टप्रापणमितिवाच्यम् इष्टपदस्य भावरूपेष्ट-परत्वात्। नचैवमपि **अनिष्टनिवारणस्य प्राधान्योक्तिविरोधः**। अनिष्टनिवारण-पूर्वकेष्टप्रापणं रक्षा इत्यपि वक्तुं शक्यत्वादिति वाच्यम्। [1]**तमेवं विदित्वा अतिमृत्युमेति** [2]**शरणं व्रज मोक्षयिष्यामि** इत्यादिप्रमाणानुसारेण तत्वज्ञानं प्रतिबन्धकनिवृत्तावेवोपयुज्यते। प्रतिबन्धके निवृत्ते, नेतौ भग्ने जलनिस्सरणवत् स्वरूपाविर्भावः स्वयमेव सम्पद्यत इत्यभिप्रायेण अनिष्टनिवारणस्य प्राधान्येन अनुगृहीतत्वोपपत्तेः।

१. श्वेता.उ.३-८ २. भ.गी.१८-६६

अथ ब्रह्मरुद्रादीनां रक्षकत्वं भगवतो रक्षकत्वसङ्कोचकमिति शङ्कां परिहरति नवमसूत्रेण (ईश्वरनैयित्यादिना)।

**मू।। (४७) ईश्वरनै योलिन्दवर्कल् रक्षकरल्ल रेन्निमिडम् प्रपन्नपरित्राणत्तिले शोन्नोम्**

ईश्वरपदम्-निरुपाधिकासङ्कुचितयोगवृत्तिनिमित्तबलात्, प्रकरणबलाच्च भगवत्परम्। रक्षकत्वस्य निर्हेतुकत्वमुपपादयितुम् - ईश्वरत्वेन निर्देशः। [१]**ईशेतव्यसम्बन्धादितं प्रथमादपि।**

**रक्षिष्यत्यनुकूलान्नः** इत्युक्तेः। (ईश्वरनैयोलिन्दवर् कल् रक्षकरल्लर्) इत्युक्त्या - अनिदं प्रथमेशेशितव्यसम्बन्धाभावात्, भगवद्व्यतिरिक्ताः निर्हेतुकरक्षका न भवन्तीति भावः सूच्यते। रक्षकपदम् निरुपाधिकासङ्कुचितरक्षणकर्तृपरम्। (एन्नुमिदम्) रक्षकत्वव्यभिचारस्थलमित्यर्थः। (प्रपन्नपरित्राणत्तिल्) प्रपन्नपरित्राणाख्यप्रबन्ध इत्यर्थः। अपेक्षितार्थस्य अत्रानुक्तिः विस्तरभिया। अत्र वक्तव्यं स्वातन्त्र्येण प्रबन्धान्तेन प्रपञ्चितम्। तत्रैव अनुसन्धेयमित्यभिप्रायेण (शोन्नोम्) इत्युक्तम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्याये द्वितीयपादे**
**भगवतोऽसङ्कुचितसर्वरक्षकत्वसमर्थनं नाम**
**पञ्चमाधिकरणम् समाप्तम्।।**

---

१. लक्ष्मी.त.१७-७०

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे
# श्रीसम्बन्धस्य अकारव्यङ्ग्यत्वसमर्थनं नाम षष्ठाधिकरणम्

**मू।। (४८) रक्षिक्कुम्बोतु पिराट्टि सन्निधिवेण्डुकैयाले इदिलेश्रीसम्बन्ध-मुमनुसन्धेयम्**

इत्थम् अकारस्य वाच्यार्थ उक्तः। अथ व्यङ्ग्यर्थ उच्यते। तत्र संशयः। श्रियः पतित्वम् अकारस्य व्यङ्ग्यार्थो न वेति। तदर्थं भगवतो रक्षणे श्रीसन्निधि-रपेक्षिता, न वेति। तदर्थं तत्र प्रमाणमस्ति न वेति। प्रथमसंशयार्थं पुनरिदं चिन्त्यते। भगवतो रक्षकत्वम्। अकारस्य रूढिनिमित्तव्यङ्ग्यं न वेति, अकारमकारसमभि-व्याहारव्यङ्ग्यं न वेति च। एतदर्थंमिदं चिन्त्यते, रक्ष्यरक्षकसन्निधानं परिकर-सन्निधानाऽनियतं न वेति। प्रथमसंशयार्थं परमपि चिन्त्यते। श्रियः पतित्वं चतुर्थ्यर्थप्रतिसम्बन्धिशेषित्वव्यङ्ग्यं न वेति। प्रथमसंशयार्थमेव अन्यदपि चिन्त्यते। दिव्यदम्पत्योः अविनाभावोऽस्ति न वेति। एतदर्थमिदं न चिन्त्यते। भगवद्रक्षक-त्वसिद्ध्यर्थं, भगवद्वक्षसि स्थित्यर्थं, भगवद्रञ्जनार्थं स्वयमेव चेतनरक्षणार्थञ्च दम्पत्योः अविनाभावे भगवत्स्वातन्त्र्यहानिः अस्ति न वेति।

पुनरपि आद्यसंशयार्थमेव चिन्त्यते। श्रियः पतित्वं चतुर्थ्यर्थव्यङ्ग्यं न वेति। यदा प्रमाणाभावेन भगवद्रक्षणे श्रीसन्निधानमपेक्षितम्। यदा च श्रियः पतित्वम् अकाररूढिनिमित्तव्यङ्ग्यं न भवति। यदा च रक्ष्यरक्षकसन्निधाने परिकरसन्नि-धानानियमेन, तत् अकारमकारसमभिव्याहाराभावेव्यङ्ग्यं न भवति। यदा च श्रियः पतित्वं चतुर्थ्यर्थप्रतिसम्बन्धिव्यङ्ग्यं न भवति। यदा च भगवद्रक्षणादिचतुष्टयार्थं दिव्यदम्पत्योः अविनाभावे भगवत्स्वातन्त्र्यभङ्गप्रसङ्गेन तयोः अविनाभावो नास्ति। यदा च चेतनस्य भगवत्प्रीतिमात्रोद्देशेन प्रवृत्त्यसम्भवेन श्रियः पतित्वं चतुर्थ्यर्थ व्यङ्ग्यं न भवति। तदा हेतुषट्केण बाधकेन श्रियः

पतित्वम् अकारस्य व्यङ्ग्यार्थो न भवेत्। यदा च निरुक्तहेतुषट्करूपबाधकं **नास्ति। तदा श्रियः पतित्वम्।** अकारस्यव्यङ्ग्यार्थो भवेत् इति फलफलीभावः।

## तत्र पूर्वपक्षः

श्रियः पतित्वम् - अकारस्य व्यङ्ग्यार्थो **न** भवति। भगवद्रक्षकत्वरूपाकारार्थस्य श्रीसम्बन्धाक्षेपकत्वाभावात्। न च श्रीसहितस्यैव भगवतो रक्षकत्वात् तस्य तदाक्षेपकत्वमिति वाच्यम्। तत्र मानाभावात्। न च [1]**लक्ष्म्या सह हृषीकेशः** इत्यादिकं प्रमाणम्। **सहैव दशभिः पुत्रैः भारं वहति गर्दभी** इत्यादाविव **लक्ष्म्या सह** इत्युक्त साहित्यस्य उपलक्षणत्वात्। अन्यथा भगवतो अनन्याधीनत्वभङ्गप्रसङ्गात्।

न च लक्ष्म्याः पत्नीत्वप्रयुक्तपारतन्त्र्यसद्भावेन भगवतः सत्तापेक्षत्वे स्वातन्त्र्य-भूतानन्याधीनत्वं सम्भवतीति वाच्यम्। पितापुत्राभ्यां सम्भूयक्रियमाणरथादौ वास्तवपारतन्त्र्यविशिष्टस्यापि पुत्रस्य पितृवत् स्वातन्त्र्या विशेषेण, प्रकृतेऽपि **लक्ष्म्या सह** इत्युक्तसाहित्यस्य विशेषणत्वे रक्षणक्रियायां सहकारित्वेन लक्ष्म्या अपि स्वातन्त्र्यापत्तौ, वास्तवपारतन्त्र्यस्याप्रयोजकतया रक्षणकार्ये स्वतन्त्र्याऽन्याधीनत्वस्याप्रसङ्गात्।

एतेन मन्त्ररत्नस्थ श्रीमच्छब्दः - लक्ष्म्याः शरणपदार्थेष्टप्राप्त्यनिष्टनिवृत्त्योः सहकारित्वे प्रमाणमिति अपास्तम्। तत्रापि नारायणशब्देन रूढ्याप्रदात्मकश्रुत्या प्रपत्तव्यदेवतानिर्धारणवत्, श्रीमच्छब्देन रूढिनिमित्तोपषष्टम्भकोत्तरनारायणादि उपबृंहितश्रीपतित्वरूपलिङ्गमुखेन, देवताविशेषनिर्धारणेन, श्रीमत्पदसाफल्यसम्भवेन, स्वातन्त्र्यभङ्गप्रसङ्गादेव, तत्रापि श्रीमच्छब्दस्योपलक्षणपरत्वात्। [2]**पतिं विश्वस्यात्मेश्वरम्** [3]**न तस्येशे कश्चन** [4]**नान्यो हेतुर्विद्यत ईशनाय** [5]**क्षरात्मानौ ईशते देव एकः** इत्यादिश्रुतिविरोधेन, पुरुषकारत्वकण्ठोक्तीनां मातृत्वप्रयुक्तवात्सल्यातिरेककृतघटनपरत्वेन, लक्ष्मीपुरुषकारभावस्य कार्योत्पत्त्यर्थाऽनपेक्षनीयत्वे सति अवर्जनीयसन्निधिकत्वलक्षणान्यथासिद्धिग्रस्तत्वात्।

---

१. लक्ष्मी.त.२८-१४ २. तै.उ.ना.व.१० ३. तै.उ.ना.व.२
४. श्वेता.उ.६-१७ ५. श्वेता.उ.१-१०

एतेन श्रीसम्बन्धस्याकारव्यङ्ग्यत्वाभावे लक्ष्म्याः भगवद्वक्षसि निवासो **न स्यादिति श्रीसेनापतिमिश्रसूक्तिवाक्यमपि** व्याख्यातम्। **अकारव्यङ्ग्यं श्रियः पतित्वम्** इति सम्प्रदायश्रद्धाविजृम्भितत्वात्। अन्यथा [1]**श्रीवत्सवक्षानित्यश्रीः** [2]**ययौ वक्षःस्थलं हरेः** इत्यादि प्रसिद्धायाः विष्णुवक्षःस्थलालयाया अकारेण व्यञ्जनयाऽनुपस्थितौ **वक्षसि स्थितिः न स्यादिति**, वक्षः स्थितिवत् अकारेणोपस्थितिरपि नियतेत्युक्तेः परीक्षकतपरिहासनीयत्वापत्तेः।

न च अकारस्य भगवति रूढतया लक्ष्म्यालिङ्गितवक्षस्कत्वं रूढिनिमित्तमितिलक्ष्मीसम्बन्धबोधो लक्ष्यत इति वाच्यम्। एवं तर्हि श्रियःपतित्वस्यैव रूढिनिमित्तत्वापत्तौ, **श्रियः पतित्वम्-अकारव्यङ्ग्यार्थः** इति सिद्धान्तभङ्गप्रसङ्गात्। यदि च मन्त्ररत्ने श्रीमत्पदेन निर्दिष्टस्यापि श्रीसम्बन्धस्य नारायणशब्देनापि निर्देशे पौनरुक्त्यापत्त्या, नारायणादिशब्देषु रूढिप्रवृत्तिनिमित्तमन्यदेव इत्युच्येत। तर्हि तदेव अकारस्यापि रूढिप्रवृत्तिनिमित्तमिति नाकारस्य श्रियः पतित्वं रूढिप्रवृत्तिनिमित्तव्यङ्ग्यार्थः। अतः वक्षस्स्थलपरित्यागे अकारपरित्याग इति वाक्यम् असदर्थवाद एव।

एतेनैव अकारमकारसमभिव्याहारव्यङ्ग्यं श्रियः पतित्वमित्यपि निरस्तम्। अकारर्थरक्षणसहकारित्वेन श्रीसम्बन्धाक्षेपस्य अनुपदमेव निरस्ततया मकारस्य ज्ञातृत्वादिविशिष्टजीवप्रतिपादकस्य श्रीसम्बन्धगन्धव्यञ्जकत्वाऽसम्भाविततया च तदुभयसमभिव्याहारव्यञ्जकत्वशङ्कायाः दूराऽपास्तत्वात्।

न च - शय्यास्थितभर्तृरञ्जनार्थं खट्वासुप्तशिशुपोषणार्थञ्च, भार्यात्वजननीत्वाकारेण, स्त्रियाश्शय्याखट्वयोः अपरित्यागवत्, ईश्वरजीववाचकाकारमकारापरित्यागो लक्ष्म्याः अपि सम्भवतीति वाच्यम्। भर्तुः शय्यास्थितेः भार्या भोगार्थतया, शिशोः खट्वास्थितेः जननीकर्तृकस्वापनमुखेन पोषणार्थतया च, भार्यायाः सामीप्यसम्बन्धेन शय्याखट्वयोः अपरित्यागसम्भवेऽपि आकारमकारयोः लक्ष्मीसापेक्षव्यापारमुखेन ईश्वरजीवबोधकत्वाभावेन लक्ष्म्या बोध्यबोधतासम्बन्धेन अकारमकारापरित्यागे मानाभावात्। स्त्रियाः शय्या खट्वयोरपि अपरित्याग-

१. रामा.सु.का.२७-२९ २. विष्णु.पु.१-९-५

स्यानियततया लक्ष्म्या अकारमकारापरित्यागस्य नियततया च दृष्टदार्ष्टान्तिकयोः वैषम्याच्च।

अकारार्थरक्षणेन व्यङ्ग्यत्वस्य पूर्वमेवोक्ततया पुनः तदुक्तिवैफल्याच्च। ज्ञातृत्वरूपेण जीवबोधकस्य मकारस्य अकारसमभिव्याहारेऽपि लक्ष्मीसम्बन्धव्यञ्जकधर्मपरत्वासम्भवेन अकारसमभिव्याहारोक्तिवैफल्याच्च।

अत एव लुप्तचतुर्थीसमभिव्याहारसिद्धशेषित्वव्यङ्ग्यं श्रियः पतित्वमित्यपि परास्तम्। **भगवतोयच्छेषित्वं तच्छेषित्वं लक्ष्म्या अपि** इत्यत्र नियमे प्रमाणाभावात्। उभयाधिष्ठानञ्चैकं शेषित्वमिति सिद्धान्तिवाक्यस्य भगवतः उपायान्तरासहत्ववत्, उपेयान्तरासहत्वप्रतिपादक प्रमाणजातविरुद्धत्वात्। न च ग्रहिण्या दासशेषित्वन्यायेन लक्ष्म्या जीवशेषित्वसिद्धरिति वाच्यम्। गृहिणीपरामर्शनियत् धर्मशास्त्रसिद्धानां गृहकार्याणां गृहिण्यनुमतरीत्या अकरणे गृहकार्याणाम् असिद्धिप्रसङ्गेन, दासं प्रति यजमानशेषित्वस्यैव असिद्धिप्रसङ्गेन, दासं प्रति यजमानशेषित्वस्यैव सिद्धिप्रसङ्गेन दासशेषीक्रयपत्रे यजमानमात्र शेषित्वलेखनेन गृहीणी शेषित्व सिद्धवर्णनसम्भवेऽपि शास्त्रैकगम्यभगवच्छेषित्वस्य लोकदृष्टरीत्या लक्ष्मीशेषित्वाक्षेपकत्वोक्तेः उपहास्यत्वात्।

अत एव श्रीश्रीशयोः अविनाभावात् श्रीशोपस्थितौ श्रियोऽपि उपस्थितिरिति परास्तम्। अकारस्य योगनिमित्तरूढिनिमित्तमकारसमभिव्याहारप्रत्यया र्थाऽन्वयरूपाऽविनाभावहेतुचतुष्टयस्य निरस्तत्वात्। अन्यस्य च अविनाभावहेतोः अनुपलब्धिपराहतत्वात्। पूर्वोक्तहेतुचतुष्टयेन पृथक्स्थित्यभावरूप व्यञ्जकान्तरोपन्यासवैफल्याच्च।

एतेन प्रभाप्रभावन्न्यायेन पुष्पपरिमलन्यायेन च अविनाभाव इत्यपि प्रत्युक्तम्। लक्ष्मीसम्बन्धप्रयुक्तातिशयविवक्षायाम् अनन्याधीनत्व भङ्गात्। तदविवक्षायां विशेषदृष्टान्तवैफल्यात्, [१]**अनन्या हि मया सीता** इत्यादेश्च प्रशंसामात्रत्वात्, [२]**प्रसूनं पुष्यन्तीम्** इत्यादेरपि स्वयंकल्पितप्रशंसामात्रत्वाच्च।

---

१. रामा.यु.का.१२१-१९
२. श्रीगुणरत्नकोशः २९

एतेनैव चतुर्थ्यर्थ एव व्यञ्जक इत्यपि प्रतिक्षिप्तम्। शेषत्वस्य मिथुन-निरूप्यत्वस्य [1]**पतिं विश्वस्य** [2]**पतिं पतीनां, परमं परस्तात्** इत्यादि प्रमाण-शतप्रतिपन्न जगच्छेष्येकत्वबाधप्रसङ्ग पराहतत्वात्। तस्मात् श्रियः पतित्वम्-अकारस्य व्यङ्ग्यार्थो न सम्भवत्येवेति ।

## अत्रायं सिद्धान्तः

श्रियः पतित्वम् अकारस्य व्यङ्ग्यार्थो भवत्येव। भगवद्रक्षकत्वरूपा-कारार्थस्य श्रीसम्बन्धाक्षेपकत्वात्। श्रीविशिष्टस्यैव भगवतः सर्वत्र रक्षकत्वात्। तत्र च **लक्ष्म्या सह** हृषीकेशः इत्यादेरेव प्रमाणत्वात्। तत्र लक्ष्मीसहितत्वस्य विशेषणत्वे सम्भवति उपलक्षणत्वस्यान्याय्यत्वात्।

न चैवं भगवतोऽनन्याधीनत्वभङ्गप्रसङ्गः। लक्ष्म्याः पत्नीत्वप्रयुक्तपारत-न्त्र्यसद्भावेन भगवतः सत्सापेक्षत्वेऽपि, स्वतन्त्रान्यानधीनत्वसम्भवात्। न च पितापुत्राभ्यां सम्भूयक्रियमाणरथादौ वास्तवपारतन्त्र्यविशिष्टस्यापि पुत्रस्य पितृवत् स्वातन्त्र्याविशेषेण, प्रकृतेऽपि लक्ष्म्या सह इत्युक्तसाहित्यस्य विशेषणत्वे रक्षण-क्रियायां स्वातन्त्रापत्त्या, पत्नीत्वप्रयुक्तपारतन्त्र्यमप्रयोजकमिति वाच्यम्। रथादौ पितापुत्रयोः रथत्वाद्यवच्छिन्नकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नतक्षणादि-व्यापाराणां तक्षत्वादि कारणतावच्छेदकस्य चाविशेषेण द्वयोरपि स्वतन्त्रका-रणत्वेऽपि, प्रकृते श्रीश्रीशयोः चेतनकर्मकरक्षणक्रियायाम् एकधर्मावच्छिन्नकारण-ताकत्वे मानाभावेन, पत्नीत्वप्रयुक्तपारतन्त्र्यस्य राजभृत्यादिन्यायेन घटकत्वरूप-परम्पराकारणत्वप्रयोजकत्वसम्भवात्। सम्भवति च पत्नीत्वेन भगवद्वाल्लभ्याति-शयात् राजभृत्याद्यपेक्षयापि फलाविनाभूतघटनातिशयः। किञ्च **लक्ष्म्यासह** इत्यत्र **सह युक्ते अप्रधाने** इति तृतीयया क्रियायाः प्राधान्यप्रतीत्या घटकत्वेनैव लक्ष्म्या अन्वयोवचनसिद्धः। अतः न भगवतोऽनन्याधीनत्वभङ्गः।

अपि च **लक्ष्म्या सह** इत्यादि वचनमूलप्रमाणभूतमन्त्ररत्ने श्रीमच्छब्द-बलेनैव लक्ष्म्या भगवत्कर्तृकरक्षणकार्योपयोगः, तत्र घटकत्वेन उपयोगविशेषश्च सिद्ध्यति। श्रियश्शरणपदार्थेष्टप्राप्त्यनिष्टनिवृत्त्योः उपयोगित्वेन विशेषणत्वस्य

---

१. तै.उ.ना.व.६-११-३ २. यजु.वे.का.३-३-३

सम्भवतः त्यागायोगात्। उपलक्षणत्वे साक्षादुपयोगित्वे च, परमोपक्रम श्रीशब्द-विरोधाच्च। श्रीशब्दव्युत्पत्तिषट्केण घटकत्वेन परम्परया रक्षणोपयोगप्रतीतेः। **श्रृणाति निखिलान् दोषान् श्रीणाति च गुणैर्जगत्** इति व्युत्पत्तिद्वयस्य **श्रीयते, श्रयते, श्रृणोति, श्रावयति** इति व्युत्पत्तिचतुष्टयस्य च द्वारद्वारिभावेन परम्पराकारणत्वपरत्वसम्भवे, साक्षात्परम्पराकारणताद्वयपरत्वस्य अन्याय्यत्वात्।

अन्यच्च पुरुषकारत्वकण्ठोक्त्यापि श्रीमच्छब्दस्य परम्परोपयोगित्वमेव उपबृंहितम्। न च पुरुषकारत्वश्रुतिसिद्धघटनस्य मातृत्वप्रयुक्तवात्सल्यातिरेक कृतत्वेन कार्योत्पत्त्यर्थमनपेक्षणीयत्वे सति इत्याद्यन्यथासिद्धिः दोष इति वाच्यम्। **पुरुषं करोतीति** व्युत्पत्त्या अकार्यकरत्वेन स्त्रीप्राययोः जीवेश्वरयोः कर्मघटकत्वेन पुंस्त्वावहत्वस्य पुरुषकारत्वश्रुतिसिद्धतया, कार्योत्पत्त्यर्थमनपेक्षणीयत्वाभावात्। साक्षात्कार्योत्पत्त्यर्थमनपेक्षणीयत्वेन अन्यथासिद्धेः अस्माकमनिष्टत्वाभावात्।

एवं —

**[1]श्रृणाति निखिलान् दोषान् श्रीणाति च गुणैर्जगत्।**
**श्रीयतेचाखिलैर्नित्यं श्रयते च परं पदम्।**
**श्रयन्तीं श्रीयमाणाञ्च श्रृणतीं श्रृण्वतीमपि।।**

इत्यादिष्वपि सद्वारककार्योपयोगित्वपरतया श्रीमच्छब्द उपबृंहित इत्यनुसन्धेयम्। इतरच्च।

**[2]तमसः परमो धाता शङ्खचक्रगदाधरः।**
**[3]जातोसि देवदेवेश शङ्खचक्रगदाधर।।**

**शमित निखिलतापं शङ्खचक्रादिचिह्नम्** इत्यादि प्रतिपन्नशङ्खचक्रादि-विशिष्टविग्रहविशेषस्यैव ब्रह्मरुद्रेन्द्रादिशब्देषु चतुर्मुखत्व त्रिनेत्रत्वसहस्राक्षत्वादि-विशिष्टविग्रहवत् विष्ण्वादिशब्देषु रूढिनिमित्ततया तत्पर्यास्य आकारस्यापि तादृशविग्रहविशेष एव रूढिनिमित्तमिति, लक्ष्मीसम्बन्धनियतविग्रहविशेषबोधकस्या-कारस्य लक्ष्मीसम्बन्धव्यञ्जकत्वाश्यम्भावेन, लक्ष्म्या अकारव्यङ्ग्यत्वाभावे, भगवद्वक्षःस्थलसम्बन्धो न स्यादिति श्रीसेनापतिमिश्रसूक्त्यनुसारेण श्रियः पतित्वम्

---

१. अहि.सं. २. रामा.यु.का.११४-१५ ३. विष्णु.पु.५-३-१०

- अकारव्यङ्ग्यार्थ एवा तत्सूक्तौ सम्प्रदायश्रद्धाजृम्भितत्वोक्तेश्च, अकारप्रवृत्तिनिमित्तविग्रहविशेषे लक्ष्मीवक्षस्कत्वाऽविनाभावाज्ञाननिबन्धना। लक्ष्मीवक्षस्कत्वनियतविग्रहविशेष निमित्तकाकारेण विष्णुवक्षस्स्थलालयायाः लक्ष्म्याव्यञ्जनया अनुपस्थितौ, वक्षसि स्थितिः न स्यादिति आपादनस्य परीक्षकहृदयङ्गमत्वात्।

न च - श्रीपतित्वमेव रूढिनिमित्तमिति तस्य व्यङ्ग्यत्वभङ्गप्रसङ्गः। श्रीपतित्वं कस्मिन्नात्मस्वरूपेऽस्ति। कस्मिन्नास्तीति जिज्ञासायां शङ्खचक्रादिचिह्नितविग्रहविशेषावच्छिन्नात्मस्वरूपत्वस्यैव तद्व्यञ्जकत्वेन वक्तव्यतया तस्यैव निमित्तत्वौचित्वात्। एवञ्च मन्त्ररत्ने श्रीमच्छब्दसमभिव्याहारोऽपि उपपद्यते।

एतच्च [१]**श्रद्धया देवो देवत्वमश्नुते,** [२]**तया स राजर्षिसुत** इत्यादि श्रुतिस्मृतिमूलकेन [३]**यस्यावीक्ष्य मुखं तत्** इत्याद्याचार्यवचनेन, भगवत्कृतचेतनरक्षणस्य, लक्ष्मीमुखोल्लासार्थतया रक्षकत्ववाचिना अकारेण, रक्षणफलमुखोल्लासशालिलक्ष्मीपतित्वं व्यङ्ग्यमिति निर्बाधम्।

इदञ्च [४]**श्रियं वासय मे कुले मातरं पद्ममालिनीम्** [५]**निजदेवीं मातरं श्रियं वासय मे कुले** [६]**त्वं मातासर्वलोकानाम्** इति श्रुतिस्मृत्यनुगृहीतेन [७]**स्वजनयसिमाता तदपि नः** इत्याचार्यवचनेन, लक्ष्म्या मातृत्वेन जीवरक्षकतया रक्ष्यवाचिना मकारेण रक्षकलक्ष्मीपतित्वं व्यज्यत एव।

न च - रक्ष्यत्वेन मकारस्य न जीववाचकत्वमितिवाच्यम् । अकारस्य रक्षकवाचित्वेन जीवस्यैव रक्षणकर्मत्वेन च ज्ञातृत्वेन जीववाचकस्य मकारस्य अकारसमभिव्याहृतस्य रक्ष्यत्वेन जीवव्यञ्जकत्वस्य निर्बाधत्वात्। अत एव स्त्रियाः पतिशिशुरञ्जनपोषणार्थं शय्याखट्वयोः अपरित्यागवत्, लक्ष्म्याः प्रथमचरमपदापरित्याग इत्याप्युपपद्यते।

अकारस्य मुखोल्लासफलकरक्षणवाचकत्वेन शय्यास्थानीयत्वस्य, मकारस्य अकारसमभिव्याहारेण जीवात्मस्वरूपे रक्षत्वव्यञ्जकतया खट्वास्थानीयत्वस्य चोपपत्तेः। तिरुप्पावै दिव्यप्रबन्धव्याख्याते अयं विषयः दरीदृश्यते ।

१. यजु.वे.का.३-३-३ २. रामा.बा.का.७७-३८ ३. श्री.र.स्त.१-१५
४,५. श्रीसूक्तम् ६. विष्णु.पु.१-९-१२६ ७. श्रीगुणरत्नकोशः.५२

सप्तदशसूक्तौ अनुगृहीतप्रकारेण प्रेमातिशयेन रञ्जनपोषणार्थं नियमेन नन्दगोपश्रीकृष्ण-शय्याखट्वयोः अपरित्यागशालिन्या यशोदाया एव दृष्टान्तत्वेन विवक्षिततया तद्वैषम्याभावाच्च।

रक्षणमूलत्वेन रक्षणफलत्वेन च श्रीसम्बन्धस्य द्वेधा व्यङ्ग्यत्वसूचनाय अकारेण व्यङ्ग्यस्य द्विरुक्तिसम्भवाच्च। अत एव समभिव्याहारोक्तेः साफल्याच्च। अतश्च, लुप्तचतुर्थ्यन्वयलब्धशेषित्वरूपाकारार्थोऽपि लक्ष्मीसम्बन्धव्यञ्जक एव। **भगवतो यच्छेषित्वं तच्छेषित्वं लक्ष्म्याः** इति नियमे, मन्त्ररत्नोत्तरवाक्यस्य श्रीमच्छब्दस्य तदुपबृंहणस्य [1]**विष्णोः श्रीरनपायिनी** इत्यादेश्च प्रमाणत्वात्। अत एव शेषित्वस्य व्यासज्यवृत्तित्वसिद्धान्तसूक्तिरपि घटते।

न चैवम्, अनन्योपेयत्वप्रमाणजातविरोधः। अनन्योपायत्वपरवचनानां प्रधानोपायान्तरासहत्वपरत्ववतः अनन्योपायत्वपरवचनानां प्रधानोपेयान्तरासहत्व-परतया विरोधाभावात्। प्राधान्यञ्च - अदृष्टद्वारकसाक्षात्फलकारणत्वम् साक्षाद्दृष्ट-द्वारकफलकारणत्वम्। अदृष्टद्वारकं दृष्टद्वारकं वा परम्परया फलकारणत्व-ञ्चोपायस्याप्राधान्यम्। स्वेतरप्राप्तीच्छाऽनधीनेच्छाविषयप्राप्तिमत्त्वम् उपेयस्य प्राधान्यम्। स्वेतरप्राप्तीच्छाधीनेच्छाविषयप्राप्तिमत्त्वम् उपेयस्याप्राधान्यम्।

न चैवं मन्त्ररत्ने पूर्वखण्डे लक्ष्म्या उपायत्वांशे विशेषणत्वम्, उत्तरखण्डे लक्ष्म्या उपेयत्वांशे विशेषणत्वमिति सिद्धान्तभङ्ग इति वाच्यम्। अदृष्टद्वारकफल-साधनत्वात्मकफलकरणत्वरूपोपायत्वस्य भगवन्मात्रवृत्तित्वेन, लक्ष्म्या उपेयत्वांशे उपलक्षणत्वमेव। एकैककैङ्कर्यव्यक्तिजनितप्रीतिमत्त्वस्य दिव्यदम्पतिवृत्तित्व-नियमेन, शेषित्वलक्षणप्राप्यत्वांशे लक्ष्म्या विशेषणत्वमेवेतिवक्तुं शक्यत्वेन, सिद्धान्तभङ्गाप्रसङ्गात्। अनन्यार्थप्राप्तत्वरूपे प्रधानोपेयत्वे लक्ष्म्या आधारत्वेन विशेषणत्वाभावेऽपि प्रवृत्त्युद्देश्यप्रीतिमत्त्वलक्षणेशेषित्वे आधारतया विशेषण-त्वोपपत्तेः।

न चैवमपि - **उभयाधिष्ठानञ्चैकं शेषित्वम्** इति आचार्यैः शेषित्वस्य व्यासज्यवृत्तिं वक्तुमयुक्तम्। कैङ्कर्येण दम्पत्योः प्रत्येकमेव भिन्नभिन्नायाः प्रीतेः

---

१. विष्णु.पु.१-८-१७

उदयादिति वाच्यम्। **दिव्यदमाती प्रीतौ भूयास्ताम्** इति कैङ्कर्यप्रवृत्ति-हेतुभूतेच्छाविषयत्वात्मकप्रवृत्त्युद्देश्यत्वरूपशेषित्वस्य व्यासज्यवृत्तित्वोक्त्युपपत्तेः।

न च - मूलमन्त्रे लक्ष्मीशेषत्वस्य कण्ठतः अनुक्तिः अयुक्ता। स्वायत्तन्याय-विरोधात्। सर्ववाङ्मूलस्य वचनान्तरोपजीवना सम्भवाच्चेति वाच्यम्।

दासक्रयपत्रे यजमानशेषत्वमात्रलेखनेन गृहिणीशेषत्वसिद्धिवत् न्यायसिद्धस्य लक्ष्मीशेषत्वस्य कण्ठोक्तेः अनपेक्षितत्वात्। सूत्राणां विश्वतोमुखत्वे तदुपबृंहणीय-सर्ववाङ्मूलस्य सुतरां विश्वतोमुखत्वसम्भवाच्च।

न च - गृहव्यापाराधिकृतगृहिणी शेषत्वाभावे दासस्य यजमानशेषत्ववत्, शास्त्रैकगम्यभगवच्छेषत्वस्य लक्ष्मीशेषत्वं विना अनिर्वाहो न न्यायसिद्ध इति वाच्यम्। गृहिणीशेषत्वस्य यजमानेष्टत्वेन यजमानशेषत्वोपपादकतया, दासस्य गृहिणीशेषत्वसिद्धिसम्भवे, तन्न्यायेनैव लक्ष्मीशेषत्वस्यापि सिद्धिसम्भवात्। विष्णु-पत्नीत्वोक्तेः पत्नी धर्मातिदेशततया लक्ष्म्याः शास्त्रवश्यत्वाभावेऽपि स्वातन्त्र्याभिमत-सर्वभर्तृव्यापारनिर्वाहिकायाः गृहिण्याः इव लक्ष्म्याः अपि स्वात्यन्ताभिमतभगव-दीयसर्वव्यापारनिर्वाहकत्वसिद्धौ, लक्ष्मीशेषत्वं विना भगवच्छेषत्वस्या निर्वाह सम्भवाच्च।

परञ्च श्रीश्रीशयोः अविनाभावात्, श्रीशोपस्थितौ श्रियोपि उपस्थितिरिति युक्तम्। हेतुचतुष्टयेन अविनाभावस्योपपादित्वात्। [1]**विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनूम्** इत्युक्तरीत्या अवतारप्रयुक्ताविनाभावसम्भवाच्च। [2]**अहन्ता ब्रह्मणस्तस्य साहमस्मि सनातनी** इत्याद्युक्तरीत्या परत्वचिह्नेषु प्रधानस्वरूप-निरूपकतया अविनाभावोपपत्तेश्च।

योगवृत्तिनिमित्तसहकारित्वेन रूढिवृत्तिनिमित्ताऽविनाभूतापेक्षया, अयुत-सिद्धधर्मत्वेन योगवृत्तिनिमित्तोद्देश्यत्वेन मातृत्वेन रक्षकत्वलक्षणं प्रतिस्विक-सम्बन्धेन, भगवच्छेषित्वनियतशेषित्वेन वक्ष्यमाणरीत्या शेषित्वस्य व्यासक्तत्वेन, लक्ष्म्या व्यङ्ग्यत्वसाधनतवत्, पूर्वोक्तैः व्यञ्जकहेतुभिः हेत्वन्तरैश्च अकारवाच्या-विनाभावसाधनपूर्वकं वाच्यसम्बन्धेन व्यङ्ग्यत्वसमर्थनस्य भिन्नरूपत्वेन सार्थकत्वाच्च

१. विष्णु.पु.१-६-१४५ २. लक्ष्मी.त.२

**प्रभावदपेक्षया प्रभाया इव अपृथक्सिद्धधार्यत्वेन प्रसूनपरिमलस्येव अयुतसिद्ध-**धर्मत्वेन च लक्ष्म्या भगवदविनाभावोपपादनसम्भवाच्च। न च - अपृथक्सिद्धधार्यत्वा-दिमात्रविवक्षायां सर्वस्य जगतः कालादि धार्यत्वेन विशेषोक्तिवैयर्थ्यम्, अतिशयाधाय-कधर्मविवक्षायाम् अनन्याधीनत्वभङ्गः इति वाच्यम्।

**भगवतो लक्ष्मीसम्बन्धस्यैव अतिशयरूपत्वेन अभेदेन अतिशयज्ञापकत्व-**विवक्षायां बाधकाभावात्। **श्रद्धया देवो देवत्वमश्नुते, तया स राजर्षिसुतः** इत्यादौ, ध्यानेन धनवान् इत्यादाविव, इत्थम्भूतलक्षणे तृतीया श्रवणात्। [1]**अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा** इत्यादावपि जनकात्मजायाः एव अप्रमेय-तेजोरूपत्वेन विवक्षितत्वात्।

यद्वा राजगुर्वाद्यनुमतिपूर्वकभृत्यशिष्याद्यधीनाऽतिशय भाजोऽपि राजगुर्वादेः स्वातन्त्र्यदर्शनेन, स्वाधीनान्यप्रयुक्तातिशयभाक्त्वस्यस्वातन्त्र्यभञ्जकत्वाभावेन, भगवदभिमतत्वपरिज्ञानेन भगवदीयसर्वव्यापारेषु लक्ष्म्या सहकरणानुमोदनादिकरणे भगवतः प्रीत्यतिशयभजनेन [2]**श्रद्धया देवो देवत्वमश्नुते** [3]**तया स राजर्षि सुतः शुशुभे** इत्यादौ करणे तृतीयाश्रयणेऽपि न दोषः।

अयञ्च प्रभाप्रभावन्न्यायः - [4]**अनन्या हि मया सीता,** [5]**अनन्या राघवेणाऽहम्** इति दिव्यदम्पतिवचनसिद्धः तस्मिंश्च वचने दृष्टान्तबलेन 'अनन्या' शब्दस्य तादात्म्य परत्व विना अपृथक्सिद्धधार्यपरत्वं सूचितम्। एवञ्च तस्य वचनस्य असदर्थवादत्वशङ्का निर्निबन्धना। अयुतसिद्धधर्मत्वञ्च लक्ष्म्याः [6]**प्रसूनं पुष्यन्तीम्** इत्याद्याचार्यसूक्तिसिद्धम्। [7]**अहन्ता ब्रह्मणस्तस्य** इत्यादिवचनेन, लक्ष्म्याः परत्वचिह्नेषु प्रधाननिरूपकतया, भगवतः शेषत्वेनस्वेतरसर्वाधिकातिशय-रूपत्वे सति अपृथक्सिद्धधर्मत्वस्य सिद्धतया आचार्यसूक्तौ स्वयंकल्पित प्रशंसा-मात्रत्वप्रलपनस्य महापापफलीभूतज्ञानमात्रविजृम्भितत्वात्। तस्मात् वाच्याविना-भावात् लक्ष्मीसम्बन्धः अकारव्यङ्ग्यार्थ इति स्थितम्।

---

१. रामा.अर.का.३७-१८ २. यजु.वे.का.३-३-३ ३. रामा.बा.का.७७-३८
४. रामा.यु.का.१२१-१९ ५. रामा.सु.का.२१-१६ ६. श्रीगुणरत्नकोशः - २९
७. लक्ष्मी.त.२

अपरञ्च - चतुर्थ्यर्थ एव लक्ष्मीसम्बन्धव्यञ्जकः। लुप्तचतुर्थ्यर्थभूतायाः शेषत्वघटकप्रार्थनायाः दिव्यदम्पतिविषयिण्याः विषयतासम्बन्धेन व्यासज्यवृत्तित्वात्। **उभयाधिष्ठानञ्च एकं शेषित्वम्** इति पूर्वाचार्यैः अनुगृहीतत्त्वात्।

उकारेण तद्विवरणप्रमाणजातेन जगच्छेष्येकत्वस्य सद्दढत्वेऽपि, एकोन शेषित्वाश्रयैकत्वपरतया वा निरूपाधिकशेष्येकत्वपरतया वा, विरोधगन्धाभावात्।

भगवत्प्रीतेरेव अन्येच्छानधीनजीवेच्छाविषयतया लक्ष्म्यादिप्रीतेः भगवत्प्रतीच्छाजन्येच्छाविषयतयापि ऐकरस्यजुषोः शेषिदम्पत्योः शेषिकर्मसु विशेषणविशेष्यत्वं श्रुतम्। **कस्मान्न रोचते** इति वेदान्ताचार्यैः अनुगृहीतरीत्या, **शेषिकर्मणि** अशेषवृत्तावपि मिथुनस्यैव प्रतिसम्बन्धितया कैङ्कर्यप्रवृत्तिहेतुभूतेच्छायाः अपि **दिव्यदम्पती प्रीतौ स्याताम्** इति विषयतासम्बन्धेन व्यासज्यवृत्तित्वे बाधकाभावात्। **भगवान् प्रीतो भूयात्, तदर्थं लक्ष्मीप्रयुक्त भगवत्प्रियतमत्वशालिन्याः अस्मदीयशेषवृत्त्या लक्ष्मीरपि प्रीताभायात्** इतीच्छायाः कैङ्कर्यप्रवृत्तौ हेतुभूतायाः व्यासज्यवृत्तित्वावश्यम्भावाच्च। कैङ्कर्यस्य मिथुनप्रतिसम्बन्धित्वनियमेन तद्धेतुभूतेच्छायाः अन्येच्छाप्रयुक्तायाः अपि, लक्ष्मीप्रीतिमात्रविषयिण्या असम्भवाच्च। तस्मात् श्रियः पतित्वमकारव्यङ्ग्यार्थो भवत्येवेति सिद्धम्।

इदञ्चाधिकरणं दशसूत्र्यात्मकम्। तत्रेदमादिमं सूत्रं - (रक्षिक्कुम्बोतु, एम्बेरुमान् रक्षिक्कुम्बोतु) इत्यर्थः। पूर्वसूत्रस्थम् (एम्बेरुमानै) इति पदम्प्रथमान्ततयाविपरिणामेन अनुषज्यते। (रक्षिक्कुम्बोतु) रक्षणफलोपधानसमये इत्यर्थः। (पिराट्टि सन्निधिवेण्डुकैयाले, पिराट्टि) नः स्वामिनीत्यर्थः। [1]**अस्येशाना जगतो विष्णुपत्नी,** [2]**ईश्वरीं सर्वभूतानाम्** इत्यादौ स्वामित्वकार्यनियन्तृत्वश्रवणेन, भगवतः इव निरुपाधिकासङ्कुचितजगत्स्वामित्वं लक्ष्म्याः एव इत्यभिप्रायेण (पिराट्टि) इत्युक्तम्। यथा स्वामित्वात्। भगवतो जगद्रक्षणं स्वतः प्राप्तम्। एवं लक्ष्म्याः अपि भगवत्कर्तृकरक्षणे घटकतया अन्वयः स्वतः प्राप्तः इत्याशयेन (पिराट्टि) इति गुणमुखेन निर्दिष्टम्। सन्निधिपदेन मातृत्वप्रयुक्तवात्सल्यातिरेककृतमानससङ्कल्पमुखेन [3]**किमेतन्निर्दोषः क इह जगति** इत्याद्युपदेशमुखेन

१,२. श्रीसूक्तम्  ३. श्रीगुणरत्नकोशः - ५२

**तच्छिरः पादयोस्तस्य योजयामास जानकी** इत्यादिव्यापारमुखेन च सान्निध्यं निर्वक्षितम्।

(वेण्डुकैयाले) इति पदेन श्रीमच्छब्देबलात् तदुपबृह्मणवचने, **लक्ष्म्या सह** इत्यप्रधाने तृतीयनिर्देशाच्च घटकत्वं विवक्षितम्।

(इतिले, इतिल् अकारम्) इति पूर्वसूत्रनिर्दिष्टे प्रणवस्थाकार इत्यर्थः। (श्रीसम्बन्धम्) यद्यपि **लक्ष्म्या सह** इत्यादि स्पष्टार्थकवचनप्रत्यभिज्ञानायलक्ष्मी-सम्बन्धमिति वक्तव्यम्। तथा पि (रक्षिक्कुम्बोतु पिराट्टि) सन्निधिवेण्डुकैयाले' इति सिद्धवत् निर्देशमहिम्ना **लक्ष्म्या सह** इत्यादिवचनस्यार्थतः प्रत्यभिज्ञानमभिप्रेत्य, मूलप्रमाणस्मारणाय श्रीशब्दप्रयोगः। **श्रीमत्** इति मतुबर्थस्य विवक्षितत्वद्योतनाय सामान्यवाचिसम्बन्धशब्दप्रयोगः। (अनुसन्धेयम्) प्रणवस्य शाब्दबोधानन्तरं व्यङ्ग्य-मर्यादयाज्ञातव्यमित्यर्थः। अनुसन्धानशब्दप्रयोगोपाधितया श्रीसम्बन्धस्यावश्य-ज्ञातव्यत्वं व्यज्यते।

इत्थम् उपबृंह्योपबृंहणप्रमाणस्मारणपूर्वकम्, सहकारितासम्बन्धेन अकार-योगवृत्तिनिमित्तभूतभगवत्कर्तृकजगद्रत्रणव्यङ्ग्यत्वं लक्ष्मीसम्बन्धस्योक्तम् । अथ अविनाभावसम्बन्धेन अकाररूढि वृत्तनिमित्तभूतभगवद्विग्रहविशेषव्यङ्ग्यत्वमुच्यते द्वितीयसूत्रेण (अत्रेत्यादिना)।

**मू।। (४९) अत्र भगवत्सेनापतिमिश्रर्वाक्यम्। - अवन् मार्वैविट्टुप्पिरियिल् इव्वक्षरम् विट्टुप्पिरिवतु इति।**

(अत्र) लक्ष्मीसम्बन्धरूपव्यङ्ग्यार्थे। (भगवत्सेनापतिमिश्रर् वाक्यम्) ब्रह्मशब्दस्य निरतिशयबृहत्त्ववत्, भगवच्छब्दस्य पूर्णषाड्गुण्यवत्त्वं मुख्योऽर्थः। तस्य लोकोत्तरबृहत्त्ववत्, अस्य अलौकिकार्थसाक्षात्कारवत्त्वं प्रयोगप्राचुर्य-सिद्धोऽर्थः। प्रकृते तु [1]**ज्ञानाधिक्यत्ताले प्रपन्नर् पूर्वाचार्यर् कल्** इत्यनुगृहीतरीत्या स्वरूपयाथात्म्यज्ञानं विवक्षितम्। सेनापतिशब्दः - नामधेयपरम्। मिश्रशब्दः पूजोक्तिः। **वाक्यम् - अनुसन्धेयम्** इति शेषः। लक्ष्मीसम्बन्धरूपव्यङ्ग्यार्थे पूर्वाचार्यवाक्यं व्यङ्ग्यत्वसाधकविशेषपरतयाम् अनुसन्धेयमिति भावः।

१. श्रीवचनभूषणम्

नियामकविशेषमेव दर्शयति (अवन् मार्वैमित्यादिना, पिराट्टि-अवन् **मार्वै विट्टुप्पिरियिल्**) इति विशेष्यमध्याहर्तव्यम्। (अवन्) सदालक्ष्मीवक्षस्कत्वेन **प्रसिद्धो** भगवानित्यर्थः। [१]**अकलकिल्ले निरैयुम्** इत्यत्र (उरैमार् पा) इति वक्ष्यमाणत्वेन (मार्वै अकलकिल्लेन्) इत्यर्थ इत्यभिप्रायेण, (अवन् मार्वै विट्टु) **इत्युक्तम्**। भगवतो निजभुजद्वयेन गढालिङ्गनयोग्यस्यलभगवद्वक्षसः क्षणविश्लेषोऽपि लक्ष्म्या न सोढुं शक्य इति तत्सूक्त्याभिप्राय इति भावः। (विट्टु) इति विभागो विवक्षितः। (पिरियिल्) इति उत्तरदेशसंयोगपर्यन्तं विवक्षितम्। गढालिङ्गनार्थो विभागोऽपि न सह्यः। उत्तरदेशसंयोगस्य का कथेत्याशयेन (विट्टुप्पिरियिल्) इत्युक्तम्।

(इव्वक्षरम्) इव्वक्षरत्तु, प्रणवस्थाकारमित्यर्थः। यद्वा (इव्वक्षरम्) इति प्रथमान्तम्। (पिराट्टियै विट्टुप्पिरिवतु) इति पूर्वमध्याहृतस्य प्रथमान्तविशेष्यपदस्य द्वितीयान्ताया **अनुषङ्गेण योजनीयम्** (विट्टु) इत्यनेन लक्ष्मीबोधकत्वाभावोऽपि विवक्षितः। (पिरिवतु) इत्यनेन लुप्तविभक्त्यर्थाऽनन्वयो विवक्षितः।

यद्यपि-अकाररूढिवृत्तिनिमित्तविग्रहविशेषस्य वक्षस्स्थितिप्रयुक्तलक्ष्मी-सम्बन्धस्य वास्तवतया नित्यत्वसम्भवेऽपि, अकारगतलक्ष्मीसम्बन्धस्य वैज्ञानिकतया न तत् सम्भवः। लक्ष्म्या विग्रहविशेषाविनाभावापज्ञाने व्यञ्जनया बोधासम्भवात्। तथापि निरतिशयबुद्धिघटितसामग्रीबलात् व्यञ्जनया लक्ष्या वक्षस्स्थले नित्यवासवत्, विग्रहविशेषरूपप्रवृत्तिनिमित्ताविनाभावपरिज्ञानशालिनां तद्घटितसामग्रीबलात्, व्यञ्जनया लक्ष्मीसम्बन्धबोधः सम्भवतीतितात्पर्यम् । इयांस्तु विशेषः। लक्ष्म्या भोग्यताबुद्धेः नित्यत्वात् वक्षः सम्बन्धोऽपि नित्यः। विग्रहविशेषाऽविनाभावज्ञान-घटितसामग्र्या अनित्यत्वात् अकारस्य लक्ष्म्या सह बोधकत्वसम्बन्धः न नित्य इति।

**अत्र भगवत् सेनापतिमिश्रर् वाक्यम्** इतीत्यध्याहारेण योजनीयम्। अन्यथा (अवन् मार्वै) इत्यस्य ग्रन्थकारवाक्यत्वे, सेनापतिमिश्रवाक्यत्वेन ग्रन्थकाराभिप्रेतमन्यत् कल्पनीयं स्यात्। तच्च नास्ति। अत्र सेनापतिमिश्रवाक्य-त्वोक्त्या **सुव्याहतानि महताम्** इति शास्त्रार्थः सूचितः। अनुगृहीतञ्च वेदान्ताचार्यैः **विशमयति च स्वादुसुव्याहतानि** इति।

---

१. तिरुवायिमोलि ६-१-१०

**मू।। (५०) भर्त्ता विनुडैय पडुक्कैयैयुम् प्रजै यिनुडैय तोट्टिलैयुम् विडाते यिरुक्कुम् तमातावैप्पोले, प्रथमचरमपदङ्गलै विडातेयिरुक्कुमिरुप्पु**

इत्थं सूत्रद्वयेन हेतुद्वयमुखेन लक्ष्मीसम्बन्धस्य अकारव्यङ्ग्यार्थत्वमुक्तम्। अथ तृतीयचतुर्थहेतुद्वयमुखेन लक्ष्मीसम्बन्धस्य व्यङ्ग्यत्वमाह तृतीयसूत्रेण (भर्त्ता विनुडैयवित्यादिना)

अनुमोदनेन रञ्जकत्वरूपहेतुमुखेन, मातृत्वेन रक्षकत्वरूप हेतुमुखेन च व्यङ्ग्यत्वमत्र लक्ष्म्याः साध्यत इति सूचनाय दृष्टान्तोपपादनम्। अत्र भर्तृप्रजामातृशब्दाः परस्परप्रतियोगिकाः । अकारः - शय्यास्थानत्वेन विवक्षितः। **अनुगृहीतञ्च वेदान्ताचार्यैः**। तल्पं कल्पान्तयानोः शठजिदुपनिषद्दुग्धसिन्धुं विमथ्नन् इति। **शब्दस्य** अर्थापेक्षया शय्या स्थानीयत्वम् । शय्यायाः भार्यानुमोदनहेतुभर्तृभोगस्थानत्वेन, अकारस्य लक्ष्म्या अनुमोदनहेतुभूतभगवद्रक्षणप्रतिपादकत्वेन च सादृश्यं द्रष्टव्यम्। मकारः खट्वास्थानीयत्वेन विवक्षितः। खट्वायाः प्रजासुखकरसुप्तिमुखेन प्रजारक्षणस्थानत्वेन, मकारस्य अकारसमभिव्याहारबलेन चेतनसुखकरजननीस्तनन्धयभावरूपसम्बन्धमुखेन, भगवद्रक्ष्यत्वबोधकत्वेन च सादृश्यं विवक्षितम् । मातृसामान्यस्य शय्या खट्वाद्वयाऽपरित्यागो न इत्याशयेन दृष्टान्तं विशेषयति, (विडातेमातावैप्पोले) इति। अनेन उपमानोपमेयसाधारणधर्मोऽपि अभिप्रेतः। (माता वैप्पोले) इत्यनन्तरम् (पिराट्टि) इति पूर्वसूत्रे अध्याहृतं विशेष्यपदमनुषञ्जनीयम्।

(प्रथमचरमपदङ्गलै) इत्यवयवद्वयोक्तिमहिम्ना (प्रणवत्तिल्, प्रथमचरमपदङ्गलै) इत्यवयविसमुदायः आक्षिप्यते। तथा च - लुप्तचतुर्थ्यन्ततया लुप्तप्रथमान्ततया च विभक्त्यन्ताकारमकारावित्यर्थः। (अकारमकारङ्गलै) इत्यनुक्त्वा, प्रथमचरमपदङ्गलै इत्युक्त्या, लक्ष्मीसम्बन्धस्य न स्वरूपेणानुसन्धानम्, पदार्थोपस्थितिमात्रपर्यवसन्नं फलम्। अपि तु विभक्त्यन्तद्वयसमभिव्याहाररूपवाक्येन जीवात्मवर्गगतशेषत्वरक्ष्यत्वयोः प्रतिसम्बन्ध्येकं मिथुनमिति बोधः फलमिति गम्यते। (विडाते) इत्यसम्बन्धनिषेधोक्त्या, व्यञ्जनावृत्तिपरिज्ञानशालिनां श्रीसम्बन्धः बोधो नियत इति सूचितम्। (विडाते यिरुक्कुमिरुप्पु, विडाते यिरुक्कैयाकि) रस्वभाव इत्यर्थः। करिकलभवन्निर्देशः।

पूर्वसूत्रविवक्षितं दृष्टान्तविशेषमुदाहरणमुखेन स्पष्टयति चतुर्थसूत्रेण। (श्रीनन्दगोपरैयुमित्यादिना)।

**मू।। ( ५१) श्रीनन्दगोपरैयुम् कृष्णनैयुम् विडात यशोदैप्पिराट्टियैप्पोले**

शय्यास्थं श्रीनन्दगोपं, खट्वास्थं श्रीकृष्णञ्चेति विवक्षितम्। [१]**अम्बरमे तण्णीरे** इति सूक्तौ नन्दगोपयशोदाश्रीकृष्णानां क्रमेण प्रबोधनेन, यशोदायाः भर्तृरञ्जनाय पुत्रपोषणाय च मध्ये अवस्थानगमादिति भावः। (श्रीनन्दगोपरैयुम्) इति श्रीशब्दः पूजोक्तिः। नन्दनामकं गोपमित्यर्थः। (गोपरै) इति पूजायां बहुवचनम्। च शब्दो वक्ष्यमाणसमुच्चये। (कृष्णनैयुम्) [२]**मध्ये विरिञ्चमिरीशं प्रथमावतारः** इत्यनुगृहीतत्या परत्वं स्थगयितुम् [३]**आत्मानं मानुषं मन्ये** इतिवत् । [४]**अहं बान्धवो जातः** इति श्रीकृष्णसूक्त्यनुसारेण, **अयमपि प्राकृतः कश्चिन्मनुष्यः** इत्यनुसन्धानमेव भगवदभिमतमित्यभिप्रेत्य एकवचननिर्देशः। (विडात) पदुक्कैयिलुम् तोट्टिलिलुम् विडातवित्यर्थः। (यशोदैप्पिराट्टियैप्पोले) इति यशोदानामिकामस्मत्स्वामिनीमित्यर्थः। श्रीकृष्णमातृत्वप्रयुक्तगौरवातिशयात् यशोदायाः स्वमिनीत्वेन अनुसन्धानम्। (यशोदैप्पिराट्टियैप्पोले प्रथमचरमङ्गलै विडातेयिरुक्कुमिरुप्पु) इत्यनुषङ्गेण वाक्यान्तरं पूरणीयम्। यद्यपि, अकारार्थकथनावसरे चरमपदव्यङ्ग्यार्थकथनमयुक्तम्। तथापि लक्ष्म्या मातृत्वप्रयुक्तजीवरक्षकत्वेन व्यङ्ग्यत्वमपि, अकारसमभिव्याहारमहिमलभ्यतया अकारव्यङ्ग्यार्थकथनपरमेव सूत्रद्वयमिति न दोषः।

इत्थं हेतुचतुष्टयमुखेन सूत्रचतुष्टयेन लक्ष्मीसम्बन्धस्य व्यङ्ग्यत्वमुक्तम्। तच्च-अकारप्रकृत्यर्थपर्यालोचनाभ्यम् अथ लुप्तविभक्त्यर्थपर्यालोचनलभ्यं हेतुं सूत्रत्रयेण वक्तुं लोकसिद्धन्यायं तावदाह पञ्चमसूत्रेण (ओरुवनित्यादिना)।

**मू।। (५२) ओरुवनडिमैकोल्लुम्बोतु गृहिणिक्केन्नने आवण योलै एलुतुवतु।**

(ओरुवन्) कश्चिद्गृहस्थ इत्यर्थः। (अडिमै) दासदासीप्रभृतिभृत्यवर्गमित्यर्थः। (कोल्लुम्बोतु) क्रयदशायामित्यर्थः। (गृहिणिक्केन्नने) गृहयजमानाया इति नैवेत्यर्थः। एकारो दार्ढ्यार्थः। (गृहिणिक्कु) इत्यनन्तरं (अडिमै) इत्यनुषङ्गः।

१. तिरुप्पावै -१६ २. श्रीरङ्गराजस्तवः २-५१
३. रामा.यु.का.१२०-११ ४. विष्णु.पु.५-१३-१३

(यजमाननुक्कुडिमै) इत्येन लेखनमिति भावः। (आवण योलै येलितुवतु) क्रयपत्रलेखनमित्यर्थः।

इत्थं लोकसिद्धां क्रयपत्रस्थितिमुक्त्वा, ततः किमिति शङ्कायाम् दार्ष्टान्तिके व्यङ्ग्यार्थसिद्धेः अनुष्ठानपर्यन्तप्रामाण्यं वक्तुं दृष्टान्ते आर्थिकार्थसिद्धेः फलं दर्शयति षष्ठसूत्रेण (आकिलुमित्यादिना)।

**मू।। (५३) आकिलुम् पणिशेय्वतु गृहिणिक्किरे।**

(आकिलुम्) गृहिणी दास्योक्तिं विनैव पत्रलेखनेऽपीत्यर्थः। अपि शब्देन गृहिणी दासवृत्तेः लेखनस्य च विरोधं सूचयति। (पणिशेय्वतु) शेषवृत्तिकरण-मित्यर्थः। (गृहिणिक्कु) इति तादर्थ्ये चतुर्थी। (इरे) इति-हि शब्दपर्यायः प्रसिद्धिपरः। गृहिणी प्रीत्युद्देशेन शेषवृत्त्यनुष्ठानं सर्वलोकाप्रसिद्धमित्यर्थः। गृहयजमानप्रीत्यर्थतयैव तद्धर्मपत्नीप्रीतेरप्युद्देश्यतया, क्रमपत्रे यजमानशेषत्वोक्तिरेव पत्नीशेषत्वमाक्षिपतीति भावः। ततोऽपि किमिति शङ्कायां दृष्टान्ते शिक्षितोऽर्थो दार्ष्टान्ति केऽपि अविरुद्ध इति दर्शयति सप्तमसूत्रेण (अदुपोले) इत्यादिना।

**मू।। (५४) अदुपोले नाम् पिराट्टिक्कु अडिमैया यिरुक्कुम्बडि।**

(अदुपोले) गृहिणी शेषवृत्तिवत् इत्यर्थः। (नाम्) भगवत एव एको न शेषित्वाभ्युपगमशालिनो वयमित्यर्थः। (पिराट्टिक्कु) ईश्वरव्यतिरिक्तनिरुपाधि-कस्वेतरसर्वस्वामिन्या इत्यर्थः। अदिमैयायिरुक्कुम्बाडि) दासभूततया अवस्थान-प्रकार इत्यर्थः।

(पिराट्टिक्कु) इत्यनेन **ईशाना देवी भुवनस्याधिपत्नी** इत्यादिषु स्वामित्वकार्यनियमनस्य स्वामित्वस्य च कण्ठोक्त्या, स्वामित्वफलीभूतं शेषित्वमपि लक्ष्म्याः सिद्धमिति व्यज्यते। (अडिमैयायिरुक्कुम्बडि) इत्यनेन नित्यकैङ्कर्यं व्यज्यते। तथा च व्यङ्ग्यार्थसिद्धिरनुष्ठानपर्यन्ता सम्भवतीति भावः।

इत्थं रक्षकत्वविग्रहविशेषप्रत्ययार्थान्वयरूपधर्माविनाभावात् लक्ष्मी-सम्बन्धस्य व्यङ्ग्यत्वमुक्तम्। अथ अकारवाच्य विग्रहविशेषविशिष्टरूपधर्म्य-विनाभावात् तस्याव्यङ्ग्यत्वमाह अष्टमसूत्रेण (आगवित्यादिना)।

## मू।। (५५) आगप्पिरित्तुनिलैयिल्लै

(आग) तस्मात्। लक्ष्म्या भगवत्कर्तृकरक्षणे सहायत्वात्, भगवद्विग्रहविशेषरूपरूढिनिमित्ताऽविनाभावात्, लक्ष्म्यनुमोदनस्य भगवत्कर्तृकजगद्रक्षणफलत्वात्, पत्नीत्वेन घटकत्वमात्रमन्तरेण मातृत्वेन घटकत्वमादायापि रक्षकत्वसम्भवात्, लक्ष्मीशेषत्वस्य भगवच्छेषत्वव्यापकतया शेषवृत्तेः मिथुनप्रतिसम्बन्धिकत्वाच्च हेतुषट्केणविग्रहविशेषविशिष्टलक्ष्म्याः विग्रहविशेषविशिष्टभगवदपेक्षया पृथक्स्थितिः नास्तीत्यर्थः। तथा च निरुक्ताऽविनाभावादपि विग्रहविशेषविशिष्ट भगवद्वाचककाकारस्य लक्ष्मीसम्बन्धव्यञ्जकत्वं सम्भवतीति भावः।

अथ निरुक्ताऽविनाभावं द्वेधा विवृण्वन्, तत्र प्रमाणान्तरमपि स्मास्यति नवसूत्रेण (प्रभैयैयुमित्यादिना)।

## मू।। (५६) प्रभैयैयुम् प्रभावानैयुम् पुष्पत्तैयुम् मणत्तैयुम्पोले

(प्रभैयैयुम् प्रभावानैयुम् विडातुपोले, पुष्पत्तैयुम् मणत्तैयुम्पोले) इति प्रत्येकं दृष्टान्तद्वयं विवक्षितम्। यद्यपि (प्रभैक्कुम् प्रभावानुक्कुम्, पुष्पत्तुक्कुम् मणत्तुक्कुम्पोले, पेरुमालुक्कुम् पिराट्टिक्कुम् पिरित्तुनिलैयिल्लै) इत्येव पूर्ववाक्यान्वयानुसारेण वक्तव्यम्। तथापि (प्रभैयैयुम् प्रभावानैयुम् विडातुपोलेयुम्, पुष्पत्तैयुम् मणत्तैयुम् विडातु पोलेयुम् इच्चेर्त्तियुम् उद्देश्यम्) इत्युत्तरसूत्रे दृष्टान्तद्वयान्वयविवक्षया, (प्रभैयैयुम् प्रभावानैयुम् विडातुपोलेयुम्, पुष्पत्तैयुम् मणत्तैयुम् विडातु पोलेयुम्, पेरुमालुम् पिराट्टियुम् पिरिवतिल्लै) इत्यध्याहारेण योजनाश्रयणात् न द्वितीयान्तनिर्देशचतुष्टयाऽनुपपत्तिः।

अत्र आद्यदृष्टान्तोपादानेन [१]**अनन्या राघवेणाऽहम्** [२]**अनन्या हि मया सीता** इत्यादि प्रमाणं स्मारितम्।

द्वितीयदृष्टान्तोपादानेन [३]**अहन्ता ब्रह्मणस्तस्य** इत्यादि प्रमाणानुगृहीता, [४]**प्रसूनं पुष्यन्तीमपि परिमलर्धिं जिगदिषुः** इत्याद्याचार्यसूक्तिः स्मारिता।

१. रामा.सु.का.२१-१६ २. रामा.यु.का.१२१-१९
३. लक्ष्मी.त.२ ४. श्रीगुणरत्नकोशः - २९

यद्यपि प्रभावदनधिकरणे वर्तमानायाः प्रभायाः पुष्पानधिकरणे पुष्पे वर्तमानस्य परिमलस्य च, प्रभावपेक्षया पुष्पापेक्षया च नाविनाभावः सम्भवति। तथापि प्रभावत् पुष्पाभ्यां सम्बन्धं विना देशकालसम्बन्धाभावः प्रभापरिमलयोः अस्तीति स एवात्र अविनाभावः विवक्षितः इति न दोषः। अत एव (पिरित्तुनिलैयिल्लै) इति दार्ष्टान्तिकेनिरुक्तः पृथक् स्थित्यभावः एवोक्त इत्यनुसन्धेयम्।

अथ शेषवृत्तिजनितप्रीतिमत्त्वलक्षणशेषित्वस्य दिव्यदम्पत्योः अविशेषात्, एकशेषित्वलाभे व्यङ्ग्यमर्यादया अपरशेषित्वलाभवत्, शेषत्वातिशयेच्छायाः चातुर्थ्यर्थभूताया दिव्यदम्पत्योः व्यासज्यवृत्तित्वबलादपि लक्ष्मीसम्बन्धस्य व्यङ्ग्यत्वं साधयाति दशमसूत्रेण (आकवित्यादिना)।

## मू।। (५७) आग इच्चेर्त्ति उद्देश्यमाय्विट्टतु

(आक) भगवद्वाल्लभ्येन रक्षकघटत्वात्, विष्णुवक्षः स्थितत्वात्, जगद्रक्षणानुमोदित्वात्, मातृत्वेन रक्षणघटकत्वात् भगवत्कैङ्कर्यप्रतिसम्बन्धित्वात्, देशतः कालतश्च धार्यत्वेन आधेयत्वेन च भगवदविनाभावाच्चेत्यर्थः। (इच्चेर्त्ति) प्रभैयैयुम् प्रभावानैयुम् पोलेयुम् पुष्पत्तैयुम् मणत्तैयुम् बोलेयुमिरुक्किर पेरुमालुम् पिराट्टियुमान शेर्त्तियित्यर्थः। (शेर्त्ति उद्देश्यम्) इत्यनेन, दिव्यदम्पतिमेलन - प्रयुक्तभोग्यता विशेषानुभवोऽपि लुप्तचतुर्थ्यर्थभूतायां कैङ्कर्यमुखेन दिव्यदम्पतिमुखोल्लासप्रार्थनायां हेतुरिति व्यज्यते। (उद्देश्यमाय् विट्टतु) उद्देश्यत्वेन व्यवस्थितमित्यर्थः। तथा च चतुर्थ्यप्रार्थनापि व्यासज्यवृत्तितया लक्ष्मीसम्बन्धव्यञ्जकेति भावः।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमस्याध्यायस्य द्वितीयपादे**
**श्रीसम्बन्धस्य अकारव्यङ्ग्यत्वसमर्थनं नाम**
**षष्ठाधिकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे
# अकारस्य लुप्तचतुर्थ्यन्तत्वसमर्थनं नाम
# सप्तमाधिकरणम्

## मू।। (५८) इति ले चतुर्थि एरिक्कळियुम्

पूर्वाधिकरणे लुप्तचतुर्थ्यर्थव्यङ्ग्यः श्रीसम्बन्ध इत्युक्तम् अथ चतुर्थ्यन्त-
६ त्वमेव नास्तीति आक्षिप्य समाधीयते। यद्वा पूर्वम् अकारार्थ उक्तः। अथ **न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलप्रत्ययः** इति न्यायेन अकारस्य साधुत्वार्थं पदत्वार्थञ्च विभक्त्यन्तत्वावश्यम्भावेन तत्र विभक्त्यर्थं वक्तुं वक्ष्यमाणाधिकरणोपोद्घातात्वेन विभक्तिस्वरूपं निर्णीयते। तत्र संशयः, प्रणवस्थाकारश्चतुर्थीविभक्त्यन्तो न वेति। तदर्थं तत्र विभक्तेः लुक्कल्पनं सम्भवति न वेति तदर्थं तत्र व्यक्तचतुर्थ्यन्तं चम्पदं लुक्कल्पने प्रमाणं भवति न वेति।

### तत्र पूर्वपक्षः

प्रणवस्थाकारो न चतुर्थ्यन्तः। चतुर्थीविभक्त्यश्रवणात्। न च समासान्तर्गतविभक्तेरिव लोपः सम्भवति। [1]**सुपो धातुप्रातिपदिकयोः** इतिवत् व्यस्तपदविभक्तेः लोपविधायकाभावेऽपि [2]**सुपां सुलुक्** इत्यादि सूत्रेणच्छन्दसि सुपां स्वादेशस्य लुकालोपस्य पूर्वसवर्णदीर्घादेश्च विधानात्, प्रणवस्थाकारे छान्दसो विभक्तिलोप इति वाच्यम्। **अच्युताऽहं तवास्मीति** इत्यादि प्रमाणानुसारेण, प्रणवस्थाकारस्य सम्बुद्ध्यन्तत्वमाश्रित्य भाषावदेव [3]**एङ्ह्रस्वात्** इत्यादिना लोपसम्भवेन छान्दसलुक्कल्पनस्यान्याय्यत्वात्।

अस्तु वा लुक्कल्पनम्। तथापि [4]**अहं ब्रह्मास्मि** इत्यादि प्रमाणानुसारेण **म्-अ एवास्मि** इत्यार्थाश्रयणमेव युक्तम्। प्रथमैकवचने लुक्कल्पनस्यैव **एकवचन-**

---

१. पा.सू.२-४-७१ २. पा.सू. ७-१-३९
३. पा.सू.६-१-६९ ४. बृह.उ.३-४-१०

**मुत्सर्गतः करिष्यते** इति महाभाष्यवचनानुसारेण अङ्गीकर्तव्यत्वात्। न चैवं व्यक्तचतुर्थ्यन्ततृतीयपदविरोधः। तत्र जीवब्रह्मणोः शेषशेषिभावेन भेदस्यैव प्रतीतेरिरिति वाच्यम्। भावानवबोधात्। नह्यहं ब्रह्मास्मीति शुद्धाद्वैतमभिप्रेतम्। येन ब्रह्मशेषभूतोऽहं ब्रह्मास्मीत्यनयोः व्याघातः स्यात्। अपि तु **तत्त्वमसि** इतिवत्, अहं पदस्य स्वशरीरकब्रह्मपरत्वाश्रयणेन विशिष्टाद्वैतं विवक्षितम्। तथा च जीवद्वारा अहन्त्वाश्रयीभूतं वस्तु ब्रह्मेत्यर्थः। तस्य च जीवविशिष्टाभेदे पर्यवसानात्। जीववैशिष्ट्यस्य च जीवशरीरकत्वरूपतया शरीरशरीरिभावस्य शेषशेषिभावघटिततया च न विरोधगन्धः।

न चैवम् **अस्मदन्तर्यामि वस्तु ब्रह्म भवति** इत्यादाविव प्रथमपुरुष एव स्यात्। लोकसिद्धास्मदर्थविवक्षायामेव उत्तमपुरुषप्राप्तेरिरिति वाच्यम्। युष्मदस्मच्छब्दविवक्षितार्थान्वितार्थकत्वस्यैव मध्यमोत्तमनिमित्तत्वात्। प्रसिद्धार्थपरत्वस्यैव मध्यमोत्तमनिमित्तत्वे **त्वत्पुत्रोदेवदत्तो भवति, मत्पुत्रो यज्ञदत्तो भवति** इत्यर्थविवक्षया **त्वं देवदत्तो भवसि, अहं यज्ञदत्तो भवामि** इत्यादि लाक्षणिकयुष्मदस्मत्प्रयोगस्थले प्रथमपुरुषप्रयोगापत्तेः।

न चैवमपि **त्वं यज्ञदत्तो भवसि, अहं देवदत्तो भवामि** इत्यादौ व्यत्यासापत्तिः। युष्मदस्मच्छब्दविवक्षितार्थान्वितार्थकत्वस्य उभयत्राविशेषादिति वाच्यम्। प्रसिद्धार्थपरत्वं नियामकमिति पक्षेऽपि निरुक्तदोषाविशेषात्। युष्मदस्मच्छब्दार्थविशेष्यकबोधविक्षाया निमित्तत्वकल्पनेन अनतिप्रसङ्गस्य सर्वमतेऽपि तुल्यत्वाच्च। अत एव **त्वं वा अहमस्मि भगवो देवते, अहं वैत्वमसि भगवो-देवते** इत्यादौ मध्यमोत्तमव्यवस्था युज्यते।

न च अकारस्य नाराणपदसङ्ग्रहत्वात् समानविभक्तिकत्वमिति वक्तुं युक्तम्। नारायणपदस्य अन्तः प्रविश्य धारकतया व्यापकत्वोक्तिमुखेन अकारार्थरक्षकत्वविवरणरूपत्वस्य भिन्नविभक्तिकत्वेऽपि अविरोधात्। तस्मात् प्रथमातिक्रमे कारणाभावात् प्रणवस्थाकारः, प्रथमैकवचनान्तः सम्बुद्ध्यन्त एव वा न चतुर्थ्यन्त इति।

## सिद्धान्तस्तु

प्रणवस्थाकारः चतुर्थ्यन्त एव। **अहमपि न मम भगवत एवाहमस्मि**

इत्यादि श्रौतप्रणवनमश्शब्दविवरणबलेन तथैवावगमात्। तत्र हि **अहमपि न मम** इति नमश्शब्दविवरणं क्रियते। तत्र **अहं पदेन नमश्शब्दे प्रणवस्थमकारानुषङ्गो व्यज्यते। अपि शब्देन इदमपि मम न** इति नमश्शब्दे ममकारनिवृत्तिरपि विवक्षितेति व्यज्यते। मम इत्यनेन मः इति पदम् अस्मच्छब्दपर्यायभूतं षष्ठ्यन्तमिति व्यज्यते। मम न इत्यनेन नमश्शब्दे **मः न** इत्यन्वयो व्यज्यते। **मम न** इत्यत्र मम नास्मि इति क्रियापदगानुषङ्गो अभिप्रेतः। **भगवत एवाहमस्मि** इति प्रणवे अस्मिपदाध्याहारस्य वक्ष्यमाणत्वात्। भगवत एवाहमस्मि इति प्रणवविवरणवाक्ये भगवच्छब्देन अकारार्थरक्षणोपयोगिकल्याणगुणजातम्, भगवच्छब्दस्य - **तत्र पूज्यपदार्थोक्तिः परिभाषासमन्वितः** इत्याद्युक्तरीत्या योगरूढितया अकारस्य विष्णौ रूढिरपि व्यज्यते। **भगवते** इति चतुर्थी कण्ठोक्त्या अकारस्य लुप्तचतुर्थ्यन्तत्वं स्पष्टीकृतम्।

एवकारेण स्थानप्रमाणेन उकारस्य अवधारणार्थकत्वं सूचितम्। **अहम्** इत्यनेन प्रणवे **म्** इति पदम् अस्मच्छब्दपर्यायभूतं प्रथमान्तमिति सूचितम्। **अस्मि** इत्यनेन प्रणवस्य **तिङ्सुबन्तचयो वाक्यम्** इत्युक्तवाक्यत्वसिद्धये क्रियापदाध्याहारः सूचितः। अनेन वर्तमानापदेशरूपेण नित्यवच्छृतेन **परिगतातिशयाधानेच्छया उपादानार्हत्वरूपमेव शेषत्वं लुप्त चतुर्थी समभिव्याहारलभ्यं स्वरूपतादर्थ्यं शब्दितम्। न तु उपादानफलोपधानम्** इत्यपि सूचितम्।

इत्थं '**ब्रह्मणेत्वामहसे ओमित्यात्मानं युञ्जीत** इत्यपि प्रणवस्थाकारस्य लुप्तचतुर्थ्यन्तत्वे प्रमाणमनुसन्धेयम्।

न च चतुर्थी विभक्तिश्रवणापत्तिः, सम्बुद्ध्यादेरविभाषायां लोपाऽविधानादिति वाच्यम्।

उक्तप्रमाणबलेन **सुपां सुलुक्** इत्यादि सूत्रेण छन्दसलुक्कल्पनसम्भवात्। न च सम्बुद्ध्यन्तत्वाश्रयणेन लोपसम्भवे, छान्दसलुक्कल्पनमन्याय्यमिति वाच्यम्। सम्बुवद्ध्यंन्तत्वे **तव** इति पदाध्याहारप्रसङ्गेन,श्रौतविवरणप्राबल्येन च छान्दसलुक्कल्पनस्यैव प्रामाणिकत्वात्। **अच्युताहं तवास्मि** इत्यादेः फलितार्थकथन-

परत्वोपपत्तेः। अत एव मन्त्ररत्ने षष्ठीतत्पुरुषस्य स्वारसिकत्वेऽपि श्रीमन्नारायण-स्वामिन् इत्याद्युपबृंहणमुपपद्यते।

एतेन **अकारोपरि प्रथमा**विभक्तेः लुक्कल्पनमपास्तम्। [1]**भगवत एवाहमस्मि** इति श्रौतविवरणविरोधात् [2]**ब्रह्मणे त्वामहसे ओमित्यात्मानं युञ्जीत** इति श्रुतिविरोधाच्च।

तत्र हि [3]**व्यत्ययो बहुलम्** इत्यनुशासनेन तुभ्यमित्यस्य [4]**त्वामौ द्वितीयायाः** इत्युक्तत्व आदेशाश्रयणेन **ब्रह्मणे महसे आय-रक्षकाय-तुभ्यमेव, अहमस्मि** इत्येवं **ब्रह्मणे त्वा महसे** इत्यस्य प्रणवेन पदैकवाक्यतयाऽन्वयावश्यम्भावेन, लुप्तचतुर्थ्यन्ताकारस्य अकामेनाप्यभ्युपगन्तव्यत्वात्। **इत्यात्मानं युञ्जीत** इति शेषिशेषिभावरूपसम्बन्धफलोपधानपर्यन्तशेषशेषिभावसम्बन्धानुसन्धाने विनियोगबलादपि तथैवान्वयस्य वक्तव्यत्वाच्च।

अपि च अकारस्य लुप्तप्रथमान्तत्वे व्यक्तचतुर्थ्यन्तपदविरोधः। न च अपर्यवसानवृत्त्या अहं पदस्य ब्रह्मपरत्वेन शरीरशरीरिभावसूचनमुखेन शेषशेषिभावसिद्ध्या, नार्थविरोध इति वाच्यम्। विवरणविवरिणिनोः एकविभक्त्यन्ततया शब्दस्वरूपेण ऐक्यरूप्यस्य, शेषत्वप्रकारकशाब्दबोधरूपफलमुखेनैकरूप्यस्य च सम्भवतः त्यागायोगात्। अहं पदपर्यायमकारस्य शरीरिपर्यन्तत्वाश्रयणेन न शेषित्वरूपव्यक्तथ्यर्थलाभाभ्युपगमे, सुकरोपदेशप्रत्याख्याने [5]**महतोवंशस्तम्बाल्लट्वाकृष्यते** इति महाभाष्योक्तरीत्या विवक्षितार्थलाभस्यातिप्रयाससाध्यत्वापत्तेश्च।

अन्यच्च नारायणपदसङ्ग्रहत्वात् अकारोलुप्तचतुर्थ्यन्त एवा न च विभक्तिवैरूप्येऽपि प्रकृत्योः सङ्ग्रहविवरणरूपत्वं सम्भवतीति वाच्यम्।

भावानवबोधात्। नह्यत्र अकारार्थ समर्थनाधिकरणोक्तरीत्या प्रकृत्योः विवरणविवरणिभावः विवक्षितः। अपि तु प्रथमचरमपदयोः **अहम्, आयैवास्मि** इति प्रणवरूपं वाक्यं प्रथमपदम्। **अहं नारायणाय स्याम्** इति वाक्यं चरमपदम् इति-अस्मिन्नेव **अहम्-आयैवास्मि** इति नित्यवच्छ्रवणरूपेण प्रथमवाक्येन,

१. यजु.वे. २. तै.उ.ना.व.५१ ३. पा.सू.३-१-८५
४. पा.सू.८-१-२३ ५. महाभाष्यम्

अकारयोमार्थरक्षणव्यञ्जितसकलकल्याणगुणगणानुभवजनितप्रीतिकारितभगवन्मुखोल्लासमात्रोद्देश्यकान्यार्हशेषवृत्तियोग्यतां त्रिविधात्मवर्गेऽपि स्वस्वानुसन्धानमुखेन ज्ञापयित्वा, द्वितीयवाक्यरूपनमश्शब्देन मध्यमाक्षरविवरणपूर्वकम् तृतीयवाक्येन रक्षणप्रकारकथनमुखेन व्यञ्जितगुणगणकण्ठोक्तिमुखेन प्राधान्येन भगवन्मुखोल्लासमात्रोद्देशरूपप्रार्थना प्रतिपादनमुपपद्यते। उपपाद्यानुक्तौ उपपादकोक्तेः अनवसरदुस्थत्वात्।

तस्मात् भगवन्मुखोल्लासमात्रोद्देश्यकप्रवृत्त्यर्होऽहं तथैव स्याम् इत्येवं सह श्रुतानां सम्भूयकारित्व व्युत्पत्तिबलसिद्धान्वयलाभाय, प्रथमतृतीयपदयोः विवरणविवरणिभाव आवश्यक इति, तत्सिद्ध्यर्थं लुप्तचतुर्थ्यन्तत्वम् अकारस्य अभ्युपगन्तव्यमिति।

इदञ्चाधिकरणं सूत्रत्रयात्मकम्। तत्र विभक्त्यश्रवणात् विभक्त्यर्थकथनंमनवसरहतम् इति शङ्कायां वक्ष्यमाणचतुर्थविभक्त्यर्थसमर्थनाधिकरणोपाद्घातत्वेन साधुत्वपदत्वयोः निर्वाहाय छान्दसलुक्कल्पनेन विभक्त्यन्तत्वं साधयति प्रथमसूत्रेण (इतिल्) इत्यादिना - (इतिल् अकारम्-सकलशब्दत्तुक्कुम् कारणमाय्) इति स्वशब्देनोक्तः **इति ले श्रीसम्बन्धमनुसन्धेयम्** इति पुनः परामृष्टः अकारः - अत्रापि (इति ले) इति - इदं शब्देन परामृश्यते। (चतुर्थि) चतुर्थीविभक्तिः। (एरि) इत्यनेन **आरुह्य** इत्यर्थकेन, **प्रत्ययः परश्च** इति-ङ्यात्प्रातिपदिकात्परत्वं विवक्षितम्। (कळियुम्) इति लुप्यत इत्यर्थः।

अथ विभक्त्यन्तत्वेऽपि छान्दसलुक्कल्पनापेक्षया सम्बुद्धिलोपकल्पनमेव ज्यायः। छान्दसलुक्कल्पनेऽपि प्रथमोपस्थितप्रथमाविभक्ते रुक्कल्पनमेव ज्यायः इति शङ्काद्वयमभिप्रेत्य अनुवदति द्वितीयसूत्रेण (चतुर्थियेरिनपडि इत्यादिना)

**मू।। ( ५९) चतुर्थि एरिनपडि एन्रेन्रिल्**

(इदिले) इत्यनुषङ्गः। अकारे चतुर्थीविभक्तेः परत्वेन प्राप्तिप्रकारः इत्यर्थः। येन छन्दसलुक्कल्पनस्य अवकाश इति भावः।

अथ **स्थलान्तरे श्रौतविवरणबलात् अकारो लुप्त चतुर्थ्यन्तः** इत्यादि

दोषेषु सत्सेव, सहश्रुतविवरणबलादपि तथेति स्फुटदोषान्तरमाह तृतीयसूत्रेण (नारायण पदत्तुविकित्यादिना)।

**मू।। (६०) नारायणपदत्तुक्कु सङ्ग्रहमायिरुक्कैयाले**

अत्र पूर्वसूत्रे (इदिले) इत्यनुषक्तस्य (इतु) नारायणपदत्तुक्कु सङ्ग्रहमायिरुक्कैयाले इति विपरिणामेन योजनीयम्। (इतु नारायणपदत्तुक्कु सङ्ग्रहमाकैयाले इति लेचतुर्थि एरिन तु) इति पूर्वसूत्रस्थपदानुषङ्गेण प्रतिज्ञाहेत्ववयवयोः अन्वयोऽपि अनुपसन्धेयः। तथा प्रथमचरमवाक्ययोः उपपाद्योपपादकभावापन्नार्थकत्वेन विवरणविवरणिभावादुपपादकत्वकथनावसरदानाय उपपाद्यं समर्पयितुं प्रणवस्थाकारे लुप्तचतुर्थ्यन्तत्वमावश्यकमिति भावः।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्यायस्य द्वितीयपादे**
**अकारस्य लुप्तचतुर्थ्यन्तत्वसमर्थनं नाम**
**सप्तमाधिकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे
# लुप्तचतुर्थ्यर्थसमर्थनं नाम
# अष्टमाधिकरणम्

## मू।। (६१) इत्ताल् ईश्वरनुक्कु शेषमेन्निरतु

इत्थं प्रणवस्थाकारस्य चतुर्थीविभक्त्यन्तत्वं साधितम् । अथ चतुर्थी विभक्त्यर्थो निरूप्यते। अत्रैवं संशयक्रमः। प्रकृते शेषत्वं चतुर्थ्यर्थो न वेति। तदर्थं शेषत्वं दुःखरूपं न वेति। तदर्थं प्रकृते शेषत्वं गुणकृतं न वेति। शेषत्वं प्रकृते निरुपाधिकभगवत्प्रियं न वेति च। एतदर्थ मिदं चिन्त्यते। ज्ञातृत्वकर्तृत्वभोक्तृत्वा-पेक्षयापि शेषत्वं भगवद्भोग्यं न वेति। तदर्थं शेषत्वाभावे भगवत्प्रियतमत्वलक्षण-स्वरूपहानिरस्ति न वेति। तदर्थं यथेष्टविनियुज्यमानत्वरूपशेषत्वाभावप्रयोजक-शेषत्वज्ञानाभावप्रयोजकं स्वातन्त्र्यज्ञानम्, आत्मापहाररूपं न वेति। आत्मापहारः भगवदत्यन्ताप्रियत्वरूपाऽसत्त्वहेतुः, उत नेति च।

### तत्र पूर्वपक्षः

शेषत्वं न चतुर्थ्यर्थः। मानाभावात्। न च **तादर्थ्ये चतुर्थी वक्तव्या** इत्यनुशासनमस्तीति वाच्यम्। तादर्थ्यस्य तत्साध्यकत्वरूपत्वेन साध्यत्वस्यैव चतुर्थ्यर्थत्वात्। **यूपाय दारु, कुण्डलाय हिरण्यम्** इत्यादौ, यूपकुण्डलादि-साध्यकत्वस्य दारुहिरण्यादौ दर्शनात्। प्रत्ययानां प्रकृत्यर्थगतस्वार्थ बोधकत्वव्युत्पत्त्य-नुसारेण **घटमानय** इत्यादौ आनयनादेः घटनिष्ठकर्मत्वादिनिरूपकता सम्बन्धेनाऽ-न्वयात् **यूपाय दारु** इत्यादौ यूपादिनिष्ठसाध्यता निरूपकत्वसम्बन्धेनदार्वादेः अन्वयसम्भावात्। **ब्राह्मणाय सूपः** इत्यादौ प्रकृत्यर्थस्य सिद्धत्वस्थले, सर्वत्र प्रकृतेः प्रकृत्यर्थगतातिशय लाक्षणिकत्वेन अतिशयगतसाध्यनिरूपकत्वेन अपरपदार्थान्वयोपपत्तेश्च। इत्थञ्च प्रकृते अकारवाच्यनिष्ठाऽतिशयगतसाध्यत-निरूपकत्वेन मकारवाच्यस्यान्वय इति न शेषत्वं चतुर्थ्यर्थः।

न च **व्रीही नहन्ति, व्रीहीन् प्रोक्षति** इत्यादौ द्वितीयायाः साध्यत्वार्थकत्वेऽपि अनघातादेः व्रीह्यादिशेषत्वलाभवत् प्रकृतेऽपि चतुर्थ्या शेषत्वलाभः सम्भवति। अत एवा ह्रिषीति वृष्टिकामाय निधनं कुर्यात् इत्यादिना, निधनस्य पुरुषशेषत्वं तान्त्रिकैः उक्तमिति वाच्यम्।

तत्र विधिप्रत्ययेन भावनायाः समीहितभाव्यकत्वसिद्ध्या, तत्सहकृतद्वितीयादि श्रुत्या परगतातिशयाधानेच्छया उपाधेयत्वरूपशेषत्वलाभसम्भवेऽपि प्रकृते [1]**ब्रह्मणे त्वा महसे ओमित्यात्मानं युञ्जीत** [2]**भगवत एवाहमस्मि, अच्युताहं तवास्मि** इत्यादिप्रमाणानुसारेण **बर्हिर्देवसदनं ददामि** इत्यादिवत् वर्तमानपदेशोत्तमपुरुषघटितस्य प्रणवस्य विधमनादिकरन्यायेन विधिवाक्यत्वाभावेन, तत्र लुप्तचतुर्थ्या साध्यत्वमात्रलाभेऽपि तत्साध्यकत्वरूपतादर्थ्यस्य चतुर्थ्यर्थस्य शेषत्वरूपत्वाऽसम्भवेन तल्लाभासम्भवात् न च तत्साध्यकत्वं कथंतादर्थ्यशब्दार्थ इति वाच्यम् **अर्थेन नित्यसमासः सर्वलिङ्गता च वक्तव्या** इत्यनुशासनानुसारेण **तस्मै इदम् तदरम्** इत्यस्य पदविग्रहाश्रयणेन तन्निष्ठसाध्यतानिरूपकपदार्थस्यैव तदर्थशब्दार्थत्वात्।

न च, तत्साध्यकत्वमेव तच्छेषत्वमिति वाच्यम्। शेषत्वस्य विध्येकगम्यत्वसिद्धान्तविरोधेन, घटादिसाधनदण्डादिषु वैदिकप्रयाजादिविषये शेषत्वव्यवहाराभावेन अतिव्याप्तेः। आरादुपकारकेषु प्रयाजादिषु उदीच्याङ्गेषु च प्रधानत्वोत्पादकत्वाभावेन अव्याप्तेश्च। अवघातादिष्विव विशिष्टवेषेण प्रधानोत्पादकत्वस्य श्रुत्यादिप्रमाणाभावेन कल्पयितुमशक्यत्वात्। तस्मात् शेषत्वं न चतुर्थ्यर्थः।

किञ्च [3]**सर्वं परवशं दुःखम्** [4]**सेवा श्ववृत्तिराख्याता** इत्यादिरीत्या शेषवृत्तेः सर्वेषां पुरुषाणां स्वस्वापेक्षया प्रतिकूलरूपत्वस्य पण्डितपामरसाधारण्येनानुभाविकत्वेन प्रणवस्य भगवच्छेषत्वपरत्वे समन्वयाधिकरणव्युत्पाद्यस्य सिद्धपरवाक्यानां स्वतः पुरुषार्थपरतया प्रामाण्यस्य भङ्गप्रसङ्गः। न च शेषवृत्तेः प्रतिकूलरूपत्वनियमः प्रमाणबलेन प्रकृते व्यभिचरित इति वाच्यम्। **न**

---

१. तै.उ.ना.व.५१ २. यजुर्वेदे

३. मनु.स्मृ.४-१६० ४. मनु.स्मृ.४-६

**द्यागमास्सहस्रम्** इति न्यायेन अपुरुषार्थत्वेन सार्वजनीनायां शेषवृत्तौ पुरुषार्थत्वपर-वाक्यस्य अप्रमाण्यप्रसङ्गेन, अन्यपरत्वस्यैव कल्पनीयत्वात्।

न च अभिमतविषयशेषवृत्तेः अनुकूलरूपत्वं दृष्टमितिवाच्यम्। अभिमत-विषयशेषवृत्तेः प्रतिकूलत्वेऽपि तज्जनितदुःखस्य बलवद्द्वेषाऽविषयत्वेन तज्ज-निताऽभिमतविषयमुखोल्लासस्य उत्कटेच्छाविषयत्वेन च तत्र बलवत् अनि-ष्टाऽननुबन्धीष्टसाधनताज्ञानरूपायाः आनुकूल्यबुद्धेरेव प्रवर्तकत्वोपपत्तेः।

न च पुत्रमित्रकलत्राद्यभिमतविषये पुत्रत्वादिसम्बन्धतत्तसाधारणोप-कारकत्वाद्यात्मगुणसौन्दर्यसौकुमार्यादिदेहगुणज्ञाननिबन्धनभोग्यतानुसन्धानेन तत्तन्मुखोल्लासार्थं प्रवृत्तिवत्, अकारोक्त कल्याणगुणानुसन्धानशालिनां भगवन्मुखो-ल्लासार्थप्रवृत्तिरपि सम्भवतीति वाच्यम्। केवलशास्त्राधीनगुणज्ञाननिबन्धना-ऽतीन्द्रियभगवन्मुखोल्लासार्थप्रवृत्तिरपि सम्भवतीति वाच्यम्। केवलशास्त्राधीनगुण-ज्ञाननिबन्धनातीन्द्रियभगवन्मुखोल्लासार्थानन्यप्रयोजनप्रवृत्तेः अनुभवपराहत्वात्।

न च शेषवृत्तेः भगवत्प्रियत्वेन, तत्परस्य प्रणवस्य पुरुषार्थपर्यवसानेन प्रामाण्यं सम्भवतीति वाच्यम्। [1]**सर्वस्स्वार्थं समीहते** इति प्रसिद्धिविरोधात्।

[2]**निरस्ताखिलदुःखोऽहमनन्तानन्द भाक् स्वराट्।**
**भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते।।**

इति श्रीभाष्यसूक्तिविरोधाच्च। जीवानिष्टस्य भगवदिष्टत्वे गुणानुभवकैङ्कर्ययोः पुरुषार्थत्वाय, भगवतो रक्ष्यापेक्षाप्रतीक्षायाः प्रमाणसिद्धायाः भङ्गप्रसङ्गाच्च।

एतेन अभिमतविषयशेषत्ववत्, भवगवच्छेषत्वस्यापि गुणकृतत्वं सम्भव-मात्रेणोक्तम्। वस्तुतस्तु भगवच्छेषत्वं जीवस्य स्वरूपमेव, स्वाभाविकसुखमेव। भगवत्प्रियत्वस्यैव इष्टतावच्छेदकत्वादिति निरस्तम्। अत एव शेषत्वस्यैव स्वरूप-मिति अन्ययोगव्यवच्छेदोऽपि दूरतोपास्तः। [3]**अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः** इति ज्ञातृत्वस्य [4]**विचित्रादेहसम्पत्तिरीश्वराय निवेदितुम्** इति कर्तृत्वस्य-

---

१. माघकाव्ये
२. श्रीभाष्यम् - जिज्ञासाधिकरणम्
३. तै.उ.आ.व.६-१
४. विष्णुतन्त्रम्

**[1]मोदते भगवान् भूतैः बालः क्रीडनकैरिव।**
**[2]हरे विहरसि क्रीडाकन्दुकैरिव जन्तुभिः।।**

**[3]हरिर्दुःखानि भक्तेभ्यो हितबुद्ध्या करोति हि** इति भोक्तृत्वार्थकर्तृत्वस्य [4]**सोऽश्नुते** [5]**आनन्दी भवति** इत्युक्त भोक्तृत्वस्यापि भगवत्प्रियत्वात्। न च –

**[6]स्वत्वमात्मनि सञ्जातं स्वामित्वं ब्रह्मणि स्थितम्।**
**आत्मदास्यं हरेस्वाम्यं स्वभावञ्च सदा स्मर।।**

इत्यादि प्रमाणबलेन [7]**अपशवो वा अन्ये गो अश्वेभ्यः** [8]**तज्ज्ञानमज्ञानमतोऽन्युदुक्तम्** इतिवत् भगवत्प्रियत्वातिशयाभिप्रायेण प्रकृते अन्ययोगव्यवच्छेद इति वाच्यम्। तत्र स्वत्वदास्ययोः स्वाभाविकत्वमात्रप्रतिपादनात्। एतेन [9]**दासभूतास्स्वतस्सर्वे** इत्यादि श्लोकोऽपि व्याख्यातः। तत्र **नान्यथा लक्षणं तेषाम्** इति शेषत्वाभावस्य स्वाभाविकत्वं निरस्यते। औपाधिकमपि शेषत्वं बहुदशायाम्। मुक्तिदशायामैक्यापत्तिरेव इति मतम्। औपाधिकमपि शेषत्वं बद्धदशायाम्। मुक्तिदशायामैक्यापत्तिरेव इति मतम्। मोक्षे तथैव च इत्यनेन व्यावर्त्यते।

न च परीक्षकस्य शेषवृत्त्यभावः स्वातन्त्र्यबुद्ध्यधीनः। स्वातन्त्र्यबुद्धेश्च **योऽन्यथा सन्तमात्मानम्** इत्यादि प्रमाणेन सर्वपापमूलतया शेषत्वाभावे भगवत्प्रियतमत्वलक्षणस्वरूपहानिः सम्भवतीति वाच्यम्। **दुःखजन्मप्रवृत्तिदोष मिथ्याज्ञानानाम्** इत्याद्युक्तरीत्या देहात्मभ्रमस्यैव सर्वपापमूलत्वेन तत्र विवक्षितत्वात्।

तस्मात्प्रणवस्य शेषत्वपरत्वे पुरुषार्थपर्यवसानाऽभावप्रसङ्गात् साध्यत्वस्यैव चतुर्थ्यर्थत्वाच्च, न शेषत्वं चतुर्थ्यर्थ इति।

## अत्रायं सिद्धान्तः

शेषत्वं चतुर्थ्यर्थ एव। **तादर्थ्ये चतुर्थी वक्तव्या** इत्यनुशासनात्। न च तादर्थ्यस्य तत्साध्यकत्वरूपतया साध्यत्वमेव चतुर्थ्यर्थ इति वाच्यम्। एवं सति [10]**शेषः परार्थत्वात्** इति जैमिनिसूत्रविरोधात्। [11]**यः परार्थस्तं वयं शेषं ब्रूमः**

---

१,२. विष्णु.पु. ३. बृह.न्नार. ४. तै.उ.आ.व.२-२ ५. तै.उ.आ.व.१
६. विष्णु.पु. ७. विष्णु.पु.६-५-८७ ८. विष्णु.पु.६-५-२७
९. रामा.यु.का. १०. जैमिनिसूत्रम् ११. शाबरभाष्यम्

इति शाबरभाष्यविरोधाच्च। **परस्मा इदम् परार्थम्** इति हि परार्थशब्दस्य विग्रहः। तत्र चतुर्थ्या साध्यत्वमात्राभिधाने साधनत्वमेव शेषत्वमित्युक्तं स्यात्। तच्च अव्याप्त्यतिव्याप्तिभ्याम् अयुक्तमिति पूर्वपक्षिणैवोक्तम्।

अयमत्र भाष्याभिप्रायः। **परस्मा इदं परार्थम्** इत्यत्र चतुर्थ्यर्थः प्रार्थना। तस्याश्च प्रकृत्यर्थे विषयत्वेन अन्वयः। परशब्दरूपप्रकृत्यर्थस्य सिद्धस्य स्वरूपेण प्रार्थनाविषयत्वासम्भवेन अतिशयाधानविशिष्टवेषेण तद्विषयत्वमुपपादनीयम्। परशब्दार्थः - शेषत्वानुयोगित्वेन प्रकृतवस्त्वपेक्षया अन्यभूतप्रतियोगिपरः। अन्यत्वञ्च साक्षाद्धर्मतश्च यथायोग्यं द्रष्टव्यम्। अर्थशब्दः शेषत्वानुयोगित्वेन तत्र तत्र विवक्षितवस्तुसामान्यपरः। तत्र च प्रार्थनायाः साध्यत्वेनान्वयः। **ब्राह्मणप्रीतये सूपसम्पादनम्** इत्यादौचतुर्थ्यर्थप्रार्थनायां प्रकृत्यर्थस्य स्वरूपेण विषयत्वेनान्वयवत्। अपरपदार्थस्य स्वरूपेण साध्यत्वेनान्वयसम्भवेऽपि **ब्राह्मणाय सूपः** इत्यादौ तृप्तिलक्षणातिशयविशिष्टवेषेण प्रकृत्यर्थस्य विषयत्वेनान्वयवत्। अपरपदार्थस्य व्यापारविशिष्टवेषेण साध्यत्वेनानुसन्धेयः।

इत्थञ्च **परविषयकेच्छासाध्यार्थः - परार्थः** इत्युक्तं भवति। उक्तञ्च तान्त्रिकैः -

**तस्मात्पारार्थ्यमेवैकं युज्यते शेषलक्षणम्।**
**परोद्देश प्रवृत्तिश्च पारार्थ्यमभिधीयते।।**

परोद्देशः - परविषयकेच्छा, तत्सम्बन्धिनीप्रवृत्तिः।

तज्जन्येच्छाजन्यरूपव्यापारसामान्यवाचिनः, प्रवृत्तिशब्दस्य इच्छारूपविशेषपरत्वसम्भवाच्च, फलेच्छया साधनेच्छासम्भवेन, परगतातिशयेच्छाजन्यचिकीर्षाविषयत्वस्य, शेषत्ववस्तुनि स्वरूपेण विशिष्टवेषेण वा सम्भवाच्च। यद्यपि **ब्राह्मणाय सूपः** इत्यादौ सूपादेः क्रयपचनादिव्यापारविशिष्टवेषेणशेषत्वं सम्भवति तथापि प्रथमोपस्थितत्वात्, अनुगतत्वाच्च, प्रवृत्तिशब्देन इच्छैव विवक्षणीयेति ध्येयम्।

इत्थम् उद्देश्यत्वघटितं शेषित्वं, चिकीर्षितत्वघटितं शेषत्वञ्च **व्रीहीनवहन्ति** इत्यादौ विधिसमभिव्याहृत द्वितीया श्रुत्यादिसिद्धमिति, शेषत्वस्य

**विध्येक**गाम्यत्वसिद्धान्तोपपत्तिः। दण्डघटादिषु साध्यसाधनभावमात्रोपाधिकतया शेषशेषिभावाभावेऽपि, **उद्देश्यत्वचिकीर्षितत्वोपाधिकः** सोऽस्त्येवेति नाति व्याप्तिः। राजभृत्यादिषु विशिष्टवेषेण **उद्देश्यत्वं चिकीर्षितत्वाच्चादाय शेषशेषिभावः** प्रसिद्धिः उपेक्षणीयवस्तुतत्प्रागभावयोः शेषशेषिभावाऽव्यवहाराच्च। **आरादुपकारकेषु प्रयाजादिषु** उदीच्याङ्गेषु प्रधानस्य अङ्गजन्योपकारविशिष्टवेषेणापि साध्यत्वे मानाभावेन **उत्पादकत्वलक्षणशेषत्वासम्भवेऽपि साङ्ग**प्रधानस्यैव फलोत्पादकतया प्राच्योदीच्यङ्गानां प्रधाने अखण्डोपकाररूपसाहित्यात्मकातिशयोद्देशेन चिकीर्षिततया अव्याप्त्यनवकाशाच्च।

एवञ्च **ब्राह्मणाय सूपः** इत्यादौ प्रकृते लक्षणा न कल्पनीया इत्यपरमपि अनुकूलम्। तृप्तिविशिष्टवेषेण प्रकृत्यर्थस्य इच्छाविषयत्वसम्भवेन, अतिशयविशिष्टवेषेण साध्यत्वासम्भवेऽपि क्षत्यभावात्। अत एव सूपाद्यपरपदलक्षणा न इत्यादि अपरमप्यनुकूलम्। सूपादेः क्रयणपचनादि व्यापारविशिष्टवेषेण चिकीर्षितत्वसम्भवात्। चतुर्थ्यर्थेच्छाया अपरपदार्थे तत्साध्येच्छा विषयत्वस्यैव अनुगतवाक्यार्थत्वाभ्युपगमात्। साध्यत्वमात्रस्य चतुर्थ्यर्थत्वे सूपपदलक्षणायाः दुर्वारत्वाच्च।

तस्मात् **तादर्थ्ये चतुर्थी वक्तव्या** इति शब्दवार्तिक गततादर्थ्यशब्दस्य [1]**चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः** इति चतुर्थीसमासविधायकव्याकरणसूत्रगततदर्थशब्दस्य च तदिच्छाजन्येच्छाविषयत्वार्थकतया तदर्थकतदर्थशब्दः परतया च अनुशासनबलादेव शेषत्वं चतुर्थ्यर्थ इति सिद्धम्।

अत एव **व्रीहीनवहन्ति** इत्यादाविव प्रकृतेऽपि शेषत्वलाभ इत्युपपद्यत इति। इयांस्तु विशेषः। तत्र शेषिणः साध्यत्वं द्वितीयाया उद्देश्यत्वं समभिव्याहारगम्यम्। अत्र शेषिणः उद्देश्यत्वं चतुर्थ्यर्थः। शेषस्य साध्येच्छाविषयत्वं वाक्यार्थ इति। अत एव **हीषीति वृषिकामाय निधनं कुर्यात्** इत्यादावपि हीषादिनिधनस्य वृष्टिकामादिपुरुषशेषत्वं तदभिलषितवृष्ट्यादिसाधनस्तोत्रकारणसौरभ्रद्वारकं चतुर्थ्यैव लभ्यत इति युक्तम्। **स्वर्गकामो यजेत** इत्यादौ विधिप्रत्ययेन भावनायाः इष्टभाव्यकत्वोक्तावपि विशिष्यस्वर्गादेः काम्यत्वोक्तिवत्, चतुर्थ्या विशिष्य

१. पा.सू.२-१-३६

पुरुषस्योद्देश्यत्वोक्त सम्भवात्। अत एव च प्रणवस्योत्तमपुरुषघटितत्वेपि न दोषः। **चतुर्थ्यैव लाभसम्भव**ात्, इत्येषा दिक्।

किञ्चेत्याद्यप्ययुक्तम्। प्रणवस्य प्रमाणतमत्वेन तद्बलात् शेषवृत्तेः दुःखरूपत्वनियमस्य भगवच्छेषवृत्तावेव, व्यभिचारात् **नह्यागमास्सहस्रम्** इति न्यायेन स्वतः पुरुषार्थे पुरुषार्थत्वेनाभिप्रायोक्तिः असदर्थवाद इति वाच्यम्। (इरामडमूट्टु वारैप्पोले) इत्यनुगृहीतरीत्या द्विषविषयेऽपि सम्बन्धमात्रकृतप्रेमातिशयेन शेषवृत्तेः दर्शनेन **स्वामित्वं ब्रह्मणि स्थितम्** इत्याद्युपबृंहितया [१]**पतिं विश्वस्य,** [२]**पतिं पतीनां परमं परस्तात्** इत्यादिश्रुत्या, प्रसिद्धसङ्कुचितनिरुपाधिसर्वस्मामित्व-लक्षणसम्बन्धमादाय, भगवद्विषयेऽपि शेषवृत्तेः अनुकूलतमत्वसम्भवेन प्रमाण-शिरोमणेः प्रणवस्यऽसदर्थ वादत्वशङ्कागन्धस्यापि अत्यन्तानुचितत्वात्।

किञ्च-पुत्रमित्रकलत्राद्यभिमतविषयेषु शेषवृत्तेः सुखरूपत्वस्य दरीदृश्य-मानत्वेन व्यभिचारः। न च **कष्टं कर्म** इति न्यायेन अभिमतविषये शेषवृत्तेः प्रतिकूलत्वेऽपि, तन्मुखोल्लासस्य उत्कटेच्छाविषयतया, तत्रत्य दुःखस्य बलवत् द्वेषाविषयतया च तत्र प्रवृत्तिः सम्भवतीति वाच्यम्। तथा सति [३]**पादप्रहारः परमं हि भाग्यम्** [४]**कान्तापाद तलाहतिस्तवमुदे तद्वन्ममापि** [५]**कोपेऽपि कान्तं मुखम्** इत्याद्यनुसारेण मुखोल्लासाभावेऽपि प्रयासाधिक्यसत्वेऽपि कुम्भदास्यादि परीक्षकप्रवृत्तेः सुप्रसिद्धत्वात्।

न च तत्रापि सौन्दर्यसौकुमार्यलावण्ययौवनादिगुणज्ञाननिबन्धनभोग्यताबुद्धि-मादाय प्रवृत्तिः सम्भवतीति वाच्यम्। काकशाबन्यायेन अभोग्येऽपि शेषवृत्तेः दर्शनात्।

किञ्च अकारेण रक्षकत्वोक्त्या तदाक्षिप्तसार्वज्ञादिकल्याणगुणगणप्रदर्शन-पूर्वकशेषवृत्तेः प्रणवे प्रतिपादितत्वेन, पुरुषार्थपर्यवसाननिबन्धनप्रामाण्यं सम्भवत्येव। न च शास्त्रैकगम्यगुणानुसन्धाननिबन्धनशेषवृत्तिः अननुभवपराहतेति वाच्यम्। **वायुमेव न स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति तृप्तएवैनमिन्द्रः प्रजया पशुभिः तर्पयति** इत्यादि प्रसिद्धदेवताप्रसादार्थप्रवृत्तिमात्रोच्छेदापत्तेः।

---

१. तै.उ.ना.व.१० २. श्वेता.उ.६-७ ३. काव्यप्रकाशः
४.मालविकाग्निमित्रम् ५. कुवलयानन्दः

न च अनादिवासनासिद्धत्रिवर्गप्रावण्यानुसारेण, शास्त्रविश्वासानुरोधेन **च** त्रिवर्गार्थदेवताप्रसादोद्देशेन प्रवृत्तिसम्भवेऽपि स्वयंप्रयोजनदेवताप्रसादोद्देशेन प्रवृत्तिः अननुभवपराहतेति वाच्यम्। **मद्भक्तजनवात्सल्यम्** इत्यारभ्य **यच्च मां नोपजीवति** इत्यन्तेन श्रीमद्वराहपुराणे **पुरुषार्थोऽयमेवैको यत्कथा श्रवणं हरेः, क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम्, वरं हुतवहज्वाला पञ्जरान्त-र्व्यवस्थितिः, [१]यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते, [२]पाथेयं पुण्डरीकाक्ष नामसङ्कीर्तनामृतम्** इत्यादि प्रमाणेषु च प्रसिद्धायाः अनन्यप्रयोजनभगवद्भक्तेः **[३]आह्लादशीतनेत्राम्बुः [४]मच्चित्ता मद्गतप्राणाः [५]श्रुण्वन्ति गायन्ति गृह्णन्ति सन्तः** इत्यादि प्रमाणप्रसिद्धेषु शुद्धसत्त्वविरोधिरजस्तमोनिबर्हणपूर्वकं निर्हेतुकभगव-त्कटाक्षमूलकसत्वविवृद्धिमत्सु भगवद्भक्तेष्वानुभाविकत्वात्।

अपि च स्वभोग्यताबुद्ध्यभावेऽपि भगवद्भोग्यताप्रतिपत्त्या प्रवृत्तेरेव जीवस्य स्वाभाविकत्वात्, प्रणवस्य प्रयोजनवत्तार्थपर्यवसानेन प्रामाण्यमुपपन्नतरम्। न च **सर्वस्स्वार्थं समीहते** इति न्यायविरोधः। स्वार्थमित्यस्यस्वेषु लाभाय इत्यर्थकत्वात्, स्तनन्धयादिविषये स्वगतसुखगन्धाभावेऽपि परसुखोद्देशेनैव जनन्यादेः प्रवृत्तिदर्शनेन केवलभगवन्मुखोद्देशेन प्रवृत्त्यविरोधात्।

न च गुणानुभवजनितप्रीतिकारितकैङ्कर्यस्थले स्वगतसुखामस्तीति वाच्यम्। तत्सत्वेऽपि कैङ्कर्यस्य अनुभवजनितप्रीतिकारिततया तदुद्देशेन तत्र प्रवृत्त्यभावात्। अनुभवस्यापि केवलपरार्थतया स्वगतस्य **[६]सोऽश्नुते सर्वान् कामान्, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति** इत्यादि प्रमाणप्रसिद्धेषु, शुद्धसत्व-विरोधिरजस्तमोनिबर्हण पूर्वकं निर्हेतुक भगवत्कटाक्षमूलकसत्वविवृद्धिमत्सु भगवद्भक्तेषु आनुभविकत्वात्।

न च-अनुभवकैङ्कर्ययोः भोग्यत्वे भोग्यस्य उद्देश्यत्वमनिवार्यम्। इच्छायाः विषयवैलक्षण्य ज्ञानमात्राधीनत्वादिति वाच्यम्। तथापि केवलस्य भोगेच्छाजन्य-प्रवृत्त्यनर्हत्वलक्षणनिष्कृष्टनमश्शब्दार्थपारतन्त्र्यज्ञानशालिनाम्, स्वभोगोच्छाजन्य-

१. गारु.पु.२२२-२२ २. गारु.पु.२२०-१६ ३. विष्णुतत्त्वम्
४. भ.गी.१०-९ ५. तै.उ.आ.व.१-१ ६. तै.उ.आ.व.२-२

प्रवृत्तेः भगवदनिष्टत्वज्ञानेन केवलपरभोगेच्छया प्रवृत्त्युपपत्तेः। **स्वस्तिसम्बाधे-ष्वभयं नो अस्तु** इत्यादिप्रमाणानुसारेण परभोगवर्धकानुमोदनरूढस्वभोगेच्छया प्रवृत्तिसम्भवेऽपि स्वातन्त्र्येण **स्वभोगेच्छाजन्य** प्रवृत्त्यभावोपपत्तेश्च।

अत एव चेतनस्य केवलपरार्थं स्वानिष्टे प्रवृत्तिः भगवतो रक्ष्यापेक्षा प्रतीक्षाविरुद्धेति परास्तम्। भगवतो रक्ष्यापेक्षाप्रतीक्षणबलादेव भगवता स्वयमेव निर्हेतुककटाक्षाधीनयादृच्छिकसुकृतादिमूलकाऽद्वेषादिपरम्परासम्पादनमुखेन, केवलपरार्थानुभवकैङ्कर्यरुचिप्रतिबन्धकानादिदुर्वासनाप्रभृतिनिवर्तनपूर्वकं तदुभयरुच्युत्पादनानन्तरमेव तदुभयार्थप्रवृत्तेः अभ्युपगमात्।

तस्मात् भगवच्छेषत्वं वस्तुतः गुणाधिकविषयत्वेन गुणकृतमपि तेषां नित्यत्वात् स्वतोऽनुकूलमेव। भगवत्प्रियत्वस्यैव स्वतइष्टतावच्छेदकत्वादिति सिद्धम्। अत एव शेषत्वमेव स्वरूपमिति अन्ययोगव्यवच्छेदोऽपि तस्य स्वतोऽनुकूलत्व-मुपोद्बलयति। बद्धदशायां ज्ञातृत्वकर्तृत्वभोक्तृत्वानां मुक्तिदशावच्छिन्नभगवदनुभव-जनितप्रीतिकारितकैङ्कर्यप्रविष्टज्ञातृत्वभोक्तृत्वार्थतया भगवतो लीलारसस्य आनुषङ्गिकतया च मुक्तिकालीनज्ञातृत्वादेरेव भगवत्प्रियतमत्वात् अनुभवप्रीति-लक्षणज्ञातृत्वभोक्तृत्वापेक्षया, कैङ्कर्यरूपकर्तृत्वात्मकशेषत्वस्यैव तदुभयदार्ढ्या-पादकतयां तथात्वाच्च। **अस्ति ब्रह्मेति चेत्** इत्यत्रापि परार्थकैङ्कर्यपर्यन्त परार्थानुभवस्यैव भगवत्प्रियतमत्वलक्षणसत्तातिशयहेतुत्वेन विवक्षितुं शक्यत्वाच्च। **ईश्वराय निवेदितुम्** इत्यत्रापि परार्थनित्यकैङ्कर्यवियोगस्यैव सर्वोत्कृष्टनिवेदनत्वेन विवक्षितत्वाच्च।

इदञ्च ज्ञातृत्वाद्यपेक्षया शेषत्वस्य भगवत्प्रियतमत्वलक्षणमाधिक्यं-मूलमन्त्रमन्त्ररत्नमूलकमुपबृह्मणदृढीकृतञ्च। तथाहि -

**स्वत्वमात्मनि सञ्जातं स्वामित्वं ब्रह्मणि स्थितम्।**

इति वचनं तावत् न स्वत्वस्वामित्वयोः स्वाभाविकत्वमात्रपरम्। अन्यतरोक्त्या अन्यतरलाभेन वैफल्यापत्तेः। जीवात्मनः परमात्मापेक्षया स्वत्वस्वरूपशक्तिविशेषः सदा तव निरतिशयभोग्ययथेष्टविनियोगरूपफलोपहितः। अतः नित्यस्य स्वरूपयोग्यस्य इत्यादिव्याप्तिसिद्धफलोपदानरूपव्यापकस्य यावदात्मभावित्वात्।

**भगवतो** जीवात्मापेक्षया स्वामित्वरूपशक्तिविशेषोऽपि यावदात्मभावीति **पदद्वय**-स्यापि प्रयोजनवत्तरत्वसम्भवाच्च।

**स्वोज्जीवनेच्छा यदि ते स्वसत्तायां स्पृहा यदि।**
**आत्मदास्यं हरेस्वाम्यं स्वभावञ्च सदा स्मर।।**

इति वचनमपि यावदात्मभाविकेवलपरार्थकैङ्कर्यरूपपरमपुरुषार्थलाभार्थं सद्यो-भगवत्प्रियतमत्वलक्षणसत्तालाभार्थञ्च अदृष्टद्वारकफलोद्देश्यकप्रवृत्तिरूपस्वयत्न-निवर्तकं प्राधान्येन प्रवृत्त्युद्देश्यस्वगतभोगरूपफलित्वनिवर्तकञ्च जीवात्मनोदास्य-लक्षणस्वभावस्य भगवतः स्वामित्वलक्षणस्वभावस्य च सदानुसन्धानम्, सद्यः केवलपरार्थानुभवकैङ्कर्यप्रवर्तकं कर्तव्यमित्यर्थकं शेषत्वमेव स्वरूपमिति दृढयति।

अत्र [1]**ऐतदात्म्यमिदं सर्वम्, तत्सत्यं, स आत्मा इतिवत्** [2]**त्वं वा अहमस्मि अहं वै त्वमसि** इतिवत्, **योऽहं सोऽसौ योऽसौ सोऽहम्** इतिवत् **तत् त्वमेव, त्वमेव तत्** इतिवच्च आदरातिशयेन **आत्मदास्यं हरेस्साम्यञ्च** इति व्यवहारानुसन्धानयुक्तमिति द्रष्टव्यम्।

**दासभूतास्स्वतस्सर्वे** इत्यादि वचनमपि **ज्ञानानन्दानामपि स्वाभाविक-त्वात् दास्यं किमिति विशेष्योपादीयते** इति शङ्कायां **सर्वे आत्मानो दास्येनैव लब्धसत्ताकाः** अतो दास्यमेव [3]**सन्तमेनं ततो विदुः** इत्यादिप्रतिपन्न भगवत्प्रियतमत्वरूपश्लाघ्यतालक्षणसत्ताज्ञापकम्। न तु स्वाभाविकमपि ज्ञानान्दा-दिकम् इत्येवं परम्। अन्यथा दास्यस्य स्वाभाविकत्वोक्तौ तदभावस्य तदुक्ति वैयर्थ्यात्। दास्यस्य बन्धदशायां स्वाभाविकत्वोक्तौ मुक्तिदशायाम् ऐक्यशङ्कानुदयेन **मोक्षे तथैव च** इत्यस्यापि वैयर्थ्यात्।

ब्रह्मवित्सामान्ये गुणानुभवमात्रस्य वेदान्तेषु श्रवणेन प्रपन्नेतरविषये गुणानुभवस्यैव परमपुरुषार्थतया **कैङ्कर्यमेव परमपुरुषार्थः** इत्ययुक्तमिति शङ्कायाम्, **अधिकं तत्रानुप्रविष्टं न तद्धानिः** इति न्यायेन कैङ्कर्यस्य अनुभव-गर्भत्वेन, भगवदनुभवस्य स्वानुभवगर्भस्य कैवल्यापेक्षयेव कैङ्कर्यपर्यन्तानुभवस्य प्रपन्नाधिकारमात्रनिष्ठस्यापि भोग्याधिक्यनिबन्धनप्रियतमत्वमादाय, आनन्दता-

---

१. छान्द.उ.६-८-७ २. शाङ्करभाष्ये ३. तै.उ.आ.व.६-१

रतम्यस्यापि जीवात्मपरमात्मनोः परमपुरुषार्थत्वं केवलानुभवापेक्षया सम्भवतीति वक्तुं **मोक्षे तथैव च** इत्युक्तमिति प्रयोजनसम्भवाच्च। अपि च **कष्टं कर्म** इति न्यायेन शेषवृत्तौ परीक्षकस्य प्रवृत्त्यभावः स्वातन्त्र्यभ्रमादेव। तस्य अनादिदुर्वासनया दुरपह्नत्वात्।

अन्यथा भगवत्प्रीतिमात्रोद्देश्यकप्रवृत्त्यर्हत्वलक्षणस्वरूपयाथात्म्यज्ञान-शालिनः परीक्षकस्य बलवदनिष्टाननुबन्धि भगवत्प्रीतिरूपेष्टसाधनताज्ञानादिघटित-सामग्रीबलेन तत्र प्रवृत्तेः आवश्यकत्वात्।

इत्थञ्च **योऽन्यथा सन्तमात्मानमन्यथा** इत्यादिवचनबलेन स्वातन्त्र्य-भ्रमस्य तत्पुरुषबहुव्रीहिवृत्त्या सकलपापमूलतया तद्वतो भगवदप्रियतमत्वेन शेषत्वाभावे भगवत्प्रियतमत्वलक्षणस्वरूपहानिः दुर्वारा। न च तद्वचनं देहात्मभ्रम-परमिति वाच्यम्। स्वातन्त्र्यभ्रमस्यापि अन्यथा प्रतिपत्तिरूपत्वाविशेषेण सङ्कोचे मानाभावात्।

(मणत्तैयुम् ओलिमै युङ्कोण्डु) इत्यादि वक्ष्यमाणरीत्या (पिर्क्कुरियना-नवन्रु) इत्यादिवक्ष्यमाणरीत्या च शेषत्वविरोधिस्वातन्त्र्य भ्रमस्य अतिक्रूरत्वेन तस्यैव द्वेधा सर्वपापमूलत्वोपपत्तेश्च। स्वातन्त्र्यबुद्धेः कैवल्यरूपमहादुःखमूलत्वेन तस्यैव तत्र अवश्यं विवक्षणीयत्वाच्च। तस्मात् प्रणवस्य शेषत्वपरत्वेऽपि प्रयोजनपर्यवसानसम्भवात्, शेषत्वमेव चतुर्थ्यर्थ इति सिद्धम्।

किञ्च - साध्यत्वमात्रं च चतुर्थ्यर्थ इत्युक्तेऽपि, प्रणवस्य प्रयोजनपर्यवसाना-भावप्रसङ्गो दुर्वारः। न च **ब्राह्मणाय सूपः** इत्यादौ चतुर्थी प्रकृतेः प्रीतिलक्षणा-श्रयणेन, अदृष्टद्वारकफलसाधनीभूतब्रह्मणप्रीत्यर्थव्यापारविषयः सूपः, इत्येवं प्रयोजनपर्यवसानवत्, प्रकृतेऽपि सम्भवतीति वाच्यम्। तत्र आतित्थ्यादिविधायक-शास्त्रबलेन तथा कल्पनेऽपि प्रकृते फलान्तरानुपादानेन तदसम्भवात्। न च [1]**सकलफलप्रदो हि विष्णुः** इत्याद्युपबृंहणबलेन प्रकृतेऽपि तत्कल्पनं शङ्कितुमपि शक्यम्। सर्वप्रमाणमूलभूते प्रणवे स्वस्वारस्यानुरोधेन स्वर्गकामाधिकरणन्यायेन च भगवत्प्रीतेः स्वयं प्रयोजनत्वपरत्वस्यैव पूर्वोक्तोपपत्तिबलेन कल्पयितुम्

---

१. वि.ध.पु.४३-४६

उचितत्वात्। लक्षणां विनैव पूर्वोक्तोपपत्तिबलेन प्रार्थनायाः **चतुर्थ्यर्थत्वाभ्युपगमेन तत्कल्पनसम्भवाच्च**। अन्यथा **मध्यमाक्षरमध्यमपदविरोधस्य दुरुत्तरत्वाच्चेति** दिक्।

**इदञ्चाधिकरणं नवसूत्र्यात्मकम्।** तत्र तावत् साध्यत्वमेव **चतुर्थ्यर्थ** इति शङ्कां वारयति प्रथमसूत्रेण (इत्तालित्यादिना)।

(इत्ताल्) प्रणवस्थलुप्तचतुर्थ्या इत्यर्थः (ईश्वरनुक्कु) [1]**ईशेशितव्यसम्बन्धातदनिदं प्रथमादपि** इत्यादिप्रसिद्धनिर्हेतुककटाक्षेण, भगवता स्वयमेव **स्रष्टव्यसर्वजीवसाधारण्येन** सङ्कल्पितं चिच्छक्तिप्रवृत्तिशक्ति, प्रधानान्तः प्रवेशधारणनियमनपूर्वकप्रवृत्तिफलोपधानसङ्कल्परूपं नियमनमपि प्रकृत्यर्थलक्षणान्तर्गतमिति भावः। इदञ्च **शेषत्वप्रतिपादनेन प्रणवस्य पुरुषार्थपर्यवसानायोक्तम्।** ईश्वरत्वात्, स एव [2]**उपादत्ते सत्तास्थितिनियमनाद्यैश्चिदचितौ**।

अत एव जीवस्य भगवदतिशयाधानेच्छया उपादेयत्वलक्षणशेषत्वस्य प्रतिपादनं युक्तमिति च भावः। (शेषमेन्गिरतु) मकारवाच्यं वस्तुशेषमिति कथ्यत इत्यर्थः।

यद्यपि प्रार्थनामात्रं चतुर्थ्यर्थः। तथापि लुप्तविभक्त्यर्थलाक्षणिकाकारार्थप्रार्थनायाः व्यापारद्वारकसाध्यत्वम्, अपरपदार्थे वाक्यार्थविधया लभ्यत इत्यभिप्रायेण (शेषमेन्गिरतु) इत्युक्तम्। यद्यपि च प्रत्ययानां प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुसारेण शेषित्वमेव चतुर्थ्यर्थः। तथा च **ईश्वरनिष्ठशेषित्वनिरूपकमित्युच्यते** इति वाक्यार्थो वर्णनीयः।

किञ्च लाक्षणिकेन अकारेण कारणत्वरक्षकत्वविष्णुत्वरूपप्रवृत्तिनिमित्तसमानाधिकरणं शेषित्वमेव लक्ष्यत इति (शेषित्वनिरूपकमेन्गिरतु) इत्येव वक्तव्यम्। तथापि **ब्राह्मणाय सूपः** इत्यादौ चतुर्थ्यर्थविशेषणकापरपदार्थविशेष्यकशाब्दबोधस्यैवव्युत्पत्तिसिद्धतया, तत्सूचनार्थतया विशिष्टवेषेण वा प्रकृत्यर्थविषयतासम्बन्धावच्छिन्नाधेयतासम्बन्धेन व्युत्पत्त्यनुरोधेन अन्वितायाः शेषित्वरूपत्वेन व्यापारघटितसाध्यतासम्बन्धेन अपरपदार्थान्वितायाः शेषत्वरूपत्वेन च प्रकृत्यर्थविषयकेच्छायाः विशेष्यत्वेनैव अकारेण लक्ष्यतया च अकारवाच्यशेषभूतं

---

१. लक्ष्मी.त.१७-७०   २. श्री.र.स्त.२-८

मकारवाच्यमित्येव वाक्यार्थस्य वक्तव्यत्वात् न दोषः। इच्छाविषयत्वस्य अपदार्थतया प्रार्थनाविषयत्वरूपशेषित्वे, प्रार्थनासाध्यतासम्बन्धेन निरूपकत्वस्यावाक्यार्थत्वात् विषयतासम्बन्धेन प्रार्थनायाः एव शेषित्वरूपत्वविवक्षया, शेषित्वरूपप्रकृतिनिमित्त-समानाधिकरणधर्मे लक्षणाया वक्तुं शक्यत्वाच्च।

तस्माल्लाघवेन प्रार्थनायाः साध्यत्वमेव अपरपदार्थान्वय इत्यभिप्रायेण, (ईश्वरनुक्कु शेषमेन्गिरतु) इति युक्तं वाक्यार्थकथनम्। (ईश्वरनुक्कु) इति-षष्ठ्यर्थो निरूपकत्वम्, **चैत्रस्य माता** इतिवत्, शेषित्वरूपप्रकृतिनिमित्तसमानाधि-करणधर्मे लक्षणाया वक्तुं शक्यत्वाच्च। तस्माल्लाघवेन प्रार्थनायाः साध्यत्वमेव अपरपदार्थान्वय इत्यभिप्रायेण, (ईश्वरनुक्कु शेषणेन्गिरतु) इति युक्तं वाक्यार्थ-कथनम्। (ईश्वरनुक्कु) इति षष्ठ्यर्थो निरूपकत्वम्, चैत्रस्य माता इतिवत्, शेषिगतातिशयाधानेच्छासाध्यव्यापारविषयत्वात्मकशेषपदप्रवृत्तिनिमित्तद्वारक-सम्बन्धेन शेषपदार्थेन सम्बध्यते। लक्षणामूलकनिरुक्तवाक्यार्थस्य, प्रार्थनायाः लुप्चतुर्थ्यर्थत्वमहिमलभ्यतया (इत्ताल् ईश्वरनुक्कु शेषमेन्गिरतु) इत्यनुगृहीतम्।

इत्थं प्रथमसूत्रे चतुर्थ्यर्थमुक्त्वा, तत्र ईश्वरशब्दस्य योगवृत्तिनिमित्तमुखेन, शेषत्वकथनस्य प्रयोजनपर्यवसानसूचनार्थत्वज्ञानेन, विष्णुत्वरूपरूढिनिमित्तमुखेन अकारोक्तचतुर्थ्यर्थशेषित्वप्रतिसम्बन्धिनिर्देशमात्रार्थत्वं मन्वानस्य शङ्कामनुवदति द्वितीयसूत्रेण (शेषत्वमित्यादिना)।

## मू।। (६२) शेषत्वम् दुःखरूपमागवन्रो नाट्टिल्-काण्गिरतेन्रिल्

शेषत्वशब्दः - परगतातिशयाधानेच्छया उपादानफलोपधानपरः। (दुःख-रूपमाकवन्रो) दुःखरूपत्वेन खल्वित्यर्थः। दुःखरूपत्वं-द्वेषद्वारा निवृत्तियत्नहेतुभूत-ज्ञानविषयप्रतिकूलत्वात्मकशक्तिविशेषः। खलुशब्दः - स्वात्मनो बुद्ध्युत्पत्तिं दृष्ट्वेतिवत्, अनुभवप्रसिद्धिपरः। (नाट्टिल् ) **मञ्चाः क्रोशन्ति** इति न्यायेन जानपदेष्वित्यर्थः। अत्र कैमुतिकन्यायेन नागरिकेषु चेति विवक्षितम्। पामरेषु परीक्ष्यकारित्वसद्भावे पण्डितेषु तस्य कैमुतिकत्वात् (काण्गिरतेन्रिल्) दृश्यत इति चेदित्यर्थः। अनेन सर्वेषां स्वस्वमानसानुभवो विवक्षितः। **कष्टं कर्म** इति न्यायेन सामान्यतोयत्नसाध्यस्य प्रतिकूलत्वेन परातिशयोद्देशेन विशिष्यप्रयत्नस्य

स्वनिकर्षापादकतया तत्साध्यप्रवृत्तेः सुतरां प्रतिकूलत्वेन च अनुभवस्य सार्वजनीनत्वादिति भावः।

विशिष्य भगवच्छेषवृत्तेः अनुकूलत्वमेव स्वभाव इति साधयिष्यन्, सामान्यतः शेषवृत्तेः प्रतिकूलत्वं न स्वभाव इति तावत् साधयति तृतीयसूत्रेण (अन्दवित्यादिना)

**मू।। (६३) अन्दनियममिल्लै**

इत्थं परिहारद्वयस्य विवक्षितत्वादेव, शङ्कासूत्रस्य पार्थक्यमुपपद्यते। अन्यथा (शेषत्वम् दुःखरूपमागवेनाट्टिल् काण्गिरतन्नु) इत्येवं सूत्रविन्यासः स्यादित्यवधेयम्। शङ्कावाक्ये (शेषत्वम् दुःखरूपमागवन्रो नाट्टिल् काण्गिरतु आकैयाले इत्ताल् ईश्वरनुक्कु शेषमेन्नक्कूडातु) इत्यध्याहारेण योजनामभिप्रेत्य, (शेषत्वम् दुःखरूपमेन्गिरनियममिल्लामैयाले, इत्ताल् ईश्वरनुक्कु शेषमेन्नक्कूडुम्) इति प्रथमपरिहारमभिप्रयन्, तत्र हेतोरपि साध्यत्वात् हेतुं प्रतिज्ञामुखेन निर्दिशति तृतीयसूत्रेण। (अन्दनियममिल्लै) इति शेषत्वञ्चेत् दुःखरूपमेवेति नियमो नास्तीत्यर्थः। हेतुं साधयति चतुर्थसूत्रेण (उकन्दवित्यादिना)।

**मू।। (६४) उकन्दविषयत्तुक्कु शेषमायि रुक्कुमिरुप्पुसुखमाकक्काणगैयाले**

(उकन्द) शास्त्रेण विना प्रत्यक्षादिना भोग्यत्वेन अवगतेत्यर्थः। (विषयत्तुक्कु) शब्दादिविषयस्येत्यर्थः। शास्त्रेण विना भोग्यत्वावगमः प्रत्यक्षेणेत्यभिप्रायेण (विषयत्तुक्कु) इत्युक्तम्। इन्द्रियगोचरस्येत्यर्थः। (विषयत्तुक्कु शेषमाय्) विषयापेक्षया शेषमायित्यर्थः। (शेषमायिरुक्कु मिरुप्पु) शेषत्वेन दृढावस्थितिः इत्यर्थः। न कदाचित् शेषवृत्तिमात्रम्।

अपि तु अनुवृत्तशेषवृत्तिरिति भावः। (सुखमाकक्काणगैयाले) अनुकूलत्वेन दृश्यमानत्वादित्यर्थः। न प्रतिकूलत्वराहित्यमात्रेणानुभूयते। अपि तु अनुकूलत्वेनाप्यनुभूयते इति भावः। कालिदासकुम्भदास्यादिकमुदाहरणं बोध्यम्।

इत्थम् चतुर्थसूत्रेण, तृतीयसूत्रोक्तपूर्वशङ्कापरिहारहेतोरुपपादनरूपहेतोः विवक्षिततया, तदाकांक्षाजननाय तृतीयसूत्रे द्वितीयसूत्रोक्तशङ्कायाः परिहारहेतुः

वाक्यभेदेन निर्दिष्टः। अत एव हि निगमनावयते हेतोः सिद्धवत् निर्देशस्य विवक्षिततया, हेतूक्तिपूर्वकं साध्यस्यैकवाक्येन निर्देशः।

अत एव च हेतूपपादनविवक्षाभावेन, अत्रैव पञ्चमसूत्रे हेतूक्तिपूर्वकसाध्य-निर्देशो दृश्यते। (इतिल् अकारम् सकलशब्दत्तुक्कुम्, इत्याद्येतत्पादीयतुरीया सकलशब्दत्तुक्कुम् कारणमाय्) इत्याद्येतत्पादीयतुरीयाधिकरणप्रथमसूत्रे तथा विवक्षाभावेन तथैव निर्देशो दृश्यते। किञ्च प्रमाणबलेन पक्षे साध्यसिद्धौ तत्रैव व्यभिचारसूचनाय (उकन्दविषयत्तुक्कु शेषमायिरुक्कुमिरुप्पुसुखमाकक्काणैयाले अन्दनियममिल्लै) इत्येवं हेतुपूर्वकं साध्यनिर्देशो न कृत इत्यवधेयम्। ननु अभिमतविषय शेषवृत्तिः गुणज्ञाननिबन्धना युज्यते।

प्रकृते तु गुणज्ञाननिबन्धनत्वे मानाभाव इत्याशङ्कायां, वाटिक-शिशुमार्गणन्यायापातात् इदमयुक्तम् गुणप्रसिद्धेः। श्रुतिस्मृत्यादिप्रमाणान्तरगवेषणम्, समभिव्याहृतनारायणपदपर्यालोचनञ्च विना, लुप्तचतुर्थ्यर्थलाक्षणिकाकारेणैव विष्णुत्वरूपरूढिनिमित्तावच्छिन्ने कारणत्वरूपगुणसमष्ट्यात्मकरूढिनिमित्तमुखेन, ज्ञानशक्त्यादिगुणाक्षेपकरक्षकत्वरूपयोगवृत्तिनिमित्तमुखेन च कल्याणगुणानां सिद्ध्या, अकारेणैव शेषवृत्तेः गुणज्ञाननिबन्धनत्वस्य **गुणैर्दास्यमुपागतः** इत्यादि प्रसिद्धस्य लाभादित्यभिप्रेत्य, द्वितीयहेतुमुपपादयति पञ्चमसूत्रेण ( अकारत्तिले इत्यादिना)।

**मू।। ( ६५) अकारत्तिले कल्याणगुणङ्गलैच्चोल्लुकैयाले इन्दशेषत्वमुम् ले वन्दतु ।**

(अकारत्तिले) इत्यनेन-निमित्तत्रयवत्त्वं विवक्षितम्। (कल्याणगुणङ्गलै) कल्याणत्वम् निरतिशयभोग्यत्वम्। (गुणङ्गलै)इत्यनेन गुणाङ्को चाभिप्रेतः। (शोल्लुकैयाले) रूढियोगनिमित्तद्वयमुखेनेति भावः। (इन्दशेषत्वम्) (इन्द) इत्यनेन अभिमतविषयशेषत्वं व्यावर्त्यते। [1]**गुणैः दास्यमुपागतः हृदयान्याममन्थेव अवशाः प्रतिपेदिरे** इत्यादिप्रसिद्ध्या, भगवद्विषयशेषवृत्तिरेव अनवधिकगुणाऽ-नुसन्धाननिबन्धनतया, अतिशयितपुरुषार्थ इति भावः। (शेषत्वम्) लुप्तचतुर्थ्यर्थ-

१. रामा.कि.का.४-१२

स्वरूपयोग्यतारूपशेषत्वव्यापकफलोपधानरूपशेषवृत्तिः इत्यर्थः। (गुणत्ताले) **गुणैः गुणवत्तया** इत्यादाविव **गुणानुसन्धानं विवक्षितम्**। (वन्दतु) उपागतमितिवत्, प्राप्तमित्यर्थः। अत्र [1]**पिता च रक्षकः** इत्याद्यनुगृहीतरीत्या कारणत्वोक्तिलब्धनिरुपाधिकपितृत्वसम्बन्धज्ञानमात्रनिबन्धनशेषवृत्तिरतिशयितपुरुषार्थ इति तृतीयसूत्राभिप्रेतहेतुरपि व्यञ्जितः। **अनेन सूत्रेण प्रथमसूत्रस्थेश्वरपदाभिप्रेतमपि** विवृतम्।

ननु भगवच्छेषवृत्तेः गुणानुसन्धाननिबन्धनत्वे [2]**नित्यकिङ्करः प्रहर्षयिष्यामि** [3]**नित्यकिङ्करो भवानि** इत्यादिकूटस्थसूक्तिसिद्धं नित्यपुरुषार्थत्वं **भज्येत** इत्याशङ्क्य, कैङ्कर्यवत् गुणानां नित्यतया क्षणकालमपि गुणानुभवविच्छेदे सति [4]**वरं हुतवहज्वाला,** [5]**यन्मुहूर्तं क्षणं वापि** इत्यादिरीत्या निरतिशयार्तिशालिनां तदनुसन्धानस्यापि **सदा पश्यन्ति** इत्यादिरीत्या नित्यतया, गुणानुभवजनितप्रीतिकारितकैङ्कर्यमपि नित्यमेवेति नोक्तदोष इति परिहारं निरुपाधिकपुरुषार्थेषु अभ्यर्हितस्य निरुपाधिकपुरुषार्थत्वं कैमुत्यन्यायसिद्धमित्युक्तिमुखेन दर्शयति षष्ठसूत्रेण (शेषत्वमित्यादिना)।

**मू।। (६६) शेषत्वमे आत्मावुक्कुस्वरूपम्**

(शेषत्वमे) भगवद्विषयशेषवृत्तिरेवेत्यर्थः। (आत्मावुक्कु) जीवस्येत्यर्थः। एकवचनं जात्यभिप्रायम्। त्रिविधात्मवर्गपरम्। (स्वरूपम्) स्वम् उ आत्मीयम्, रूपम् उ आकारः, यावदाश्रयभावीति यावत्।

अत्र शेषत्वस्य सुखरूपत्वेन पूर्वसूत्रत्रये सिषाधयिषिततया **सुखम्** इत्यध्याहृत्य **सुखं नित्यपुरुषार्थः** इत्यर्थो अनुसन्धेयः। अत्र अपशुन्यायेन स्वरूपशब्दस्य प्रशस्तस्वरूपपरतया अतिशयितत्वं नित्यपुरुषार्थेषु विवक्षितम्। ज्ञानचिकीर्षाप्रयत्नभोगानां नित्यत्वस्य भगवत्प्रियत्वेन पुरुषार्थत्वस्य च प्रामाणिकत्वादिति द्रष्टव्यम्। अत्र **स्वत्वमात्मनि, स्वोज्जीवनेच्छा, दासभूताः इत्यादिकं** प्रमाणमभिप्रेतम्।

ननु समानाधिकरणेषु ज्ञातृत्वकर्तृत्वभोक्तृत्वेषु **कर्तृत्वान्तर्गतं शेषत्वं भगवत्प्रियतमत्वज्ञापकम्, नान्यत्** इति दुर्ग्रहम्। तृतीयाधिकरणस्य व्यक्तिनिष्ठं

---

१. नवविधसम्बन्धः २. स्तो.र.४ ३. शरणगतिगद्यम ४.गा.पु. ५.गा.पु.२२२-२२

भगवत्प्रियतमत्वं शेषत्वप्रयुक्तम्, नान्यप्रयुक्तमिति नियन्तुमशक्यत्वादित्याशङ्क्य, [1]**ज्ञानीत्वात्मैवमे मतम्** [2]**स महात्मा सु दुर्लभः** [3]**स मे युक्ततमो मतः स च मम प्रियः** इत्याद्यनुसारेण –

**सत्कर्मनिरताश्शुद्धास्साङ्ख्ययोगविदस्तथा।**

**नार्हन्ति शरणस्थस्य कलां कोटितमीमपि।**

**तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः।।**

इत्याद्यनुसारेण च ऐश्वर्य कैवल्यभगवल्लाभार्थिषु शेषवृत्त्यभावे, भगवत्प्रियतमत्वाभावस्यासिद्धतया, **शेषवृत्तिरेव भगवत्प्रियतमत्वप्रयोजकतया निरतिशयनिरुपाधिकपुरुषार्थः** इति नियन्तुं शक्यमेवेत्यभिप्रायेण परिहरति सप्तमसूत्रेण (शेषत्वमिल्लातपोदु इत्यादिना)

**मू।। (६७) शेषत्वमिल्लातपोदु स्वरूपमिल्लै**

(शेषत्वमिल्लातपोदु) शेषवृत्त्यत्यन्ताभाववत्सु, त्रिष्वित्यर्थः (पुरुषकारमाम्बोतु) इत्यस्य - (पुरुषकारमामिदत्तिल्) इत्यर्थवर्णनवत् (स्वरूपमिल्लै) भगवत्प्रियतमत्वप्रयुक्तं निरुपाधिकनिरतिशयपुरुषार्थरूपं स्वरूपमत्र नास्तीत्यर्थः। इत्थं शेषत्वस्वरूपयोः व्यतिरेकव्याप्तेः विवक्षितत्वादेव, पूर्वसूत्रोक्तावधारणस्य (शेषत्वमिल्लाततु स्वरूपमन्रु) इति विवरणं न कृतम्। अत एव इदं सूत्रं व्यर्थप्रायमिति शङ्कायाः अपि नावकाशः। अस्मिन् सूत्रे शेषत्वाभावकाले स्वरूपं नास्तीति शेषत्वस्वरूपयोः कालिकीव्यतिरेकव्याप्तिरपि गर्भिता। तत्रायमभिप्रायः –

**जन्मान्तरसहस्रेषु या बुद्धिर्भाविता नृणाम्।**

**तामेव लभते जन्तुरुपदेशो निरर्थकः।।**

इत्यादिवचनानुसारेण, **पतिं विश्वस्य** इत्यादि स्फुटार्थकन्यायनिरपेक्षमाणोपदेशशालिनामपि भगवच्छेषवृत्त्यभावः, अनादिदुर्वासनानिबन्धनस्वातन्त्र्यभ्रमप्रतिबन्धेन तज्ज्ञानाभावात्। तद्दशायाञ्च निरतिशयनिरुपाधिकपुरुषार्थ लक्षणं स्वरूपं भगवत्प्रियतमत्वप्रयुक्तं नास्तीत्यर्थः।

---

१. भ.गी.७-१८  २. भ.गी.७-४७  ३. भ.गी.७-४७

इत्थमुक्तौ स्वातन्त्र्यबुद्धिप्रतिबन्धेन शेषवृत्त्यभावे, निरुक्तस्वरूपाभावः कुतः? येन शेषत्वमेव स्वस्य रूपं स्यादिति शङ्कायाम् -

**[१]योऽन्यथासन्तमात्मानमन्यथा प्रतिपद्यते।**
**किन्तेन न कृतं पापं चोरेणात्मापहारिणा।।**

इति वचनबलात्, स्वातन्त्र्यबुद्धिदशायां स्वरूपाभावोऽवगम्यत इत्यष्टमनवमसूत्राभ्यां प्रतिपादयिष्यन्, तद्वचनम् [२]**अनात्मन्यात्मबुद्धिर्या** इत्यादिवचनानुसारेण देहात्माभिमानस्य सर्वपापमूलत्वेन क्रौर्यपरमिति शङ्कां तावत् परिहरति अष्टमसूत्रेण (आत्मापहारमावदु इत्यादिना)।

**मू।। (६८) अत्मापहारमावदु - स्वतन्त्रमेन्गिरनिनैवु**

(आत्मापहारमावतु) तस्मिन् वचने आत्मापहारत्वेन भवितुं योग्यमित्यर्थः। (स्वतन्त्रमेन्गिरनिनैवु) अत्र **अहमिति प्रतीयमानं वस्तु** इति विशेष्यमध्याहर्तव्यम्। (आत्मास्वतन्त्रनेन्गिरनिनैवु) इत्यनुक्त्वा (स्वतन्त्रमेन्गिरनिनैवु) इति सामान्येन नपुंसकनिर्देशबलेन तादृशविशेष्यलाभात्।

तस्य च अयमभिप्रायः [३]**योऽहमस्मिननन्यजे** इत्यारभ्य **य एवास्मिननन्यजे** इत्यन्तेन [४]**वपुरादिषु योऽपिकोऽपि वा** इत्याद्यनुगृहीतरीत्या, देहात्मसत्वासत्वहेतुत्वोक्त्या, ज्ञातृत्वमेव स्वरूपमिति प्रतीयत इत्याशङ्क्य **स्वतः प्रामाण्यन्यायेन** (तनक्केन्नवन्नु योग्यतैयुड्केड अलियुम्) इति नमश्शब्दपादीयद्वितीयाधिकरणषष्ठसूत्रे व्युत्पादितोपपत्तिबलेन, तत्पादीयसप्तमाधिकरणन्यायबलेन च **वपुरादिषु** इत्यादिसूक्ति विवृतश्रुतिबलेन च **योऽन्यथा सन्तम्** इत्यादेः असदर्थवादत्वासम्भवात्। अनुभवजनितप्रीतिकारितकैङ्कर्यरूपशेषवृत्तेः अनुभवोत्कर्षापादकत्वरूपोपपत्तिबलेन, पूर्वोक्तप्रमाणोपपत्तिसम्प्रदायबलेन च शेषवृत्तिपर्यन्तज्ञातृत्वस्यैव **असन्नेव** इत्यादि श्रुतिविवक्षितत्वाच्च नोक्त दोषद्वयमित्यभिप्रायेण परिहरति नवमसूत्रेण (स्वतन्त्रमित्यादिना)।

---

१. म.भा.उ.प.४१-३४ २. विष्णु.पु.६-७-१०
३. यजु.वे.आ.३-१ ४. स्तोत्ररत्नम्. ५२

## मू।। (६९) स्वतन्त्रमाम्बोतु इल्लैयाय् विडुम्

अत्र **अहम् इति प्रतीयमानं वस्तु** इति विशेष्यमनुषञ्जनीयम्।। (स्वतन्त्रमाम्बोतु ) अनादिदुर्वासनाबलेन पूर्वसूत्रोक्तस्वातन्त्र्यभ्रमस्य दुरत्ययतया, तद्बलेन अन्यगतातिशयेच्छाऽनधीनस्वगतातिशयेच्छया, प्रवृत्तमाम्बोतु इत्यर्थः। (इल्लैयाय् विडुम्, इल्लैयाय्) इत्यस्य क्षणकालविच्छेदरहितनित्यकैङ्कर्यपर्यन्त-सदादर्शनस्यैव चैतन्यशक्तिप्रवृत्तिप्रदानपरमफलतया, तद्रहितः असत्प्राय इत्यर्थः।

(इल्लैयाय् विडुम्) इल्लैयामित्यर्थः। मुलुच्चोल्लु नाम-नामधेयम्, भागः - भागधेयमितिवत्, समुदायोक्तिरिति यावत्) समुदायोक्तिः नाम-अर्थान्तरं विना एकदेशार्थस्य वाचकः तद्घटितः। (कण्डु = कण्डु कोण्डु, उण्डु = उण्डु कोण्डु) इत्यादिवत्। (इल्लै इत्येतावदनुक्त्वा) इल्लैयाय् विडुम् = इत्युक्तिः = **असन्नेव स भवति** इति श्रुतिच्छाययोक्तम्। श्रुतौ च सर्वत्र स्फुटाध्याहारविषयस्य भवतेः प्रयोगः, ब्रह्माऽसद्भावज्ञानाऽऽत्माऽसद्भावयोः कालिकव्याप्तिसूचनार्थः। अत्र तु (स्वतन्त्रमाम्बोतु इल्लैयाय् विडुम्) इति ब्रह्माऽसद्भावज्ञानाधीनस्वातन्त्र्यभ्रमजन्य-स्वतन्त्रप्रवृत्तेः आत्मासद्भावस्य च कालिकव्यप्तिरुक्तेति विशेषः। आत्मनोऽ-सत्प्रायत्वञ्च भगवत्प्रियतमत्वाभाव इति पूर्वमेवोक्तम्।

यद्वा (इल्लैयाय् विडुम्) इल्लै या काते विडातु। (कडियाते विडातु, अन्वितङ्गलामोवेन्नु निनैक्कवेण्डा, अन्वितङ्गलाये विडुम्) इत्यादिवत्, (विडुम्) इत्यनेन कालिकव्यतिरेकव्याप्तिरपि दार्ढ्यार्थं सूच्यते। अनेन इत्यवधारणं विवृतम्। तस्मात् प्रणवस्थ लुप्तचतुर्थ्यर्थः शेषत्वमेवेति सिद्धम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्यायस्य द्वितीयपादे**
**लुप्तचतुर्थ्यर्थसमर्थनं नाम**
**अष्टमाधिकरणम् समाप्तम्।।**

❀ ❀ ❀ ❀

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे उकारार्थसमर्थनं नाम नवमाधिकरणम्

**मू।। (७०) स्थानप्रमाणत्ताले उकारम् अवधारणार्थम्।**

अत्र क्रमप्राप्त उकारार्थो निरूप्यते। अत्रैवं संशयक्रमः । अत्र उकारः **अवधारणार्थको न भवति उत भवतीति**। तदर्थम् अत्र स्थानप्रमाणं नावतरति, उतावतरतीति। तदर्थम्, उकारः लक्ष्मीर्भवति, उत न भवतीति, तदर्थं, स्थानप्रमाणापेक्षया लक्ष्म्यर्थकत्ववचनं प्रबलम्, उत न प्रबलमिति। तदर्थम्, लक्ष्म्यर्थकत्वापेक्षया अन्यशेषत्वनिषेधः प्राधान्येन ज्ञातव्यः। न वेति। तदर्थम्, अन्यशेषत्वं शुनः पुरोडाशदानसमं न वेति। तदर्थम्, भगवच्छेषत्वस्य प्राधान्येन ज्ञातव्यत्वनिबन्धनः कैमुतिकन्यायो नावतरति, उत अवतरतीति। तदर्थम् अन्यशेषत्वनिषेधापेक्षया भगवच्छेषत्वस्य प्राधान्ये प्रामाण्यमस्ति न वेति। उकारस्य अवधारणार्थत्वे वैयर्थ्यमस्ति न वेति वा।

## तत्र पूर्वपक्षः

उकारः अवधारणार्थपरो न भवति। अव्ययानामनेकार्थत्वेऽपि अथशब्दादेः आनन्तर्यादाविव, **उकारः - शेषोक्तौ सम्बोधने च** इत्यादि शाब्दिकव्यवहारानुसारेण प्रसिद्धार्थपरित्यागेन, अनेकार्थत्वप्रसिद्धिमात्रेण ऐच्छिकार्थान्तरकल्पनाया अयुक्तत्वात्। अन्यथा **यजति, ददाति, जुहोति** इत्यादीनां धातूनाम् अनेकार्थत्वप्रसिद्धिमात्रेण अर्थव्यवस्था भङ्गप्रसङ्गात्।

न च [१]**तदेव भूतं तदुभव्यं, तदेवाग्निः** इत्यादाविव अवधारणार्थकत्वमपि स्थानप्रमाणेन लुप्तमेवेति वाच्यम्। तदेव भूतम् इत्यादौ एकस्मिन् प्रकरणे एकस्मिन् धर्मिणि **तदेव भूतम्, तदेवर्तम्, तदेवब्रह्म, तदेवाग्निः, तदेवशुक्रम्**

---

१. तै.उ.ना.व.१-२

इत्येवं पञ्चकृत्वः उद्देश्यविधेयसमर्पकपदद्वयमध्ये विधेये उद्देश्य भेदाभावपरस्य एवकारस्य प्रयोगदर्शनात्। [1]**तदुभव्यं, तदुसत्यम्, तदुचन्द्रमाः, स उ गर्भे अन्तः** इत्येवं तस्मिन्नेव प्रकरणे तस्मिन्नेवधर्मिणि उद्देश्यविधेयसमर्पक पदद्वयमध्ये चतुर्वारं प्रयोगात् उपस्थितत्वरूपस्थानाख्यलिङ्गेन, तत्रत्पोकारस्य विधेये उद्देश्यभेदा-भावतात्पर्यनिश्चय सम्भवेऽपि, प्रकृते तादृशलिङ्गाभावेन अवधारणार्थत्व-सिद्ध्यसम्भवात्।

न च, अन्यत्रस्थानप्रमाणेन अवधारणार्थकत्वसिद्धौ योग्यताबलात् प्रकृतेऽपि उकारस्य अवधारणार्थकत्वसिद्धिरिति वाच्यम्। तथा सति [2]**तद्विजिज्ञासस्व** इति वत् अवश्यज्ञातव्यार्थत्वेन आदरसूचनाय, श्रोतृजनसम्बोधनरूपप्रसिद्धापरि-ग्रहस्यैव उचितत्वात्। अन्यथा **एष उ एव वा मुनिः एष उ एव भामनिः** इत्यादावगतेः।

किञ्च - अत्रावधारणम्, न तावत् अत्यन्तायोगव्यवच्छेदः। उकारेण शेषत्वोक्तौ, तदत्यन्तायोगस्य अप्रसक्तत्वेन निषेधानुपपत्तेः। **नीलं सरोजं भवत्येव** इत्यादौ सरोजरक्तत्वस्य औत्सर्गिकत्वेन तत्र नीलत्वस्य अत्यन्तायोगस्य प्रसक्त्या तन्निषेधोपपत्तेश्च।

नाप्ययोगव्यवच्छेदः। अस्मीत्यद्याहृतक्रियापदेन वर्तमानापदेशतया नित्य-वच्छ्रवणरूपेण कदाचिच्छेषत्वाभावरूपस्य अयोगस्य व्यवच्छेदत्वसिद्ध्या, लोकरीत्या शेषत्वसाहचर्येण प्रसक्तस्यापि शेषत्वाभावस्य व्यवच्छेदे मध्यमाक्षर-वैयर्थ्यापत्तेः।

नाप्यन्ययोगव्यवच्छेदः। लोके गृहादेः पितापुत्रादि शेषत्वदर्शनेन भगवच्छेष-त्वसाहित्येन अन्यशेषत्वस्यापि प्रसक्तत्वेऽपि विशेष्यसङ्गतैवकारस्यैव अन्ययोगव्य-वच्छेदकत्वस्य **राम एवधनुर्धरः** इत्यादौ तान्त्रिकव्यवहारसिद्धत्वेन **म्-अयैवास्मि** इति मकारार्थविशेषणीभूत भगवच्छेषत्वसमभिव्याहृतस्य मध्यमाक्षरस्य अन्ययोग-व्यवच्छेदकत्वानुपपत्तेः।

---

१. तै.उ.ना.व.१-२ २. तै.उ.भृ.व.१-१

**अकारश्चित्स्वरूपस्य विष्णोर्वाचक इष्यते।**
**उकारश्चित्स्वरूपायाः श्रियो वाची तथा विदुः।**
**मकारस्तु तयोर्दास इति प्रणवलक्षणम्।**
**अकारेणोच्यते विष्णुः सर्वलोकेश्वरो हरिः।**
**उद्धृता विष्णुना लक्ष्मी रुकारेणोच्यते सदा।**
**मकारस्तु तयोर्विप्रश्रीनारायणयोस्सदा।**
**आत्मनश्शेषभूतस्य वाचकश्श्रुतिचोदितः।**

इति वचनबलेन, उकारस्य लक्ष्मीवाचकत्वाऽवश्यम्भावेन, स्थानप्रमाणेन अवधारणार्थकत्वं वक्तुमशक्यम्, **न हि वचनविरोधे न्यायः प्रभवति** इति न्यायात्। तत्र उकारस्य चिद्वाचिपदानन्दं सच्चिद्वाचित्वमुचितमित्यभिप्रायेण चित्वरूपस्येत्यादिकमुक्तम्।

(तयोर्दासः) दासवाचक इत्यर्थः। अनेन उकारोऽपि लुप्तचतुर्थ्यन्त इति गम्यते। यद्वा **भ्याम्** इति चतुर्थीद्विवचनस्य भ्यामोलुगभिप्रेतः। (इति प्रणवलक्षणम्) त्रिविधात्मवर्गस्य मिथुनशेषत्वबोधकम् अकारोकारमकारात्मकमक्षरत्रयं प्रणवस्य स्वरूपमित्यर्थः। उत्तरश्लोके (विष्णुः) इत्यनेन अकारस्य रूढ्यर्थः उक्तः। योगार्थरक्षकत्वस्य इष्टप्रापकत्वानिष्टनिवर्तकत्वरूपतया (सर्वलोकेश्वरः) इत्यनेन-इष्टप्रापकत्वं प्रदर्शितम्। (हरिः) इति अनिष्टनिवर्तकत्वमुक्तम्। रूढ्यर्थमात्रविवक्षां वारयितुम् **विष्णुः, हरिः** इति पदद्वयमुपात्तम्। (उद्धृता) इति विशेषणेन अमृतमथनसमये [1]**पश्यतां सर्वदेवानां ययौ वक्षस्स्थलं हरेः** इत्युक्तत्वेन, लक्ष्म्याः पत्नीत्वसूचनमुखेन तच्छेषत्वमप्यवश्यं वक्तव्यमिति व्यज्यते। **ओभ्यामस्मि** इति नित्यवच्छ्रवणाभिप्रायेण **सदा शेषभूतस्य वाचकः** इत्युक्तम्।

एतेन लक्ष्मीशेषत्वापेक्षया अन्यशेषत्वनिवृत्तिः अवश्यं वक्तव्येत्यपास्तम्। न हि वचनविरोध इति न्यायात् पत्नीशेषत्वस्य पतिशेषत्वोपपादकतया अवश्यवक्तव्यत्वाच्च। लक्ष्मीशेषत्वस्य इष्टप्राप्तिरूपतया, अन्यशेषत्वनिवृत्तेः अनिष्टनिवृत्तिरूपतया च तदपेक्षया तस्य अवश्यं वक्तव्यत्वाभावाच्च।

१. विष्णु.पु.१-९-१०५

एतेन देवताशेषपुरोडाशस्य शुनेदानवत्, ईश्वरशेषस्य आत्मवस्तुनः संसारिशेषत्वेन करणम्। तथा च **अनर्थनिवृत्तये अन्यशेषत्वनिवृत्तिरावश्यकी, नत्विष्टप्राप्तये भगवत्सम्बन्धो लक्ष्मीसम्बन्धो वा** इति **सैव अवश्यवक्तव्या** इति परास्तम्।

**अप्यकार्यंशतकृत्वा** इति न्यायेन अप्राप्तशेषवृत्तिमुखेनापि प्राप्तशेषवृत्तेः प्रामाणिकत्वात्। भक्तिपारवश्यपन्नेषु प्राप्यत्वरया देवतान्तरभजनादेः दर्शनाच्च। श्रीभाष्यकारचरमश्लोकोपदेशन्यायेन अनर्थाभ्युपगमेनापि इष्टार्थप्रवृत्तिसम्भवाच्च।

एतेनैव भगवच्छेषत्वस्यापि अन्यशेषत्वनिवृत्त्यपेक्षया आवश्यकत्व एव **मानाभावेन कैमुतिकन्यानवतारात्। उभयाधिष्ठानञ्चैकं शेषित्वम्** इति सिद्धान्तविरोधेन दिव्यदम्पत्योः उपायत्वे वैषम्यवत् शेषित्वे वैषम्यस्य कैश्चिदभ्युपगतत्वाच्च। [1]**परिहरमधुसूदन प्रपन्नान्** इति वचनविरोधेन श्रीभक्तिसारसूरिभिरनुगृहीतायाः यमकिङ्करसंवादप्रदर्शनसूक्तेः अन्यशेषत्वनिवृत्तिप्रशंसामात्रत्वाच्च।

अन्यच्च - उकारविवरण भूतेन नमश्शब्देनैव अन्यशेषत्व निवृत्तिसिद्ध्या मध्यमाक्षरवैयर्थ्यप्रसङ्गेन, लक्ष्मीशेषत्वपरत्वाश्रयणेन तस्य अनन्यथासिद्धप्रयोजनकत्वमेव युक्तमङ्गीकर्तुम्। न च देवतान्तरशेषत्वनिवर्तकतया साफल्यम्। **न म** इति स्वशेषत्वस्य विशिष्यनिषेधबलेन, देवतान्तरशेषत्वनिवृत्तेः भगवद्वैलक्षण्यज्ञानकार्यतया, अन्यथासिद्धेः आवश्यकत्वात्। तस्मात् उकारः - अवधारणार्थको न भवतीति।

## सिद्धान्तस्तु

उकारः - अवधारणार्थक एव। [2]**तदेवभूतं तदुभव्यम्, तदेवाग्निः** इत्यादौ अवधारणार्थकत्वस्यापि स्थानप्रमाणेन क्लुप्ततया अव्ययानेकार्थकत्वसाधनैकार्थत्वाद्युपन्यासस्य अस्थानविजृम्भितत्वात्। न च तदेव भूतम् इत्यादिषु, उद्देश्यविधेयसमर्पकपदद्वयमध्ये प्रयोगादुपस्थिततत्वरूपस्थानाख्यलिङ्गेन, उकारस्य अवधारणार्थकत्वनिश्चयसम्भवेऽपि, प्रकृते तदभावात् न तत्सम्भव इति वाच्यम्। **अहमपि न मम, भगवत एवाहमस्मि** इत्यादिषु जीवेश्वरादिपदद्वयमध्ये प्रयोग-

१. विष्णु.पु.३-७-१३

दुपस्थितत्वरूपस्थानाख्यलिङ्गेन प्रकृतेऽपि एवकारस्येव उकारस्यापि अवधारणार्थकत्वसिद्धिसम्भवात्, प्रणवस्ताकारस्य एवकारप्रकरणगतत्वाभावेऽपि, **पूर्वाधिकरणन्यायेन** प्रणवस्य **अहमपि मम न** इत्यादेश्च विवरणविवरणिभावापन्नत्वेन, प्रणवस्थोकारस्य स्थानप्रमाणेन एवकारसमानार्थकत्वोपपादनसम्भवाच्च।

**किञ्च - अन्यत्र स्थानप्रमाणेन** उकारस्य अवधारणार्थकत्वसिद्धौ योग्यताबलादेव प्रकृतेऽपि तत्सिद्धिः। न च अवश्यज्ञातव्यार्थत्वेन आदरसूचनाय सम्बोधनार्थकत्वमेव युक्तमिति वाच्यम्। श्रुत्युक्तत्वेन अवश्यज्ञातव्यत्वसिद्ध्या उकारस्य व्यर्थप्रायत्वापत्त्या, अवधारणपरत्वेन अनन्यथासिद्धार्थकत्वस्यैव युक्तत्वात्। किञ्च अन्यशेषत्वनिवृत्तेः बहुप्रमाणसिद्धत्वेन, सर्ववाङ्मूलभूते प्रणवे तत्सङ्ग्रहावश्यम्भावेन, अवधारणार्थकत्वमेवयुक्तम्। **एष एव वामनिः** इत्यादौ पौनरुक्त्यापत्त्या अन्यपरत्वमेव युक्तम्।

किञ्चेत्याद्यप्ययुक्तम्। **भगवत एवाहमस्मि** इत्यादिप्रमाणविरोधेन उकारस्य क्रियासङ्गतत्वाभावेन, अत्यन्तायोगव्यवच्छेददूषणस्य अप्रसक्तप्रतिषेधत्वात्। अत एव अयोगव्यवच्छेदपरत्वदूषणमपि तथैव। एवकारसमभिव्याहृतपूर्वपदजन्यप्रतीतिविशेषणस्य, तत्समभिव्याहृतपदान्तरजन्यप्रतीतिविशेष्यकादाचित्कस्य असम्बन्धस्य व्यवच्छेदो हि अयोगव्यवच्छेदशब्दार्थः। पूर्वपदशब्दश्च पूर्वसुबन्तपरः। प्रकृते च शेषत्वस्य पूर्वपदस्थप्रत्ययार्थत्वेऽपि तत्समप्रकृतिजन्यप्रतीति विशेषणत्वाभावेन, स्वसमभिव्याहृतपदजन्यप्रतीति विशेष्यान्वितविशेषणनिमित्तकसुबन्तपदोत्तरैवकारस्यैव विशेषणसङ्गतैव कारतया प्रकृते तादृशविशेषणभूताकारार्थरक्षकत्वस्य समभिव्याहृतपदान्तरोपात्तविशेष्यान्वितत्वाभावेन, तादृशविशेष्यभूतमकारार्थान्वितस्यैव शेषत्वस्य प्रत्ययार्थतया तादृशविशेषणत्वाभावेन च उकारस्य विशेषणसङ्गतत्वाश्रयणेन अयोगव्यवच्छेदपरत्वं हि अप्रसक्तमेव।

एतेन विशेष्यसङ्गतत्वाभावेन अन्ययोगव्यवच्छेदपरत्वं न सम्भवतीति प्रत्युक्तम्। स्ववाक्यजन्यशाब्दबोधविशेषणस्य यद्व्यक्त्यन्यत्वावच्छेदेन सम्बन्धो नास्ति। तद्व्यक्तिविशेष्यकप्रतीतिजनकसुबन्तपदोत्तरत्वस्यैव विशेष्यसङ्गतत्वरूपतया, स्ववाक्यजन्य शाब्दबोधे मकारार्थापेक्षया विशेषणस्य लुप्तचतुर्थ्यर्थशेषत्वस्य

अकारार्थान्यत्वावच्छेदेन सम्बन्धनिषेधस्य अन्ययोगव्यवच्छेदरूपतया च प्रकृतोकारस्य अन्ययोगव्यवच्छेदेपरत्वस्य निष्प्रत्यूहत्वात्। **याजनाऽध्यापनादिकं ब्राह्मणस्यैव धर्मः, गवादिकं ब्राह्मणायैव देयम्** इत्यादौ अन्ययोगव्यवच्छेदस्यैव सर्वसम्भवात्।

अपि च इत्यादिकमपि अयुक्तम्। **अकारेणोच्यते विष्णुः** इत्यादिवचनस्य भगवच्छब्दनिर्वचनादिवत् सम्भवमात्रेणोपपत्त्या **भगवत एवाहस्मि** इत्यादिश्रौत-विवरणबलेन श्रुतिस्मृत्यादिप्रसिद्धायाः अन्यशेषत्वनिवृत्तेः सङ्ग्रहस्यैव, सर्व-वाङ्मूलभूत प्रणवे स्वीकर्तुमुचितत्वात्। अन्यथा अकारोकारयोः विभक्तिलुक्कल्पना-गौरवाच्च। **ओभ्याम्** इति चतुर्थीद्विवचनविभक्तेः लुक्कल्पने द्वन्द्वाश्रयणादि गौरवात्, **भगवत एव** इत्येकवचनान्तविवरण श्रुतिविरोधात्, **ब्रह्मणे त्वामहस ओमिति** इति प्रणवो पादानपूर्वकंचतुर्थ्येकवचनान्तपदेन विवरणविरोधाच्च।

मूलमन्त्र एव व्यक्तचतुर्थेकवचनान्तनारायणपदेन विवरणविरोधस्य दुरुद्धर-त्वाच्च। [1]**पतिं विश्वस्यात्मेश्वरम्** [2]**पतिं पतीनां परमं परस्तात्, भगवत एवाहमस्मि** इत्यादिप्रमाणप्रसिद्धस्य निरुपाधिकसर्वशेषित्वस्य नारायणैकनिष्ठस्य **ओभ्याम्** इत्यनेन स्वरसतस्तुल्यवत्, सर्वशेषित्वस्य दिव्यदम्पत्योः प्रतीत्यापत्त्या भङ्गप्रसङ्गाच्च।

अन्यच्च - लक्ष्मीशेषत्वापेक्षया अन्यशेषत्वनिवृत्तिश्चावश्यवक्तव्या। सर्ववाङ्मूलस्य प्रणवस्य परमपुरुषार्थपरत्वेनैव प्रमाणतमत्वस्य वक्तव्यतया, अन्यशेषत्वनिवृत्तिमनुक्त्वा, लक्ष्मीशेषत्वोक्त्या, अन्यशेषत्वनिवृत्तिं विना लक्ष्मीशेष-वृत्तिमात्रानुष्ठापकत्वापत्त्या, अन्यशेषवृत्तेः परमपुरुषार्थविरोधित्वेन बहुप्रमाणप्रसिद्ध्या च अप्रामाण्यप्रसङ्गात्। उक्तन्यायानुगृहीतपूर्वोक्तश्रुतिबलेन, लक्ष्मीशेषत्वपरतया व्याख्यानवचनस्य अभ्युच्चयमात्रत्वेन न हि वचनविरोध इति न्यायानवताराच्च। पत्नीशेषत्वस्य पतिशेषत्वोपपादकतया श्रियः पतित्ववत् व्यङ्ग्यमर्यादयालाभेन, तत्कण्ठोक्तेः व्यर्थप्रायत्वाच्च।

---

१. तै.उ.ना.व.१०

२. श्वेता.उ.६-७

**पश्यत्येनं जायमानं ब्रह्मरुद्रोऽथ वा पुनः।**
**रजसातमसा वास्यमानसं समभिप्लुतम्।।**

इत्याद्युक्तरीत्या, अन्यशेषत्वस्य मिथुनशेषत्वविरोधित्वेन, तन्निवृत्तेः इष्टलाभार्थमवश्यवक्तव्यत्वाच्च।

अत एव अन्यशेषत्वस्य परमपुरुषार्थप्रतिलम्भकत्वाभावेन त्रिवर्गरूपक्षुद्रफलहेतुत्वेन, परमपुरुषार्थविरोधित्वेन च तत्करणे शुनः पुरोडाशदानन्यायाऽवतारसम्भवाच्च। **अप्यकार्यं शतं कृत्वा** इत्यादौ अगतिकस्य अवरणवर्णधर्मानुष्ठानेन कुटुम्बपोषणरूपाल्पधर्मलाभस्यैव विवक्षिततया अत्यन्तनिषिद्धान्यशेषत्वेन परमधर्मभूतमिथुनशेषत्वलाभस्योक्त्यसम्भवग्रस्तत्वाच्च।

भक्तिपारवश्यप्रपन्नेषु देवतान्तरभजनादेः भक्तिविवृद्धिमूलकत्वेन, भगवत्प्रीत्यतिशयसम्पादनमुखेन सत्वोद्रेकसम्पादकतया, भगवत्कैङ्कर्यकोटिप्रवेशेन मोक्षहेतुतया च मोक्षविरोध्यन्यशेषवृत्तौ तद्दृष्टान्तीकरणासम्भवाच्च। क्षेत्रहारिजयन्यायेन दयातिशयकार्यश्रीभाष्यकारादिप्रवृत्तेः इष्टहान्यनिष्टप्राप्तिहेतुभूतान्यशेषवृत्तौ दृष्टान्तत्वोक्त्यसम्भवाच्च। अत एव अन्यशेषत्वस्य भगवच्छेषत्वविरोधित्वेन तन्निवृत्तेः तदपेक्षया आवश्यकतया, कैमुतिकन्यायावतारसम्भवाच्च।

न च अन्यशेषत्वनिवृत्त्यनुक्तौ तदसिद्धिवत् भगवच्छेषत्वानुक्तौ तदसिद्धिः स्यादिति वाच्यम्। अन्यशेषत्वनिवृत्तेः भगवच्छेषवृत्तिप्रतिबन्धकाभावरूपत्वेन, तदुक्तेः भगवच्छेषत्वयोग्यताऽऽपादनमुखेन भगवत्प्रीतिकरतयैव पुरुषार्थपर्यवसानस्यवक्तव्यतया भगवच्छेषत्वपर्यवसानाभावेन अन्यशेषत्वनिवृत्त्युक्तेः वैफल्येन, तथैव भगवच्छेषत्वस्य अनुक्तिसिद्धत्वात्। पतिशेषत्वोपपादकपत्नीशेषत्वस्य सुतरां तथात्वाच्च। शेषवृत्तिसामान्यस्य दिव्यदम्पतिप्रीत्युद्देश्यकतया प्रवृत्तिहेतुभूतेच्छाविशेष्यत्वरूपशेषित्वस्य तयोर्व्यासञ्जवृत्तित्वेऽपि [1]**स्वमुद्दिश्य श्रीमान्** इति सिद्धान्तानुसारेण भगवत्प्रीत्यर्थतयैव लक्ष्मीप्रीतेः उद्देश्यतया, दिव्यदम्पत्योः शेषित्वांशे प्राधान्याप्राधान्ययोः दुर्वारत्वाच्च। [2]**मधुसूदनप्रपन्नान्** इत्यत्र मधुसूदनपदसमभिव्याहारेण विरोधिनिवर्तकत्वगुणानुसन्धानस्यैव विवक्षिततया, भगवच्छेषत्व-

१. श्रीरङ्गराजस्तवः २-८७ २. विष्णु.पु.३-७-१३

विरोध्यन्यशेषत्वनिवृत्तिपरत्वस्य तत्र फलितार्थतया **यमकिङ्करसंवादप्रदर्शनसूक्तेः तद्विरोधाभावेनन्यायानुगृहीत** यथाश्रुतार्थपरत्वसम्भवेऽपिऽसदर्थवादत्वस्य अयुक्तत्वाच्च।

**अन्यच्चेत्याद्यपि** अयुक्तम्। स्वपरसाधारणान्यशेषत्वनिवृत्तिरूपाऽ**नन्यथासिद्धार्थकतया** मध्यमाक्षरसाफल्योपपत्तेः, **सामान्यनिषेधे सत्येव नमशशब्देन विशेषनिषेधस्य स्वशेषत्वक्रौर्यद्योतकत्वात्**। अन्यथा **अप्रतिषिद्धमनुमतम्** इति न्यायेन विशेषनिषेधे विशेषाभ्यनुज्ञानन्यायेन च भगवद्वैलक्षण्यज्ञानवतो मोक्षार्थं देवतान्तरशेषत्वाभावेऽपि, क्षुद्रफलार्थमन्यशेषत्वप्रसक्तौ तस्य मोक्षविरोधित्वेन निषिद्धत्वस्यालाभप्रसङ्गाच्च। तस्मात्, उकारः अवधारणार्थक एवेति सिद्धम्।

इदञ्चाधिकरणम् - अष्टसूत्रात्मकम्। तत्र उकारस्य तन्त्रेण स्थलान्तरे अवधारणार्थकत्वं प्रदर्शयन् प्रकृतेऽपि तत्प्रदर्शयति प्रथमसूत्रेण।

उकारः स्थलान्तरे स्थानप्रमाणेन अवधारणार्थकः। तथैव प्रकृतेऽपि स्थानप्रमाणेन उकारः - अवधारणार्थक इत्यर्थः। अत्र दार्ढ्यार्थं स्थलान्तरप्रदर्शनम्। यद्वा उकारः स्थलान्तरे स्थानप्रमाणेन अवधारणार्थकः। ततश्च प्रकृतेऽपि उकारः योग्यतया अवधारणार्थक इत्यर्थः। अत्र उकारस्य अवधारणार्थकत्वमेव नास्तीति शङ्कां परिहर्तुं स्थलान्तरप्रदर्शनमित्यनुसन्धेयम्। (स्थानप्रमाणत्ताले) स्थानम्-उपस्थानम्। उपस्थितिः। अत्र प्रमाणपदसमभिव्याहृतस्थानपदेन श्रुतिलिङ्गादिषु परिगणितं स्थानप्रमाणं व्यज्यते। तथा च प्रकृते अवधारणार्थकत्वेन निश्चितैवकारसमभिव्याहृत पूर्वोत्तरोद्देश्यविधेयसमर्पकपदद्वयमध्ये प्रयोगात् उपस्थितिरूपलिङ्ग-प्रमाणेनेत्यर्थः। (उकारः) स्थालान्तरे प्रकृते च उकार इत्यर्थः। (अवधारणार्थः) अवधारणम् निषेधः। सः - अर्थः - द्योतः, यस्य स इत्यर्थः।

**अयोगं योगमपरैः** इत्यादि प्रसिद्धार्थेषु विवक्षितमर्थं दर्शयति द्वितीयसूत्रेण (इत्तालित्यादिना)।

**मू।। (७१) इत्ताल् पिर्रक्कु शेषं अन्रु एन्गिरतु ।**

(इत्ताल्) उकारत्तालित्यर्थः। (पिरर्क्कु) उकारसमभिव्याहृतपूर्वपद-

प्रकृत्यर्थव्यतिरिक्तस्येत्यर्थः। (शेषमन्रु) प्रकृत्यर्थ भिन्नविषयकेच्छासाध्यो न भवामीत्यर्थः। (एन्गिरतु) इति द्योतते इत्यर्थः।

**अथ उकारार्थं पक्षान्तरेणोपक्षिपति** तृतीयसूत्रेण (पेरियपिराट्टियारुक्कि-त्यादिना)।

**मू।। (७२) पेरियपिराट्टियारुक्कु शेषमेन्गिरतेन्रुं शोल्लुवर्कल्**

**उकारेणोच्यते लक्ष्मीः, उकारश्श्रियोवाची तथा विदुः** इति वचना-भिप्रायेण भूनीलाव्यावृत्त्यर्थम्, (पेरियपिराट्टियारुक्कु) इत्युक्तम्। (पेरियपिराट्टि-**यारुक्कु**) पुरुषकारभावेन उपकारिण्या देव्या इत्यर्थः। अनेन गुणकृतं तच्छेषत्वमिति सूचितम्। **याभिस्त्वं स्तनबाहुदृष्टिभिरिव** इत्याद्युक्तमवमवित्वम्, **पेरिय** इति विशेषणेन विवक्षितम्। तथा च लक्ष्मीदेव्या इत्यर्थः। (शेषमेन्गिरतु) **लुप्तचतुर्थ्य-न्तोकारेण लक्ष्मीविषयकेच्छा साध्योऽस्मि** इत्युच्यत इत्यर्थः। (एन्नुम् शेल्लुवर् कल्) इत्यपि केचिद्वदन्ति इत्यर्थः।

अपि शब्देन स्वोक्तिः समुच्चीयते। अथ अपक्षिप्तं पक्षं प्रतिक्षिपति चतुर्थसूत्रेण (अतिलुमित्यादिना)।

**मू।। (७३) अतिलुम् अन्यशेषत्वम् कलिकैये प्रधानम्।**

(अतिलुम्) लक्ष्मीशेषत्वादपीत्यर्थः। अपिः - विरोधेपदार्थसम्भावनायां वा। यद्यपि अन्यशेषत्वनिवृत्तेः लक्ष्मीशेषफलित्वात्, लक्ष्मीशेषत्वस्यार्थ प्राधान्य-मस्ति। तथापि फलितार्थत्वसम्भवात् पतिशेषत्वोक्तिव्यङ्ग्यत्वाच्च, अन्यशेषत्व-निवृत्तेरेव वक्तव्येषु प्राधान्यमिति सैव वक्तव्येति भावः। अन्यशेषत्व स्वातन्त्र्येण भगवदन्यगतातिशयाधानेच्छया उपादेयत्वमित्यर्थः। तेन लक्ष्मीशेषत्वाभ्युपगमेऽपि न दोषः।

(शेषत्वम् कलिकैये) इति, शेषत्वात्यन्ताभाव एवेत्यर्थः। यद्यपि द्वितीयसूत्रेशेषभेद एवोक्तः। तथापि धर्मात्यन्ताभावधर्म्यन्योन्याभावयोरैक्यान्नविरोधः। (कलिकैये) इत्यवधारणेन लक्ष्मीशेषत्वं व्यावर्त्यते। यद्यपि तस्मादपि प्रधानमित्यु-क्त्यैव, तत्प्राधान्येन व्यवच्छेदः सिद्ध्यति। तथापि अत्र अन्यशेषत्वशब्देन देवतान्तरादिशेषत्वस्य विवक्षिततया स्वातन्त्रेण लक्ष्मीशेषत्वस्यापि निषेध्यतया,

कथं देवतान्तरादिशेषत्वमेव निषेध्यमिति शङ्कायाम्, **लक्ष्मीशेषत्वं देवतान्तरादि शेषत्ववत् रजस्तमोवर्धकतया न भगवच्छेषत्व विरोधि। अतः देवतान्तर-शेषत्वमेव निषेध्यम्** इत्यभिप्रायेण (कलिकैये) इत्यव धारणप्रयोगः इत्यनुसन्धेयम्।

(प्रधानम्) इत्यनन्तरम् **वक्तव्यम्** इति शेषः। (प्रधानम्) इति विशेषणेन लक्ष्मीशेषत्वस्य अप्रधानवक्तव्यत्वसिद्ध्या **उकारेणोच्यते लक्ष्मीः** इत्यादिवचनम् अभ्युच्चयार्थपरमिति सूचितम्। अर्थाबाधसत्त्वे कथञ्चित् शब्दबोध्यत्व सम्भवे च, अवश्यज्ञातव्यत्वाभावात्, शब्दस्वारस्याभावाच्च। अप्रधानभूतानामप्यर्थानां शब्दविवक्षितत्वेन व्याख्यानस्य भगवच्छब्दादिषु दर्शनादित्यभिप्रायः।

अथ पूर्वसूत्रस्थान्यशब्दविवक्षितार्थं स्पष्टयन्, न केवलं लक्ष्मीशेषत्व-विरोधितया अन्यशेषत्वस्य, तन्निवृत्तेः अवश्यवक्तव्यत्वम्। अपि तु इष्टहानिकरतया बलवदनिष्टकरतया च तस्य, तन्निवृत्तेः तथात्वमित्यभिप्रायेण, दृष्टान्तमुखेन अन्यशेषत्वकार्यं प्रदर्शयति पञ्चमसूत्रेण (देवर्कलुक्कु इत्यादिना)।

**मू।। (७४) देवर् कलुक्कु शेषमानपुरोडाशत्तै नाय् क्किडुमापोले, ईश्वरनुक्कुशेषमान आत्मवस्तुवै संसारिकलुक्कु शेषमाक्कुकै**

(देवर्कलुक्कु) अग्नीन्द्राद्यर्वाचीनदेवानामित्यर्थः। (शेषमान) अग्नीन्द्रादि देवताप्रीत्युद्देशेन, यागदानहोमरूपव्यापारविषयीकृतस्येत्यर्थः। (पुरोडाशत्तै) इति हविर्मात्रोपलक्षणम्। (नाय्क्कु) इत्यनेन पुरोडाशसमीपगमन तद्दर्शनतद्गन्धघ्राणा-योग्यत्वं शुनो व्यज्यते। शुनः पुरोडाशकर्मकनिरुक्तव्यापाराणां देवताप्रीतिविरोधित्वात्, तदप्रीतिसम्पादकत्वाच्च। (इडुमापोले) इत्यनेन दत्तापहार दोषो व्यज्यते। अनेन भगवच्छेषवृत्त्ययोग्यतापादकत्वम् सर्वपापमूलभूतात्मापहारहेतुत्वञ्च देवतान्त-रोत्कर्षज्ञानस्य तत्प्रीत्युद्देशस्य तदुद्देशेन स्वविषयव्यापारस्य च अस्तीति व्यज्यते।

(ईश्वरशेषमान) ईश्वरशब्देन - देवानामपि ईश्वरत्वं विवक्षितम्। अनेन पर-देवताद्रव्यापहारादधिकदोषो व्यज्यते। (आत्मवस्तुवै) आत्मशब्देन पुरोडाशाद्यपे क्षया प्रकृते देयद्रव्योत्कर्षो विवक्षितः। वस्तुपदेन **वस्तु लक्ष्मीधरं विदुः, वस्तु पैतामहं धनम्** इत्युक्तरीत्या भोग्यतायामप्रमेयत्व व्यज्यते। (शेषमान आत्मवस्तुवै) इत्यनेन भगवच्छेषत्वविशिष्टस्य अन्यशेषत्व करणम् अतिक्रूरमिति

गम्यते। (संसारिकलुक्कु) [१]**आब्रह्मस्तम्बपर्यन्ताः** इत्युक्तरीत्या संसारवशवर्तिनामित्यर्थः। (शेषमाक्कुकै) तत्प्रीत्युद्देशेन व्यापारवत्तया करणमित्यर्थः। अस्मिन् **सूत्रे वानिडैवालु मव्वानवर्क्कु** इत्यादि श्रीमद्गोदादेवी दिव्यसूक्तिः प्रमाणत्वेन अनुसन्धेया।

अथ लक्ष्मीशेषत्वापेक्षया अन्यशेषत्वनिवृत्तेः प्रधानवक्तव्यत्वम्, कैमुतिकन्यायेन प्रदर्शयति षष्ठसूत्रेण (भगवच्छेषत्वत्तिलुमित्यादिना)

**मू।। (७५) भगवच्छेषत्वत्तिलुम्, अन्यशेषत्वम् कलिकैये प्रधानम्।**

(भगवच्छेषत्वत्तिलुम्) भगवच्छब्देन योगरूढिभ्यां षाड्गुण्यदेवताविशेषौ विवक्षितौ। (शेषत्वत्तिलुम्) इति अपि शब्दः पूर्ववत् अर्थद्वयपरः। अन्यशेषत्वनिवृत्तिलक्ष्मीशेषत्वयोः फलतया, भगवच्छेषत्वस्य अर्थप्राधान्ये सत्यपि, अन्यशेषत्वस्य, तद्विरोधितया, तन्निवृत्युक्तिव्यङ्ग्यतयाच भगवच्छेषत्वस्य, तन्निवृत्तेः प्रधानवक्तव्यत्वं सम्भवतीति भावः। (अन्यशेषत्वम् कलिकैये) इत्यादि पदत्रयं पूर्ववत्। **प्रधानम्** इत्यनन्तरं **वक्तव्यम्** इति शेषः। तथा च पतिशेषत्वव्यङ्ग्यं पत्नीशेषत्वं, सुतरां न प्रधान वक्तव्यमिति भावः।

अथ उपपत्तिसिद्धेः अवश्यवक्तव्यत्वे प्रमाणमपि हेतुत्वेन दर्शयति सप्तमसूत्रेण (मरन्दुमित्यादिना)।

**मू।। (७६) [२]मरन्दुम् पुरन्तोलामान्दर् एन्गैयाले**

**तिरुवडितन्नामम् इति - तिरम्बेल् मिन्** इति श्रीभक्तिसारसूरिदिव्यसूक्तिस्थं कर्माभिप्रेतम्। (तिरुवडि तन्नामम्) श्रीमस्वामिनोऽसाधारणं नामेत्यर्थः। (मुरन्दुम्) इत्यनेन अवश्यज्ञातव्याज्ञानं विवक्षितम्। (नामम् मरन्दुम्) इत्यनेन नामापि न श्रूयते इति न्यायोऽभिप्रेतः। (पुरन्दोलामान्दर्) अन्यसेवारहितमनुष्याः इत्यर्थः।

अत्र [२]**मधुसूदनप्रपन्नान्** इत्युक्तविरोधि निवर्तकत्वानुसन्धानं फलितम्। भगवच्छेषत्वविरोध्यन्यशेषत्वनिवृत्तिमत्वयुक्तम्। (मान्दर् एन्गैयाले) इत्यस्य **मान्दर्**

१. १. वि.ध.पु.१०४-२३ २. विष्णुपुराणम् ३-७-१३

**इरै ञ्जियुम्** इति एवम्भूतमनुष्याणां भयभक्तिपूर्वकं सेव्यत्वस्य भटान् प्रति यमो क्तत्वेन प्रदर्शितत्वादित्यर्थः। अथ अकारस्य अवधारणार्थकत्वे, नमश्शब्देन गतार्थतामाशङ्क्य परिहरत्यष्टमसूत्रेण (इत्तालित्यादिना)।

**मू।। ( ७७) इत्ताल् तनक्कुम् पिरर्क्कुं उरित्तन्रु एन्किरदु ।**

(इत्ताल्) अवधारणार्थकेन उकारेणेत्यर्थः। (तनक्कुम्) इत्यनेन अस्मच्छब्द-पर्यायसमभिव्याहृतमकारोक्तं प्रयोक्तुचेतनसामान्यं परामृश्यते। (पिरर्क्कुम्) इत्यनेन प्रयोक्तृचेतनव्यतिरिक्ता जीवा उच्यन्ते।

एवम्, अकारार्थापेक्षया अन्यव्यक्तित्वा-वच्छेदेन प्रत्ययार्थशेषत्वस्य प्रतिसम्बन्धितालक्षणयोगव्यवच्छेदके उकारे द्योत्यस्य अकारार्थव्यतिरिक्तस्य सर्वस्य प्रयोक्तृजीवत्वेन तद्भिन्नजीवत्वेन च द्वैराश्यकथनात् प्रयोक्त्रुजीवशेषत्व-मात्रव्यवच्छेदकेन नमश्शब्देन गतार्थत्वं नास्तीति सूचितम्।

(उरित्तन्रु) योग्यमन्रुभगवदन्यत्वावच्छिन्नं प्रतिशेषवृत्तियोग्यो नास्मीत्यर्थः। **भगवच्छेषभूतोऽस्मि** इति विधिवाक्ये नित्यवच्छ्रवणस्य प्रत्यक्षाविरोधेन बाध-परिहाराय **अन्यशेषत्वयोग्यो न भवामि** इत्येवं योग्यतैव निषेध्येतेति भावः। (एन्गिरतु) इति द्योत्यतइत्यर्थः।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्यायस्य द्वितीयपादे**
**उकारार्थसमर्थनं नाम**
**नवमाधिकरणम् समाप्तम्।।**

❀ ❀ ❀ ❀

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे

# मकारार्थसमर्थनं नाम

## दशमाधिकरणम्

**मू।। (७८) मकारम्, इरुपत्तैन्दामक्षरमाय् ज्ञानवाचियु मायिरुक्कैयाले आत्मावैच्चोल्लु .किरतु**

अथ क्रमप्राप्तो मकारार्थो निरूप्यते। तत्र संशयः। किं मकारार्थो देहविशिष्ट आत्मा। उत-निष्कृष्टात्मेति। तदर्थं, मकारस्य देहविशिष्टात्मपरत्वे, मकारात्मनोः वर्गाक्षरेषु त्याज्योपादेयतया ज्ञातव्येष्वर्थेषु च पञ्चविंशत्व प्रयुक्तो वाच्यवाचकभाव उपपद्यते। न वेति च । तदर्थं मकारस्य त्रिविधात्मवर्गपरत्व-मावश्यकम्, न वेति च। तदर्थं त्रिविधात्मवर्गपरत्वे एकवचनं विरुध्यते, न वेति। तदर्थं, मकारस्य देहविशिष्टात्मपरत्वे ज्ञातृत्ववाचित्वमुपपद्यते, न वेति। तदर्थं ज्ञातृत्वं देहाद्व्यावर्तकं, न वेति।

### तत्र पूर्वपक्षः

मकारार्थो देहविशिष्टात्मैव। [१]**अहमपि न मम, भगवत एवाहमस्मि, अच्युताहं तवास्मि** [२]**तवास्मीति च याचते** [३]**किङ्करोऽस्मि हृषीकेश, ममेति द्व्यक्षरो मृत्युः न ममेति च शाश्वतम्** इत्याद्यनुसारेण मकारस्य अस्मच्छब्दपर्यायतया अस्मच्छब्दे वक्तृत्वस्य प्रयोगोपाधितया वक्तृत्वस्य देहविशिष्टात्मन्येव सम्भवात्।

न च, मकारस्य वर्ग्याक्षरेषु पञ्चविंशतया **पञ्चविंशोऽयं पुरुषः, पञ्चविंश आत्मा भवति** इत्यादिना जीवस्य ज्ञातव्यतत्त्वेषु पञ्चविंशत्वेन प्रसिद्धतया च **भूतानि च कवर्गेण** इत्यादिवचने वर्णक्रमेण तत्वक्रमेण च

---

१. यजु.वे.  २. रामा.यु.का.१८-३३  ३. जितन्ता.१-१४

वाच्यवाचकभावस्योक्ततया च **निष्कृष्टात्मन एव मकारवाच्यत्वसिद्धिरिति वाच्यम्।** देहविशिष्टात्मनि विशेष्यांशस्य ज्ञानरूपस्य पञ्चविंशत्वेन मकारवाच्यत्वोपपत्तेः।

न च **मन-ज्ञाने** इति धातोः निष्पन्नस्य मकारस्य, ज्ञानरूपनिष्कृष्टात्म-परत्वमेवेति वाच्यम् । धात्वर्थतया ज्ञानरूपत्वलाभवत्, प्रयोगोपाधितया देहवैशिष्ट्य-लाभस्यापि दुर्वारत्वात्।

न च, लुप्तचतुर्थ्यन्तोक्तभगवच्छेषत्वस्य त्रिविधात्मवर्गसाधारणतया तद्विशेष्यसमर्पकस्य मकारस्य देहविशिष्टात्मपरत्वं न सम्भवतीति वाच्यम्। प्रयोगोपाधितया व्युत्पत्ति सिद्धदेहवैशिष्ट्यानुसारेण विशिष्ट्यात्मन्येव भगव्च्छेषत्वस्य प्रणवे प्रतिपादनोपपत्तेः।

किञ्च त्रिविधात्मवर्गपरत्वं मकारस्य एकवचनान्तत्वेन अनुपपन्नम्। व्यक्त्यैकत्वस्यैव एकवचनेन स्वरससिद्धत्वात्। आत्मद्वारकैकत्वपरत्वे तद्वैयर्थ्याच्च। अत एव आत्मनां प्रत्येकमेकत्वेऽपि तत्परत्वमयुक्तम्। किञ्च प्रकृतिप्रयोगोपाधितया सिद्धस्य वक्तृत्वस्य एकदेहावच्छिन्नात्मव्यक्तिवृत्तितया, तदनुसारेणैकवचनं व्यक्त्यैक-त्वपरमित्येव युक्तम्।

अपि च **मन-ज्ञाने** इति धातोः कर्तरि व्युत्पत्त्या निष्पन्नस्य मकारस्य ज्ञातृत्वपरतया, ज्ञातृत्वस्य च देहविशिष्टात्मन्येव सम्भवेन, विशिष्टपरत्वमेव युक्तम्। न च ज्ञातृत्वस्य अचेतनदेहाद्व्यावर्तकत्वेन शुद्धात्मपरत्वमेव युक्तमिति वाच्यम्। ज्ञातृत्वस्य विशेष्यांशान्वयोपपत्तेः।

किञ्च **अहं जानामि** इति ज्ञातृत्वेन प्रतीतिसिद्धोऽहमर्थः, **स्थूलोऽहम्, कृशोऽहम्** इत्यबाधितसामानाधिकरण्यानुभवबलाद्देह एवेति वदन्तं प्रतिदेहस्य अचेतनत्वसिद्धवत्कारेण ज्ञातृत्वं देहव्यावर्तकमिति वचनमुपहास्यम्। तस्मात् देहविशिष्टात्मैव मकारार्थ इति।

## सिद्धान्तस्तु

मकारार्थो निष्कृष्टात्मैव **भूतानि च कवर्गेण** इत्यादिना अन्वयक्रमेण पृथिव्यादिचतुर्विंशतितत्त्वानां ककारादि चतुर्विंशतिवर्णवाच्यत्वस्य **कं पृथिव्यै**

**नमः** इत्यादि संहारन्यासबलेन सिद्ध्या, **भूतानि च कवर्गेण** इत्यादिना तेषां ककारादि - चतुर्विंशति वर्णवाच्यत्वकण्ठोक्त्या च तत्वेषु पञ्चविंशत्वेन प्रसिद्धस्य आत्मनः, वर्णेषु पञ्चविंशतिवर्णरूपमकारवाच्यत्वस्य, औचित्येनैव सिद्धेः। **आत्मा तु समकारेण पञ्चविंशः प्रकीर्तितः** इत्यौचित्यसिद्धार्थस्य कण्ठोक्त्या दृढीकृतत्वाच्च।

न च - अस्मच्छब्दपर्यायमकारवाच्यस्य प्रयोगोपाधितयादेहवैशिष्ट्यासिद्धौ, विशेष्यांशस्य आत्मनः पञ्चविंशत्वविवक्षया **पञ्चविंशः प्रकीर्तितः** इत्युक्तिः उपपन्नेति वाच्यम्। अन्वय क्रमेण तत्वानां ककारादिवर्णवाच्यत्वोक्तिमहिम्ना, भोक्तृत्वावस्थारहित जीवस्यैव मकारवाच्यत्वसिद्धेः। कारणावस्थाद्योतनार्थमेव श्रुतौ पञ्चविंशत्वोक्त्या, स्थूलसूक्ष्म देहपरित्यागेन भोक्तृत्वावस्थारहितस्य कारणावस्थजीवस्य वाच्यत्वाभिप्रायेण **पञ्चविंशः प्रकीर्तितः** इति विशेषितत्वाच्च।

किञ्च **मन-ज्ञाने** इति धातोः निष्पन्नस्यमकारस्य ज्ञानरूपनिष्कृष्टात्मपरत्वमेव युक्तम्। न च, प्रयोगोपाधितया देहवैशिष्ट्यलाभोऽपि दुर्वार इति वाच्यम्। प्रयोगोपाधेः पदजन्यप्रतीति प्रकारत्वाभावेन **ब्राह्मणोऽहम्, मनुष्योऽहम्** इत्यादौ तत्तच्छब्दवक्तृत्वोपलक्षितात्मव्यक्तेः वक्तृत्वाभावदशायामपि मनुष्यादि देहवैशिष्ट्यवत्, मकारवाच्यस्य मकारघटित वाक्यप्रयोगदशायां देहविशिष्टस्यापि देहावच्छिन्न दशायां धातुसिद्धज्ञानरूपत्ववैशिष्ट्यसम्भवेन, सर्वकालावच्छिन्न निष्कृष्टात्मन एव मकारवाच्यत्वाऽवश्यम्भावात्।

अपि च लुप्तचतुर्थ्यन्ताकारोक्त भगवच्छेषत्वस्य सर्वकालावच्छेदेन सर्वात्मसाधारणतया श्रुतिस्मृत्यादिषु प्रपञ्चितत्वेन, तदाश्रयसमर्पकस्य मकारस्य सर्वकालावच्छेदेन धातूपात्तज्ञानत्वविशिष्टात्मसामान्यपरत्वमेव युक्तम्। प्रयोगोपाधितया व्युत्पत्तिसिद्धस्यापि देहवैशिष्ट्यस्योपलक्षणत्वसम्भवात्, प्रथमोपात्तभगवच्छेषत्वस्य अनन्तरोपात्तशब्दस्वभावेन अर्थसिद्धं प्रयोगोपाधिमादाय आश्रयसङ्कोचानुपपत्तेः। धातूपात्तज्ञानरूपान्वयितावच्छेदकेन सहशेषत्वस्य सर्वदेशकालावच्छेदेन एकस्मिन् धर्मिणि अन्वयरूपविशिष्टवैशिष्ट्यसम्भवे तत्त्यागायोगाच्च।

न च भगवत्स्वरूपस्यापि ज्ञानरूपत्वेन भगवच्छेषत्वस्य आश्रयसङ्कोच आवश्यक इति वाच्यम्।

**मन-ज्ञाने** इति वा, **मन-अवबोधने** इति वा धातोः **मदि-हर्षे** इति धातोश्च, भावे कर्तरि च निष्पन्नस्य मकारस्य असङ्कोचेन ज्ञानानन्दरूपत्वज्ञानान्दाश्रयत्वबोधकत्ववत्, **मसि-परिमाणे** इति वा **माङ्-माने** इति वा धातोः निष्पन्नस्य तस्य असङ्कोचेन परमाणुत्वबोधकतया, भगवत्यनतिप्रसङ्गेन भगवच्छेषत्वस्य आश्रयसङ्कोचानवकाशात्।

अत एव [१]**अस्येशाना जगतो विष्णुपत्नी** इत्यादिषु लक्ष्म्या तस्या अपि मकारार्थानुप्रवेशावश्यम्भावेन, परमाणुभूतायाः तस्याः जीवकोटिरेवेति सिद्धान्तोऽपि उपपद्यते। किञ्च इत्याद्यपि अयुक्तम् **बर्हिर्देवसदनं दामि** इत्यादिमन्त्राणां सर्वदा सर्वत्र सर्वैः प्रयुज्यमानानाम् एकप्रयोगान्वितैकपुरुषपरत्वे तु अनित्यार्थसंयोगादप्रामाण्यप्रसङ्गेन, अनाद्यनन्ततत्तत्प्रयोगान्विततत्तत्पुरुषैकत्वपरत्ववत्, त्रिविधात्मवर्गपरस्यापि मकारस्य अनाद्यनन्तभिन्नभिन्नशेषत्वानुसन्धानान्विततत्तत्पुरुषैकत्वपरतया एकवचनान्तत्वोपपत्तेः।

वस्तुतस्तु **बर्हिर्देवसदनं दामि** इत्यादौ अनित्यार्थसंयोगपरिहाराय, अनाद्यनन्ततत्तत्प्रयोगावच्छिन्नतत्तत्पुरुषैकत्वपरत्वेऽपि, तादृशैकत्वोपस्थितेः अव्यावर्तकत्वेन एकवचनस्य प्रकृतिप्रयोगसाधुत्वमात्रार्थकत्वमगत्याश्रयणीयम्। न च प्रकृते तदाश्रयणं युक्तम्। जात्येकवचनतया साफल्योपपत्तेः। तथापि-न तावत् जात्येकचनं जातिगतैकत्वबोधकम् **पदार्थः पदार्थेनान्वेति** इति व्युत्पत्तिविरोधापत्तेः। नापि सविशेषणे वेति न्यायेन जातिद्वारा एकत्वबोधकम्। **स्वर्गीध्वन्तः** इत्यादौ विशेष्यबहिर्भूतविशेषणस्थल एव तन्न्यायापातात्। अन्यथा **गौर्नित्या** इत्यादि प्रयोगप्रसङ्गस्य दुरुद्धरत्वात्। तस्मात् जात्येकचवनं समुदायैकत्वबोधकम्। समुदायतावच्छेदकञ्च प्रकृत्युपात्ता जातिरेवातथाच **आत्मा नित्यः** इत्यादौ आत्मव्यक्तिबहुत्वेऽपि एकवचनम् आत्मत्वावच्छिन्नसमुदायैकत्वपरतया आत्मत्वावच्छेदेन नित्यत्वबोधकमिति सप्रयोजनम्। यद्यपि विशिष्टवैशिष्ट्यस्य औत्सर्गिकत्वेन **आत्मानो नित्याः** इत्युक्तावपि तत्सिद्धिः। तथापि उत्सर्गे बाधकाभावं दृढयितुम् एकवचनम्।

---

१. श्रीसूक्तम्

वस्तुतः समुदायद्वारकैकत्वबोधनमाश्रयितुं युक्तम्। समुदायत्व **पर्याप्त्य-धिकरणवृत्तित्वसिद्ध्यैव प्रकृत्यर्थतावच्छेदका**ऽवच्छेदेन अपरपदार्थान्वयसिद्धेः।

न चैवम्, अनेकघटवति **घटोऽस्ति** इत्याद्यनुपपत्तिः। तत्र अगत्या जाति-द्वारैकत्वाऽन्वयस्य अव्यावर्तकस्यापि प्रत्येकमेकत्ववत्, प्रकृतिप्रयोगसाधुत्वार्थं प्रयुक्ते नैकवचनेन बोधनाङ्गीकारात्।

न च अनुपात्तसमुदायद्वारकान्वयः अनुपपन्नः। **गौर्नित्या** इत्याद्यप्रयोगात् **लोहितस्स्फटिकः, पीतश्शङ्कः** इत्यादौ गुणिलक्षणया विशेष्यभूतविशेषणस्यैव परम्परासम्बन्धबोधनेन प्रामाण्याभ्युपगमादिति वाच्यम्। विशेषणस्य द्वारत्वे विशेष्यत्वापेक्षायामपि **लोहितस्स्फटिकः** इत्यादिवत् उपात्तविशेषणस्य अनुपात्तद्वार-कान्वयसम्भवात्। विशेष्यविशेषणस्यैव सद्वारकान्वय इत्युक्तौ **एको व्रीहिः** इत्याद्यसम्भवात्।

तत्र एववचनस्य साधुत्वार्थत्वेऽपि एकशब्दस्य जातिभेदशङ्काव्यावृत्त्यर्थं जातित्वारकैकत्वपरतयैवसार्थक्यस्य वक्तव्यत्वात्। इत्थञ्च प्रकृते विशिष्टवैशिष्ट्य-व्युत्पत्त्यनवतारेऽपि, प्रकृत्यर्थतावच्छेदकज्ञानानन्दरूपत्वावच्छिन्नसमुदायैक-त्वबोधने, तत्सामानाधिकरण्यमात्रेण अपरपदार्थस्य भगवच्छेषत्वस्य ज्ञानानन्द-रूपत्वाद्यवच्छेदेन निष्कृष्टात्मान्वयसिद्धिः प्रयोजनमिति सिद्धम्।

अपि चेत्याद्यप्ययुक्तम्। [१]**न हि विज्ञातुर्विज्ञातेर्विपलरिलोपो** [२]**अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा** इत्यादिप्रमाणानुसारेण, असङ्कोचन्यायेन च कर्तरि व्युत्पत्त्या, मकारसिद्धज्ञातृत्वस्य स्वाभाविकत्वेन, तत्र देह वैशिष्ट्यस्या-प्रयोजकत्वात्। संसारिणामेव धर्मभूतज्ञानस्य विषयावगाहनदशायां देहवैशिष्ट्यापेक्षा-भ्युपगमात्। अन्येषां तन्वभावे **सन्ध्यवदुपपत्तेः** इत्येव सिद्धान्तित्वात्।

वस्तुतस्तु धातुशक्यप्रथमोपस्थितज्ञातृत्वस्य सिद्धे शब्दार्तेति न्यायेन श्रुतिस्मृत्यादिप्रमाणजातेन च निरुपाधिकत्वसिद्ध्या तस्यान्वयेन शेषत्वस्यापि देहविशिष्टान्वये सङ्कोचापत्तिरूपक्रमबाधापत्तिश्च। अत एव मकारोपात्तज्ञातृत्वेन आत्मनो देहाद्व्यावृत्ति सिद्धिरपि उपपद्यते। देहस्य अनित्यस्य सर्वकालावच्छिन्न-

---

१. बृह.उ.६-३-३०　　२. बृह.उ.६-५-१४

ज्ञातृत्वासम्भवात्। एवं ज्ञानत्वानन्दत्वाणुत्वांशेष्वपि सङ्कोचोपक्रमविरोधौ, तन्मुखेन देहाद्व्यावृत्तिसिद्धिश्चानुसन्धेया। एतेन किञ्चेत्याद्यपि दूरोत्सारितम्।

किञ्च **अहं जाग्रद्दशायां देहादिकं जानामि स्वप्नादिषु देहमपि न जानामि** इति प्रतीत्या, आत्मदेहयोः मिथोज्ञातृज्ञेयभावात् भेदसिद्धिः।

अपि च देहात्मनोः **इदम्-अहम्** इति प्रतीतिविषयत्वादपि भेदसिद्धिः। अन्यच्च **मम शरीरम्** इति प्रतीत्या च तथा। इतरच्च **बालदेहोऽहं मन्दज्ञानः, युवदेहोऽहं बहुज्ञानः** इत्यादि प्रतीत्यापि, तथा **स्थूलोऽहम्** इत्यादिप्रतीतिस्तु पण्डितानाम् अन्तर्यामि विषयत्वात्, पामराणां भेदाग्रहाच्च उपपद्यते। एतच्च ***अवयवसङ्घातस्य आत्मत्वे, एकावयवापगमे अहम्बुद्धिव्यवहाराभावप्रसङ्गः। एकावयवस्य आत्मत्वे तन्नाशे तत्प्रसङ्गः। विनिगमनाविरहश्च। इदञ्च, देहस्यात्मत्वे अकृताभ्यागमकृतविप्रणाशप्रसङ्गः*** इत्यादि बहुदूषणम् तत्त्वं शेखराख्यरहस्य प्रबन्धे प्रपञ्चितम्। तत्रैवानुसन्धेयम्।

इत्थञ्च बहुप्रमाणन्यायानुगृहीतमकारासङ्कोचस्वारस्यात् मकारो देहव्यावृत्त निष्कृष्टात्मपर इति सिद्धम्।

इदञ्चाधिकरणं पञ्चसूत्र्यात्मकम्। तत्र **भूतानि च कवर्गेण** इत्यादौ **आत्मातु समकारेण पञ्चविंशः प्रकीर्तितः** इति वचने जीवस्य मकारवाच्यत्व-कण्ठोक्तिं स्फुटत्वादुपेक्ष्य, **आत्मा तु समकारेण** इत्यत्र श्रुति प्रसिद्ध पञ्चविंश-त्वोक्तेः भोक्तृत्वरहितजीवस्वरूपपरत्वम्, पञ्चविंशतत्वस्य पञ्चविंशवर्णवाच्यत्वम्, चतुर्विंशतितत्वानां चतुर्विंशतिवर्णवाच्यत्वोक्त्यैव सिद्धमिति औचित्यपरत्वञ्चा-भिप्रेत्य, वचनानुक्तं, लोकसिद्धं मकारस्य पञ्चविंशत्वं कण्ठतो निर्दिशन्, भावव्युत्पत्त्या, धातुसिद्धज्ञात्वासङ्कोचन्यायेन निष्कृष्टात्मपरत्वञ्च दर्शयति प्रथमसूत्रेण –

## सूत्रार्थस्तु

अत्र **मकारः निष्कृष्टजीववाचकः। वर्गेषु पञ्चविंशाक्षरत्वात्, जीवे ज्ञानत्वबोधकत्वाच्च** इत्यनुमानद्वयमभिप्रेतम्। **तस्याः खुरन्यास** इत्यादौ पञ्चविंशाक्षरे, व्यभिचारवारणाय **वर्गेषु** इत्युक्तम्। अत्र **वर्गेषु यत्सङ्ख्यायुक्तम्,**

**यदक्षरम्, तत् - त्वेषु तत्सङ्ख्यायुक्तद्रव्यवाचि** इति, **सामान्यव्याप्तिः, आद्यानुमाने अभिप्रेता। विपक्षे भूतानि च कवर्गेण** इत्यादि वचनविरोध इत्यभिप्रेतम्। द्वितीयानुमाने प्रणवस्थमकारस्य अस्मच्छब्दपर्यायतया, धर्मभूतज्ञान-बोधकत्वाभावात् न तद्वाचकज्ञानपदादौव्यभिचार इत्यभिप्रायेण **जीवे** इत्युक्तम्। **विपक्षेमकारार्थं सङ्कोचप्रसङ्ग इत्यभिप्रेतम्।**

(मकारम्) प्रकरणात् प्रणवस्थमकार इत्यर्थः। (इरुपत्तैन्दाक्षरमाय्) अत्र लोकप्रसिद्ध्या वर्ग्याक्षरेषु पञ्चविंशत्वं विवक्षितम्।

(ज्ञानवाचियुमा यिरुक्कैयाले) स्वयम्प्रकाशत्वं ज्ञानशब्दार्थः। भावव्युत्पत्त्या तद्वाचकत्वं विवक्षितम्। (आत्मावैच्चोल्लुकिरतु) अपरपदार्थान्वयप्रतियोगितया, निष्कृष्टजीवस्वरूपबोधक इत्यर्थः।

इत्थं न्यायत्रयं प्रदर्श्य, अनन्तरं समभिव्याहृत पदोपात्तशेषत्वाश्रयासङ्कोच-न्यायं दर्शयति द्वितीयसूत्रेण (इतुतानित्यादिना)।

**मू।। (७९) इतुतान् समष्टिवाचकम्**

(इतुतान्) प्रणवस्थमकारस्त्वित्यर्थः। (तान्) इत्यनेन असाधरण-स्वरूपवाचिना मकारान्तरवैषम्यमभिप्रेतम्। समष्टिशब्दः त्रिविधात्मवर्गपरः। (इतुतान्) इत्यत्र इदं शब्दः - शेषत्वाश्रयबोधकत्वरूपापरपदार्थान्वयप्रतियोगिनो ज्ञानत्वेन रूपेण वाचक इत्यर्थः। अनेन मकारस्य देहविशिष्टात्मस्वरूपपरत्वाभाव-समर्थनस्य, देहानवच्छिन्नसूक्ष्मचिद्रूपबद्धात्मवर्गमुक्तात्मवर्गनित्यसूरिवर्गाणां लाभः प्रयोजनमित्यपि सूचितम्।

अथ प्रकृत्यर्थतावच्छेदकज्ञानजात्यवच्छिन्ने समुदायैकत्वबोधकत्वादपि, मकारो निष्कृष्टात्म पर इति पञ्चमन्यायं प्रदर्शयति तृतीयसूत्रेण (जात्येकेत्यादिना)।

**मू।। (८०) जात्येकचवनम्**

अत्र (इतुतान्) इति विशेष्यमनुसन्धेयम्। प्रणवस्थमकारस्त्वित्यर्थः। अनेकघटवति **घटोऽस्ति** इत्याद्येकचनान्तवैषम्यं तु शब्देन द्योतते। जातिशब्दः - सर्वेषामात्मनां स्वयम्प्रकाशत्वरूपभिन्नभिन्नपरस्परसादृश्यलक्षणाकृतिपरः। सिद्धान्ते

अकृत्यतिरेकेण जातेः अनभ्युपगमात्। जातिसम्बन्धिएकवचनं जात्येकवचनम्। जातिसम्बन्धश्चजात्यवच्छिन्नसमुदायैकत्वबोधकत्वम्।

तथा च **एको व्रीहिः** इत्यादौ एकशब्देन, व्रीहिषु जातिद्वारकैकज्ञान-विषयीभावस्यैव समुदायतारूपत्वात्। सिद्धान्ते अपेक्षाबुद्धिविशेषातिरेकेण सङ्ख्याया अनभ्युपगमाच्च। तादृशैकवचनान्तोऽयं मकार इत्यर्थः।

अत्र कर्तरि व्युत्पत्तिसिद्ध ज्ञातृत्वा सङ्कोचादपि मकारेणनिष्कृष्टात्म-बोधमुखेनत्रिविधात्मवर्गलाभो देहव्यावृत्तिसिद्धिश्च, मकारस्य प्रयोजनमिति दर्शयन्, आनन्दत्वाणुत्वासङ्कोचबलादपि तदुभयसिद्धिंन्यायतौल्येन सूचयन्, मकारस्य निष्कृष्टात्मपरत्वे षष्ठसप्तमाष्टमनवमदूषणानि प्रदर्शयति चतुर्थसूत्रेण (इत्तालित्या-दिना)।

**मू।। (८१) इत्ताल् आत्मा ज्ञातावेन्नु, देहत्तिल् व्यावृत्तिसोल्लिट्रायिट्रु ।**

(इत्ताल्) कर्तरि व्युत्पन्नेन मकारेणेत्यर्थः। **आत्मनितिष्ठन्** इत्यादौ आत्मशब्दस्य जीवे प्रसिद्धिमभिप्रेत्य (आत्मा) इत्युक्तम्। (ज्ञाता) इत्यनेन निरुपाधिकज्ञातृत्वं विवक्षितम्। (एन्नु) इति बोधनेनेत्यर्थः। (देहत्तिल्) स्थूलोह-मित्यादिप्रतीत्यादेहभेदस्य शङ्कितत्वात्। (देहत्तिलित्युक्तम्) अचिद्व्यावृत्तौ तात्पर्यम्। (देहन्तिल् व्यावृत्ति) देहद्भेद इत्यर्थः। (सोल्लिट् रायिट्रु) दार्ढ्यार्थं निगमनवत् (सोल्लिट् रायिट्रु) इति उक्तिसमाप्तेः निर्देशः।

इत्थं प्रमाणान्तरासङ्कोचन्यायानुगृहीतेन मकारेण पञ्चधा देहव्यावृत्ति-सिद्धिमुक्त्वा, पूर्वोक्तदार्ढ्योपपादनाय स्वीयप्रबन्धान्तरोक्तमात्मनो देहव्यावृत्तिसाधक-न्यायजातं स्मारयन्, मकारस्य निष्कृष्टात्मपरत्वे दशमदूषणमपि सूचयति पञ्चम-सूत्रेण (देहत्तिलित्यादिना)।

**मू।। (८२) देहत्तिल् व्यावृत्ति - तत्त्वशेखरत्तिले शोन्नोम्'**

अत्र आदौ पूर्वसूत्रस्थमात्मेति पदं षष्ठ्यन्ततया अनुषञ्जनीयम्। आत्मा-वुक्कु देहाद्भेद इत्यर्थः। (तत्त्वशेखरत्तिले) तत्वशब्दः - चिदचिदीश्वररूपप्रामाणिक-वस्तुपरः। शेखरशब्देन स्वोक्ततत्त्वत्रयस्य मोक्षार्थ मवश्यज्ञातव्यत्वं दृढतमानेक

प्रमाणोपपत्तिसिद्धत्वञ्चाभिप्रेतम्। अत्र प्रतिपाद्यप्रतिपादकयोः अभेदोपचारेण, तत्त्वशेखराख्यप्रबन्ध इत्यर्थः। प्रमाणोपपत्तिसिद्धार्थवक्तृत्वरूपं पूज्यत्वं स्वस्मिन् दृढमित्यभिप्रायेण (शोत्रोम्) इति बहुवचनप्रयोगः। तथा च तत्प्रबन्धोक्तन्यायबलादपि देहव्यावृत्तिवत् ज्ञातृत्वाद्यसङ्कोचस्यापि सिद्ध्या, मकारस्य निष्कृष्टात्मपरत्वसिद्धिरिति भावः।

**।। इति श्रीशुद्धसत्त्वरामानुजाचार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्यायस्य द्वितीयपादे**
**मकारार्थसमर्थनं नाम**
**दशमाधिकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे
# अकारादिक्रमसमर्थनं नाम
# एकादशाधिकरणम्

**मू।। (८३) मणत्तैयुम् ओलियैयुम् कोण्डु पूवैयुम् रत्नत्तैयुम् विरुम्बुमापोले, शेषमेन्रु आत्मावै आदरिक्किरतु**

इत्थं प्रणवस्थाक्षरत्रयं व्याख्यातम्। अथ तत्क्रमः समर्थ्यते। तत्र संशयः। अकाराद्यक्षरत्रयक्रमेणोपपद्यते। उत उपपद्यते। तदर्थमात्मनो ज्ञातृत्वभोक्तृत्वापेक्षया शेषत्वमुत्कर्षो, न वेति। तदर्थं तत्र उपपत्तिः नास्ति, उत अस्तीति।

यद्यपि, एतत्पादीयष्टमाधिकरणषष्ठसूत्रादिषु शेषत्वस्य ज्ञातृत्वाद्यपेक्षया उत्कर्षः साधितः। तथापि ज्ञातृत्वाद्यभावापेक्षया शेषत्वाभावस्य भगवतोऽत्यन्ता निष्टावहत्वेन शेषत्वस्योत्कर्षः पूर्वं साधितः। अत्र तु शेषत्वस्य ज्ञातृत्वाद्यपेक्षया भगवदत्यन्तेष्टावहत्वेन उत्कर्षः साध्यत इति न गतार्थता।

## तत्र पूर्वपक्षः

[१]**अस्ति ब्रह्मेति चेद्वेद,** [२]**सोऽश्नुते सर्वान् कामान् सह** इत्यादिषु भगवत्स्वरूपरूपगुणादिज्ञानतद्भोगयोरपि पुरुषार्थत्वेनोक्ततया, तादृशज्ञातृत्व-भोक्तृत्वापेक्षया भगवच्छेषत्वस्य उत्कर्षे मानाभावः।

न च, भगवच्छेषत्वाभावे स्वातन्त्र्यबुद्ध्यापत्त्या भगवदत्यन्ताप्रियत्वापत्ति-रुत्युक्ततया, भगवत्प्रियतमत्वापादकं शेषत्वमेवोत्कृष्टमिति वाच्यम्। केवलानुभव-पराणां मुक्तानामत्यन्तशिथिलकरणानां भक्तिपारवश्यप्रपन्नानाञ्च स्वातन्त्र्यबुद्ध्य-भावेऽपि, शेषत्वाभावदर्शनेन व्यभिचारात्। न च तेषां शेषत्वाभावेन निकर्षः। प्रमाणपथमारोहति। येन शेषत्वमुत्कर्षः स्यात्।

---

१. तै.उ.आ.व.६-१ २. तै.उ.आ.व.२-२

न च [1]**उडम्बुडैयान् कवरात उयिरिनाल् कुरैविलमे** इति दिव्यसूक्तौ, दिव्यज्ञानिनां **गुणानुभवपरिपूर्णानामपि** श्रीशठकोपमुनीनां, सर्वशरीरकस्य भगवतः शरीरत्वेन सिद्धस्य **स्वात्मनः शरीरलक्षणभूतशेषत्वाभावे** अनादरणीयत्वानुसन्धानेन भगवत्स्वरूपज्ञानतद्गुणानुभवापेक्षया तच्छेषवृत्तिरेवोत्कृष्टेति **वाच्यम्**। [2]**परमं साम्यमुपैति** [3]**मम साधर्म्यमागताः** इत्यादि श्रुतिस्मृतिविरोधेन, मुक्तेषु [4]**ज्ञानीत्वात्मैव मे मतम्** [5]**स महात्मा सुदुर्लभः** इत्यादिस्मृतिविरोधेन मुमुक्षुषु च वैषम्यस्याप्रामाणकतया तत्सूक्तेः शेषवृत्तिप्रशंसामात्रपरत्वाच्च। एतेन [6]**स हि मे जीवितेनार्थः** [7]**न देहम्** इत्यादिसूक्तिरपि व्याख्याता।

न च पुष्पस्य गन्धेनोत्कर्षवत्, रत्नस्य तेजसैवोत्कर्षवच्च शेषवृत्त्यैव आत्मन उत्कर्ष इति युक्तम्। पुष्पेगन्धाद्यपेक्षया रूपादेः रत्ने रूपापेक्षया गन्धादेश्च अभोग्यत्वस्य प्रामाणिकतया, तत्र गन्धरूपोत्कर्षेण आदरसम्भवेऽपि मुक्तेषु ज्ञानिषु च ज्ञानानन्दयोः शेषवृत्त्यपेक्षया भोग्यत्वाभ्युपगमे आनन्दतारतम्यस्य वज्रलेपत्वात्।

तस्मात् शेषवृत्त्युत्कर्षसूचकतया प्रथमोपादानमिति वक्तुमशक्यत्वात्, धर्मिस्वरूपकथनपूर्वकमेवधर्मस्वरूपकथनस्योचितत्वाच्च, प्रणवस्थाकारादिवर्णत्रयक्रमोऽनुपपन्नः।

न च **जाया प्रतिग्राहितगन्धमाल्याम् - पीतप्रतिबद्धवत्साम - धेनुं - मुमोच** इत्यादौ सर्वत्र धर्मकथनपूर्वकं धर्मिस्वरूपकथनम्, तत्क्रमेण बोधनञ्च दृष्टमिति वाच्यम्। धर्मिशब्दस्य उद्देश्यपरतया, धर्मशब्दस्य विधेयपरतया च दोषाभावात्। उद्देश्यविधेययोः प्राथम्यचारम्य लक्षणत्वात्। अत एव हि निगमनावयवे उद्देश्यविधेयपरत्वाभावेऽपि दार्ढ्यार्थमनुवादरूपे पुरो वादानुरूप्याय उद्देश्यविधेययोः क्रमेण निर्देशः। इत्थञ्च प्रकृते मकारार्थानुवादेन शेषत्वस्य विधेयत्वात्, क्रमो नोपपद्यत इति।

## सिद्धान्तस्तु

[8]**अस्ति ब्रह्मेति चेद्वेद**, [9]**सोऽश्नुते सर्वान् कामान्** इत्याद्युक्तस्वरूप-

---

१. तिरुवायिमोलि ४-८-१०　२. मुण्ड.उ.३-१३　३. भ.गी.१४-२
४. भ.गी.७-१८　५. भ.गी.७-१९　६. रामा.सु.का.२६-५
७. स्तो.र.५७　८. तै.उ.आ.व.६-१　९. तै.उ.आ.व.२-२

ज्ञानगुणानुभवरूपयोः ज्ञातृत्वभोक्तृत्वयोः भगवत्प्रीतिमात्रेच्छासाध्यव्यापाररूपत्वे भगवत्प्रियतमशेषत्वरूपतया स्वप्रीतीच्छयापि साध्यत्वे शेषत्वरूपत्वाभावेन च, शेषत्वस्य निरुक्तस्य केवलज्ञातृत्वभोक्तृत्वापेक्षया उत्कर्षरूपत्वस्य प्रणवनमश्शब्दादिसिद्धत्वेन, **तत्र मानाभाव इत्ययुक्तम्**।

यद्यपि केवलानुभवपरेषु मुक्तेषु भक्तिपारवश्यप्रपन्नेषु च स्वातन्त्र्यबुद्ध्यभावेऽपि, कायिकशेषवृत्त्यभावेन शेषत्वाभावस्य स्वातन्त्र्यबुद्धिरूपात्मापहारापादकतया भगवदत्यन्तानिष्टत्वेन ज्ञातृत्वभोक्तृत्वाभावापेक्षया वैषम्यात्, ज्ञातृत्वभोक्तृत्वापेक्षया, शेषत्वस्य उत्कर्षासद्भावः। तथापि तेषु स्वरूपज्ञानगुणानुभवयोरेव शेषत्वरूपतया, शेषत्वसामान्याभावस्य स्वातन्त्र्यबुद्ध्यापादकत्वं युक्तमिति न दोषः।

किञ्च केवलानुभवपरेषु भक्तिपरवशेषु परिपूर्णभगवदनुभवजनितानवधिकातिशयप्रीतिकारिताऽशेषावस्तोचिताशेषशेषतैकरतिरूपनित्यकैङ्कर्याभावेन, असङ्कुचितशेषत्वस्य तदीयज्ञातृत्वभोक्तृत्वापेक्षयापि उत्कर्षो युक्त एव।

अत एव हि [1]**मयर्वरमतिनलमरुलिनन्** इत्युक्त्वापि [2]**वलुविलावडिमैशेय्य वेण्डुम् नाम्** इति प्रार्थनमुपपद्यते। अत एव च [3]**उयिरिनाल् कुरैविलमे** इति अशेषशेषवृत्त्यलाभेन आत्मन्यनादरणीयत्वानुसन्धानमप्युपपद्यते।

न च केवलानुभवपरेषु निकर्षाभ्युपगमे श्रुतिस्मृतिविरोधः। अशेषशेषतारूपभगवद्भोग्याधिक्यशालिनां तद्रहितानाञ्च वैषम्यस्य न्यायप्राप्तत्वात्।

तथापि भोगमात्रसाम्यपरतया श्रुतिस्मृतिविरोधाभावाच्च भोग्यानामाश्रयभेदेन व्यवस्थितत्वेऽपि द्विविधमुक्तानां नित्यसूरीणां दिव्यमहिषीणां भगवतश्च स्वपराश्रितस्वाभाविकाकारज्ञानेच्छाकृतिप्रवृत्तिरूपसर्वभोग्यानुभवाविशेषेण तादृशानुभवरूपनिरतिशयानन्दतारतम्याप्रसङ्गात् [4]**नार्हन्ति शरणस्थस्य कलां कोटितमीम्** इत्याद्यनुसारेण मुमुक्षुवैषम्यस्य स्फुटत्वाच्च।

अत एव ज्ञानभक्तिपरिपूर्णायाः अपि श्रीसीतादेव्याः [5]**न हि मे जीवितेनार्थः**

---

१. तिरुवायिमोलि. १-१-१ २. तत्रैव.३-३-१ ३. तत्रैव.४-८-१० ४,५. रामा.सु.का.२६-५

इत्यादिना अलाभक्लेशानुसन्धानमुपपद्यते। अत एव च [1]**न देहं न प्राणान्** इति परमाचार्यसूक्तौ **शेषत्वविभवात्** इति असङ्कुचितशेषवृत्तिसाम्राज्यं निर्दिश्य, **नान्यत्किमपि** इति मोक्षसुखेऽपि अनादरो अनुगृहीतः।

अत एव च **पुष्पेषु रत्नेषु च गन्धस्य** तेजसश्च तारतम्येन आदरतारतम्यवत्, अनुभवपरेषु भक्तिपरेषु च तथात्वं युक्तमिति, शेषवृत्त्युत्कर्षप्रमाणानुग्राहकन्यायोप्युपपद्यते। गन्धतेजोभ्यां सजातीयसर्वोत्कृष्टेषु पुष्परत्नेषु सजातीयसर्वभोग्यान्तर्भाववत्, स्वरूपज्ञानगुणानुभवपूर्वकाशेषशेषवृत्तिशालिषु सर्वेषामात्मनां परमात्मनश्च सर्वभोग्यलाभः सम्भवतीति दृष्टान्तदार्ष्टान्तिकयोः साम्यस्य विवक्षिततया पुष्पेषु रूपानुत्कर्षस्य च प्रामाणिकत्ववत्, स्वरूपज्ञानगुणानुभवयोः शेषवृत्त्यपेक्षयानुत्कर्षस्य प्रामाणिकत्वं नास्तीति उक्तेः अनवकाशपराहतत्वात्।

अत एव अनादरोक्तिः शेषवृत्तिप्रशंसामात्रमित्युक्तेः न्यायद्वयानुगृहीतप्रमाणाविश्वासमात्रनिबन्धनत्वाच्चानुक्तेषु नित्येषु च भोग्यानां न्यूनाधिकभावव्यवस्थयोः सत्वेऽपि सर्वेषां सर्वभोग्यानुभवितृत्वेन, आनन्दतारतम्यस्य दूरीकृतत्वाच्च।

तस्माद्धर्मिस्वरूपकथनपूर्वकमेव धर्मस्वरूपस्य वक्तव्यत्वेऽपि पूर्वोक्तरीत्या शेषवृत्त्युत्कर्षसूचकतया शेषत्वस्य प्रथमोपादानमिति वक्तुं शक्यमेव। इत्थञ्च न्यायद्वयानुगृहीत श्रीशठकोपमुनि श्रीसीतादेवि परमाचार्यसूक्तिसिद्धं ज्ञानभक्त्यपेक्षया शेषवृत्तेः आधिक्यं सर्ववाङ्मूलभूतप्रणवरूपमुख्यप्रमाणमेव सूचयतीति, प्रणवस्थाकारादिवर्णक्रमो युक्त एवेति सिद्धम्।

इदञ्चाधिकरणं सूत्रत्रयात्मकम्। तत्र अकारोकाराभ्यां प्रतिपाद्यमानं भगवच्छेषत्वं तदनन्यार्हत्वञ्च मकारार्थज्ञातृत्वभोक्तृत्वापेक्षया भगवत्प्रियतमत्वेन उत्कृष्टमिति सूचयितुं, तयोः प्रथमनिर्देश इति । तृतीयसूत्रे वक्ष्यन् तदुपोद्घाततया प्रमाणानुग्राहकन्यायद्वयं दर्शयति प्रथमसूत्रेण (मणत्तैयुमित्यादिना)।

(मणत्तैयुम्) सजातीयपुष्पोत्कर्षरूपमानपरिमलत्तैयुमित्यर्थः। (ओलियैयुम्) सजातीयरत्नोत्कर्षरूपमानतेजस्सैयुमित्यर्थः। (कोण्डु) ज्ञात्वेत्यर्थः। एकगन्धव्यक्तिविशेषनिष्ठपुरुषानुकूलत्वलक्षणभोग्यतायां सर्वगन्धान्तरनिष्ठतादृशभोग्यता-

---

१. स्तो.र.५७

नामन्तर्भावात्, एकरत्नप्रभाव्यक्तिनिष्ठभोग्यतायां सर्वरत्नप्रभान्तरनिष्ठभोग्यता-नामन्तर्भावाच्च, **गन्धप्रभयोः** पुष्परत्नोत्कर्षरूपत्वमित्यभिप्रेतम्। (पूवैयुम् रत्नत्तैयुम्) सर्वोत्कृष्टपुष्प व्यक्तिविशेषत्तैयुम्, सर्वोत्कृष्टरत्नव्यक्तिविशेषत्तैयुमित्यर्थः। (विरुम्बु-मापोले) अत्यन्तमादरिक्कुमापोल् इत्यर्थः। **अत्रत्य दृष्टान्तद्वयोक्त्या**, पुष्परत्नयोः **परिमलप्रभारूपभोग्याकारयोः** व्यवस्थायां सत्यामपि तदुभयानुभवितॄणां भोगतारतम्यं नास्तीति व्यज्यते।

(शेषमेन्रु) शेष इति ज्ञात्वेत्यर्थः। अत्र **आत्मावै** इति वक्ष्यमाणात्मा विभक्ति-परिणामेन विशेष्यत्वेन आकृष्यते तथा च प्रणवेन नमसा च अनन्यार्हशेषत्व-रूपोत्कर्षवत्तया आत्मानमनुसन्धायेत्यर्थः। (आत्मा वैआदरिक्किरतु) [1]**यमाहाऽस्मै कालम्** इत्याद्युक्तरीत्या **सर्वविधकैङ्कर्यविशिष्टवेषेण आत्मविषयक प्रार्थना-वानहं नारायणाय स्याम्** इत्येवं तृतीयपदेन क्रियत इत्यर्थः।

तथा च शेषवृत्तेः ज्ञानभक्तिपूर्वकतया शेषवृत्तिमत आत्मनो भोग्याधिक्येन भगवत्प्रियत्वाधिक्यात्, तदुभयानुभवितुः स्वस्य परमात्मनश्च आनन्दतारतम्य-प्रसङ्गाभावाच्च दार्ष्टान्तिके शेषत्वमुत्कर्ष इति वक्तुं युक्तमिति भावः।

इत्थम् एकस्मिन् भोग्येसजातीयसर्वभोग्यान्तर्भावलक्षणसाधनानुगृहीतेन भोग्यतानामाश्रयभेदेन, न्यूनाधिकभावतारतम्यव्यवस्थानत्वेऽपि, तादृशसर्वभोग्य-भोक्तॄणां भोगतारतम्याभावलक्षणबाधकाभावानुगृहीतेन असङ्कोचसहकृतेन च मूलमन्त्रेण **सर्वप्रकारानन्यार्हशेषवृत्त्यर्होहं तथैव स्याम्** इत्येवं मकारोक्तज्ञानभोग-प्रार्थनमन्तरेण सर्वप्रकारानन्यार्हाशेषवृत्तिप्रार्थनप्रतिपादनेन, प्रणवगतोद्देश्य विधेय-व्यत्यासमूलभूते शेषत्वोत्कर्षे मूलमन्त्र एव अन्वयमुखेन प्रमाणमिति सूचितम्।

अथ शेषत्वाभावे आत्मानादरणीयत्वरूपव्यतिरेक प्रतिपादनमुखेन तत्र प्रमाणभूताम् - **न हि मे जीवितेनार्थो न वस्त्रैः न च भूषणैः** इत्यादि श्रीरामायणगत श्रीसीतादेवी सूक्त्युपबृंहणभूताम्, मूलमन्त्रोक्त प्रार्थनस्य शेषत्वाभावे सर्वप्रकारावच्छिन्नात्मानादरणीयत्वप्रतिपादनरूपव्यतिरेकमुखेन दशधाविवरण भूतासु दशसु गाथासु शिरोरत्नभूताम् [2]**न देहं न प्राणान्** इत्यादिदशगाथाविवरण-

१. अष्टश्लोकी-३ २. स्तो.र.५७

**भूतायामुनाचार्यानुगृहीतैकश्लोकेन** शपथोक्तिमुखेन दृढीकृतां मुख्यवेदभूतां श्रीशठकोपमुनिसूक्तिं कण्ठतः **उपपादनेन मुख्यप्रमाणतया** शृङ्गग्राहिकन्यायेन दर्शयन् शेषत्वोक्तिं, स्वयमपि व्यतिरेकमुखेन विवृणोति द्वितीयसूत्रेण (अल्लातवित्यादिना)।

**मू।। (८४) अल्लातपोतु [1]उयिरिनाल् कुरै विलमे एन्गिरपडियेत्याज्यम्।**

(अल्लातपोतु = आत्माशेषमल्लातपोतु) इति धर्मिप्रतियोग्यध्याहारेण योजनीयम् (पोतु) इत्यनेन कालिकव्यतिरेकव्याप्तिः सूचिता। (उयिरिनाल् कुरैविलमे, उयिर्) इति शब्देन - **स्वात्मा स्वस्यानुकूलोऽहि** इत्यात्मसाक्षिक एव स इत्युक्तं, निरतिशयभोग्यभूतं निष्कृष्टात्मस्वरूपमुच्यते। अनेन पूर्वतनवगाथास्वनादरणीयत्वेनोक्ताः, भोग्यभूता देहधर्माः आत्मधर्माः आत्मधर्मा देहश्च व्यावर्त्यन्ते। अत्र यत् सम्बन्धात् देहादेः भोग्यत्वम्। सोऽपि अनादरणीय इत्युच्यते।

(उयिरिनाल्) इति पञ्चम्या **मशकेभ्यो धूमः** इतिवत् (उडम्बुडैयान् कवरात) इति शरीरिभूतभगवदेकप्रियत्वराहित्यलक्षणविशेषणविशिष्टस्य निषेध्यत्वेन (कुरैवु) इति पदोपात्तेष्टहानौ हेतुत्वं विवक्षितम्। (कुरैविलमे) इष्टहानिरहिता एव भवाम इत्यर्थः। अवधारणेन इष्टहास्यभावदार्ढ्योक्त्या तादृशात्मनोद्वेष्यत्वं सूच्यते।

(एन्गिरपडिये) इत्युक्तप्रकारेणेत्यर्थः। (त्याज्यम्)। तादृशात्मनो नोपेक्षणीयत्वमात्रम्। किन्तु द्वेष्यत्वमेवास्तीत्यर्थः। (त्याज्यम्) इति पुल्लिङ्गनिर्देशेन शेषत्वरहितस्य पुरुषाधमत्वं ध्वन्यते।

इत्थं शेषत्वोत्कर्षे प्रमाणोपपत्ति सम्प्रदायान्प्रदर्श्य, अनन्तरं सर्ववाङ्मूलभूताकार एव तत्र प्रमाणमिति व्यञ्जयन्, **प्रणवे उद्देश्यविधेयव्यत्यासाऽस्वारस्यमर्थविशेषसूचकतया न दोषः** इति प्रदर्शयन् प्रणवाक्षरत्रयक्रमोपपत्तिरूपपरमसाध्यं निर्दिशति तृतीयसूत्रेण (अतित्यादिना)।

**मू।। (८५) अतुतोन्र शेषत्वत्तैच्चोल्लिप्पित्रै आत्मावैच्चोल्लुकिरतु**

(अतुतोन्र) शेषत्वविशिष्टात्मनः विपक्षे द्वेषपर्यन्तानादरस्य तृतीयपदप्रति-

---

१. तिरुवायिमोलि.४-८-१०

पाद्यस्य, शेषत्वोत्कर्षसूचनमुखेन उपपादनार्थमित्यर्थः। (शेषत्वत्तैच्चोल्लि) भगव-च्छेषवृत्तिफलोपधानव्याप्यानन्यार्हाशेषशेषवृत्तियोग्यतां प्रथमद्वितीयाक्षराध्याहृत-क्रियापदैः उक्त्वा इत्यर्थः। (पिन्नै) अनन्तरमित्यर्थः। (शोल्लि) इत्यनेन उक्तस्य आनन्तर्यस्य दार्ढ्यार्थं पुनरुक्तिः। ज्ञातव्यार्थविशेषसूचनाय **म्-आयैन्नास्मि** इत्यन्वयमङ्गीकृत्यापि, यथा न्यास एव युक्त इति भावः। (आत्मावै) निरुपाधिका-सङ्कुचितज्ञानत्वज्ञातृत्वानन्दत्वानन्दित्वाणुत्वविशिष्टं वस्त्वित्यर्थः। (शोल्लुकिरतु) मकारेणेति शेषः।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्यायस्य द्वितीयपादे**
**अकारादिक्रमसमर्थनं नाम**
**एकादशाधिकरणम् समाप्तम्।।**

श्रीमते रामानुजाय नमः

# प्रथमाध्याये द्वितीयपादे

# प्रणवस्य शाब्दवाक्यार्थसमर्थनं नाम

# द्वादशाधिकरणम्

## पदत्रयसमुदाचार्यः

**मू।। (८६) आकप्रणवत्ताल् [1]कण्णपुरमोन्नुडैयानुक्कडिये नोरुवर्क्कुरियेनो एन्निरपडिये, जीवपरसम्बन्धम् शोल्लिट्रु**

इत्थं प्रणवस्य पदार्थाः व्याख्याताः। अथ प्रणवस्य द्वेधा वाक्यार्थो निरूप्यते। तत्र संशयः, प्रणवस्य द्विधा वाक्यार्थः सम्भवति न वेति। तदर्थं द्विविधवाक्यार्थपरत्वे, वाक्यभेदः प्रसज्यते न वेति। तदर्थं वाक्यार्थयोः शेषशेषिभावे प्रमाणमस्ति न वेति।

## तत्र पूर्वपक्षः

प्रणवस्य द्वेधा वाक्यार्थो न सम्भवत्येवद्विविधवाक्यार्थस्यैव दुर्निरूपत्वात्। तथा हि-जीवेश्वरयोः शेषशेषिभावः तावन्न प्रणवस्य प्रधानभूतो वाक्यार्थः जीवेश्वरयोः रक्ष्यरक्षकभावस्यापि प्रणवप्रतिपाद्यत्वाभ्युपगमेव विनिगमनाविरहात्।

**पिता च रक्षकः शेषी भर्ता ज्ञेयो रमापतिः।।**

इति कूटस्थसम्प्रदायसूक्त्यनुसारेण, पञ्चविधसम्बन्धानां प्रणवप्रतिपाद्यत्वाभ्युपगमेन विनिगमनाविरहाच्च। एषु कस्यचित्प्राधान्ये प्रमाणाभावाच्च। वाक्यार्थभेदे तेषां सर्ववाङ्मूलभेदप्रणवैकगम्यतया, प्रणवस्य विधेयभेदनिबन्धवाक्यभेद प्रसङ्गाच्च। अत एव जीवेश्वरयोः रक्ष्यरक्षकभावोऽपि न वाक्यार्थः। न च विधेयानां शेषशेषिभावात् वाक्यभेदाप्रसङ्गः, विकल्पासहत्वात्।

किं रक्ष्यरक्षकभावः शेषशेषिभावार्थः। उत शेषशेषिभावो रक्ष्यरक्षक-भावार्थः। नाद्यः। इष्टप्रापणानिष्टनिवारणयो रक्षकपदार्थत्वेन, किञ्चिद्व्यापाराधी-

---

१. तिरुवायिमोलि ८-९-३

नेष्टप्राप्तिमतः शेषिपदार्थत्वेन च रक्षकत्वशेषित्वयोः हेतुहेतुमद्भावासम्भवात्। **अत एव न द्वितीयः**। अन्यगतेष्टप्रापणरूपव्यापारं प्रतिस्वगतेष्टप्राप्तेः कारणत्वाभावात्, फलत्वाभावाच्च।

एतेन **उकारार्थस्य अकारार्थं प्रतिहेतुहेतु मद्भावेनान्वयो** दूरापास्तः। कस्यचित्पुरुषस्य किञ्चित्पुरुषगतेष्टप्राप्तिहेतुभूतव्यापारनिवृत्तेः अन्यपुरुषीयान्यपुरुषेष्टप्रापणरूपव्यापारं प्रतिहेतुत्वस्य फलत्वस्य वा शङ्कितुमपि अशक्यत्वात्।

एवं पितापुत्रभावादि सम्बन्धत्रयस्य उक्तसम्बन्धद्वयस्य च हेतुहेतुमद्भावे मानाभावात् असम्भवाच्च परस्परनिरपेक्षविधेयभेदनिबन्धनवाक्यभेदोदुर्वारः। तस्मात् प्रणवे प्रधानवाक्यार्थस्य दुर्निरूपत्वात् तस्य द्वेधावाक्यार्थो न सम्भवतीति।

## सिद्धान्तस्तु

प्रणवस्य द्वेधा वाक्यार्थः सम्भवत्येव। द्विविधवाक्यार्थस्यापि सुनिरूपत्वात्। तथाहि-जीवेश्वरयोः शेषशेषिभावः तावत्प्रणवस्य प्रधानभूतो वाक्यार्थ एव **अहं रक्षकायैवास्मि** इति क्रियान्वितस्य अनन्यार्हशेषत्वस्य विधेयत्वेन, रक्षकत्वस्य चेतनैकप्रतियोगिकतया अर्थस्वभावेन मकारसमभिव्याहारेण च जीवेश्वरयोः रक्ष्यरक्षकभावस्य आर्थिकतया रक्षकत्वस्य पदार्थत्वेन क्रियान्वितशेषत्वरूपविधेयोपसर्जनतया च **राजपुरुषः** इत्यत्र राज्ञः स्वामित्व लक्षणवाक्यार्थस्य, राजोत्कर्षप्रतिपादनतात्पर्यवशेन अर्थस्वभावात् प्राधान्यवत् **जगत्कारणभूतो विष्णुः त्रिविधात्मवर्गरक्षकः** इति वाक्यार्थस्य अर्थप्राधान्येऽपि, **आत्माभगवदनन्यार्हशेषभूतः** इति वाक्यार्थस्य शाब्दप्राधान्ये बाधकाभावात्।

एतेन रूढिनिमित्तकारणत्वलब्धपितापुत्रभावसम्बन्धस्य, उकारोक्तानन्यार्हत्वबलेन सिद्धस्यभर्तृभार्या सम्बन्धस्य, अकारमकारसमभिव्याहारलब्ध ज्ञातृज्ञेयभावसम्बन्धस्य च, वाक्यार्थत्वेऽपि तैः विनिगमनाविरहो दूरोत्सारितः। रक्षकत्ववत्, पितृत्वभर्तृत्वज्ञेयत्वानां शब्दबोध्यत्वस्यैव भानात्। एतेनैव एषु कस्यचित्प्राधान्ये प्रमाणाभावः इति निरस्तम्। उक्तरीत्या उपपत्तेरेव प्रमाणत्वात्। तस्य च प्रणवप्रामाण्य एव पर्यवसानात्।

किञ्च - अष्टाक्षरसिद्धिस्थलभूत श्रीकृष्णपुरनाथ विषयतया श्रीमत्परकाल-दिव्यसूरिभिः **मट्रुमोर् तेय् वमुलतेन्निरुप्पारोडु उट्रिलेन्** इत्यादि गाथायाम् अष्टाक्षरस्य महावाक्यतात्पर्यविषयार्थमनुगृहीतवद्भिः, गाथान्तरे [1]**कण्णपुरमेन्नु-डैयानुक्कडियेनोरु वर्क्कुरियेनो** इति सूक्त्या प्रणवस्य एवकारोऽपहत विधिशक्तिकत्वेन (ओत्तिलेन्) इति (ओरुवर् क्कुरियेनो) इति च, उकारार्थनिषेधस्यैव शाब्दप्राधान्येन महावाक्यार्थतया विधेयत्वं सूचितम्। अतः द्योत्यतया विधेयस्यैव बोध्यतया, विधेयस्य क्रियान्वितस्य शेषत्वस्य शाब्दप्राधान्येन विधेयत्वं दुरपह्नवम्।

अपि च - श्रीमत्सरोयोगिदिव्यसूक्तौ [2]**तामरैमाल् केल्वनोरुवनैये नोक्कुमुणर् वु** इति ज्ञानैकनिरूपणीय आत्मा, श्रियः पतिमेव पश्यति इत्येवं मकारार्थस्य व्यङ्ग्यार्थस्य श्रियः पतित्वस्य उकारार्थावधारणस्य मिथुनस्य **सदा पश्यन्ति** इत्युक्तदर्शनकर्मत्वोक्त्या कर्तुः क्रियया अप्तमिष्टतमत्वरूपशेषत्वात्मक-लुप्तविभक्तिलभ्यार्थस्य च प्रतिपादनावसरे (कण्णपुरमोन्नुडैयानुक्कडियेन्) इत्यत्र एवकारार्थरक्षकत्वस्य कण्ठतो निर्देशाभावेन, शेषशेषिभावस्यैव शब्दबोध्यभूत-विधेयस्य क्रियान्वितस्य शब्दप्राधान्येन वाक्यार्थत्वं सिद्धम्।

एतेन विधेयभेदात् वाक्यभेदप्रसङ्ग इत्यपि दूरोत्सारितम्। अप्रवृत्तप्रवर्त-नात्मक विधिवाक्य एव विधेयभेदे सति, क्रियाद्वयबोधनाय, तदनुबन्धिभिन्नभिन्न-कारकाणामेकैकसमभिव्याहृतपदैर्बोधनाय च, वाक्यावृत्ति लक्षणवाक्यभेद-प्रसक्तावपि, अज्ञातज्ञापनरूपविधौ अज्ञातनानापदार्थविशिष्टैकविधेयबोधकतया वाक्यभेदा प्रसङ्गात्।

यदा हि अज्ञातनानापदार्थानां वैशिष्ट्यं न भवेत्। तदा अप्रवृत्तप्रवर्तनस्थल इव भावनाभेदापूर्व भेदकल्पनरूपप्रमेयगौरवस्य, नानाकारकविशिष्टनानाक्रिया-बोधकतया वाक्यावृत्तिरूपप्रमाणगौरवस्य च भावेऽपि, **घटोदण्डजन्यो भवति, पटस्तन्तुजन्यः** इत्यादाविव अज्ञातज्ञापनरूपविधिस्थले, परस्परनिरपेक्षविधेयभेद-निबन्धन तिङ्सुबन्तचयद्वयरूपवाक्यभेदः शंक्येतापि। न चेहविधेयानां परस्परा-नपेक्षत्वमस्ति, रक्ष्यरक्षकभावस्य शेषशेषिभावस्य, अन्यशेषत्वनिवृत्तेश्च परस्परा-

१. तिरुवायिमोलि ८-९-३ २.तिरुवन्तादि- ६७

**काङ्क्षाहेतुभूतपरस्परवैशिष्ट्यस्य** जागरूकत्वात्, अकारादिवर्णत्रयस्य पदैकवाक्य-**तया बोधजनकत्वेन आख्यतभेदमात्र**निबन्धनवाक्यभेदस्यापि अप्रसङ्गाच्च।

**तथाहि तत्र तावत् रक्ष्यरक्षकभावः शेषशेषि**भावार्थक इत्यत्र दूषणमुक्तम्। **किञ्चित्पुरुषीयेष्टप्रापणतदनिष्टनिवारयोः अन्यपुरुषीययोः** तत्पुरुषीयव्यापाराधीनेष्ट-प्राप्तिमत्वे **हेतुत्वासम्भवादिति। तदयुक्तम्।** पुत्रगतेष्टप्रापणानिष्टनिवारणयोः पितृगतयोः पितृगतपुत्रशिश्रुषाधीनेष्टप्राप्तौ हेतुत्वदर्शनात्। स्वरक्षणेप्यशक्तस्य इति **न्यायस्य स्वातन्त्र्येण पररक्षक**विषयत्वात्। अन्यगतकिञ्चिदिष्टप्रापणस्य, अन्य-व्यापाराधीनेष्टान्तरप्राप्तौ हेतुत्वसम्भवाच्च।

**अत एव शेषशेषिभावो रक्ष्यरक्षकभावार्थ** इति पक्षे अन्यगतेष्टप्रापणरूप-व्यापारं प्रति स्वगतेष्टप्राप्तेः कारणत्वाभावात्, फलत्वाभावाच्चेति दूषणमप्ययुक्तम् पित्रुगतपुत्रशरीरोत्पादनतत्पोषणादौ पुत्रगतशिश्रूषाधीनेष्टप्राप्तेरुद्देश्यत्वेन हेतुत्वदर्शनात्, स्वरूपेणहेतत्वदर्शनाच्च। [1]**तदैक्षत बहुस्यां प्रजायेयेति** [2]**तदात्मानं स्वयमकुरुत** इत्यादि प्रसिद्धचेतनव्यापारसामान्यानधीनज्ञानचिकीर्षाप्रयत्नवत्त्व-रूप रक्षकत्वसद्भावात्, अनन्यार्थसर्वचेतनव्यापाराधीनेष्टप्राप्तिमत्त्वरूपशेषित्व-योग्यतारूपस्वामित्वाच्च। **तादृशस्वामित्वसद्भावात्** तादृशरक्षकत्ववान् इत्येवं रक्षकत्वशेषित्वयोः ज्ञाप्यज्ञापकभावरूपहेतुमद्भावसम्भाच्च। स्वामित्वसम्बन्धस्य **निरुक्तरक्षणव्यापारं प्रतिस्वरूपेण** कारणत्वसम्भवाच्च।

एतेन अकारोकारार्थयोः हेतुहेतुमद्भावासम्भवो दूरापास्तः । स्वेष्टप्राप्ति-प्रतिबन्धकान्यशेषवृत्त्यनर्हत्वस्य स्वविषये निरुपाधिकरक्षक्तवेन ज्ञाप्यत्वसम्भवात्। अन्यशेषत्वनिवृत्तेः स्वविषये निरुपाधिकरक्षणेन जन्यत्वसम्भवाच्च। अन्यशेषत्व-निवृत्तेः उद्देश्यत्वेन तादृशरक्षणे कारणत्वसम्भवाच्च। निरुपाधिकरक्षकत्वस्यापि अन्यशेषत्वनिवृत्तौ अन्यशेषत्वानर्हत्वेन च ज्ञापकत्वेन हेतुत्वसम्भवाच्च। रक्षणे प्रवृत्तत्वेऽपि, राजादेः देवादीष्टप्राप्त्यर्थं दर्शनेऽपि तत्र भार्याया अन्यभोगार्थं प्रवृत्ताविव निषेधाभावेन प्रकृते उकारनमश्शब्दाभ्यामेव **योऽन्यथा सन्तमात्मानम्** इत्याद्युप-बृंहिताभ्यां निषेधेन च वैषम्यात्। राजादेः निरुपाधिकरक्षकत्वाभावेन देवाद्यपेक्षया

१. तै.उ.६-२-३ २. तै.उ.आ.व.७

उत्कृष्टत्वाभावेन, देहादीष्टप्राप्त्यर्थं भृत्यादिप्रवृत्तेः राजादिकृतरक्षणफलप्रति- बन्धकत्वाभावेन च, प्रकृते तद्वैपरीत्येन च वैषम्याच्च।

इत्थं पितापुत्रभावसम्बन्धस्य भर्तृभार्यासम्बन्धस्य च अत्यन्तार्थिकत्वात्, **रक्ष्यरक्षकभावः** ज्ञातृज्ञेयभावयोः **समभिव्याहारगम्यत्वाच्च निरुपाधिकपितृत्वान्नि- रुपाधिकरक्षकः, निरुपाधिकरक्षकत्वान्निरुपाधिकः शेषी, निरुपाधिक- शेषित्वात्, अन्यशेषत्वविरोधिनिरुपाधिकभर्ता। एवं चतुर्धासम्बन्दात् स एव ज्ञेयः** इत्येवमादिरूपेण हेतुहेतुमद्भावसम्भवात्। [1]**माता पिता भ्राता,** [2]**येन जातानि जीवन्ति,** [3]**पतिं विश्वस्य** [4]**सहस्रशीर्षा पुरुषः, तमेवैकं जानथाऽऽत्मानम्** इत्यादि प्रमाणशतोपबृंहितमन्त्रशेषनिवृत्तप्रणवरूपप्रमाण शिरोष्ठमणि नैव तस्य सिद्धत्वाच्च परस्परनिरपेक्षशब्दबोध्य, विधेयभेदगन्धस्यापि अभावात् न वाक्यभेदशङ्कायाः अपि अवकाशः।

तस्मात् प्रणवे शाब्दप्राधान्येन शेषशेषिभावरूपवाक्यार्थस्य अर्थप्राधान्येन रक्ष्यरक्षकभावरूपवाक्यार्थस्य च सुनिरूपत्वात् तस्य द्वेधा वाक्यार्थः सम्भवत्येवेति।

इदञ्चाधिकरणं सूत्रचतुष्टयात्मकम्। तत्र पदार्थवाक्यार्थकथनयोः हेतुहेतुमद्भावसङ्गतिं दर्शयन् शेषशेषिभावस्य शाब्दप्राधान्ये प्रमाणमपि दर्शयन्, प्रणवस्यशेषशेषिभावस्य शाब्दप्राधान्ये प्रमाणमपि दर्शयन् प्रणवस्य शेषशेषिप्रधान- वाक्यार्थ इति दर्शयति प्रथमसूत्रेण (आकप्रणवतालित्यादिना)।

(आक) तस्मादित्यर्थः। तस्य च - इत्थं पदार्थकथनादित्यर्थः। अनेन अधिकरणाष्टकेन प्रणवस्थपदत्रयेण योगार्थनिरुपाधिकासङ्कुचितरक्षकत्वस्य, रूढ्यर्थकारणत्वविष्णुत्वयोः श्रियः पतित्वरूपलक्ष्यार्थस्य, अवधारणरूपद्योत्यार्थस्य, ज्ञानत्वादिपञ्चकरूपयोगार्थलुप्तप्रथमैकवचनार्थसमुदायैकत्वरूपलक्ष्यार्थस्य च, ज्ञानं वक्ष्यमाण द्विविधवाक्यार्थज्ञाने हेतुरिति सूचितम्।

न चास्य अधिकरणस्य वाक्यार्थकथनरूपत्वात् एतत् पादीयप्रथमाधि- करणानन्तर्यापत्तिः। तस्यवाक्यार्थतात्पर्यविषयसंसर्गरूपमहावाक्यार्थकथनरूपत्वात्,

---

१. सुबा.उ.६ २. तै.उ.भृ.व.१-१

३. तै.उ.ना.व.१० ४. पु.सू.

अस्य वाक्यबोध्यसंसर्गरूपावान्तरवाक्यार्थकथनपरत्वाच्च अस्य पदत्रयार्थकथनान्तर्यमेव युक्तमिति भावः।

एतेन अक्षरत्रयक्रमसमर्थनरूपैकादशाधिकरणस्य पदत्रयक्रमकथनरूपतृतीयाधिकरणान्तर्यमपि न प्रसज्यत इति सूचितम्। पदार्थोत्कर्षसूचकतया क्रमसमर्थनस्य पदार्थज्ञानाधीनत्वात्, सकलवेदसारत्वेन क्रमसमर्थनस्य परमपुरुषार्थतत्साधनविस्तारोवेदः तत्सङ्ग्रहः प्रणवः इति ज्ञानमात्रसम्भवेन मूलमन्त्रस्य वाक्यत्रयार्थज्ञानानपेक्षत्वाच्च।

(प्रणवत्ताल्) इत्यनेन समुदायार्थो वक्ष्यत इति गम्यते । अत्र [1]**प्रणवो धनुश्शरोह्यात्मा** इत्यादिश्रुतिरपि शेषशेषिभावरूपप्रणवार्थपरा सूचिता। (कण्णपुरमोन्नुडैयानुक्कु) अष्टाक्षरसिद्धिस्थलत्वेन सर्वोत्तमस्थानशालिन इत्यर्थः। (उडैयानुक्कु) इत्यनेन आश्रितलाभहेतुत्वेन स्थानलाभहेतुत्वेन उभयविभूतिसम्पन्नस्य अपूर्वसम्पदिति सूच्यते। (उडैयानुक्कु) निरूपकत्वं षष्ट्यर्थः। (अडियेन्) शेषभूतोऽहमित्यर्थः। (ओरुवर्क्कु) भगवतो अन्यस्यापि इत्यर्थः। षष्ठ्यर्थः पूर्ववत्। (उरियेनो) शेषत्वयोग्यः किम् ? न भवामीत्यर्थः। अनेन **अयमस्मि** इति विधावपि शेषत्वार्हत्वं वाक्यार्थः। अन्यथा नित्यवत् श्रवणबाधप्रसङ्गादिति सूचितम्।

(कण्णपुरमोन्नुडैयान्) इत्यर्चावतारोक्त्या अकारार्थलक्षणचरमावधिः सूचितः। (अडियेन्) इत्यनेन लुप्तविभक्त्यर्थकथनपूर्वकं शेषत्वैकनिरुपणीयः शेषत्वाश्रयो मकारार्थः उक्तः। (ओरुवर्क्कुरियेनो) इति उकारद्योत्यार्थः उक्तः।

अत्र रक्षकत्वरूपाकारार्थस्य ज्ञातृत्वरूपमकारार्थस्य च कण्ठतोऽनुक्त्या, मकारसमभिव्याहारलभ्यो रक्ष्यरक्षकभावः, अकारसमभिव्याहारलभ्यो ज्ञातृज्ञेय भावश्च न शाब्दप्राधान्येन वाक्यार्थ इति सूचितम्। (अडियेन्) इति विध्यर्थमुद्दिश्य, (ओरुवर् क्कुरियेनो) इति निषेधस्य विधानेन, भगवच्छेषत्वापेक्षया अन्यशेषत्वनिवृत्तेः पूर्वोक्तं प्राधान्यं सूचितम्। तच्च एवकारोपहतविधिशक्तिकत्वात्, प्रणवेनैव सिद्धम्।

(एन्गिरपडिये) इत्युक्तप्रकारेण शाब्दप्राधान्येन अनन्यर्हशेषत्वोक्तेः इत्यर्थः। (जीवपरसम्बन्धम् शोल्लिल्लु) ज्ञानत्वानन्दत्वाभ्यां लीलाविभूतिव्यावृत्तेः, ज्ञान-

---

१. ध्यानबिन्दूपनिषत्.१

वत्त्वानन्दत्वाभ्यां नित्यविभूतेः जीवेश्वरधर्मभूतज्ञानयोश्चव्यावृत्तेः, अणुत्वेनैव ईश्वरव्यावृत्तेश्च जीवो मकारार्थः।

सर्वकारणत्वेन सर्वरक्षकत्वेन श्रियः पतित्वेन च सर्वस्मात्परोविष्णुः - अकारार्थः। एवं जीवेश्वररूपप्रतियोगिद्वयविशिष्टः विभक्त्यर्थशेषत्वप्रतिसम्बन्धितया सिद्धलक्ष्यार्थभूतशेषित्वयोग्यतारूपः स्वामित्वलक्षणसम्बन्धः, निरुक्तप्रतियोगिद्वयविशिष्टशेषत्वयोग्यतारूपस्वत्वलक्षणसम्बन्धश्च वाक्यर्थविधयाबोध्यत इत्यर्थः।

(प्रणवत्ताल्) जीवपरसम्बन्धम् शोल्लिल् इत्यन्वयः। अन्यशेषत्वानर्हत्वस्य उकारद्योत्यार्थतया शेषशेषिभाव योग्यतारूपस्वस्वामि भावसम्बन्ध एव समानसंवित् संवेद्यतयाबोध्यरूपो वाक्यार्थ इति भावः।

अथ शेषशेषिभावः शाब्दप्राधान्येन वाक्यार्थ इत्यत्र श्रीमत्सरोयोगिसूक्तेः स्ववाक्यत्वेन निर्देशमहिम्ना तत्सूक्तिरपि प्रमाणमिति सूचयन्, तत्सूक्तिस्मारणेन श्रियःपतित्वरूपव्यङ्ग्यार्थसंवादरूपमपि सूचयन्, प्रमाणोपपत्तिसम्प्रदायैः यथोक्तप्रणवार्थो दृढ इति वक्तुं, शेषशेषिभावस्य प्रणववाक्यार्थत्वं निगमयति द्वितीयसूत्रेण (इत्तालित्यादिना) ।

**मू।। (८७) इत्ताल् [1]तामरैयाल् केल्वनोरुवनै येनोक्कुमुणर्वु एन्नतायिट्रु**

**(इत्ताल्) अस्मच्छब्दपर्यायमकारघटितेन** प्रणवेनेत्यर्थः। (तामरैयाल् केल्वन्) **कमलालयायानाथ इत्यर्थः। अनेन** कमलसंश्लेषादपि नायकसंश्लेषः **अत्यन्तभोग्य इति व्यज्यते। (ओरुवनै ये नोक्कुम्)** एकमेव प्रतीक्षत इत्यर्थः। **अत्र (करुङ्गडलेनोक्कुमारु) इति पूर्ववाक्ये [2]यथा नद्यः** स्यन्दमानाः इति **श्रौतदृष्टान्तस्य उक्ततया, परमप्राप्यत्वेन प्रतीक्षणं व्यज्यते। अनेन परमप्राप्यत्वरूपशेषित्वात्मकाकारलक्ष्यार्थः सूचितः। पूर्वम् ओरुवर् क्कुरियेनो इत्यत्र अर्थमुखेन** उकारस्य **लक्ष्मीपरत्वं निराकृतम्। अत्र तु (ओरुवनै ये) इत्यवधारणप्रयोगेण** तन्निराकृतमिति **भेदः। (उणर्वु) ज्ञानरूपम् आत्मेत्यर्थः। अनेन (इत्ताल्) इति** पूर्वपदसूचित**प्रयोगोपाधिभूतमकारवकत्रृत्वस्य पदजन्यप्रतीति प्रकारत्वाभावेन** तादृशासङ्कुचितज्ञानत्वावच्छेदेन **शेषत्वानयस्वारस्यं न त्याज्यमिति सूचितम्।**

१. तिरुवन्तादि - ६७ २. मुण्ड.उ.३-२-८

अत्र श्रियः पतिमेकमेव प्रतीक्षते ज्ञानरूपं आत्मा इति रक्षकत्वज्ञातृत्वोक्तिं विना प्रणवार्थोक्त्या (ओरुवनैयेनोक्कुम्) इति परमप्राप्यत्वेन प्रतीक्षणस्य विधेयत्वोक्त्या च शेषशेषि भाव एव शाब्दप्राधान्येन वाक्यार्थ इति गम्यत इति भावः। (एन्रतायिट्रु) इति अर्थः सिद्ध इत्यर्थः। निगमनेन निरुक्तवाक्यार्थदाढर्च्य विवक्षितम्।

अथ अर्थप्राधान्येन प्रणववाक्यार्थं सूत्रद्वयेनवक्ष्यन् प्रथमं प्रधानार्थं दर्शयति तृतीयसूत्रेण (अकारत्तालुमित्यादिना)।

**मू।। (८८) अकारत्तालुम् मकारत्तालुम् रक्षकनैयुम् रक्ष्यत्तैयुम् शोल्लिट्रु।**

समन्वयाधिकरणन्यायेन पूर्वोत्तरभागस्थविधिवाक्यानां सिद्धब्रह्मपरवाक्यशेषत्वात्, तस्य [1]**वेदैश्च सर्वैरहमेव वेद्यः,** [2]**विष्णुनामा स वेदेषु,** [3]**ये च वेदविदो विप्राः** इत्यादिवचनसिद्धत्वाच्च, रक्षकत्वविशिष्टपरमात्मरूपप्रणवप्रधानार्थपरः - अकारः। रक्षणस्य इष्टप्रापणानिष्टनिवारणरूपतया, योग्यतया रक्षणकर्मत्वेन सिद्धश्चेतन एव मकारेण समभिव्याहारबलादपि कर्मेति लभ्यत इत्यभिप्रायेण (रक्षकनैयुम् रक्ष्यत्तैयुम्) इत्युक्तम्।

यथा श्रुतेः मकारस्य चतुर्थ्यर्थान्वयप्रतियोगिसमर्पकत्वेन रक्षकस्य चतुर्थ्यर्थान्वितत्वेन च, मकारस्य रक्षणान्वयप्रतियोगिसमर्पत्वानुपपत्तेः, त्रिवर्गापवर्गरूपफलप्रदत्वरूपोत्कर्ष एव प्रधानप्रतिपाद्यः, तद्रक्षकत्वं निर्हेतुकमिति वक्तुं कारणत्वोक्तिः। तादृशोत्कर्षाश्रयव्यक्तिविशेषं वक्तुं विष्णुत्वोक्तिरित्यपि भावः।

एवम् **अकारो वै सर्वावाक्** इत्यादि विवक्षितो रक्षकत्वरूपः प्रणवस्यार्थतः प्रधानभूतोवाक्यार्थः उक्तः। तस्य प्रधानभूतवाक्यार्थत्वं समभिव्याहृतपदत्रयार्थानां तच्छेषत्वं विना न सम्भवतीति, तत्पदत्रयमध्ये मकारस्य योग्यतानुगृहीतसमभिव्याहारबलेन, रक्षणप्रतियोगिव्यञ्जकतया अन्तरङ्गत्वात् मकारस्य शेषत्वमपि उक्तम्। अथ विभक्त्युकारयोः रक्षणहेतुपरत्वेन बहिरङ्गत्वात् तदर्थयोः शेषत्वं प्रदर्शयति चतुर्थसूत्रेण (चतुर्थियालुमित्यादिना)। **चतुर्थियालुम् उकारतालुम् रक्षणहेतुवान प्राप्तियैयुम् फलतैयुम् सोल्लिट्रु।**

---

१. भ.गी.१५-१५ २. विष्णु.पु.६-४-४
३. म.भा.आर.प.८८-२६

**अप्रयुक्तापि स्मृता विभक्तिः बोधिका** इति पक्षमभिप्रेत्य (चतुर्थियालुम्) इत्युक्तम्। **विद्यमानश्शब्दो लुप्यमानार्थोऽभिधायी इति लुप्तविभक्त्यर्थस्य प्रातिपदिकेन लक्षणा हि समाने** इत्याचार्यसूक्त्यनुसारेण, एतत्पादीयाष्टमाधिकरण-व्याख्यावृत्तौ **शेषत्वप्रतिसम्बन्धियान आक** इति निगमनसूक्त्यनुसारेण च **चतुर्थियालुम्** इति स्थाने **लाक्षणिकाकारत्तालुम्** इत्यनुसन्धेयम्। **चतुर्थियालुम् उकारत्तालुम्** इति करणद्वयं प्रत्येकं वक्ष्यमाणप्राप्तिफलयोः उभयोरपि अन्वेति।

(रक्षणहेतुवान) निरुपाधिकासङ्कुचितरक्षणकारणमान। (प्राप्तियैयुम्) शेषत्वस्वरूपयोग्यतालक्षणम्, ईश्वरप्रतियोगिकं जीवानुयोगिकं, स्वशक्तिरूप-निरूपाधिकसम्बन्धमित्यर्थः। लोके गृहारामक्षेत्रादिषु स्वत्वकृताभिमानविशेषमात्रेण तद्विनियोगकृतभोगाल्पत्वेऽपि यावच्छक्तिरक्षणप्रवृत्तिदर्शनात्, अन्यदीयगृहादौ तादृशाभिमानाभावेन भोगाधिक्येऽपि तादृशप्रवृत्त्य दर्शनाच्च स्वत्वं रक्षणहेतुरिति भावः। यद्यपि [1]**तदेव प्रीतये भूत्वा** इत्यादि न्यायेन स्वत्वाशयेऽपि उपेक्षादिकं दृश्यते। तथापि सोपाधिकरक्षणेऽन्यायपेक्षायामपि निरुपाधिकासङ्कुचितरक्षणे स्वत्वमेव हेतिरिति न दोषः।

लाक्षणिकाकारत्तालुम् इत्युक्तौ तु शेषित्वस्वरूपयोग्यतालक्षणजीव-प्रतियोगिकेश्वरानुयोगिकस्वामित्वलक्षणशक्ति विशेषात्मकसम्बन्धमित्यर्थः। यद्वा स्वामित्वस्य स्वगतेष्टोद्देशनियमं विना अनन्यार्थ परगतेष्टोद्देशेनापि प्रवृत्तौ हेतुत्वात्, शेषित्वस्वरूपयोग्यतायाः स्वगतेष्टोद्देशनियमेन पररक्षणप्रवृत्तौ हेतुत्वाच्च। स्वस्वामिभावशक्त्यपेक्षया शेषशेषिभावशक्तिः भिन्नैवा। सैव अत्र प्राप्तिशब्देन विवक्षिता। अत एव सौकर्यापादकगुणचतुष्कान्तर्भूतस्वामित्वापेक्षयाकार्यापादक-गुणचतुष्कान्तर्भूता प्राप्तिः पृथङ्निर्दिष्टा। किञ्च प्राप्तिशब्देन अत्र अप्राप्तिविशिष्ट-प्राप्तिः विवक्षिता। शेषत्वस्य अनन्यार्हत्वरूपप्राप्तेः उकारद्योत्यार्थत्वात्। भर्तुः भार्यायाः रक्षणादौ अनन्यार्हत्वस्य हेतुत्वाच्च।

(फलत्तैयुम्) उपस्थिततत्वात् रक्षणफलत्तैयुमित्यर्थः। फलशब्देन अन्यशेषवृत्ति फलोपधानाभावः, भगवच्छेषवृत्ति फलोपधानञ्च विवक्षितम्।

---

१. विष्णु.पु.२-६-४८

(शोल्लिट्रु) चतुर्थ्याप्राप्तिः वाक्यार्थविधया बोध्यते। अकारेण लक्षणापूर्वकं तथा। अप्राप्तिस्तु उकारेण द्योत्यते। शेषवृत्तिफलोपधानन्तु - चतुर्थ्या लाक्षणिकाकारेण वा, वाक्यार्थविधया बोध्यमानशेषशेषिभावस्वरूपयोग्यतापेक्षया व्यापकत्वात् अर्थात् बोध्यते। अन्यशेषत्वफलोपधानाभावेऽपि उकारद्योत्यान्यशेषत्वानर्हत्वरूपशक्तिविशेषलक्षणस्वरूपयोग्यतापेक्षया व्यापकत्वात् तथेत्यनुसन्धेयम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते**
**रहस्यत्रयमीमांसाभाष्ये**
**प्रथमाध्याये द्वितीयपादे**
**प्रणवस्य शाब्दवाक्यार्थसमर्थनं नाम**
**द्वादशधिकरणम् सम्पूर्णम्।।**

**प्रथमाध्यायस्य द्वितीयपादस्य श्लोकरूपसारः**

मन्त्रतात्पर्यविषयवाक्यार्थोऽत्रादितो मतः।
तस्य स प्रणवस्यैवाष्टाक्षरत्वमथेरितम्।। १।।

पदत्रयक्रमः पश्चादकारार्थोऽथवर्णितः।
रक्षकत्वमसङ्कोचात् ततश्श्रीमत्वमप्यथ।। २।।

अथोलुप्तचतुर्थ्युक्ता तदर्थोऽथाष्टमोदितः।
उकारार्थस्तु नवमे मकारार्थोऽथवर्णितः।। ३।।

वर्णत्रयक्रमः पश्चात् तद्वाक्यार्थोऽथवर्णितः।
नवाधिकरणी चात्र प्रणवार्थप्रकाशिका।। ४।।

**।। श्रीमत्कुशिककुलतिलक श्रीशुद्धसत्वगुरुचरणतनूजरत्नस्य**
**तत्प्रसादलब्धसकलविद्यावैशद्यस्य रामानुजादासस्य कृतौ**
**रहस्यत्रयमीमांसाभाष्ये प्रणवार्थवर्णनं नाम**
**प्रथमाध्यायस्य द्वितीयपादः समाप्तः।।**

श्रीमते रामानुजाय नमः

# उदाहृतप्रमाणवाक्यानुक्रमणी
## प्रथमभागः


| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| अ इति ब्रह्म | (बह्वृचोपनिषत्) | 168,174 |
| अकलकिल्लेनिरैयुम् | (तिरुवायिमोलि ६-१०-१०) | 120,199 |
| अकाराञ्चाप्युकारञ्च | (मनुस्मृतिः, २-७६) | 153 |
| अकारार्थो विष्णुः | (अष्टश्लोकी) | 68,164,172 |
| अकारो विष्णुवाचकः | (विष्णुपुराणम्) | 68 |
| अकारो वै सर्वावाक् | (बह्वृचोपनिषत्) | 173 |
| अक्रूरमालाकारादीन् | (गीताभाष्यम्) | 85 |
| अक्षराणामकारोऽस्मि | (भगवद्गीता १०-३३) | 173 |
| अगाधभगवद्भक्तिसिन्धवे | (स्तोत्ररत्नम् -१) | 121 |
| अजस्सर्वेश्वरस्सिद्धः | (विष्णुसहस्रनामस्तोत्रम्) | 38 |
| अथ नामधेयं सत्यस्य | (बृहदारण्यकोपनिषत् ४-३-६) | 76 |
| अथ पातकभीतस्त्वम् | (विष्णुधर्मः ६६-७१) | 12 |
| अथातो ब्रह्मजिज्ञासा | (ब्रह्मसूत्रम् १-१-१) | 2,168 |
| अधिगतनिगमः | (अष्टश्लोकि -५) | 147 |
| अनन्ता वै भगवन्मन्त्रा | (तैत्तिरीयब्राह्मणम्) | 60 |
| अनन्यसाध्ये स्वाभीष्टे | (विष्वक्सेनसंहिता) | 12,105 |
| अनन्या राघवेणाहम् | (रामायणे, सुन्दरकाण्डे २१-१६) | 203 |
| अनन्या हि मया सीता | (रामायणे, युद्धकाण्डे १२१-१९) | 190,196,203 |
| अनात्मन्यात्मबुद्धिर्या | (विष्णुपुराणम् ६-७-१०) | 228 |
| अन्तरिक्षगतः श्रीमान् | (रामायणे, युद्धकाण्डे १७) | 96 |
| अन्नुनान्पिरन्दिलेन् | (तिरुच्चन्दविरुत्तम्) | 116 |
| अप्रमेयं हि तत्तेजो | (रामायणे, आरण्यकाण्डे ३७-१८) | 196 |
| अम्बरमेतण्णीरे | (तिरुप्पावै -१६) | 201 |
| अम्भस्य पारे | (तैत्तिरीयोपनिषत्, नारायणवल्ली -१) | 64 |
| अविकाराय | (विष्णुपुराणम् १-२-१) | 68 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| अविनाशी वा अरे | (बृहदारण्यकोपनिषत् ६-५-१४) | 246 |
| अष्टाक्षराख्यमनुराज | (यतिराजविंशति -५) | 18 |
| अष्टोत्तरशतं मूलमन्त्र.. | (श्रीरङ्गनाथाष्टोत्तरशतम्) | 71 |
| असत्यमप्रतिष्ठन्ते | (कौशीतकी उपनिषत्) | 89 |
| असन्नेव स भवति | (तैत्तिरीयोपनिषत् आनन्दवल्ली ६-१) | 30,116 |
| अस्ति ब्रह्मेति चेद्वेद | (तैत्तिरीयोपनिषत् आनन्दवल्ली ६-१) | 213,251,252 |
| अस्येशाना जगतो | (श्रीसूक्तम्) | 197,245 |
| अहं ब्रह्मास्मि | (बृहदारण्यकोपनिषत् ३-४-१०) | 205 |
| अहं बान्धवो जातः | (विष्णुपुराणम् ५-१३-१३) | 201 |
| अहं सर्वं करिष्यामि | (रामायणे, अयोद्याकाण्डे ३१-२५) | 32 |
| अहन्ता ब्रह्मणस्तस्य | (लक्ष्मीतन्त्रम् -२) | 195,196,203 |
| अहमद्यैव मया समर्पितः | (स्तोत्ररत्नम् -५२) | 119,120 |
| अहमपि न मम | (यजुर्वेदे) | 242 |
| अहमस्य इति वत् | (रामायणे, किष्किन्धाकाण्डे ४-१२) | 50 |
| आचारश्चैव साधूनाम् | (मनुस्मृतिः १२-१०६) | 80 |
| आचार्यस्तु ते गतिं | (छान्दोग्योपनिषत् ४-१४-१) | 08 |
| आचार्यात् दैवविद्या | (छान्दोग्योपनिषत् ४-९-३) | 24 |
| आचार्यादैव | (महाभारते विराटपर्वे ९-३) | 88 |
| आत्मानं मानुषं मन्ये | (रामायणे, युद्धकाम्डे १२०-११) | 201 |
| आदरम्पेरुकवैत्तवलिकम् | (तिरुवायिमोलि -१६) | 83 |
| आदरादलोपः | (ब्रह्मसूत्रम् ३-३-४०) | 61 |
| आदित्यवर्णं तमसस्तु पारे | (पुरुषसूक्तम्) | 108 |
| आनन्दी भवति | (तैत्तिरीयोपनिषत्, आनन्दवल्ली -१) | 214 |
| आनृशंस्यं परो धर्मः | (रामायणे, सुन्दरकाण्डे ३८-४१) | 8,39 |
| आपो नारा इति प्रोक्ताः | (विष्णुपुराणम् १-४-६) | 62,64 |
| आब्रह्मस्तम्बपर्यन्ताः | (विष्णुधर्मपुराणे १०४-२३) | 240 |
| आमोक्षं लक्ष्मणार्यं | (रामानुजचतुःश्लोकी) | 114 |
| आयिरनामम्शोल्लि | (तिरुप्पाल्लाण्डु -५) | 58 |
| आर्ता विषण्णाः | (विष्णुसहस्रनामस्तोत्रे) | 56,77 |
| आर्षंधर्मोपदेशञ्च | (मनुस्मृतिः, १२-१०६) | 49 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| आलोढ्य सर्वशास्त्राणि | (महाभारतम्) | 49 |
| आस्तां ते गुणराशिवद्गुण | (श्रीरङ्गराजस्तवः २-७४) | 60,75 |
| आह्लादनेत्रशीताम्बुः | (विष्णुतत्त्वे) | 218 |
| इतरेभ्यस्त्वितरथा | (वरदराजस्तवः १८) | 8 |
| इतिहासपुराणाभ्यां | (महाभारते, आदिपर्वे १-२७३) | 3,13 |
| इत्यङ्गमुदितं श्रेष्ठम् | (श्रीवचनभूषणम्) | 103 |
| इदं शरणमज्ञानं | (लक्ष्मीतन्त्रम्,१७-१००) | 28 |
| इवन्तान्इवै तन्नेरा | (मुमुक्षुप्पडि -३) | 59 |
| इवले धर्ममेन्गिरतु | (मुमुक्षुप्पडि चरमश्लोके) | 118 |
| इषेत्वा | (यजुर्वेदे १-१) | 53,73 |
| इष्टानिष्टङ्गल् | (श्रीवचभूषणम् -३) | 59 |
| ईशेशितव्यसम्बन्धात् | (लक्ष्मीतन्त्रम् १७-७०) | 28,186,222 |
| ईश्वराय निवेदितुम् | (विष्णुतत्त्वम्) | 36,199 |
| ईश्वरीं सर्वभूतानाम् | (श्रीसूक्तम्) | 197 |
| उणर्वेनुम्पेरुम्बदम् | (तिरुवायिमोलि १-१-१) | 100 |
| उडम्बुडैयान्कवरात | (तिरुवायिमोलि ४-८-१०) | 252 |
| उपदेशाद्धरिं बुध्वा | (पूर्वदिनचर्या -९) | 78,80 |
| उपादत्ते सत्तास्थिति | (श्रीरङ्गराजस्तवः २-८) | 104,222 |
| उयिरिनाल्कुरैविलमे | (तिरुवायिमोलि ४-८-१०) | 253,256 |
| ऋचोयजूंषि सामानि | (वृद्धहारीतसंहिता ३-४५) | 17,20,78,106,110,141 |
| ऋणं प्रवृद्धमिव | (महाभारतम्) | 85 |
| एकमेवाऽद्वितीयं | (छान्दोग्योपनिषत्. ६-२-१) | 76 |
| एको ह वै नारायण | (महोपनिषत् -१) | 170 |
| एकाक्षरां द्विपदां | (नारायणोपनिषत्) | 150 |
| एङ्ह्रस्वात् | (पाणिनिसूत्रम् ६-१-६९) | 205 |
| एण्णिलुम्वरुम् | (तिरुवायिमोलि १-१०-२) | 82 |
| एतमितः प्रेत्य | (छान्दोग्योपनिषत् ३-१४-४) | 108 |
| एतांश्च सत्यान्कामान् | (छान्दोग्योपनिषत् ८-१-६) | 61,76 |
| एते वै निरयास्तात | (जितन्ते १-४) | 78 |
| एनक्केन्नुम तेनुम्बालुम् | (पेरियतिरुमोलि ६-१०-६) | 71,75 |

| प्रमाणवचनम् | आकर: | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| एनतावियुल्कलन्दु | (तिरुवायिमोलि २-३-४) | 119,120 |
| एवमेष महाशब्दो | (विष्णुपुराणम् ६-५-७६) | 57 |
| एष एव साधुकर्म कारयति | (कौषीतक्युपनिषत् ३-९) | 90 |
| एष सर्वभूतान्तरात्मा | (सुबालोपनिषत् -१) | 66,77 |
| ऐतदात्म्यमिदं सर्वम् | (छान्दोग्योपनिषत् ६-८-७) | 220 |
| ऐहलौकिकमैश्वर्यं | (वृद्धहारीतसंहिता, ३-४७) | 96 |
| ओङ्कार प्रभवं सर्वं जगत् | (ध्यानबिन्दूपनिषत्) | 158 |
| ओङ्कारप्रभवा वेदा: | (ध्यानबिन्दूपनिषत् -१५) | 153,157,160 |
| ओतियायिरनामङ्गल् | (पेरियतिरुमोळि १-२-९) | 58 |
| ओतियायिरनामम्पणिन्दु | (तिरुवायिमोलि ३-५-९) | 58 |
| ओमित्यग्रेव्याहरेत् | (नारायणोपनिषत्) | 11,58,70,143,151 |
| ओमित्येकाक्षरम् | (नारायणोपनिषत्) | 140,143,145 |
| औपनिषदपरमपुरुष | (श्रीभाष्ये, जिज्ञासाधिकरणे) | 22 |
| कण्णपुरमेन्नुडैयानुक्कडिये | (पेरियतिरुमोलि ८-९-३) | 258,260 |
| कथयन्तश्च मां नित्यम् | (भगवद्गीता ९-१४) | 75 |
| कान्तापादतलाहति | (मालविकाग्निमित्रम्) | 32,217 |
| कामान्नी कामरूप्यनुसञ्चरन् | (तैत्तिरीयोपनिषत्, भृगुवल्ली १०-५) | 179 |
| किं तत्र बहुभिर्मन्त्रैः | (ब्रह्मपुराणम् ५७-२४) | 77 |
| किं नु समर्पयामि | (स्तोत्ररत्नम् -५३) | 120 |
| किङ्करोऽस्मि हृषीकेश | (जितन्तास्तोत्रम् १-१४) | 242 |
| किञ्चिदस्ति किल | (वरदराजस्तव: -९) | 24 |
| किन्तु त्वदग्रे शरणा.. | (स्तोत्ररत्नम् -२५) | 85 |
| किमलभ्यं भगवति | (श्रीभाष्ये, जिज्ञासाधिकरणे ) | 23 |
| किमेतन्निर्दोष: क इह | (श्रीगुणरत्नकोश: ५२) | 197 |
| कुरुष्व मामनुचरम् | (रामायणे, अयोध्याकाण्डे ३१-२२) | 12 |
| कुलन्तरुम् | (तिरुवायिमोलि १-१-९) | 95,99 |
| कृपा काप्युपजायते | (अहिर्बुध्न्यसंहिता १४-२८) | 28 |
| कृष्णानुस्मरणं परम् | (विष्णुपुराणम् २-६-३९) | 19 |
| को धर्म: सर्वधर्माणां | (विष्णुसहस्रनामस्तोत्रम्) | 44 |
| कोपेऽपि कान्तं मुखम् | (कुवलयानन्दे) | 217 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| गतिरष्टाक्षरो नृणाम् | (नारदीयपुराणम्, १-१३) | 21 |
| गुणैः दास्यमुपागतः | (रामायणे, किष्किन्धाकाण्डे ४-१२) | 30 |
| गुणैः षड्भिः तु एतैः | (वरदराजस्तवः १६) | 75 |
| गुणैर्दास्यमुपागतः | (रामायणे, किष्किन्धाकाण्डे ४-१२) | 225 |
| गुप्तिज्किद्भ्यस्सन् | (पाणिनिसूत्रम् ३-१-५) | 4 |
| गुरुं प्रकाशयेत् | (शेषसंहिता १४-३३) | 43,71 |
| गुह्यानां गुह्यमुत्तमम् | (भगवद्गीता, १८-२५) | 8,18,21 |
| गोविन्देति यदाक्रन्दत् | (महाभारते, सभापर्वम् ६६-४१) | 82,84 |
| गौरनाद्यन्तवती | (भागवतम् ६-२-१४) | 89 |
| चक्षुश्च द्रष्टव्यं च | (सुबालोपनिषत्) | 77 |
| चतुर्थी तदर्थार्थबलिहित | (पाणिनिसूत्रम् २-१-३६) | 216 |
| जगतोऽस्य जगच्च सः | (विष्णुपुराणम् १-१-३१) | 68 |
| जगत्तत्रैव च स्थितम् | (विष्णुपुराणम् १-१-३१) | 68 |
| जन्माद्यस्य यतः | (ब्रह्मसूत्रम् १-१-२) | 168 |
| जन्मान्तरसहस्रेषु | (लघ्वत्रिस्मृतौ) | 94,101 |
| जातोऽसि देवदेवेश | (विष्णुपुराणम् ५-३-१०) | 192 |
| जीवनम् - उज्जीवनम् | (श्रुतिप्रकाशिका) | 2 |
| जीवे दुःखाकुले विष्णोः | (अहिर्बुध्न्यसंहिता १४-२८) | 38 |
| ज्ञानात् मोक्षः | (महाभारतम्, अनुशासनपर्वम् २१-१८) | 48 |
| ज्ञानाधिक्यत्ताले प्रपन्नर् | (श्रीवचनभूषणम्) | 59,198 |
| ज्ञानीत्वात्मैव मे मतम् | (भगवद्गीता ७-१८) | 85,227,252 |
| तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् | (विष्णुपुराणम् ६-५-८७) | 9,36,163,214 |
| ततस्स वासुदेवेति | (विष्णुपुराणम् १-२-१२) | 55 |
| ततो निकृष्टे मयि | (श्रीरङ्गनाथस्तोत्रम् -८) | 71 |
| तत्रैव च स्थितम् | (विष्णुपुराणम् १-१-३१) | 68 |
| तदात्मानं स्वयमकुरुत | (तैत्तिरीयोपनिषत्, आनन्दवल्ली -७) | 173,261 |
| तदुपकरणं वैष्णवमिदं | (अष्टश्लोकी) | 68 |
| तदेव प्रीतये भूत्वा | (विष्णुपुराणम् २-६-४८) | 176,179,266 |
| तदेवभूतं तदुभव्यम् | (तैत्तिरीयोपनिषत्, नारायणवल्ली १-२) | 230,231 |
| तदेवाग्निस्तद्वायुः | (तैत्तिरीयपनिषत् १७) | 174 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| तदैक्षत बहुस्यां | (छान्दोग्योपनिषत् ६-२-३) | 76,173,261 |
| तद्विजिज्ञासस्व | (तैत्तिरीयोपनिषत्, भृगुवल्ली १-१) | 231 |
| तद्विद्धि प्रणिपातेन | (भगवद्गीता ४-३४) | 41,94 |
| तद्ज्ञानमज्ञानमतो | (विष्णुपुराणम् ६-५-७८) | 9,29,36 |
| तमवैहि विष्णुभक्तम् | (विष्णुपुराणम् ३-७-२०) | 55 |
| तमसः परमो धाता | (रामायणे, युद्धकाण्डे ११४-१५) | 85,192 |
| तमेवं विदित्वा | (श्वेताश्वतरोपनिषत् ३-८) | 28,107,108,185 |
| तमेवं विद्वान् | (पुरुषसूक्तम्) | 28,38 |
| तया स राजर्षिसुतः | (रामायणे, बालकाण्डे ७७-३८) | 193,196 |
| तवास्मीति च याचते | (रामायणे, युद्धकाण्डे १८-३३) | 242 |
| तस्मात्दुःखात्मकं नास्ति | (विष्णुपुराणम् २-६-४९) | 176 |
| तस्मिन्दृष्टे परावरे | (मुण्डकोपनिषत् २-२-९) | 84 |
| तस्य सर्वेषु लोकेषु | (छान्दोग्योपनिषत् ७-२५५) | 179 |
| तानेकधा समभरत् | (नारायणोपनिषत्) | 154 |
| तामरैयाल्केवन् | (तिरुवन्तादि, ६७) | 260,264 |
| ते वैष्णवाः | (विष्णुपुराणम् ३-७-२०) | 55 |
| तेजोऽतः तथाप्याह | (ब्रह्मसूत्रम् २-३-१०) | 181 |
| त्रयं यदा विन्दते ब्रह्ममेतत् | (श्वेताश्वतरोपनिषत् १-९) | 107 |
| त्रयाणामेवमुपन्यासः | (ब्रह्मसूत्रम् १-४-६) | 107 |
| त्रैगुण्यविषया वेदाः | (भगवद्गीता २-४५) | 96,106 |
| त्वं माता सर्वलोकानाम् | (विष्णुपुराणम्, १-९-१२६) | 193 |
| त्वं वा अहमस्मि | (शङ्करभाष्यम्) | 220 |
| त्वदीयगंभीर | (स्तोत्ररत्नम् -२०) | 80 |
| त्वमेव उपायभूतो मे | (अहिर्बुध्न्यसंहिता ३६-३४) | 11 |
| त्वामौ द्वितीयायाः | (पाणिनिसूत्रम् ८-१-२३) | 208 |
| दासभूतास्स्वतस्सर्वे | (रामायणे, युद्धकाण्डे) | 30,116,214 |
| दीर्घं प्रणमतो मम | (पूर्वदिनचर्या -२०) | 18 |
| दूरवासिनं मां | (महाभारते, सभापर्वे) | 84 |
| देवं मत्वा | (कठोपनिषत् २-१२) | 28 |
| देहधारणं परमात्मसमाराधन | (श्रीवचनभूषणम्) | 116 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| देहासक्तात्मबुद्धि | (अष्टश्लोकी -४) | 6,15,109 |
| दोषैक दृक्पुरो भागी | (अमरकोशः, ३-४७) | 42 |
| धातोः कर्मणः | (पाणिनिसूत्रम् ३-१-७) | 4 |
| ध्यात्वा देवं | (कठोपनिषत् २-१२) | 28 |
| न चलति निजवर्ण धर्मतो यः | (विष्णुपुराणम् ३-७-२०) | 54 |
| न चाशुश्रूषवे वाच्यं | (भगवद्गीता १८-६७) | 41 |
| न जातु हीयते | (स्तोत्ररत्नम् -२८) | 24 |
| न तत्समश्चाभ्यधिकश्च | (श्वेताश्वतरोपनिषत् ६-८) | 81 |
| न तस्येशे कश्चन | (तैत्तिरीयोपनिषत्, नारयणवल्ली -२) | 188 |
| न तु नारायणादीनां | (विष्णुपुराणम्) | 65 |
| न देहं न प्राणान् | (स्तोत्ररत्नम् -५७) | 254,255 |
| न देहम् | (स्तोत्ररत्नम् -५७) | 252 |
| न दैवं केशवात्परम् | (हरिवंशे शेषधर्म) | 110 |
| नम इति द्वे अक्षरे | (नारायणोपनिषत्) | 140 |
| नम इत्येव वादिनः | (महाभारते शान्तिपर्वे) | 24 |
| न मन्त्रो अष्टाक्षरात्परः | (नारसिंहपुराणम् १८-३२) | 19 |
| न हि विज्ञातुर्विज्ञाते | (बृहदारण्यकोपनिषत् ६-३-३०) | 246 |
| न धर्मनिष्ठोऽस्मि | (स्तोत्ररत्नम् -२२) | 120 |
| नन्मालै पलकोण्डु | (तिरवायिमोलि ४-२-३) | 71 |
| नमस्यन्तश्च मां भक्त्या | (भगवद्गीता ९-१४) | 72 |
| नमो नारायणाय वेन्रु | (तिरुप्पल्लाण्डु -१२) | 24 |
| नमो नारायणायेति | (नारदीयपुराणम् १-४०) | 95,145 |
| नमो हिरण्यगर्भाय | (विष्णुपुराणम् १-२-२) | 68 |
| नमोनारायणायेत्युक्त्वा | (वराहपुराणम्) | 145 |
| नरनारायणनायुलकत्तुर | (परकालसूक्तिः) | 39 |
| न हि मेजीवितेनार्थः | (रामायणे, सुन्दरकाण्डः) | 253 |
| नामं पलवुवुनविन्रु | (तिरुप्पावै -९) | 58 |
| नान्योहेतुर्विद्यते | (श्वेताश्वतरोपनिषत् ६-१७) | 188 |
| नामं पलपरवि | (तिरुप्पल्लाण्डु -२) | 58 |
| नामं पलशोल्लि | (तिरुप्पल्लाण्डु -२) | 58 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| नाममायिरमेत्त | (नाच्चियार्तिरुमोलि २-१) | 58 |
| नायेन्वन्दडैन्देन् | (पेरियतिरुमोलि १-९-१) | 71 |
| नाय् कूलै वालाल | (तिरुवायिमोलि ९-४-३) | 71 |
| नारस्त्वति सर्वपुंसाम् | (पाद्मोत्तर २२६-५२) | 62,64 |
| नारायणेति शब्दोऽस्ति | (विहगेन्द्रसंहिता २४-१२) | 56,77,78 |
| नार्हन्ति शरणस्थस्य | (रामायणे सुन्दरकाण्डे. २६-५) | 253 |
| निजदेवीं | (श्रीसूक्तम्) | 193 |
| नित्यकिङ्करः प्रहर्षयिष्यामि | (स्तोत्ररत्नम् -४३) | 19,62,178,226 |
| नित्यकिङ्करो भवानि | (शरणागतिगद्यम्) | 178,226 |
| निरस्ताखिलदुःखोऽहम् | (श्रीभाष्यम्, जिज्ञासाधिकरणम्) | 213 |
| नेहाभिक्रमनाशोऽस्ति | (भगवद्गीता २-४०) | 10,19,94,118,120 |
| पठित्वा भाष्यं तत्प्रवचनम् | (भाष्यकारमुक्तकम्) | 116 |
| पतिं पतीनां परमम् | (श्वेताश्वतरोपनिषत् ६-७) | 217,235 |
| पतिं विश्वस्यात्मेश्वरम् | (तैत्तिरीयोपनिषत्नारायणवल्लि -१०) | 30,31,188,217,235 |
| परगतातिशय | (श्रीभाष्यम्) | 148 |
| परं यद्वस्तूक्तम् | (वरदराजस्तवः १४) | 24 |
| परमं साम्यमुपैति | (मुण्डकोपनिषत् ३-१३) | 108,252 |
| परात्परं पुरुषमुपैति | (मुण्डकोपनिषत् ३-२-८) | 108 |
| परित्राणाय साधूनां | (भगवद्गीता ४-८) | 85 |
| परव्यूहादिकान्पत्युः प्रकारान् | (पूर्वदिनचर्या -१५) | 59 |
| परिहरमधुसूदनप्रपन्नान् | (विष्णुपुराणम् ३-७-१३) | 233 |
| पश्यतां सर्वदेवानां | (विष्णुपुराणम् १-९-१०५) | 232 |
| पाथेयं पुण्डरीकाक्ष | (गारुडपुराणम् २२०-१६) | 75,218 |
| पादप्रहारः परमं हि | (काव्यप्रकाशकः) | 217 |
| पाराशर्यवचस्सुधाम् | (श्रीभाष्यम्) | 75,118 |
| पिता च रक्षकः | (नवविधसम्बन्धः) | 226 |
| पिता च रक्षकश्शेषी | (तत्त्वदीपे) | 61 |
| पिरन्दपिन्मरन्दिलेन् | (तिरुच्चन्दविरुत्तम् -६४) | 116,122 |
| पुंसां दृष्टिचित्तापहारिणम् | (रामायणे अयोध्यकाण्डे ३-२९) | 83 |
| पुण्डरीकाक्षनाम | (गारुडपुराणम् २२०-१६) | 118 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| पुरुषान्न परं किञ्चित् | (कठोपनिषत् ३-१-११) | 67 |
| पृथगात्मानं प्रेरितारञ्च | (श्वेताश्वतरोपनिषत् १-६) | 107 |
| पेरुमोरायिरत्तुलोन्रु नीर् | (तिरुवायिमोलि १०-२-३) | 58 |
| प्रचयशिष्टायाः पञ्चत्व | (प्रचयः - उत्तरोत्तरगणना) | 107 |
| प्रणवो धनुश्शरोह्यात्मा | (ध्यानबिन्दूपनिषत् -१) | 161,263 |
| प्रत्यगानन्दम् | (नारायणोपनिषत्) | 11,70 |
| प्रपत्त्युपायत्तुक्कु | (श्रीवचनभूषणम्) | 121 |
| प्रशस्तिस्सा राज्ञः | (न्यासविंशति -२) | 42 |
| प्रसूनं पुष्यन्तीं | (श्रीगुणरत्नकोशः -२९) | 190,196,203 |
| प्राप्यस्य ब्रह्मणो रूपं | (वृद्धहारीतसंहिता ८-१४१) | 107,109,141 |
| प्राज्ञोहि प्रकरणात् | (ब्रह्मसूत्रम् १-४-५) | 67 |
| प्रियतम एव हि | (श्रीभाष्ये जिज्ञासाधिकरणे) | 116 |
| प्रियतम एव हि | (श्रीभाष्ये जिज्ञासाधिकरणे) | 23,118 |
| प्रियो हि ज्ञानिनोऽत्यर्थम् | (भगवद्गीता ७-१७) | 31 |
| प्रियोऽपि न प्रियोऽसौ मे | | 53 |
| प्रेरितारञ्च मत्वा | (श्वेताश्वतरोपनिषत् १-६) | 28 |
| फलमत उपपत्तेः | (ब्रह्मसूत्रम् ३-२-३८) | 168 |
| ब्रह्म वेद ब्रह्मैव भवति | (मुण्डकोपनिषत् ३-२-९) | 24 |
| ब्रह्मणे त्वामह | (तैत्तिरीयोपनिषत्, नारायणवल्ली ५१) | 208,212 |
| ब्रह्मविदाप्नोति | (तैत्तिरीयोपनिषत्, आनन्दवल्ली -१) | 97,107 |
| भक्तामृतम् | (तिरुवाय्मोलितनियन्) | 118 |
| भक्तैर्भागवतैस्सह | (वायव्ये) | 115 |
| भगवत एवाहमस्मि | (यजुर्वेदे) | 208,212 |
| भगवत्प्रवृत्तिविरोधि | (मुक्तकम्) | 6 |
| भगवानिति शब्दोऽयं | (विष्णुपुराणम्) | 57,65 |
| भयाभयङ्गलिरण्डुम्मारि | (श्रीवचनभूषणम्) | 104 |
| भाष्यामृतम् | (श्रीभाष्यम्) | 118 |
| भूतोर्ध्वबाहुरद्यात्र | (नारसिंहपुराणम् १८-२५) | 20 |
| भूरितिऋग्वेदादजायत | (अथर्व गोपथब्राह्मणम् १-६) | 153 |
| भोक्ता भोग्यं प्रेरितारं | (श्वेताश्वतरोपनिषत् १-१२) | 107 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| मकारार्थो जीवः | (अष्टश्लोकी) | 68 |
| मङ्गलादीनि मङ्गलमध्यानि.. | (महाभाष्यम्) | 157 |
| मच्चित्ता मद्गतप्राणाः | (भगवद्गीता १०-९) | 218 |
| मद्भक्तं श्वपचं वापि | (कौषीतक्युपनिषत् -९) | 90 |
| मद्भक्तोऽपि | (लक्ष्मीतन्त्रं १७-९५) | 59 |
| मधुसूदनप्रपन्नान् | (विष्णुपुराणम् ३-७-१३) | 236,240 |
| मध्य विरिञ्चमिरीशं | (श्रीरङ्गराजस्तवः २-५१) | 201 |
| मनसापि न लंघयेत् | (लक्ष्मीतन्त्रम् १७-९५) | 59 |
| मन्त्रं यत्नेन गोपयेत् | (शेषसंहिता १४-५०) | 8,17,20,29,35 |
| मन्त्ररत्नानुसन्धान | (पूर्वदिनचर्या) | 71 |
| मन्त्राणां परमो मन्त्रः | (नरसिंहपुराणम् १८-२५) | 15,17,19,22,13,77 |
| मम साधर्म्यमागताः | (भगवद्गीता १४-२) | 159 |
| तमुक्त्वामुच्यते योगी | (नारायणोपनिषत्) | 252 |
| मयर्वरमति नलमरुलिनन् | (तिरुवायिमोलि १-१-१) | 253 |
| मरन्देनुन्नैमुन्रम् | (पेरियतिरुमोलि ६-२-२) | 36 |
| मरप्पनो विनियानेन् | (तिरुवायिमोलि १-१०-१०) | 116 |
| मट्रेल्लाम्पेशिलुम् | (पेरियतिरुमोलि ८-१०-३) | 106,110 |
| मल्लै इरुवरुमनुग्रहत्तु | (श्रीवचनभूषणम्) | 121 |
| महतो वंशस्त | (महाभाष्यम्) | 208 |
| महत्यापदि सम्प्राप्ते | (महाभारतम्, उद्योगपर्वम्) | 82 |
| माता पिता भ्राता | (सुबालोपनिषत् -६) | 262 |
| मायां न सेवे | (महाभारतम्, उद्योगपर्वम् ६८-५) | 163 |
| मालरिकेशवनित्यादि | (तिरुवायिमोलि ८-२-७) | 58 |
| मालरिकेशवन् | (तिरुवायिमोलि ८-२-७) | 64,75 |
| मित्रभावेन सम्प्राप्तम् | (रामायणे, युद्धकाण्डे १८-३) | 11 |
| मुक्तानां परमा गतिः | (सहस्रनामभाष्यम् ) | 2 |
| मुच्लृमोक्षणे | (तुदादि प्रकरणे) | 4 |
| मुमुक्षुर्वै शरणमहं प्रपद्ये | (श्वेताश्वतरोपनिषत् ६-१८) | 24 |
| मूलमन्त्रस्सनातनः | (नारसिंहपुराणम् १८-२५) | 14 |
| मेरुमन्दरमात्रोऽपि | (विष्णुधर्मोत्तरपुराणम् ६९-११७) | 88 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| मेरुमन्दरमात्रोऽपि | (विहगेन्द्रसंहिता) | 93 |
| मेल्लवेलुन्दरियेन्न | (तिरुप्पावै -६) | 59 |
| मैत्तुनन्मार्कालिये | (तिरुवायिमोलि) | 85 |
| मोदते भगवान्भूतैः | (विष्णुपुराणम्) | 214 |
| यः परार्थस्तं वयं | (शाबरभाष्यम्) | 214 |
| यज्ञेन यज्ञमयजन्त देवाः | (पुरुषसूक्तम्) | 66 |
| यज्ञो वै विष्णुः | (यजुर्वेदे) | 66 |
| यतो वा इमानि | (तैत्तिरीयोपनिषत्, भृगुवल्ली -१) | 168 |
| यथा जगत् | (विष्णुपुराणम् १-१-४) | 68 |
| यथा ते तत्र वर्तेरन् | (तैत्तिरीयोपनिषत्शीक्षावल्ली ११-४) | 72 |
| यथा नद्यः स्यन्दमानाः | (मुण्डकोपनिषत् ३-२-८) | 264 |
| यथा सर्वेषु वेदेषु | (नारदीयपुराणे अष्टश्लोकी १-४१) | 56 |
| यद्यदाचरति श्रेष्ठः | (भगवद्गीता ३-२१) | 145 |
| यद्वेदादौ स्वरः प्रोक्तः | (तैत्तिरीयोपनिषत्, नारयणवल्ली ११-२४) | 173 |
| यन्मयञ्च जगद्ब्रह्म | (विष्णुपुराणम् १-१-५) | 68 |
| यन्मूहूर्तं क्षणं वापि | (गारुडपुराणम् २२२-२२) | 218,226 |
| यमन्तस्समुद्रे | (तैत्तिरीयोपनिषत्, नारायणवल्ली-१) | 64 |
| यमाहाऽस्मै कालम् | (अष्टश्लोकि -३) | 255 |
| यमुक्त्वा मुच्यते योगी | (नारायणोपनिषत्) | 154 |
| ययौ वक्षःस्थलं हरेः | (विष्णुपुराणम् १-९-५) | 189 |
| यावन्नचरणौ भ्रातुः | (रामायणे अयोध्यकाण्डे ९८-८) | 32 |
| यस्तर्केणानुसन्धत्ते | (मनुस्मृतिः १२-१०६) | 46,79 |
| यस्य देवे पराभक्तिः | (श्वेताश्वतरोपनिषत् ६-२३) | 21,25,41 |
| यस्य पृथ्वी शरीरम् | (बृहदारण्यकोपनिषत् ५-७-२२) | 77 |
| यस्यामतं तस्य मतं | (केनोपनिषत् २-३) | 119 |
| यस्यावीक्ष्य मुखं तत् | (श्रीरङ्गराजस्तवः १-४५) | 193 |
| यावदात्मभावि अशरियाम् | (तत्त्वत्रयम्) | 78 |
| ये च वेदविदो विप्राः | (महाभारतम्, आरण्यपर्वे ८८-२६) | 12,171,265 |
| येन जातानि जीवन्ति | (तैत्तिरीयोपनिषत् भृगुवल्ली १-१) | 262 |
| यो वेदनिहितं गुहायां | (तैत्तिरीयोपनिषत् आनन्दवल्ली -१) | 108 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| यो वै वेदांश्च प्रहिणोति | (श्वेताश्वतरोपनिषत् ६-१७) | 6,29 |
| योऽन्यथा सन्तमात्मानं | (महाभारते उद्योगपर्वे ४१-३४) | 228 |
| योऽहमस्मिननन्यजे | (यजुर्वेदे यजुराण्यकम् ३-१) | 228 |
| रङ्गेशविज्ञप्ति | (श्रीरङ्गनाथस्तोत्रम्) | 71 |
| रसो वै सः | (तैत्तिरीयोपनिषत् आनन्दवल्ली ७-१) | 5 |
| रा-दाने | (तुदादिप्रकरणम्) | 42 |
| रुद्रो बहुशिराबभ्रुः | (विष्णुसहस्रनामस्तोत्रम्) | 69 |
| रुजं द्रावयते | (विष्णुपुराणम्) | 65 |
| लक्ष्मणो लक्ष्मिसम्पन्नः | (रामायणं, बालकाण्डे १८-२९) | 96 |
| लक्ष्म्या सह हृषीकेशो | (लक्ष्मीतन्त्रम्, २८-१४) | 188 |
| वपुरादिषु योऽपि | (स्तोत्ररत्नम् -५२) | 228 |
| वरं हुतवहज्वाला | (गरुडपुराणम्) | 226 |
| वरत्त्वेकमेव दुःखाय | (विष्णुपुराणम् २-६-४७) | 176 |
| वर्णाश्रमाचारवता | (विष्णुपुराणम् ३-८-९) | 54 |
| वलुविलावडिमैशे | (तिरुवायिमोलि ३-३-१) | 253 |
| वस निवासे | (भ्वादिप्रकरणे) | 62 |
| वाचं देवा उपजीवन्ति | (विष्णुपुराणम्) | 170 |
| वासुदेवस्सर्वमिति | (भगवद्गीता ७-१९) | 55 |
| विचित्रा देहसम्पत्तिः | (विष्णुतन्त्रम्) | 6,213 |
| विंपन्यवः | (सुबालोपनिषत् -६) | 71 |
| विष्णवे सर्वजिष्णवे | (विष्णुपुराणम् १-२-१) | 55,68 |
| विष्णुनामा स वेदेषु | (विष्णुपुराणम् ६-४-४) | 171,265 |
| विष्णुपोतं विना नान्यत् | (विष्णुधर्मे १-५६, १७-१००) | 28 |
| विष्णुर्वरिष्टः | (विष्णुपुराणम्, १-२-७०) | 55 |
| विष्णोः कटाक्षम् | (विष्णुधर्मोत्तरपुराणम् १-५९) | 68 |
| विष्णोः कृपा | (अहिर्बुध्न्यसंहिता १४-२८) | 68 |
| विष्णोः श्रीरनपायिनी | (विष्णुपुराणम् १-८-१७) | 194 |
| विष्णोर्देहानुरूपां वै | (विष्णुपुराणम् १-६-१४५) | 195 |
| विष्णोस्सकाशादुद्भूतं | (विष्णुपुराणम् १-१-३१) | 55,57,68 |
| विष्लृव्याप्तौ | (जुहोत्यादि) | 62 |

| प्रमाणवचनम् | आकर: | पृष्ठसङ्ख्या च क्रमश: |
|---|---|---|
| वेदशब्देभ्य एवादौ | (विष्णुपुराणम् १-५-६३) | 158 |
| वेदानां सामवेदोऽस्मि | (भगवद्गीता) | 163 |
| वेदान्तङ्गल् इवल् | (श्रीवचनभूषणम्) | 119 |
| वेदैश्च सर्वैरहमेव वेद्य: | (भगवद्गीता १५-१५) | 18,157,162,170,171,265 |
| वेदोऽनृतो बुद्धकृतागमोऽनृत: | (तैत्तिरीयोपनिषत्, आरण्यकम् १) | 76 |
| वेदोऽखिलो धर्ममूलम् | (मनुस्मृति:) | 80 |
| वैकुण्ठे तु परे लोके | (शैवे-वायव्ये) | 27 |
| वैकुन्दत्तमररुम्मुनिवरुम् | (तिरुवायिमोलि -१०) | 115 |
| वैष्णवांघ्रिजलात्पुण्यात् | (विष्णुपुराणम् १-२-१) | 55 |
| व्यत्ययो बहुलम् | (पाणिनिसूत्रम् ३-१-८५) | 208 |
| शक्तयस्सर्वभावानाम् | (विष्णुपुराणम् १-३-२) | 179 |
| शक्तेस्सूपसदत्वाच्च | (लक्ष्मीतन्त्रम् १७-७०) | 33 |
| शङ्खचक्रगदापाणे | (महाभारते, सभापर्वे ६६-४१) | 82,87 |
| शमायालं जलं वह्ने: | (विहगेन्द्रसंहिता) | 93 |
| शरणं प्राप्य | (जिता -४) | 28 |
| शरणं ते व्रजं | (भविष्यपुराणम्) | 104 |
| शरणं व्रज | (भगवद्गीता १६-६६) | 185 |
| शास इदङ्हलो: | (पाणिनिसूत्रम् ६-४-३४) | 42 |
| शासु-अनुशिष्टौ | (अदादिप्रकरणम्) | 42 |
| शास्त्रफलं प्रयोक्तरि | (पूर्वमीमांसासूत्रम् ३-७-१८) | 26 |
| शिष्यप्रकर्षो यशसे | (श्रीगुणरत्नकोश: ३०) | 42 |
| शेष: परार्थत्वात् | (जैमिनिसूत्रम्) | 214 |
| श्रद्धया देवो | (यजुर्वेदे काठ. ३-३-३) | 193 |
| श्रियं वासय मे कुले | (श्रीसूक्तम्) | 193 |
| श्रिय: पतियाय् अवाप्त | (भगवद्विषय:) | 38 |
| श्रीमते नारायणाय नम: | (द्वयोत्तरमन्त्र:) | 4 |
| श्रीवत्सवक्षा नित्यश्री: | (रामायणे सुन्दरकाण्डे २७-२९) | 189 |
| श्रुण्वन्ति गायन्ति गृह्णन्ति | (तैत्तिरीयोपनिषत्, आ. १-१) | 218 |
| श्रुणाति निखिलान् | | 186,192 |
| श्रद्धया देवोदेवत्वमश्नुते | (यजुर्वेदे काठकवल्ली ३-३-३) | 196 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| स एकाकी न रमेत | (महोपनिषत् -१) | 6,149 |
| स एव पात्यत्ति च | (विष्णुपुराणम् १२-६७) | 169 |
| सकलफलप्रदो हि | (विष्णुधर्मे ४३-४६) | 221 |
| स कारणं करणाधिपाधिपः | (श्वेताश्वतरोपनिषत् ६-९) | 172 |
| स तु नागवरः श्रीमान् | (विष्णुधर्म्मोत्तरपुराणम्) | 96 |
| स महात्मा सुदुर्लभः | (भगवद्गीता ७-१९) | 227,252 |
| समस्तशब्दमूलत्वात् | (विष्णुपुराणम्, १-५-६३) | 176,158 |
| स वासुदेवो नयतोऽन्यदस्ति | (विष्णुपुराणम् २-१२-४४) | 55 |
| स हि मे जीवितेनार्थः | (रामायणे सुन्दरकाण्डे २६-५) | 252 |
| संशयात्मा विनश्यति | (भगवद्गीता ४-४०) | 46,50 |
| संसारसागरं घोरं | (जितन्तास्तोत्रम् १-४) | 33,37 |
| संहितायां | (नारदीयोपनिषत्) | 146 |
| स कारणं करणाधिपाधिपः | (श्वेताश्वतरोपनिषत् ६-९) | 165 |
| सकृदेव प्रपन्नाय | (रामायणे युद्धकाण्डे १८-३३) | 11 |
| सकृदेव हि | (लक्ष्मीतन्त्रम् १७-८५) | 104 |
| सञ्जातमोक्षाभिलाषस्य | (श्रीभाष्ये, जिज्ञासाधिकरणे) | 2 |
| सततं कीर्तयन्तो मां | (भगवद्गीता ९-१४) | 59,72,75 |
| सतां हि सन्देहपदेषु वस्तुषु | (शाकुन्तलम्) | 80 |
| सत्यं ज्ञानमनन्तं ब्रह्म | (तैत्तिरीयोपनिषत्आनन्दवल्लि -१) | 76 |
| सत्यकामस्सत्यसङ्कल्पः | (छान्दोग्योपनिषत् ८-१-५) | 76 |
| सद्बुद्धिस्साधुसेवी | (न्यायविंशतिः-२) | 41 |
| सन्तमेनं ततो विदुः | (तैत्तिरीयोपनिषत्, आनन्दवल्ली ६-१) | 220 |
| सन्ध्याहीनो | (दक्षस्मृतिः ) | 49 |
| सन्ध्यावन्दनत्तुक्कुप्पु | (श्रीवचनभूषणम् -३) | 59 |
| स मे युक्ततमो मतः | (भगवद्गीता ६-४७) | 227 |
| सर्वं परवशं दुःखं | (मनुस्मृतिः ४-१६०) | 212 |
| सर्वगुह्यतमं भूयः | (भगवद्गीता १८-६४) | 8 |
| सर्वज्ञोऽपि हि विश्वेशः | (लक्ष्मीतन्त्रम् १७-१८) | 96 |
| सर्वत्रासौ समस्तं च | (विष्णुपुराणम् १-२-१२) | 62 |
| सर्वधर्मान्परित्यज्य | (भगवद्गीता १८-६६) | 49 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| सर्वपापेभ्यो मोक्षयिष्यामि | (भगवद्गीता १८-६६) | 7 |
| सर्वमष्टाक्षरान्तस्थं | (वृद्धहारीतसंहिता ३-४५) | 14,18,45,47 |
| सर्ववेदान्तसारार्थः | (नारदीयपुराणम् १-१३) | 14,56,77 |
| सर्वश्शर्वश्शिवस्थाणुः | (विष्णुसहस्रनामस्तोत्रम्) | 69 |
| सर्वस्वार्थं समीहते | (माघे) | 213 |
| सहस्रशीर्षम् | (तैत्तिरीयोपनिषत्नारायणवल्ली) | 67 |
| साऽहं केशग्रहं | (महाभारतम्, सभापर्वम्) | 83 |
| साक्षात्फलैकलक्ष्यत्व | (पूर्वदिनचर्या -२७) | 18,22 |
| साक्षान्मन्मथमन्मथः | (भागवतम् १०-३२-२) | 83 |
| साङ्केत्यं पारिहास्यं च | (भागवतम् ६२-१४) | 79 |
| साङ्केत्यं पारिहास्यं वा | (भागवतम् ६२-१४) | 78 |
| सुपां सुलुक् | (पाणिनिसूत्रम् ७-१-३९) | 205 |
| सुपोधातुप्रातिपदिकयोः | (पाणिनिसूत्रम् २-४-७१) | 205 |
| सुसुखं कर्तुम् | (भगवद्गीता ९-२) | 32 |
| सूक्ष्मन्तु तदर्हत्वात् | (ब्रह्मसूत्रम् १-४-२) | 28 |
| सृष्टिस्थित्यन्तकारिणी | (विष्णुपुराणम्) | 65 |
| सेवा श्ववृत्तिः | (मनुस्मृतिः ४-६) | 212 |
| सोऽकामयत | (तैत्तिरीयोपनिषत्, आनन्दवल्ली -६) | 173 |
| सोऽश्नुते सर्वान्कामान् | (तैत्तिरीयोपनिषत्, आनन्दवल्ली २-२) | 2,30,108,214,218, 251,252 |
| स्थितिसंयमकर्ता | (विष्णुपुराणम् १-१-३१) | 68 |
| स्थिते मनसि सुस्वस्थे | (वराहपुराणम्) | 11 |
| स्मृतिशीले च तद्विदाम् | (मनुस्मृतिः) | 80 |
| स्मृतो यच्छति शोभनम् | (विष्णपुराणम् १-७-७८) | 82,90,157 |
| स्वजनयसि माता | (श्रीगुणरत्नकोशः -५२) | 193 |
| स्वज्ञानं प्रापकज्ञानं | (पाञ्चरात्रम्) | 9 |
| स्वत्वमात्मनि सञ्जातं | (विष्णुपुराणम्) | 214 |
| स्वमुद्दिश्य श्रीमानिति | (श्रीरङ्गराजस्तव २-८७) | 149,236 |
| स्वल्पमप्यस्य धर्मस्य | (भगवद्गीता २-४०) | 94 |
| स्वात्मानुभूतिरिति या | (वरदराजस्तवः -८१) | 2 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| स्वातमाप्येनं विगर्हते | (रामायणे, अयोध्यकाण्डे १७-१४) | 71 |
| स्वोज्जीवनेच्छा यदि ते | (रामायणम्, युद्धकाण्डः) | 116 |
| हरिः परायणं परम् | (महाभाष्यम्) | 157 |
| हरिरखिलाभिरुदीर्यते | (विष्णुपुराणम् ६-८-६४) | 57 |
| हरिरपजन्मजरादिकां | (विष्णुपुराणम् ६-८-६४) | 57 |
| हरिर्दुःखानि भक्तेभ्यः | (बृहन्नारदीयम्) | 90,214 |
| हरिर्हरति पापानि | (हर्यष्टकम्) | 90 |
| हरे विहरसिक्रीडा | (विष्णुपुराणम्) | 214 |
| हरेर्नामैव नामैव | (विहगेन्द्रसंहिता) | 93 |
| हृदयात्रापसर्पति | (महाभाष्यम्) | 82 |
| क्षणेऽपि ते | (स्तोत्ररत्नाकरः -५६) | 85 |
| क्षरात्मानौ | (श्वेताश्वतरोपनिषत्, १-१०) | 188 |
| क्षिपाम्यजस्रं | (भगवद्गीता, १६-१०) | 88 |

# एतद्वचनोपयुक्तग्रन्थाः

| | | |
|---|---|---|
| अथर्वशिरः | ....... | |
| अभिज्ञानशाकुन्तलम् | ....... | कालिदासः |
| अमरकोशः | ....... | अमरसिंहः |
| अष्टश्लोकी | ....... | पराशरभट्टार्यः |
| अहिर्बुध्न्यसंहिता | ....... | पाञ्चरात्रागमः |
| ईशावास्योपनिषत् | ....... | |
| कठोपनिषत् | ....... | |
| कुवलयानन्दः | ....... | अप्पय्यदीक्षितः |
| केनोपनिषत् | ....... | |
| कौषीतक्युपनिषत् | ....... | |
| गरुडपुराणम् | ....... | वेदव्यासः |
| गोपथब्राह्मणम् | ....... | |
| छान्दोग्योपनिषत् | ....... | |
| जितन्तास्तोत्रम् | ....... | |
| तत्त्वत्रयम् | ....... | पिल्लै लोकाचार्याः |
| तत्त्वशेखरम् | ...... | पिल्लै लोकाचार्याः |
| तिरुच्चन्दविरुत्तम् | ....... | तिरुमलि शैयाल्वार् |
| तिरुप्पल्लाण्डु | ....... | पेरियाल्वार् |
| तिरुप्पल्लियेलिच्चि | ....... | तोण्डरडिप्पोडियाल्वार् |
| तिरुप्पावै | ....... | आण्डाल् |
| तिरुमालै | ....... | तोण्डरडिप्पोडि आल्वार् |
| तिरुवायिमोलि | ....... | नम्माल्वार् |
| तैत्तिरीयब्राह्मणम् | ....... | |
| तैत्तिरीयोपनिषत् | ....... | |
| दक्षस्मृतिः | ....... | |
| ध्यानाबिन्दूपनिषत् | ....... | |
| नवविधसम्बन्धः | ....... | पिल्लै लोकाचार्याः |
| नाच्चियार्तिरुमोलि | ....... | आण्डाल् |
| नारदीयपुराणम् | ....... | वेदव्यासः |
| नारसिंहपुराणम् | ....... | वेदव्यासः |
| नारायणोपनिषत् | ....... | |

| | | |
|---|---|---|
| न्यायसिद्धाञ्जनम् | ....... | वेदान्तदेशिकः |
| न्यासविंशतिः | ....... | वेदान्तदेशिकः |
| पद्मपुराणम् | ....... | वेदव्यासः |
| परमसंहिता | ....... | |
| पाणिनीयसूत्राणि | ....... | पाणिनिः |
| पूर्वदिनचर्या | ....... | देवराजगुरुः |
| पूर्वमीमांसा | ....... | जैमिनिः |
| पेरियाल्वार् तिरुमोलि | ....... | पेरियाल्वार् |
| प्रपन्नपरित्राणम् | ....... | पिल्लै लोकाचार्याः |
| बह्वृचोपनिषत् | ....... | |
| बृहदारण्यकोपनिषत् | ....... | |
| ब्रह्मपुराणम् | ....... | वेदव्यासः |
| ब्रह्मसूत्राणि | ....... | वेदव्यासः |
| भगवद्गीता | ....... | |
| भगवद्विषयः | ....... | नम्माल्वार् |
| भविष्यपुराणम् | ....... | वेदव्यासः |
| भागवतमहापुराणम् | ...... | वेदव्यासः |
| भाष्यकारमुक्तकम् | ....... | |
| मनुस्मृतिः | ....... | मनुः |
| महाभारतम् | ....... | वेदव्यासः |
| महाभाष्यम् | ....... | पतञ्जलिः |
| महोपनिषत् | ....... | |
| माघकाव्यम् | ....... | माघः |
| मालविकाग्निमित्रम् | ....... | कालिदासः |
| मुण्डकोपनिषत् | ....... | |
| मुमुक्षुप्पडि | ....... | पिल्लै लोकाचार्याः |
| यजुर्वेदः | ....... | |
| यतिराजविंशतिः | ....... | मणवालमहामुनिः |
| रामानजचतुःश्लोकी | ....... | |
| रामायणम् | ....... | वाल्मीकिमहर्षिः |
| लक्ष्मीतन्त्रम् | ....... | पाञ्चरात्रागमः |
| लघ्वत्रिस्मृतिः | ....... | |
| वरदराजस्तवः | ....... | कूरेशमिश्रः |
| वराहपुराणम् | ....... | वेदव्यासः |

| | | |
|---|---|---|
| वायुपुराणम् | ....... | वेदव्यासः |
| बिष्णुतत्त्वम् | ....... | |
| विष्णुधर्मः | ....... | |
| बिष्णुधर्मोत्तरपुराणम् | ....... | वेदव्यासः |
| विष्णुपुराणम् | ....... | पराशरमहर्षिः |
| बिष्णुसहस्रनामस्तोत्रम् | ....... | वेदव्यासः |
| विष्वक्सेनसंहिता | ....... | पाञ्चरात्रागमः |
| विहगेन्द्रसंहिता | ....... | पाञ्चरात्रागमः |
| वृद्धहारीतसंहिता | ....... | |
| शरणागतिगद्यम् | ....... | भगवद्रामानुजाचार्याः |
| शरणागतिदीपिका | ....... | वेदान्तदेशिकः |
| शाङ्करभाष्यम् | ....... | शङ्कराचार्यः |
| शाबरभाष्यम् | ....... | शबरस्वामी |
| शेषसंहिता | ....... | पाञ्चरात्रागमः |
| श्रीगुणरत्नकोशः | ....... | पराशरभट्टार्यः |
| श्रीभाष्यम् | ....... | भगवद्रामानुजाचार्याः |
| श्रीरङ्गगद्यम् | ....... | भगवद्रामानुजाचार्याः |
| श्रीरङ्गनाथस्तोत्रम् | ....... | |
| श्रीरङ्गराजस्तवः | ....... | पराशरभट्टार्यः |
| श्रीवचनभूषणम् | ........ | पिल्लै लोकाचार्याः |
| श्रीसूक्तम् | ....... | |
| श्रीस्तवः | ....... | कूरेशमिश्रः |
| श्वेताश्वतरोपनिषत् | ....... | |
| सुबालोपनिषत् | ....... | |
| स्कान्दपुराणम् | ....... | वेदव्यासः |
| स्तोत्ररत्नम् | ....... | यामुनाचार्याः |
| हरिवंशः | ....... | वेदव्यासः |
| हर्यष्टकम् | | |


❀ ❀ ❀ ❀



Editor : Prof. Tatta Vijaya Raghavacharyulu

Prof.Tatta Vijaya Raghavacharyulu, (Vidyapraveena), (M.A.,Ph.D.) has studied Sahitya, Darsana and Agama Sastras under reputed scholars in a traditional way. He was awarded Vidyavaridhi (Ph.D.) degree for his doctoral dissertation on "A Critical Study of Vedarthasangraha" under the guidance of mahamahopadhyaya N.S.R. Ramanuja Tatacharya in 1987. He started his career as a lecturer in Rashtriya Sanskrit Sansthan, New Delhi in July 1987, and later joined the R.S. Vidyapeetha, Tirupati in 1991. He was elevated to the post of Reader in 1997, and as a Professor in Agama dept. from 2005 onwards. He was chairman of Board of Studies in Visistadvaita Vedanta, Agamas during the past ten years. He has successfully guided 10 Ph.D. students and has published extensively on various subjects of Sanskrit literature He is actively engaged in various Religious Programmes related to the TTD (Tirumala Tirupati Devasthanams) and is regularly invited to deliver religious discourses. He has so far published ten books and more than fifty Research Papers in reputed journals of Indology, and has attended nearly fifty national and international conferences and presented papers. He has participated several times the Ubhaya Vedanta Seminars and was honoured by Tridandi Chinna Srimannarayana Jeeyar Swamiji, Vijayawada and by Sri Rangaramanuja Jeeyar Swamiji of Kakinada.

Presently Prof. T.V. Raghavacharyulu is the Head, Dept. of Agama Studies, Rashtriya Sanskrit Vidyapeetha, Tirupati.